

अथ विष्णु
राणको प्रारंभ
[illegible]
[illegible]

1

वि॰पु॰ १

श्रीमते रामानुजाय नमः ॥ पराशरं मुनिवरं कृतपूर्वाह्णिकक्रियं मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च ॥ त्वत्तो हि वेदाध्य
यनमधीतमखिलं गुरो ॥ धर्मशास्त्राणि सर्वाणि वेदांगानि यथाक्रमं ॥ त्वत्प्रसादान्मुनिश्रेष्ठ मामन्ये नाकृतश्रमं
वक्ष्यंते सर्वशास्त्रेषु प्रायशो ये पि विद्विषः ॥ सोहमिच्छामि धर्मज्ञ श्रोतुं त्वत्तो यथा जगत् ॥ बभूव भूयश्च यथा महाभा
ग भविष्यति ॥ यन्मयं च जगद्ब्रह्मन्यतश्चैतच्चराचरं ॥ लीनमासीद्यथा यत्र लयमेष्यति यत्र च ॥ यत्प्रमाणानि भूता
नि देवादीनां च संभवं समुद्रपर्वतानां च संस्थानं च यथा भुवः ॥ सूर्यादीनां च संस्थानं प्रमाणं मुनिसत्तम देवादीनां
तथा वंशान्मनून्मन्वंतराणि च ॥ कल्पान्कल्पविभागांश्च चातुर्युगविकल्पितान् ॥ कल्पांतस्य स्वरूपं च युगधर्मांश्च
कृत्स्नशः ॥ देवर्षिपार्थिवानां च चरितं यन्महामुने ॥ वेदशाखाप्रणयनं यथावद्व्यासकर्तृकं ॥ धर्मांश्च ब्राह्मणादी
नां तथा चाश्रमवासिनां ॥ श्रोतुमिच्छाम्यहं सर्वं त्वत्तो वाशिष्ठनंदन ॥ ब्रह्मन्प्रसादप्रवणं कुरुष्व मयि मानसं ये
नाहमेतज्जानीयां त्वत्प्रसादान्महामुने ॥ श्रीपराशर उवाच ॥ साधु मैत्रेय धर्मज्ञ स्मारितो स्मि पुरातनं ॥ पितुः पिता मे भग
वान्वशिष्ठो यदुवाच ह ॥ विश्वामित्रप्रयुक्तेन रक्षसा भक्षितः पुरा ॥ श्रुतस्तातस्ततः क्रोधो मैत्रेयाभून्ममातुलः ॥ ततो हं रक्ष
सां सत्रं विनाशाय समारभं ॥ भस्मीभूताश्च शतशस्तस्मिन्सत्रे निशाचराः ॥ ततः संक्षीयमाणेषु तेषु रक्षःस्वशेषतः ॥ श्रीः

१

उवाच ॥ अविकाराय शुद्धाय नित्याय परमात्मने ॥ सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ॥ नमो हिरण्यगर्भाय हरये शंकराय
च ॥ वासुदेवाय ताराय सर्गस्थित्यंतकारिणे ॥ एकानेकस्वरूपाय स्थूलसूक्ष्मात्मने नमः ॥ अव्यक्तव्यक्तभूताय वि
ष्णवे मुक्तिहेतवे ॥ सर्गस्थितिविनाशानां जगतो यो जगन्मयः ॥ मूलभूतो नमस्तस्मै विष्णवे परमात्मने ॥ आधारभूतं वि
श्वस्याप्यणीयांसमणीयसां ॥ प्रणम्य सर्वभूतस्थमच्युतं पुरुषोत्तमं ॥ ज्ञानस्वरूपमत्यंतनिर्मलं परमार्थतः ॥ तमेवार्थ
स्वरूपेण भ्रांतिदर्शनतः स्थितं ॥ विष्णुं ग्रसिष्णुं विश्वस्य स्थितौ सर्गे तथा प्रभुं ॥ प्रणम्य जगतामीशमजमक्षयमव्ययं
कथयामि यथापूर्वं दक्षाद्यैर्मुनिसत्तमैः ॥ पृष्टः प्रोवाच भगवानब्जयोनिः पितामहः ॥ तैश्चोक्तं पुरुकुत्साय भूभुजे नर्म
दातटे ॥ सारस्वताय तेनापि मह्यं सारस्वतेन च ॥ परः पराणां परमः परमात्मात्मसंस्थितः ॥ रूपवर्णादिनिर्देशविशेषण
विवर्जितः ॥ अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः ॥ वर्जितः शक्यते वक्तुं यः सदास्तीति केवलं ॥ सर्वत्रासौ समस्तं च
वसत्यत्रेति वै यतः ॥ ततः स वासुदेवेति विद्वद्भिः परिपठ्यते ॥ तद्ब्रह्म परमं नित्यमजमक्षयमव्ययं ॥ एकस्वरूपं च सद
हेयाभावाच्च निर्मलं ॥ तदेव सर्वमेवैतद्व्यक्ताव्यक्तस्वरूपवत् ॥ तथा पुरुषरूपेण कालरूपेण च स्थितं ॥ पर
स्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज ॥ व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथापरः ॥ प्रधानपुरुषव्यक्तकालानां परमं हि
यत् ॥ पश्यंति सूरयः शुद्धं तद्विष्णोः परमं पदं ॥ प्रधानपुरुषव्यक्तकालास्तु प्रविभागशः ॥ रूपाणि स्थितिसर्गांत

म

वि॰

२

मामुवाच महाभागो वशिष्ठो मे पितामहः ॥ अलमत्यंतकोपेन तात मन्युमिमं जहि ॥ राक्षसा नापराध्यंते पितुस्ते विहितं तथा ॥ मू
ढानामेव भवति क्रोधो ज्ञानवतां कुतः ॥ हन्यते तात कः केन यतः स्वकृतभुक् पुमान् ॥ संचितस्यापि महता वत्स क्लेशेन मान
वैः ॥ यशसस्तपसश्चैव क्रोधो नाशकरः परः ॥ स्वर्गापवर्गव्यासेधकारणं परमर्षयः ॥ वर्जयंति सदा क्रोधं तात मा तद्वशो भव ॥
अलं निशाचरैर्दग्धैर्दीनैरनपकारिभिः ॥ सत्रं ते विरमत्वेतत् क्षमासारा हि साधवः ॥ एवं तातेन तेनाहमनुनीतो महात्मना ॥ उ
पसंहृतवान् सत्रं सद्यस्तद्वाक्यगौरवात् ॥ ततः प्रीतः स भगवान् वशिष्ठो मुनिसत्तमः ॥ संप्राप्तश्च तदा तत्र पुलस्त्यो ब्रह्मणः
सुतः ॥ पितामहेन दत्तार्घ्यः कृतासनपरिग्रहः ॥ मामुवाच महाभागो मैत्रेय पुलहाग्रजः ॥ वैरे महति यद्वाक्याद्गुरोरद्या
श्रिता क्षमा ॥ त्वया तस्मात्समस्तानि भवांश्शास्त्राणि वेत्स्यति ॥ संततेर्न मम छेदः क्रुद्धेनापि यतः कृतः ॥ त्वया तस्मान्महा
भाग ददाम्यन्यं महावरं ॥ पुराणसंहिताकर्ता भवान्वत्स भविष्यति ॥ देवतापारमार्थ्यं च यथावद्वेत्स्यते भवान् ॥ प्रवृत्ते
च निवृत्ते च कर्मण्यस्तमला मतिः ॥ मत्प्रसादादसंदिग्धा तव वत्स भविष्यति ॥ ततश्च भगवान्प्राह वशिष्ठो मे पिताम
हः ॥ पुलस्त्येन यदुक्तं ते सर्वमेतद्भविष्यति ॥ इति पूर्वं वशिष्ठेन पुलस्त्येन च धीमता ॥ यदुक्तं तत्स्मृतिं यातं त्वत्प्रश्नादखि
लं मम ॥ सोहं वदाम्यशेषं ते मैत्रेय परिपृच्छते ॥ पुराणसंहितां सम्यक् तां निबोध यथातथं ॥ विष्णोः सकाशादुद्भूतं जग
त्तत्रैव च स्थितं ॥ स्थितिसंयमकर्तासौ जगतोस्य जगच्च सः ॥ इति श्रीविष्णुपुराणे प्रथमेंशे प्रथमोध्यायः ॥ १ ॥ पराशर

वि० पु०
३

3

४ बलवानभवद्वायुस्तस्य स्पर्शो गुणो मतः आकाशं शब्दमात्रं तु स्पर्शमात्रं समावृणोत् ततो वायुर्विकुर्वाणो रूपमात्रं ससर्ज ह ४
न्।। प्रधानतत्त्वेन समं त्वचा बीजमिवावृतं।। वैकारिकस्तैजसश्च भूतादिश्चैव तामसः।। त्रिविधोयमहंकारो महत्तत्त्वादजाय
त।। भूतेंद्रियाणां हेतुः स त्रिगुणत्वान्महामुने।। यथा प्रधानेन महान्महता च स तथावृतः।। भूतादिस्तु विकुर्वाणः शब्दतन्
मात्रिकं ततः।। ससर्ज शब्दतन्मात्रादाकाशं शब्दलक्षणं।। शब्दमात्रं तथाकाशं भूतादिः स समावृणोत्।। आकाशस्तु विकुर्वाणः
स्पर्शमात्रं ससर्ज ह।। ज्योतिरुत्पद्यते वायोस्तद्रूपगुणमुच्यते।। स्पर्शमात्रं तु वै वायू रूपमात्रं समावृणोत्।। ज्योतिश्चापि वि
कुर्वाणं रसमात्रं ससर्ज ह।। संभवंति ततोंभांसि रसाधाराणि तानि च।। रसमात्राणि चांभांसि गंधमात्रं समावृणोत्।। विकु
र्वाणानि चांभांसि गंधमात्रं ससर्जिरे।। संघातो जायते तस्मात्तस्य गंधो गुणो मतः।। तस्मिंस्तस्मिंस्तु तन्मात्रा तेन तन्मात्रता स्मृ
ताः।। तन्मात्राण्यविशेषाणि अविशेषास्ततो हि ते।। न शांता नापि घोरास्ते न मूढाश्चाविशेषिणः।। भूततन्मात्रसर्गोयमहं
कारात्तु तामसात्।। तैजसानींद्रियाण्याहुर्देवा वैकारिका दश।। एकादशं मनश्चात्र देवा वैकारिकाः स्मृताः।। त्वक्चक्षुर्नासिका
जिह्वा श्रोत्रमत्र तु पंचमं।। शब्दादीनामवाप्त्यर्थं बुद्धियुक्तानि वै द्विज।। पायूपस्थौ करौ पादौ वाक् च मैत्रेय पंचमी।। विसर्ग
शिल्पगत्युक्ति कर्म तेषां च कथ्यते।। आकाशवायुतेजांसि सलिलं पृथिवी तथा।। शब्दादिभिर्गुणैर्ब्रह्मन् संयुक्तान्युत्तरो
त्तरैः।। शांता घोराश्च मूढाश्च विशेषास्तेन ते स्मृताः।। ५०।। नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना।। नाशक्नुवन्प्रजाः।
स्रष्टुमसमागम्य कृत्स्नशः।। समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः।। एकसंघातलक्ष्याश्च संप्राप्यैक्यमशेषतः।। पुरुषा

राम
३

व्यक्तिसद्भवहेतवः ॥ व्यक्तो विष्णुस्तथाव्यक्तं पुरुषः काल एव च ॥ क्रीडतो बालकस्येव चेष्टां तस्य निशामय ॥ अव्यक्तं कारणं यत्त
त्प्रधानमृषिसत्तमैः ॥ प्रोच्यते प्रकृतिः सूक्ष्मा नित्यं सदसदात्मकं ॥ अक्षय्यं नान्यदाधारममेयमजरं ध्रुवं ॥ शब्दस्पर्शविहीनं तद्रूपा
दिभिरसंहतं ॥ त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययं ॥ तेनाग्रे सर्वमेवासीद्व्याप्तं वै प्रलयादनु ॥ वेदवादविदो विद्वन्नियता ब्र
ह्मवादिनः ॥ पठंति चैतमेवार्थं प्रधानप्रतिपादकं ॥ नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमोज्योतिरभून्न चान्यत् ॥ श्रोत्रादिबुध्यानु
पलभ्यमेकं प्राधानिकं ब्रह्मपुमांस्तदासीत् ॥ विष्णोः स्वरूपात्परतो हि ते न्ये रूपे प्रधानं पुरुषश्च विप्र ॥ तस्यैव तेन्येन धृते वियुक्ते र
पेणापत्तद्विजकालसंज्ञं ॥ प्रकृतौ संस्थितं व्यक्तमतीतप्रलये तु यत् ॥ तस्मात्प्राकृतसंज्ञोयमुच्यते प्रतिसंचरः ॥ अनादिर्भग
वान्कालोनांतोस्य द्विज विद्यते ॥ अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यंतसंयमाः ॥ गुणसाम्ये ततस्तस्मिन्पृथक्पुंसि व्यवस्थिते ॥
कालस्वरूपरूपं तद्विष्णोर्मैत्रेय वर्त्तते ॥ ततस्तत्परमं ब्रह्म परमात्मा जगन्मयः ॥ सर्वगः सर्वभूतेशः सर्वात्मा परमेश्वरः ॥ प्रधानं
पुरुषं चापि प्रविश्यात्मेच्छया हरिः ॥ क्षोभयामास संप्राप्ते सर्गकाले व्ययाव्यये ॥ यथा सन्निधिमात्रेण गंधः क्षोभाय जायते ॥ मन
सो नोपकर्तृत्वात्तथासौ परमेश्वरः ॥ स एव क्षोभको ब्रह्मन्क्षोभ्यश्च पुरुषोत्तमः ॥ स संकोचविकाशाभ्यां प्रधानत्वेपि संस्थितः ॥
विकाशाणुस्वरूपैश्च ब्रह्मरूपादिभिस्तथा ॥ व्यक्तस्वरूपश्च तथा विष्णुः सर्वेश्वरेश्वरः ॥ गुणसाम्यात्ततस्तस्मात्क्षेत्रज्ञाधिष्ठितान्मुने
॥ गुणव्यंजनसंभूतिः सर्गकाले द्विजोत्तम ॥ प्रधानतत्त्वमुद्भूतं महांतं तत्समावृणोत् ॥ सात्विको राजसश्चैव तामसश्च त्रिधा महा

वि०पु०
४

णे प्रथमेंशे द्वितीयोध्यायः॥२॥ मैत्रेय उवाच॥ निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः॥ कथं सर्गादिकर्तृत्वं ब्रह्मणोभ्युप
गम्यते॥ पराशर उवाच॥ शक्तयः सर्वभावानामचिंत्यज्ञानगोचराः॥ यतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः॥ भवंति तप
तां श्रेष्ठ पावकस्य यथोष्णता॥ तन्निबोध यथा सर्गे भगवान्संप्रवर्त्तते॥ नारायणाख्यो भगवान्ब्रह्मा लोकपितामहः॥ उत्पन्नः प्रो
च्यते विद्वन्नित्य एवोपचारतः॥ निजेन तस्य मानेन आयुर्वर्षशतं स्मृतं॥ तत्पराख्यं तदर्द्धं च परार्द्धमभिधीयते॥ कालस्वरूपं वि
ष्णोश्च यन्मयोक्तं तवानघ॥ तेन तस्य निबोध त्वं परिमाणोपपादनं॥ अन्येषां चैव जंतूनां चराणामचराश्च ये॥ भूभूभृत्सागरादी
नामशेषाणां च सत्तम॥ काष्ठा पंचदशाख्याता निमेषा मुनिसत्तम॥ काष्ठा त्रिंशत्कला त्रिंशत्कला मौहूर्त्तिको विधिः॥ तावत्सं
ख्यैरहोरात्रं मुहूर्त्तैर्मानुषं स्मृतं॥ अहोरात्राणि तावंति मासः पक्षद्वयात्मकः॥ तैः षड्भिरयनं वर्षं द्वे यने दक्षिणोत्तरे॥ अयनं
दक्षिणं रात्रिर्देवानामुत्तरं दिनं॥ दिव्यैर्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितं॥ चतुर्युगं द्वादशभिस्तद्विभागं निबोध मे॥ चत्वारि त्री
णि द्वे चैकं कृतादिषु यथाक्रमं॥ दिव्याब्दानां सहस्राणि युगेष्वाहुः पुराविदः॥ तत्प्रमाणैः शतैः संध्या पूर्वा तत्राभिधीयते॥ सं
ध्यांशकश्च तत्तुल्यो युगस्यानंतरो हि सः॥ संध्यासंध्यांशयोरंतर्यः कालो मुनिसत्तम॥ युगाख्यः स तु विज्ञेयः कृतत्रेतादिसंज्ञि
तः॥ कृतत्रेतादिसंधिस्तु मनवश्च चतुर्दश॥ भवंति परिमाणं च ब्रह्मणो दिवसे मुने ब्रह्मणो दिवसे तेषां कालकृतं शृणु
॥ सप्तर्षयः सुराः शक्रो मनुस्तत्सूनवो नृपाः॥ एककाले हि सृज्यंते संह्रियंते च पूर्ववत्॥ चतुर्युगानां संख्याता साधिका ह्येक

राम
४

धिष्टितत्वाच्च तथा प्रधानानुग्रहेण च ॥ महदाद्या विशेषांता ह्यंडमुत्पादयंति ते ॥ तत्क्रमेण विवृद्धं तु जलबुद्बुदवत्समं ॥ भूतेभ्योंडं म
हाबुद्धे बृहत्तदुदकेशयं ॥ प्राकृतं ब्रह्मरूपस्य विष्णोः स्थानमनुत्तमं ॥ तत्राव्यक्तस्वरूपोसौ व्यक्तरूपी जगत्पतिः ॥ विष्णुर्ब्रह्मस्व
रूपेण स्वयमेव व्यवस्थितः ॥ मेरुरुल्बमभूत्तस्य जरायुश्च महीधराः ॥ गर्भोदकं समुद्राश्च तस्यासन्सुमहात्मनः ॥ साद्रिद्वीपस
मुद्राश्च सज्योतिर्लोकसंग्रहः ॥ तस्मिन्नंडेभवद्विप्र सदेवासुरमानुषः ॥ वारिवह्न्यनिलाकाशैस्ततो भूतादिना बहिः ॥ वृतं दशगुणै
रंडं भूतादिर्महता तथा ॥ अव्यक्तेनावृतो ब्रह्मंस्तैः सर्वैः सहितो महान् ॥ एभिरावरणैरंडं सप्तभिः प्राकृतैर्वृतं ॥ नालिकेरफलस्यां
तर्बीजं बाह्यदलैरिव ॥ जुषन्रजोगुणं तत्र स्वयं विश्वेश्वरो हरिः ॥ ब्रह्मा भूत्वास्य जगतो विसृष्टौ संप्रवर्त्तते ॥ सृष्टं च पात्यनुयुगं
यावत्कल्पविकल्पना ॥ सत्वभृद्भगवान्विष्णुरप्रमेयपराक्रमः ॥ ततोंते कल्पांते रुद्ररूपी जनार्दनः ॥ मैत्रेयाखिलभूता
नि भक्षयत्यतिदारुणः ॥ संभक्षयित्वा भूतानि जगत्येकार्णवीकृते ॥ नागपर्य्यंकशयने शेते च परमेश्वरः ॥ प्रबुद्धश्च पुनः सृष्टिं क
रोति ब्रह्मरूपधृक् ॥ सृष्टिस्थित्यंतकरणाद्ब्रह्मविष्णुशिवात्मिकां ॥ स संज्ञां याति भगवानेक एव जनार्दनः ॥ स्रष्टा सृजति चा
त्मानं विष्णुः पाल्यं च पाति च ॥ उपसंह्रियते चांते संहर्त्ता च स्वयं प्रभुः ॥ पृथिव्यापस्तथा तेजो वायुराकाश एव च ॥ सर्वेंद्रियांतः
करणं पुरुषाख्यं हि यज्जगत् ॥ स एव सर्वभूतात्मा विश्वरूपो यतोव्ययः ॥ सर्गादिकं ततोस्यैव भूतस्थमुपकारकं ॥ स एव सृ
ज्यः स च सर्गकर्त्ता स एव पात्यत्ति च पाल्यते च ॥ ब्रह्माद्यवस्थाभिरशेषमूर्त्तिर्विष्णुर्वरिष्ठो वरदो वरेण्यः ॥ इति श्रीविष्णु

विष्णु० ५

नरसूनवः॥ अयनंतस्यताःपूर्वंतेननारायणःस्मृतः॥ तोयांतःसमहींज्ञात्वाजगत्येकार्णवेप्रभुः॥ अनुमानात्तदुद्धा
रंकर्तुकामःप्रजापतिः॥ अकरोत्सतनूमन्यांकल्पादिषुयथापुरा॥ मत्स्यकूर्मादिकांतद्वद्वाराहंवपुरास्थितः॥
वेदयज्ञमयंरूपमशेषजगतःस्थितौ॥ स्थितःस्थिरात्मासर्वात्मापरमात्माप्रजापतिः॥ जनलोकगतैःसिद्धैःसन
कादैरभिष्टुतः॥ प्रविवेशतदातोयमात्माधारोधराधरः॥ निरीक्ष्यतंतदादेवीपातालतलमागतं॥ तुष्टावप्रण
ताभूत्वाभक्तिनम्रावसुंधरा॥ पृथिव्युवाच॥ नमस्तेसर्वभूतायतुभ्यंशंखगदाधर॥ मामुद्धरास्मदद्यत्वंत्वत्तो
हंपूर्वमुत्थितः॥ त्वत्तोहमुद्धृतापूर्वंत्वन्मयाहंजनार्दन॥ तथान्यानिचभूतानिगगनादीन्यशेषतः॥ नमस्तेपरमा
त्मात्मपुरुषात्मन्नमोस्तुते॥ प्रधानव्यक्तभूतायकालभूतात्मनेनमः॥ त्वंकर्त्तासर्वभूतानांत्वंपातात्वंविनाश
कृत्॥ सर्गादिषुप्रभोब्रह्मविष्णुरुद्रात्मरूपधृक्॥ संभक्षयित्वासकलंजगत्येकार्णवीकृते॥ शेषेत्वमेवगोविंदचिं
त्यमानोमनीषिभिः॥ भवतोयत्परंतत्वंतन्नजानातिकश्चन॥ अवतारेषुयद्रूपंतदर्चंतिदिवौकसः॥ त्वामाराध्य
परंब्रह्मयातामुक्तिंमुमुक्षवः॥ वासुदेवमनाराध्यमोक्षंकःसमवाप्स्यति॥ यत्किंचिन्मनसाग्राह्यंयद्ग्राह्यं
चक्षुरादिभिः॥ बुद्ध्याचयत्परिछेद्यंतद्रूपमखिलंतव॥ त्वन्मयाहंत्वदाधारात्वत्सृष्टात्वामुपागता॥ माधवी
मितिलोकोमभिधत्तेततोहिमां॥ जयाखिलज्ञानमयजयस्थूलमयाव्यय॥ जयानंतजयाव्यक्तजयव्यक्त

य

ए
राम
५

सप्ततिः ॥ मन्वन्तरं मनोः कालः सुरादीनां च सत्तम ॥ अष्टौ शतसहस्राणि दिव्यया संख्यया स्मृतं ॥ द्विपंचाशत्तथान्यानि सहस्रा
ण्यधिकानि च ॥ त्रिंशत्कोट्यस्तु संपूर्णाः संख्याताः संख्यया द्विज ॥ सप्तषष्टिस्तथान्यानि नियुतानि महामुने ॥ विंशतिश्च सहस्रा
णि कालोयमधिकं विना ॥ मन्वन्तरस्य संख्येयं मानुषैर्वत्सरैर्द्विज ॥ चतुर्दशगुणो ह्येष कालो ब्राह्ममहः स्मृतं ॥ ब्राह्मो नैमि
त्तिको नाम तस्यान्ते प्रतिसंचरः ॥ तदा हि दह्यते सर्वं त्रैलोक्यं भूर्भुवादिकं ॥ जनं प्रयान्ति तापार्त्ता महर्लोकनिवासिनः ॥ एका
र्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः ॥ भोगिशय्यागतः शेते त्रैलोक्यग्रासबृंहितः ॥ जनस्थैर्योगिभिर्देवश्चिन्त्यमानोब्जसं
भवः ॥ तत्प्रमाणं हि तां रात्रिं तदन्ते सृजते पुनः ॥ एवं तु ब्रह्मणो वर्षमेवं वर्षशतं च तत् ॥ शतं हि तस्य वर्षाणां परमायुर्म
हात्मनः ॥ एकमस्य व्यतीतं तु परार्द्धं ब्रह्मणोनघ ॥ तस्यान्तेभून्महाकल्पः पाद्म इत्यभिविश्रुतः ॥ द्वितीयस्य परार्द्धस्य व
र्त्तमानस्य वै द्विज ॥ वाराह इति कल्पोयं प्रथमः परिकीर्त्तितः ॥ इति श्रीविष्णुपुराणे प्रथमेंशे तृतीयोध्यायः ॥ मैत्रेय उ
वाच ॥ ब्रह्मा नारायणाख्योसौ कल्पादौ भगवान्यथा ॥ ससर्ज सर्वभूतानि तदाचक्ष्व महामुने ॥ पराशर उवाच ॥ प्रजाः स
सर्ज भगवान्ब्रह्मा नारायणात्मकः ॥ प्रजापतिपतिर्देवो यथा तन्मे निशामय ॥ अतीतकल्पविरतौ निशासुप्तोत्थितः प्रभुः ॥
सत्वोद्रिक्तस्तथा ब्रह्मा शून्यं लोकमवैक्षत ॥ नारायणः परोचिन्त्यः परेषामपि स प्रभुः ॥ ब्रह्मस्वरूपी भगवाननादिः सर्वसं
भवः ॥ इमं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति ॥ ब्रह्मस्वरूपिणं देवं जगतः प्रभवाप्ययं ॥ आपो नारा इति प्रोक्ता आपो वै

विष्णु० ६

मं त्वमेव॥ विलोचने रात्र्यहनी महात्मन् सर्वाश्रयं ब्रह्म परं शिरस्ते॥ सूक्तान्यशेषाणि सटाकलापो घ्राणं समस्ता
न्नि हवींषि देव॥ स्रुक्तुंड सामस्वरधीरनाद प्राग्वंशकाया खिलसत्रसंधे॥ पूर्त्तेष्टधर्मश्रवणोसि देव सनातना
त्मन् भगवन् प्रसीद॥ पदक्रमाक्रांतभुवं भवंतमादिस्थितं चाक्षर विश्वमूर्त्ते॥ विश्वस्य विद्मः परमेश्वरोसि प्रसीद
नाथोसि चराचरस्य॥ दंष्ट्राग्रविन्यस्तमशेषमेतद्भूमंडलं नाथ विभाव्यते ते॥ विगाहतः पद्मवनं विलग्नं सरोजिनी
पत्रमिवोढपंकं॥ द्यावापृथिव्योरतुलप्रभाव यदंतरं तद्वपुषा तवैव॥ व्याप्तं जगद्व्याप्तिसमर्थदीप्ते हिताय वि
श्वस्य विभो भव त्वं॥ परमार्थस्त्वमेवैको नान्योस्ति जगतः पते॥ तवैष महिमा येन व्याप्तमेतच्चराचरं॥ यदेतद्दृश्य
ते मूर्त्तमेतज्ज्ञानात्मनस्तव॥ भ्रांतिज्ञानेन पश्यंति जगद्रूपमयोगिनः॥ ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः
॥ अर्थस्वरूपं पश्यंतो भ्राम्यंते मोहसंप्लवे॥ ये तु ज्ञानविदः शुद्धचेतसस्तेखिलं जगत्॥ ज्ञानात्मकं प्रपश्यंति त्व
द्रूपं परमेश्वर॥ प्रसीद सर्व सर्वात्मन् भवाय जगतामिमां॥ उद्धरोर्वीममेयात्मन् शन्नो देह्यब्जलोचन॥ सत्वोद्रिक्तोसि भगवन्
गोविंद पृथिवीमिमां॥ समुद्धर भवायेश शन्नो देह्यब्जलोचन॥ सर्गप्रवृत्तिर्भवतो जगतामुपकारिणी॥ भवत्वेषा नमस्ते
स्तु शन्नो देह्यब्जलोचन॥ पराशर उवाच॥ एवं संस्तूयमानोथ परमात्मा महीधरः॥ उज्जहार क्षितिं क्षिप्रं न्यस्तवांश्च महा

राम ६

पद्म

जयप्रभो॥ परापरात्मन् विश्वात्मन् जय यज्ञपते नमः॥ त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारस्त्वमग्नयः॥ त्वं वेदास्त्वं तदं
गानि त्वं यज्ञपुरुषो हरे॥ सूर्यादयो ग्रहास्तारा नक्षत्राण्यखिलं जगत्॥ मूर्तामूर्तमदृश्यं च दृश्यं च पुरुषोत्तम॥ यच्चो
क्तं यच्च नैवोक्तं मयात्र परमेश्वर॥ तत्सर्वं त्वं नमस्तुभ्यं भूयो भूयो नमो नमः॥ पराशर उवाच॥ एवं संस्तूयमानस्तु
पृथिव्या पृथिवीधरः॥ सामस्वरध्वनिः श्रीमान् जगर्ज परिघर्घरं॥ ततः समुत्क्षिप्य धरां स्वदंष्ट्र्या महावराहः स्फु
टलोचनः॥ रसातलादुत्पलपत्रसंनिभः समुत्थितो नीलइवाचलो महान्॥ उत्तिष्ठता तेन मुखानिलाहतं तत्सं
भवांभो जनलोकसंश्रयान्॥ प्रक्षालयामास हि तान्महाद्युतीन् सनंदनादीनपकल्मषान्मुनीन्॥ प्रयांति तोया
नि खुराग्रविक्षते रसातलेधः कृतशब्दसंतति॥ श्वासानिलास्ताः प्रयतां प्रयांति सिद्धा जने ये नियता वसंति॥ उ
त्तिष्ठतस्तस्य जलार्द्रकुक्षेर्महावराहस्य महीं विगृह्य॥ विधुन्वतो वेदमयं शरीरं रोमांतरस्था मुनयो जुषंति॥ तं तु
ष्टुवुस्तोषपरीतचेतसो लोके जने ये निवसंति योगिनः॥ सनंदनाद्या ह्यतिनम्रकंधरा धराधरं धीरतरोद्धतेक्षणं
॥ जयेश्वराणां परमेश केशव प्रभो गदाशंखधरासिचक्रधृक्॥ प्रसूतिनाशस्थितिहेतुरीश्वरस्त्वमेव नान्यत्परमं
च यत्पदं॥ पादेषु वेदास्तव यूपदंष्ट्र दंतेषु यज्ञाश्चितयश्च वक्त्रे॥ हुताशजिह्वोसि तनूरुहाणि दर्भाः प्रभो यज्ञपु

स्था

वि॰पु॰
७

रम्॥ तमप्यसाधकं मत्वा ध्यायतोन्यस्ततोभवत्॥ ऊर्द्ध्वस्रोतस्तृतीयस्तु सात्विकोर्ध्वमवर्त्तत॥ ते सुखप्रीतिबहुला बहिरंतश्च
नावृताः॥ प्रकाशा बहिरंतश्च ऊर्द्ध्वस्रोतोभवाः स्मृताः॥ तुष्टात्मानस्तृतीयस्तु देवसर्गस्तु सं स्मृतः॥ तस्मिन्सर्गेभवत्प्रीतिर्निष्पन्ने
ब्रह्मणस्तथा॥ ततोन्यं स तदा दध्यौ साधकं सर्गमुत्तमं॥ असाधकांस्तु तान् ज्ञात्वा मुख्यसर्गादिसंभवान्॥ तथाभिध्यायतस्त
स्य सत्याभिध्यायिनस्ततः॥ प्रादुर्बभूव चाव्यक्तादर्वाक्स्रोतस्तु साधकः॥ यस्मादर्वाग्व्यवर्त्तंत ततोर्वाक्स्रोतसस्तु ते॥ ते च प्र
काशबहुलास्तमोद्रिक्ता रजोधिकाः॥ तस्मात्ते दुःखबहुला भूयो भूयश्च कारिणः॥ प्रकाशा बहिरंतश्च मनुष्याः साधकास्तु ते॥ इत्ये
ते कथिताः सर्गाः षडत्र मुनिसत्तम॥ प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः॥ तन्मात्राणां द्वितीयश्च भूतसर्गस्तु स स्मृ
तः॥ वैकारिकस्तृतीयस्तु सर्ग ऐंद्रियकः स्मृतः॥ इत्येष प्राकृतः सर्गः संभूतो बुद्धिपूर्वकः॥ मुख्यसर्गश्चतुर्थस्तु मुख्या वै
स्थावराः स्मृताः॥ तिर्यक्स्रोतस्तु यः प्रोक्तस्तैर्यग्योन्यः स उच्यते॥ ऊर्द्ध्वस्रोतस्ततः षष्ठो देवसर्गस्तु स स्मृतः॥ ततोर्वाक्स्रोत
सः सर्गः सप्तमः स तु मानुषः॥ अष्टमोनुग्रहः सर्गः सात्विकस्तामसश्च सः॥ पंचैते वैकृताः सर्गाः प्राकृतास्तु त्रयः स्मृताः॥ प्राकृतो वैकृ
तश्चैव कौमारो नवमः स्मृतः॥ इत्येते वै समाख्याता नव सर्गाः प्रजापतेः॥ प्राकृता वैकृताश्चैव जगतो मूलहेतवः॥ सृजतो जगदी
शस्य किमन्यच्छ्रोतुमर्हसि॥ मैत्रेय उवाच॥ संक्षेपात्कथितः सर्गो देवादीनां मुने त्वया॥ विस्तराच्छ्रोतुमिच्छामि त्वत्तो मुनिवरोत्तम॥
पराशर उवाच॥ कर्मभिर्भाविताः पूर्वैः कुशलाकुशलैस्तु ताः॥ ख्यात्या तया ह्यनिर्मुक्ताः संहरेत्तुपसंहृताः॥ स्थावरांताः सुराद्याः
स्तु प्रजा ब्रह्मंश्चतुर्विधाः॥ ब्रह्मणः कुर्वतः सृष्टिं जज्ञिरे मानसास्तु ताः॥ ततो देवासुरपितॄन्मनुष्यांश्च चतुष्टयं॥ सिसृक्षुरंभांस्ये

राम
७

हाणि वै । तस्योपरि समुद्रस्य महती नौरिव स्थिता ॥ विततत्वात्तु देहस्य न मही याति संप्लवं । ततः क्षितिं समां कृत्वा पृथिव्यां
सोचिनोद्गिरीन् । यथाविभागं भगवाननादिः परमेश्वरः ॥ प्राक्सर्गदग्धानखिलान्पर्वतान्पृथिवीतले । अमोघेन प्रभावे
न ससर्जामोघवांछितः ॥ भूविभागं ततः कृत्वा सप्तद्वीपं यथातथा । भूराद्यांश्चतुरो लोकान्पूर्ववत्समकल्पयत् ॥ ब्रह्मरू
पधरो देवस्ततोसौ रजसावृतः । चकार सृष्टिं भगवांश्चतुर्वक्त्रधरो हरिः ॥ निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि ॥ प्र
धानकारणीभूता यतो वै सृज्यशक्तयः ॥ निमित्तमात्रं मुक्त्वैकं नान्यत्किंचिदपेक्षते ॥ नीयते तपसां श्रेष्ठ स्वशक्त्या वस्तु व
स्तुतां ॥ इति श्रीविष्णुपुराणे प्रथमेंशे चतुर्थोध्यायः ॥ मैत्रेय उवाच ॥ यथा ससर्ज देवोसौ देवर्षिपितृदानवान् । मनुष्यति
र्यग्वृक्षादीन्भूव्योमसलिलौकसः ॥ यद्गुणं यत्स्वरूपं च यत्स्वभावं जगत् द्विज । सर्गादौ सृष्टवान्ब्रह्मा तन्ममाचक्ष्व तत्त्वतः
॥ पराशर उवाच ॥ मैत्रेय कथयाम्येष शृणुष्व सुसमाहितः ॥ यथा ससर्ज देवोसौ देवादीनखिलान्विभुः ॥ सृष्टिं चिंतय
तस्तस्य कल्पादिषु यथा पुरा ॥ अबुद्धिपूर्वकः सर्गः प्रादुर्भूतस्तमोमयः ॥ तमो मोहो महामोहस्तामिस्रो ह्यंधसंज्ञितः ॥ अवि
द्या पंचपर्वैषा प्रादुर्भूता महात्मनः ॥ पंचधावस्थितः सर्गो ध्यायतोप्रतिबोधवान् ॥ बहिरंतोप्रकाशश्च संवृतात्मा नगा
त्मकः ॥ मुख्या नगा यतः प्रोक्ता मुख्यसर्गस्ततस्त्वयं ॥ तं दृष्ट्वासाधकं सर्गममन्यदपरं पुनः ॥ तस्याभिध्यायतः सर्गस्तिर्य
क्स्रोतान्यवर्तत ॥ यस्मात्तिर्यक्प्रवृत्तः स तिर्यक्स्रोतास्ततः स्मृतः ॥ पश्वादयस्ते विख्यातास्तमःप्राया ह्यवेदिनः ॥ उत्पथ
ग्राहिणश्चैव तेऽज्ञाने ज्ञानमानिनः ॥ अहंकृता अहंमाना अष्टाविंशद्वधात्मकाः ॥ अंतःप्रकाशास्ते सर्वे आवृताश्च परस्प

वि० पु०

पद्भ्यां सोश्वान् समातंगान् रासभान् गवयान् मृगान् ॥ उष्ट्रान् अश्वतरांश्चैव न्यंकून् अन्यांश्च जातयः ॥ औषध्यः फलमूलिन्यो रोमभ्यस्त-
स्य जज्ञिरे ॥ त्रेतायुगमुखे ब्रह्मा कल्पस्यादौ द्विजोत्तम ॥ सृष्ट्वा पश्वौषधीः सम्यग् युयोज स तदाध्वरे ॥ गौरजः पुरुषो मेषा अश्वा-
श्वतरो गर्दभाः ॥ एतान् ग्राम्यान् पशून् आहुर् आरण्यांश्च निबोध मे ॥ श्वापदं द्विखुरं हस्ती वानराः पक्षिपंचमः ॥ औदकाः पशवः षष्ठाः
सप्तमास्तु सरीसृपाः ॥ गायत्रं च ऋचश्चैव त्रिवृत्साम रथंतरं ॥ अग्निष्टोमं च यज्ञानां निर्ममे प्रथमान्मुखात् ॥ यजूंषि त्रैष्टुभं
छंदः स्तोमं पंचदशं तथा ॥ बृहत्साम तथोक्थं च दक्षिणाद् असृजन्मुखात् ॥ सामानि जगतीछंदः स्तोमं सप्तदशं तथा ॥ वैरूपम् अति-
रात्रं च पश्चिमाद् असृजन्मुखात् ॥ एकविंशम् अथर्वाणम् आप्तोर्यामाणम् एव च ॥ अनुष्टुभं स वैराजम् उत्तराद् असृजन्मुखात् ॥ उच्चावचा-
नि भूतानि गात्रेभ्यस्तस्य जज्ञिरे ॥ देवासुरपितॄन् सृष्ट्वा मनुष्यांश्च प्रजापतिः ॥ ततः पुनः ससर्जादौ स कल्पस्य पितामहः ॥ यक्षान्
पिशाचान् गंधर्वांस्तथैवाप्सरसां गणान् ॥ नरकिंनररक्षांसि वयः पशुमृगोरगान् ॥ अव्ययं च व्ययं चैव यद् इदं स्थाणुजं-
गमं ॥ तत्ससर्ज तदा ब्रह्मा भगवान् आदिकृत्प्रभुः ॥ तेषां ये यानि कर्माणि प्राक्सृष्ट्यां प्रतिपेदिरे ॥ तान्येव ते प्रपद्यंते सृज्यमा-
नाः पुनः पुनः ॥ हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्माव् ऋतानृते ॥ तद्भाविताः प्रपद्यंते तस्मात्तत्तस्य रोचते ॥ इंद्रियार्थेषु भूतेषु शरीरेषु
च स प्रभुः ॥ नानात्वं विनियोगं च धातैवं व्यसृजत्स्वयं ॥ नाम रूपं च भूतानां कृत्यानां च प्रपंचनं ॥ वेदशब्देभ्य एवादौ देवादीनां
चकार सः ॥ ऋषीणां नामधेयानि यथा वेदश्रुतानि वै ॥ यथानियोगयोग्यानि सर्वेषाम् अपि सोकरोत् ॥ यथर्तुष्वृतुलिंगा-
नि नानारूपाणि पर्यये ॥ दृश्यंते तानि तान्येव तथा भावा युगादिषु ॥ करोत्येवंविधां सृष्टिं कल्पादौ स पुनः पुनः ॥ सिसृक्षा

तानि स्वमात्मानमयूयुजत ॥ युक्तात्मनस्तमोमात्रा उद्रिक्ताभूत्प्रजापतेः ॥ सिसृक्षोर्जघनात्पूर्वमसुरा जज्ञिरे ततः ॥ उत्ससृ
र्ज ततस्तां तु तमोमात्रात्मिकां तनुं ॥ सा तु त्यक्ता ततस्तेन मैत्रेयाभूद्विभावरी ॥ सिसृक्षुरन्यदेहस्थः प्रीतिमाप ततः सुराः ॥ सत्वो
द्रिक्ताः समुद्भूता मुखतो ब्रह्मणो द्विज ॥ त्यक्ता सापि तनुस्तेन सत्वप्रायमभूद्दिनं ॥ ततो हि वलिनो रात्रावसुरा देवता दिवा ॥ स
त्वमात्रात्मिकामेव ततोन्यां जगृहे तनुं ॥ पितृवन्मन्यमानस्य पितरस्तस्य जज्ञिरे ॥ उत्ससर्ज पितॄन्सृष्ट्वा ततस्तामपि स प्रभुः
॥ सा चोत्सृष्टाभवत्संध्या दिननक्तांतरस्थितिः ॥ रजोमात्रात्मिकामन्यां जगृहे स तनुं ततः ॥ रजोमात्रोत्कटा जाता मनुष्या द्विज
सत्तम ॥ तामप्याशु स तत्याज तनुं सद्यः प्रजापतिः ॥ ज्योत्स्ना समभवत्सापि प्राक्संध्या याभिधीयते ॥ ज्योत्स्नागमे तु वलिनो म
नुष्याः पितरस्तथा ॥ मैत्रेय संध्यासमये तस्मादेते भवंति वै ॥ ज्योत्स्ना रात्र्यहनी संध्या चत्वार्येतानि वै प्रभोः ॥ ब्रह्मणस्तु शरीरा
णि त्रिगुणोपाश्रयाणि तु ॥ रजोमात्रात्मिकामेव ततोन्यां जगृहे तनुं ॥ ततः क्षुद्ब्रह्मणो जाता जज्ञे कोपस्तया ततः ॥ क्षुत्क्षामानं
धकारेथ सोसृजद्भगवांस्ततः ॥ विरूपाः श्मश्रुला जातास्तेभ्यधावंस्ततं प्रभुं ॥ मैवं भो रक्ष्यतामेष यैरुक्तं राक्षसास्तु ते ॥ ऊचुः खादा
म इत्यन्ये ये ते यक्षास्तु जक्षणात् ॥ अप्रियेण तु तान्दृष्ट्वा केशाः शीर्यंत वेधसः ॥ हीनाश्च शिरसो भूयः समारोहंत तच्छिरः ॥ सर्प
णात्तेभवन्सर्पा हीनत्वादहयः स्मृताः ॥ ततः क्रुद्धो जगत्स्रष्टा क्रोधात्मनो विनिर्ममे ॥ वर्णेन कपिशेनोग्रभूतास्ते पिशिताशनाः ॥ ध्या
यतोंगात्समुत्पन्ना गंधर्वास्तस्य तत्क्षणात् ॥ पिवंतो जज्ञिरे वाचं गंधर्वास्तेन ते द्विज ॥ एतानि सृष्ट्वा भगवान्ब्रह्मा तच्छक्तिनोदितः ॥
ततः स्वच्छंदतोन्यानि वयांसि वयसो सृजत् ॥ आवयो वक्षसश्चक्रे मुखतोजाः स सृष्टवान् ॥ सृष्टवानुदराद्गाश्च पार्श्वाभ्यां च प्रजापतिः

वि॰पु॰ ५

रिषु ॥ शीतातपादिबाधानां प्रशमाय महामुने ॥ प्रतीकारमिदं कृत्वा शीतादेस्ताः प्रजाः पुनः ॥ वार्त्तोपायं ततश्चक्रुर्हस्तसिद्धिं
च कर्मजं ॥ व्रीहयश्च यवाश्चैव गोधूमाश्चाणवस्तिलाः ॥ प्रियंगवो ह्युदाराश्च कोरदूषाः सचीनकाः ॥ माषामुद्गामसूराश्च
निःपावाः सकुलत्थकाः ॥ श्यामाकास्त्वथ नीवारा आढक्यश्चणकाश्चैव शणाः सप्तदश स्मृताः ॥ इत्येता ओषधीनां तु ग्राम्या
णां जातयो मुने ॥ ओषध्यो यज्ञियाश्चैव ग्राम्यारण्याश्चतुर्दश ॥ व्रीहयः सयवा माषा गोधूमाश्चाणवस्तिलाः ॥ प्रियंगुसप्त
मा ह्येता अष्टमास्तु कुलत्थकाः ॥ श्यामाकास्त्वथ नीवारा जर्त्तिलाः सगवेधुकाः ॥ तथा वेणुयवाः प्रोक्तास्तथा मर्कटका मुने ॥
ग्राम्यारण्याः स्मृता ह्येता ओषध्यस्तु चतुर्दश ॥ यज्ञनिष्पत्तये यज्ञस्तथासां हेतुरुत्तमः ॥ एताश्च सह यज्ञेन प्रजानां कारणं
परं ॥ परापरविदः प्राज्ञास्ततो यज्ञान्वितन्वते ॥ अहन्यहन्यनुष्ठानं यज्ञानां मुनिसत्तम ॥ उपकारकरं पुंसां क्रियमाणाघशांति
दं ॥ येषां तु कालसृष्टोसौ पापबिंदुर्महामते ॥ चेतस्सु ववृधे चक्रुस्ते न यज्ञेषु मानसं ॥ वेदवादांस्तथा वेदान्यज्ञकर्मादिकं च
यत् ॥ तत्सर्वं निंदयामासुस्ते यज्ञव्यासेधकारिणः ॥ प्रवृत्तमार्गव्युच्छित्तिकारिणो वेदनिंदकाः ॥ दुरात्मानो दुराचारा बभूवुः
कुटिलाशयाः ॥ संसिद्धायां तु वार्त्तायां प्रजाः सृष्ट्वा प्रजापतिः ॥ मर्यादां स्थापयामास यथास्थानं यथागुणं ॥ वर्णानामा
श्रमाणां च धर्मान्धर्मभृतां वर ॥ लोकांश्च सर्ववर्णानां सम्यक्धर्मानुपालिनां ॥ प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रि
यावतां ॥ स्थानमैन्द्रं क्षत्रियाणां संग्रामेष्वनिवर्त्तिनां ॥ वैश्यानां मारुतं स्थानं स्वधर्ममनुवर्त्तिनां ॥ अष्टाशीतिसहस्राणि मुनी
नामूर्द्ध्वरेतसां ॥ स्मृतं तेषां तु यत्स्थानं [illegible] तदेव गुरुवासिनां ॥ सप्तर्षीणां तु यत्स्थानं स्मृतं तद्वै वनौकसां ॥ प्राजाप

राम ५

क्तिपुक्तो सौ सृजत्यशक्तिप्रचेतसः॥ इति श्रीविष्णुपुराणे प्रथमेंऽशे पंचमोऽध्यायः॥ मैत्रेय उवाच॥ अर्वाक्स्रोतस्तु कथितो भवता यस्
तु मानुषः। ब्रह्मन्विस्तरतो ब्रूहि ब्रह्मा तमसृजद्यथा॥ यथा च वर्णानसृजद्यद्गुणांश्च महामुने। यच्च तेषां स्मृतं कर्म्म विप्रादीनां तदु
च्यताम्॥ पराशर उवाच॥ सत्याभिध्यायिनः पूर्वं सिसृक्षोर्ब्रह्मणो जगत्। अजायंत द्विजश्रेष्ठ सत्वोद्रिक्ता मुखात्प्रजाः॥ वक्षसो रजसो
द्रिक्तास्तथा वै ब्रह्मणोऽभवन्। रजसा तमसा चैव समुद्रिक्तास्तथोरुजः॥ पद्भ्यामन्याः प्रजा ब्रह्मा ससर्ज द्विजसत्तम॥ ततः प्रधानास्ताः
सर्वाश्चातुर्वर्ण्यमिदं ततः। ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च द्विजसत्तम॥ पादोरुवक्षस्थलतो मुखतश्च समुद्गताः॥ यज्ञनिष्पत्तये
सर्वमेतद्ब्रह्मा चकार वै। चातुर्वर्ण्यं महाभाग यज्ञसाधनमुत्तमं॥ यज्ञैराप्यायिता देवा वृष्ट्युत्सर्गेण वै प्रजाः। आप्याययंते धर्मज्ञ य
ज्ञाः कल्याणहेतवः॥ निष्पाद्यंते नरैस्तैस्तु स्वकर्माभिरतैः सदा। विशुद्धाचरणोपेतैः सद्भिः सन्मार्गगामिभिः॥ स्वर्गापवर्गौ मानुष्यात्प्रा
प्नुवंति नरा मुने। यच्चाभिरुचितं स्थानं तद्यांति मनुजा द्विज॥ प्रजास्ता ब्रह्मणा सृष्टाश्चातुर्वर्ण्यव्यवस्थितौ। सम्यक्श्रद्धासमाचारप्र
वणा मुनिसत्तम॥ यथेच्छावासनिरताः सर्वबाधाविवर्जिताः। शुद्धांतःकरणाः शुद्धाः सर्वानुष्ठाननिर्मलाः॥ शुद्धे च तासां मनसि
शुद्धेऽन्तःस्थे स्थिते हरौ। शुद्धज्ञानं प्रपश्यंति विष्ण्वाख्यं येन तत्पदं॥ ततः कालात्मको योऽसौ स चांशः कथितो हरेः॥ स पातयत्यघं घो
रमल्पमल्पाल्पसारवत्॥ अधर्मबीजसंभूतं तमोलोभसमुद्भवं॥ प्रजासु तासु मैत्रेय रागादिकमसाधकं॥ ततः सा सहजा सिद्धिस्तासां
नातीव जायते॥ रसोल्लासादयश्चान्याः सिद्धयोऽष्टौ भवंति याः॥ तासु क्षीणास्वशेषासु वर्द्धमाने च पातके। द्वन्द्वाभिभवदुःखार्त्तास्ता भवंति ततः
प्रजाः॥ ततो दुर्गाणि ताश्चक्रुर्धान्वं पार्वतमौदकं॥ कृत्रिमं च तथा दुर्गं पुरखर्वटकादिकं॥ गृहाणि च यथान्यायं तेषु चक्रुः पुरा

ष्णो २

वि०पु०
१०

10

तांनारीं तपसा निर्धूतकल्मषां ॥ स्वायंभुवो मनुर्देवः पत्नीत्वेन गृहे विभुः ॥ तस्माच्च पुरुषाद्देवी शतरूपा व्यजायत ॥ प्रियव
त्तोत्तानपादौ प्रसूत्याकूतिसंज्ञितं ॥ कन्याद्वयं च धर्मज्ञ रूपौदार्यगुणान्वितं ॥ ददौ प्रसूतिं दक्षायाकूतिं रुचये पुरा
प्रजापतिः स जग्राह तयोर्यज्ञः सदक्षिणः ॥ पुत्रो जज्ञे महाभाग दंपत्योर्मिथुनं ततः ॥ यज्ञस्य दक्षिणायां तु पुत्रा द्वादश जज्ञि
रे ॥ यामा इति समाख्याता देवाः स्वायंभुवे मनौ ॥ प्रसूत्यां च तथा दक्षश्चतस्रो विंशतिस्तथा ॥ ससर्ज कन्यास्तासां तु सम्यङ्ना
मानि मे शृणु ॥ श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा ॥ बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्तिस्त्रयोदशी ॥ पत्न्यर्थं
प्रतिजग्राह धर्मो दाक्षायणीः प्रभुः ॥ ताभ्यः शिष्टा यवीयस्या एकादश सुलोचनाः ॥ ख्यातिः सत्यथ संभूतिः स्मृतिः प्रीतिः क्ष
मा तथा ॥ सन्नतिश्चानसूया च ऊर्जा स्वाहा स्वधा तथा ॥ भृगुर्भवो मरीचिश्च तथा चैवांगिरा मुनिः ॥ पुलस्त्यः पुलहश्चैव क्रतु
श्चर्षिवरस्तथा ॥ अत्रिर्वशिष्ठो वह्निश्च पितरश्च यथाक्रमं ॥ ख्यात्याद्या जगृहुः कन्या मुनयो मुनिसत्तम ॥ श्रद्धा कामं चला
दर्पं नियमं धृतिरात्मजं ॥ संतोषं च तथा तुष्टिर्लोभं पुष्टिरसूयत ॥ मेधा श्रुतं क्रिया दण्डं नयं विनयमेव च ॥ बोधं बुद्धिस्तथा
लज्जा विनयं वपुरात्मजं ॥ व्यवसायं प्रजज्ञे वै क्षेमं शान्तिरसूयत ॥ सुखं सिद्धिर्यशः कीर्तिरित्येते धर्मसूनवः ॥ कामाद्रती
सुतं हर्षं धर्मपौत्रमसूयत ॥ हिंसा भार्या त्वधर्मस्य ततो जज्ञे तथानृतं ॥ कन्या च निकृतिस्ताभ्यां भयं नरकमेव च ॥
माया च वेदना चैव मिथुनं त्विदमेतयोः ॥ तयोर्जज्ञेथ वै माया मृत्युं भूतापहारिणं ॥ वेदना स्वसुतं चापि दुःखं जज्ञेथ रौ

राम
१०

स्यं गृहस्थानां न्यासिनां ब्रह्मसंज्ञितं ॥ योगिनाममृतं स्थानं तद्विष्णोः परमं पदं ॥ एकांतिनः सदा ब्रह्मध्यायिनो योगिनो हि ये ॥ तेषां त-
त्परमं स्थानं यत्तु पश्यंति सूरयः ॥ गत्वा गत्वा निवर्त्तंते चंद्रसूर्यादयो ग्रहाः ॥ अद्यापि न निवर्त्तंते द्वादशाक्षरचिंतकाः ॥ तामिस्रमंध-
तामिस्रं महारौरवरौरवौ ॥ असिपत्रवनं घोरं कालसूत्रमवीचिमत् ॥ विनिंदकानां वेदस्य यज्ञव्याघातकारिणां ॥ स्थानमेतत्स-
माख्यातं स्वधर्मत्यागिनश्च ये ॥ इति श्रीविष्णुपुराणे प्रथमेंशे षष्ठोध्यायः ॥ पराशर उवाच ॥ ततोभिध्यायतस्तस्य जज्ञिरे मान-
सीः प्रजाः ॥ तच्छरीरसमुत्पन्नैः कार्यैस्तैः कारणैः सह ॥ क्षेत्रज्ञाः समवर्त्तंत गात्रेभ्यस्तस्य धीमतः ॥ ते सर्वे समवर्त्तंत ये मया प्रागुदीरि-
ताः ॥ देवाद्याः स्थावरांताश्च त्रैगुण्यविषये स्थिताः ॥ एवं भूतानि सृष्टानि चराणि स्थावराणि च ॥ यदास्य ताः प्रजाः सर्वा न व्यवर्द्धंत धी-
मतः ॥ अथान्यान्मानसान्पुत्रान्सदृशानात्मनोसृजत् ॥ भृगुं पुलस्त्यं पुलहं क्रतुमंगिरसं तथा ॥ मरीचिं दक्षमत्रिं च वशिष्ठं चैव मानसान् ॥ न-
व ब्रह्माण इत्येते पुराणे निश्चयं गताः ॥ सनंदनादयो ये च पूर्वसृष्टास्तु वेधसा ॥ न ते लोकेष्वसज्जंत निरपेक्षाः प्रजासु ते ॥ सर्वे तेभ्या-
गतज्ञाना वीतरागा विमत्सराः ॥ तेष्वेवं निरपेक्षेषु लोकसृष्टौ महात्मनः ॥ ब्रह्मणोभून्महाक्रोधस्त्रैलोक्यदहनक्षमः ॥ तस्य क्रोधात्स-
मुद्भूतज्वालामालाविदीपितं ॥ ब्रह्मणोभूत्तदा सर्वं त्रैलोक्यमखिलं मुने ॥ भृकुटीकुटिलात्तस्य ललाटात्क्रोधदीपितात् ॥ समुत्प-
न्नस्तदा रुद्रो मध्याह्नार्कसमप्रभः ॥ अर्द्धनारीनरवपुः प्रचंडोतिशरीरवान् ॥ विभजात्मानमित्युक्त्वा तं ब्रह्मांतर्दधे ततः ॥ तथोक्तोसौ द्वि-
धा स्त्रीत्वं पुरुषत्वं तथाकरोत् ॥ बिभेद पुरुषत्वं च दशधा चैकधा च सः ॥ सौम्यासौम्यैस्तथा शांताशांतैः स्त्रीत्वं च स प्रभुः ॥ बिभेद ब-
हुधा देवः स्वरूपैरसितैः सितैः ॥ ततो ब्रह्मात्मसंभूतं पूर्वं स्वायंभुवं प्रभुं ॥ आत्मानमेव कृतवान्प्रजापालं मनुं द्विजः ॥ शतरूपां च

वि॰पु॰ ११

रोदीति तं ब्रह्मा रुदंतं प्रत्युवाच ह। नाम देहीति तं सोथ प्रत्युवाच प्रजापतिं। रुद्रस्त्वं देव नाम्नासि मा रोदीर्धैर्यमावह। एवमुक्तः
पुनः सोथ सप्तकृत्वो रुरोद वै। ततोन्यानि ददौ तस्मै सप्त नामानि वै प्रभुः। स्थानानि चैषामष्टानां पत्नीः पुत्रांश्च वै प्रभुः। भ
वं शर्वं महेशानं स्थाणुं पशुपतिं द्विज। भीममुग्रं महादेवमुवाच स पितामहः। चक्रे नामान्यथैतानि स्थानान्येषां चका
र सः। सूर्यो जलं मही वह्निर्वायुराकाशमेव च। दीक्षितो ब्राह्मणः सोम इत्येतास्तनवः क्रमात्। सुवर्चला तथैवोषा विके
शी चापरा शिवा। स्वाहा दिशस्तथा दीक्षा रोहिणी च यथाक्रमं। सूर्यादीनां नरश्रेष्ठ रुद्राद्यैर्नामभिः सह। पत्न्यः स्मृ
ता महाभाग तदपत्यानि मे शृणु। येषां सूतिप्रसूतैर्वा इदमापूरितं जगत्। शनैश्चरस्तथा शुक्रो लोहितांगो मनोजवः
स्कंदः सर्गोथ संतानो बुधश्चानुक्रमात्सुताः। एवंप्रकारो रुद्रोसौ सतीं भार्यामविंदत। दक्षकोपाच्च तत्याज सा सती स्वक
लेवरं। हिमवद्दुहिता साभून्मेनायां द्विजसत्तम। उपयेमे पुनश्चोमामनन्यां भगवान्भवः। देवौ धाताविधातारौ भृगोः
ख्यातिरसूयत। श्रियं च देवदेवस्य पत्नी नारायणस्य या। मैत्रेय उवाच। क्षीराब्धौ श्रीः समुत्पन्ना श्रूयतेमृतमंथ
ने। भृगोः ख्यात्यां समुत्पन्नेत्येतदाह कथं भवान्। पराशर उवाच। नित्यैवैषा जगन्माता विष्णोः श्रीरनपायिनी। यथा स
र्वगतो विष्णुस्तथैवेयं द्विजोत्तम। अर्थो विष्णुरियं वाणी नीतिरेषा नयो हरिः। बोधो विष्णुरियं बुद्धिर्धर्मोसौ सत्क्रि
या नित्यं। स्रष्टा विष्णुरियं सृष्टिः श्रीर्भूमिर्भूधरो हरिः। संतोषो भगवान्लक्ष्मीस्तुष्टिर्मैत्रेय शाश्वती। इच्छा श्रीर्भगवान्कामो

राम ११

स्थानं॥ मृत्योर्व्याधिजराशोककृष्णाक्रोधाश्च जज्ञिरे॥ दुःखोत्तराः स्मृता ह्येते सर्वे चाधर्मलक्षणाः॥ नैषां भार्यास्ति पुत्रो वा ते
सर्वे ह्यूर्ध्वरेतसः॥ रौद्राण्येतानि रूपाणि विष्णोर्मुनिवरात्मज॥ नित्यप्रलयहेतुत्वं जगतोस्य प्रयांति वै॥ दक्षो मरीचिरत्रिश्च
भृग्वाद्याश्च प्रजेश्वराः॥ जगत्यत्र महाभाग नित्यसर्गस्य हेतवः॥ मनवो मनुपुत्राश्च भूपा वीर्यधराश्च ये॥ सन्मार्गनिर
ताः शूरास्ते नित्यस्थितिकारिणः॥ मैत्रेय उवाच॥ येयं नित्या स्थितिर्ब्रह्मन्नित्यसर्गस्तथेरितः॥ नित्याभावश्च तेषां वै स्वरूपं
मम कथ्यतां॥ पराशर उवाच॥ सर्गस्थितिविनाशांश्च भगवान्मधुसूदनः॥ तैस्तै रूपैरचिंत्यात्मा करोत्यव्याहतो विभुः॥ नैमि
त्तिकः प्राकृतिकस्तथैवात्यंतिको द्विज॥ नित्यश्च सर्वभूतानां प्रलयोयं चतुर्विधः॥ ब्राह्मो नैमित्तिकस्तत्र यच्छेते जगतः
पतिः॥ प्रयाति प्राकृते चैव ब्रह्मांडं प्रकृतौ लयं॥ ज्ञानादात्यंतिकः प्रोक्तो योगिनः परमात्मनि॥ नित्यः सदैव जातानां यो वि नां
नाशो दिवानिशं॥ प्रसूतिः प्रकृतेर्या तु सा सृष्टिः प्राकृती स्मृता॥ दैनंदिनी तथा प्रोक्ता यांतरप्रलयादनु॥ भूतान्यनुदिनं
यत्र जायंते मुनिसत्तम॥ नित्यः सर्गस्तु स प्रोक्तः पुराणार्थविचक्षणैः॥ एवं सर्वशरीरेषु भगवान्भूतभावनः॥ संस्थितः
कुरुते विष्णुरुत्पत्तिस्थितिसंयमान्॥ सृष्टिस्थितिविनाशानां शक्तयः सर्वदेहिषु॥ वैष्णव्यः परिवर्तंते मैत्रेयाहर्निशं स
दा॥ गुणत्रयमयं ह्येतद्ब्रह्मन्शक्तित्रयं महत्॥ योतियाति स यात्येव परं नावर्तते पुनः॥ इति श्रीविष्णुपुराणे प्रथमेंशे
सप्तमोध्यायः॥ पराशर उवाच॥ कथितस्तामसः सर्गो ब्रह्मणस्ते महामुने॥ रुद्रसर्गं प्रवक्ष्यामि तन्मे निगदतः शृणु॥ कल्पा
दावात्मनस्तुल्यं सुतं प्रध्यायतस्ततः॥ प्रादुरासीत्प्रभोरंके कुमारो नीललोहितः॥ रुरोद सुस्वरं सोथ प्राद्रवद्द्विजसत्तम॥ किं रो

गंधेनवासितं ॥ अति सेव्यमभूद्ब्रह्मं स्तद्वनं वनचारिणां ॥ उन्मत्तव्रतधृग्विप्रः सदृष्ट्वा शोभनं स्रजं ॥ तांययाचे वरारोहां
विद्याधरवधूं ततः ॥ याचितातेनतन्वंगी मालां विद्याधरांगना ॥ ददौ तस्मै विशालाक्षी सादरं प्रणिपत्य तं ॥ तामादायात्म
नोमूर्ध्नि स्रजमुन्मत्तरूपधृक् कृत्वा सविप्रो मैत्रेय परिबभ्राममेदिनीं ॥ सददर्शसमायांतमुन्मत्तैरावतस्थितं ॥ त्रैलोक्या
धिपतिं देवं सहदेवैः शचीपतिं ॥ तामात्मनः सशिरसः स्रजमुन्मत्तषट्पदां ॥ आदायामरराजाय चिक्षेपोन्मत्तवन्मुनिं
॥ गृहीत्वामरराजेन स्रगैरावतमूर्द्धनि ॥ न्यस्ता रराजकैलासशिखरे जाह्नवीयथा ॥ मदांधकारिताक्षोसौ गंधाकृष्टेन
वारणः ॥ करेणाघ्राय चिक्षेप तां स्रजं धरणीतले ॥ ततश्चुक्रोध भगवान्दुर्वासामुनिसत्तम ॥ मैत्रेय देवराजं तं क्रुद्धश्चैत
दुवाचह ॥ ऐश्वर्यमदुदुष्टात्मन्नतिस्तब्धोसि वासव ॥ श्रियो धाम स्रजं यस्त्वं मद्दत्तां नाभिनंदसि ॥ प्रसाद इति नोक्तं
ते प्रणिपातपुरःसरं ॥ हर्षोत्फुल्लकपोलेन न चापि शिरसा धृता ॥ मयादत्तामिमां मालां यस्मान्नबहुमन्यसे ॥ त्रैलोक्य
श्रीरतो मूढ विनाशमुपयास्यति ॥ मांमन्य सेत्वं सदृशं नूनं शक्रेतरैर्द्विजैः ॥ अतोवमानमस्माकं मानिनाभवताकृ
तं ॥ मद्दत्ता भवता यस्मात्क्षिप्ता माला महीतले ॥ तस्मात्प्रनष्टलक्ष्मीकं त्रैलोक्यं ते भविष्यति ॥ यस्य संजातकोपस्य भ
यमेति चराचरं ॥ तंत्वं मामतिगर्वेण देवराजावमन्यसे ॥ पराशर उवाच ॥ महेंद्रो वारणस्कंधादवतीर्य्यत्वरान्वितः ॥
प्रसादयामास मुनिं दुर्वाससमकल्मषं ॥ प्रसाद्यमानः सतदा प्रणिपातपुरःसरं ॥ प्रत्युवाच सहस्राक्षं दुर्वासामुनि

विष्णु०

१२

12

राम

१२

यज्ञोसौदक्षिणात्वसा॥ साज्याहुतिरसौदेवीपुरोडाशोजनार्दनः॥ पत्नीशालामुनेर्लक्ष्मीप्राग्वंशोमधुसूदनः॥ चितिर्लक्ष्मीहरि
र्यूपः इध्माश्रीभगवान्कुशः॥ सामस्वरूपीभगवानुद्गीतिःकमलालया॥ स्वाहालक्ष्मीर्जगन्नाथोवासुदेवोहुताशनः॥ शंकरो
भगवान्शौरिर्गौरीलक्ष्मीर्द्विजोत्तम॥ मैत्रेयकेशवःसूर्यस्तत्प्रभाकमलालया॥ विष्णुःपितृगणःपद्मास्वधाशाश्वतपुष्टि
दा॥ द्यौश्रीःसर्वात्मकोविष्णुरवकाशोतिविस्तरः॥ शशांकःश्रीधरःकांतिःश्रीस्तस्यैवानपायिनी॥ धृतिर्लक्ष्मीर्जगच्चेष्टावा
युःसर्वत्रगोहरिः॥ जलधिर्द्विजगोविंदस्तद्वेलाश्रीर्महामते॥ लक्ष्मीस्वरूपमिंद्राणीदेवेंद्रोमधुसूदनः॥ यमश्चक्रधरःसाक्षा
द्धूमोर्णाकमलालया॥ ऋद्धिःश्रीःश्रीधरोदेवःस्वयमेवधनेश्वरः॥ गौरीलक्ष्मीर्महाभागाकेशवोवरुणःस्वयं॥ श्रीर्देवसे
नाविप्रेंद्रदेवसेनापतिर्हरिः॥ अवष्टंभोगदापाणिःशक्तिर्लक्ष्मीर्द्विजोत्तम॥ काष्ठालक्ष्मीर्निमेषोसौमुहूर्तोसौकलातुसा
ज्योत्स्नालक्ष्मीःप्रदीपोसौसर्वःसर्वेश्वरोहरिः॥ लताभूताजगन्माताश्रीर्विष्णुर्द्रुमसंस्थितः॥ विभावरीश्रीर्दिवसोदेवश्चक्र
गदाधरः॥ वरप्रदोवरोविष्णुर्वधूःपद्मवनालया॥ नदस्वरूपीभगवान्श्रीर्नदीरूपसंस्थितिः॥ ध्वजश्चपुंडरीकाक्षःपता
काकमलालया॥ तृष्णालक्ष्मीर्जगत्स्वामीलोभोनारायणःपरः॥ रतिरागौचधर्मज्ञलक्ष्मीर्गोविंदएवच॥ किंचातिबहुनो
क्तेनसंक्षेपेणेदमुच्यते॥ देवतिर्यङ्मनुष्यादौपुन्नाम्निभगवान्हरिः॥ स्त्रीनाम्निलक्ष्मीर्मैत्रेयनानयोर्विद्यतेपरं॥ इतिश्री
विष्णुपुराणेप्रथमेंशेअष्टमोध्यायः॥ पराशरउवाच॥ इदंचशृणुमैत्रेययत्पृष्टोहमिहत्वया॥ श्रीसंबंधंमयाप्येतच्छ्रुतमासी
न्मरीचितः॥ दुर्वासाशंकरस्यांशश्चचारपृथिवीमिमां॥ सददर्शस्रजंदिव्यामृषिर्विद्याधरीकरे॥ संतानकानामखिलंयस्या

वि॰ पु॰
१३

13

लोकपितामहः॥ क्षीरोदस्योत्तरे तीरे तैर्देवैः सहितो ययौ॥ समेत्य त्रिदशैः सर्वैः समवेतः पितामहः॥ तुष्टाव वाग्भिरिष्टाभिः परा
वरपतिं हरिं॥ ब्रह्मोवाच॥ नमामि सर्वं सर्वेशमनंतमजमव्ययं॥ लोकधाम धराधारमप्रकाशमभेदिनं॥ नारायणमणीयां
समशेषाणामणीयसां॥ समस्तानां गरिष्ठं च भूरादीनां गरीयसां॥ यत्र सर्वं यतः सर्वमुत्पन्नं मत्पुरःसरं॥ सर्वभू
तश्च यो देवः पराणामपि यः परः॥ परः परस्मात्पुरुषात्परमात्मस्वरूपधृक्॥ योगिभिश्चिंत्यते योसौ मुक्तिहेतोर्मुमुक्षु
भिः॥ सत्वादयो न संतीशे यत्र च प्राकृता गुणाः॥ स शुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु॥ कलाकाष्ठानिमेषादि
कालसूत्रस्य गोचरे॥ यस्य शक्तिर्न शुद्धस्य प्रसीदतु स नो हरिः॥ प्रोच्यते परमेशो हि यः शुद्धोप्युपचारतः॥ प्रसीदतु
स नो विष्णुरात्मा यः सर्वदेहिनां॥ यः कारणं च कार्यं च कारणस्यापि कारणं॥ कार्यस्यापि च यः कार्यं प्रसीदतु स नो ह
रिः॥ कार्यकार्यस्य यत्कार्यं तत्कार्यस्यापि यः स्वयं॥ तत्कार्यकार्यभूतो यस्ततश्च प्रणताः स्म तं॥ कारणं कारणस्यापि त
स्य कारणकारणं॥ तत्कारणानां हेतुं तं प्रणताः स्म सुरेश्वरं॥ भोक्तारं भोज्यभूतं च स्रष्टारं सृज्यमेव च॥ कार्यकर्तृस्वरूपं तं
प्रणताः स्म परं पदं॥ विशुद्धबोधवन्नित्यमजमक्षयमव्ययं॥ अव्यक्तमविकारं यत्तद्विष्णोः परमं पदं॥ न स्थूलं न च सूक्ष्मं य
न्न विशेषणगोचरं॥ तत्पदं परमं विष्णोः प्रणमामः सदामलं॥ यस्यायुतायुतांशांशे विश्वशक्तिरियं स्थिता॥ परं ब्रह्मस्वरूपं यत्प्र
णमामस्तमव्ययं॥ यन्न देवा न मुनयो न चाहं न च शंकरः॥ जानंति परमेशस्य तद्विष्णोः परमं पदं॥ यद्योगिनः सदोद्युक्ताः
पुण्यपापक्षये क्षयं॥ पश्यंति प्रणवे चिंत्यं तद्विष्णोः परमं पदं॥ शक्तयो यस्य देवस्य ब्रह्मविष्णुशिवात्मिकाः॥ भवंत्यभूतपूर्व

राम
१३

सत्तमः ॥ नाहं कृपालुहृदयो न च मां भजते क्षमा ॥ अन्ये ते मुनयः शक्र दुर्वाससमवेहि मां ॥ गौतमादिभिरन्यैस्त्वं गर्वमापादि
तो मुधा ॥ अक्षांतिसारसर्वस्वं दुर्वाससमवेहि मां ॥ वसिष्ठाद्यैर्दयासारैः स्तोत्रं कुर्वद्भिरुच्चकैः ॥ गर्वं गतोसि येनैवं मामप्य
द्यावमन्यसे ॥ ज्वलज्जटाकलापस्य भृकुटीकुटिलं मुखं ॥ निरीक्ष्य कस्त्रिभुवने मम यो न गतो भयं ॥ नाहं क्षमिष्ये बहुना
किमुक्तेन शतक्रतो ॥ विडंबनामिमां भूयः करोष्यनुनयात्मिकां ॥ पराशर उवाच ॥ इत्युक्त्वा प्रययौ विप्रो देवराजोपि तं पु
नः ॥ आरुह्यैरावतं ब्रह्मन्प्रययावमरावतीं ॥ ततः प्रभृति निःश्रीकं सशक्रं भुवनत्रयं ॥ मैत्रेयासीदपध्वस्तं संक्षीणौष
धिवीरुधं ॥ न यज्ञाः संप्रवर्तंते न तपस्यंति तापसाः ॥ न च दानादिधर्मेषु मनश्चक्रे तदा जनाः ॥ निःसत्वाः सकला लो
का लोभाद्युपहतेंद्रियाः ॥ स्वल्पेपि हि बभूवुस्ते साभिलाषा द्विजोत्तम ॥ यतः सत्वं ततो लक्ष्मीः सत्वं भूत्यनुसारि च ॥ निः
श्रीकाणां कुतः सत्वं विना तेन गुणाः कुतः ॥ बलशौर्याद्यभावश्च पुरुषाणां गुणैर्विना ॥ लंघनीयः समस्तस्य बलशौ
र्यविवर्जितः ॥ भवत्यपध्वस्तमतिर्लंघितः प्रथितः पुमान् ॥ एवमत्यंतनिःश्रीके त्रैलोक्ये सत्ववर्जिते ॥ देवान्प्रति बलोद्यो
गं चक्रुर्दैतेयदानवाः ॥ लोभाभिभूता निःश्रीका दैत्याः सत्वविवर्जिताः ॥ श्रिया विहीनैर्निःसत्वैर्देवैश्चक्रुस्ततो रणं ॥
विजितास्त्रिदशा दैत्यैरिंद्राद्याः शरणं ययुः ॥ पितामहं महाभागं हुताशनपुरोगमाः ॥ यथावत्कथितो देवैर्ब्रह्मा प्राह ततः
सुरान् ॥ परावरेशं शरणं व्रजध्वमसुरार्दनं ॥ उत्पत्तिस्थितिनाशानामहेतुं हेतुमीश्वरं ॥ प्रजापतिपतिं विष्णुमनंतमपराजि
तं ॥ प्रधानपुंसोरजयोः कारणं कार्यभूतयोः ॥ प्रणतार्तिहरं विष्णुं स वः श्रेयो विधास्यति ॥ एवमुक्त्वा सुरान्सर्वान्ब्रह्मा

ह

वि० पु०
१४

14

श्रीभगवानुवाच ॥ तेजसा भवतां देवाः करिष्याम्युपवृंहणं ॥ वदाम्यहं यत्क्रियतां भवद्भिस्तदिदं सुराः ॥ आनीय सहिता दैत्यैः क्षीरा
ब्धौ सकलौषधीन् संप्रयाने मंदरं कृत्वा नेत्रं कृत्वा तु वासुकिं ॥ मथ्यताममृतं देवाः साहाय्ये मय्यवस्थिते ॥ सामपूर्वं च दैतेया
स्तत्र साहाय्यकर्मणि ॥ सामान्यफलभोक्तारो यूयं वाच्या भविष्यथ ॥ मथ्यमाने च तत्राब्धौ यत्समुत्पद्यतेऽमृतं ॥ तत्पानाद्बलि
नो यूयममराश्च भविष्यथ ॥ तथा चाहं करिष्यामि यथा त्रिदशविद्विषः ॥ न प्राप्स्यन्त्यमृतं देवाः केवलं क्लेशभागिनः ॥ प
राशर उवाच ॥ इत्युक्ता देवदेवेन सर्व एव ततः सुराः ॥ संधानमसुरैः कृत्वा यत्नवंतोऽमृतेऽभवन् ॥ नानौषधीः समानीय देवदैतेयदा
नवाः ॥ क्षिप्त्वा क्षीराब्धिपयसि शरदभ्रामलत्विषि ॥ मंथानं मंदरं कृत्वा नेत्रं कृत्वा तु वासुकिं ॥ ततो मथितुमारब्धा मैत्रेय तरसाम
तं ॥ विबुधाः सहिताः सर्वे यतः पुच्छं ततः कृताः ॥ कृष्णेन वासुकेर्दैत्याः पूर्वकाये निवेशिताः ॥ ते तस्य फणनिःश्वासवह्निनापहतत्विषः ॥
निस्तेजसोऽसुराः सर्वे बभूवुरमितद्युते ॥ तेनैव मुखनिःश्वासवायुनास्तबलाहकैः ॥ पुच्छप्रदेशे वर्षद्भिस्तथा चाप्यायिताः सुराः ॥ ८
क्षीरोदमध्ये भगवान् कूर्मरूपी स्वयं हरिः ॥ मंथनाद्रेरधिष्ठानं भ्रमतोऽभून्महामुने ॥ रूपेणान्येन देवानां मध्ये चक्रगदाधरः ॥ चक
र्ष भोगिराजानं दैत्यमध्येऽपरेण च ॥ उपर्याक्रांतवान् शैलं बृहद्रूपेण केशवः ॥ तथापरेण मैत्रेय यन्न दृष्टं सुरासुरैः ॥ तेजसा
नागराजानं तत आप्यायितवान् हरिः ॥ अन्येन तेजसा देवानुपबृंहितवान् विभुः ॥ मथ्यमाने ततस्तस्मिन् क्षीराब्धौ देवदानवैः ॥ ह
विर्धामाभवत्पूर्वं सुरभिः सुरपूजिता ॥ जग्मुर्मुदं ततो देवा दानवाश्च महामुने ॥ व्याक्षिप्तचेतसश्चैव बभूवुः स्तिमितेक्षणाः ॥ किमेत
दिति सिद्धानां दिवि चिंतयतां ततः ॥ बभूव वारुणी देवी मदाघूर्णितलोचना ॥ कृतावर्तात्ततस्तस्मात्क्षीरोदाद्वासयन् जगत्

राम
१४

स तद्विष्णोः परमं पदं ॥ त्वत्तस्तस्माज्जगद्भूतं त्वं च सर्वगताच्युत ॥ इत्युक्ते च ततस्तेषां देवानां ब्रह्मणस्तथा ॥ अग्रे देववृषः सर्वे वृहस्पतिपुरो
गमाः ॥ आद्योऽयं पुरुषो नित्यो यः सर्वेषां च पूर्वजः ॥ तं त्वां तस्माज्जगत्स्रष्टुः स्रष्टारमविनाशिनं ॥ भगवन्भूतभव्येश जगन्नाथ निधिरव्ययः
प्रसीद प्रणतानां त्वं सर्वेषां देहि दर्शनं ॥ एवं ब्रह्मा ततः पैवायं सह रुद्रैस्त्रिलोचनः ॥ सर्वादित्यैः समं पूषा पावकोऽपि सहाग्निभिः ॥ अश्विनौ
वसवश्चैव वायवैते च मरुद्गणाः ॥ साध्या विश्वे तथा देवा देवेन्द्रश्चापमीश्वर ॥ प्रणमाम प्रवणा नाथ दैत्यसैन्यैः पराजिताः ॥ शरणं त्वामनुप्राप्ताः
समस्तदेवतागणाः ॥ सर्वेशः सर्वभूतात्मन् सर्व सर्वाश्रयाच्युत ॥ प्रसीद विष्णो भक्तानां व्रज नो दृष्टिगोचरं ॥ इत्युदीरितमाकर्ण्य ब्रह्म
णस्त्रिदशास्ततः ॥ प्रणम्योचुः प्रसीद त्वं व्रज नो दृष्टिगोचरं ॥ यन्नायं भगवान्ब्रह्मा जानाति परमं पदम् ॥ पराशर उवाच ॥ एवं संस्तूयमाना
स्तु भगवान्शंखचक्रभृत् ॥ जगाम दर्शनं तेषां मैत्रेय परमेश्वरः ॥ तं दृष्ट्वा ते तदा देवाः शंखचक्रगदाधरं ॥ अपूर्वरूपसंस्थानं
तेजसां राशिमूर्जितं ॥ प्रणम्य प्रणताः पूर्वं संक्षोभस्तिमितेक्षणाः ॥ तुष्टुवुः पुंडरीकाक्षं पितामहपुरोगमाः ॥ देवा ऊचुः ॥ नमो नमस्ते
देवेश त्वं ब्रह्मा त्वं पिनाकधृक् ॥ इंद्रस्त्वमग्निः पवनो वरुणः सविता यमः ॥ वसवो मरुतः साध्या विश्वेदेवगणा भवान् ॥ योऽयं तवागतो
देव समीपं देवतागणः ॥ स त्वमेव जगत्स्रष्टा यतः सर्वगतो भवान् ॥ त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारः प्रजापतिः ॥ वेद्यावेद्यं च सर्वात्म
न् त्वन्मयं चाखिलं जगत् ॥ त्वामत्र शरणं विष्णो प्रयाता दैत्यनिर्जिताः ॥ वयं प्रसीद भवन् तेजसाप्यायय स्वनः ॥ तावदार्तिस्तथा वां
छा तावन्मोहस्तथासुखं ॥ यावन्नयाति शरणं त्वामशेषाघनाशनं ॥ त्वत्प्रसादं प्रसन्नात्मन्प्रपन्नानां कुरुष्व नः ॥ तेजसां नाथ
सर्वेषां स्वशक्त्याप्यायनं कुरु ॥ पराशर उवाच ॥ एवं संस्तूयमानस्तु प्रणतैरमरैर्हरिः ॥ प्रसन्नदृष्टिर्भगवानिदमाह स विश्वकृत् ॥

सर्वभूतानां तदा मतिर्जायत॥ त्रैलोक्यं च श्रिया जुष्टं बभूव मुनिसत्तम॥ शक्रश्च त्रिदशश्रेष्ठः पुनः श्रीमानजायत॥ सिंहा
सनगतः शक्रः संप्राप्य त्रिदिवे पुनः॥ देवराज्ये स्थितो देवीं तुष्टावाब्जकरां ततः॥ इंद्र उवाच॥ नमस्ये सर्वभूतानां जननीमब्ज
संभवां॥ श्रियमुन्निद्रपद्माक्षीं विष्णुवक्षस्थलस्थितां॥ त्वं सिद्धिस्त्वं स्वधा स्वाहा सुधा त्वं लोकपावनी॥ संध्या रात्रिः प्रभा भू
तिर्मेधा श्रद्धा सरस्वती॥ यज्ञविद्या महाविद्या गुह्यविद्या च शोभने॥ आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी॥ आन्वी
क्षिकी त्रयी वार्ता दंडनीतिस्त्वमेव च॥ सौम्यासौम्यैर्जगद्रूपैस्त्वयैतद्देवि पूरितं॥ का त्वन्या त्वामृते देवि सर्वयज्ञमयं वपुः॥ अ
ध्यास्ते देवदेवस्य योगिचिंत्यं गदाभृतः॥ त्वया देवि परित्यक्तं सकलं भुवनत्रयं॥ दाराः पुत्रास्तथागारं सुहृद्धान्यधनादिकं॥ भव
त्येतन्महाभागे नित्यं त्वद्वीक्षणान्नृणां॥ शरीरारोग्यमैश्वर्यमरिपक्षक्षयः सुखं॥ देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्लभं॥ त्वमा
म्बा सर्वभूतानां देवदेवो हरिः पिता॥ त्वयैतद्विष्णुना चांब जगद्व्याप्तं चराचरं॥ मानं कोशं तथा कोष्ठं मा गृहं मा परिच्छदं॥ मा
शरीरं कलत्रं च त्यजेथाः सर्वपावनि॥ मा पुत्रान्मा सुहृद्वर्गान्मा पशून्मा विभूषणं॥ त्यजेथा मम देवस्य विष्णोर्वक्षस्थला
लये॥ सत्वेन सत्यशौचाभ्यां तथा शीलादिभिर्गुणैः॥ त्यज्यंते ते नराः सद्यः संत्यक्ता ये त्वयामले॥ त्वयावलोकिताः सद्यः
शीलाद्यैरखिलैर्गुणैः॥ कुलैश्वर्यैश्च युज्यंते पुरुषा निर्गुणा अपि॥ स श्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान्॥ स शूरः
स च विक्रांतो यस्त्वया देवि वीक्षितः॥ सद्यो वैगुण्यमायांति शीलाद्याः सकला गुणाः॥ पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुव
ल्लभे॥ न ते वर्णयितुं शक्ता गुणान् जिह्वापि वेधसः॥ प्रसीद देवि पद्माक्षि मास्मांस्त्याक्षीः कदाचन॥ पराशर उवाच॥ एवं

गंधेनपारिजातोभूद्देवस्त्रीनंदनस्तरुः॥रूपौदार्य्यगुणोपेतास्ततश्चाप्सरसागणाः॥क्षीरोदधेःसमुत्पन्नामैत्रेयपरमाद्भुताः॥ततः
शीतांशुरभवज्जगृहेतंमहेश्वरः॥जगृहुश्चविषंनागाःक्षीरोदाद्धिसमुत्थितं॥ततोधन्वंतरिर्देवःश्वेतांबरधरःस्वयं॥बिभ्रत्कमं
डलुंपूर्णममृतस्यसमुत्थितः॥ततःस्वस्थमनस्कास्तेसर्वेदैत्याःसदानवाः॥बभूवुर्मुदिताःसर्वेमैत्रेयमुनिभिःसह॥ततःस्फुर
त्कांतिमतीविकासिकमलेस्थिता॥श्रीर्देवीपयसस्तस्मादुद्धृतपंकजा॥तांतुष्टुवुर्मुदायुक्ताःश्रीसूक्तेनमहर्षयः॥विश्वा
वसुमुखास्तस्यागंधर्वाःपुरतोजगुः॥घृताचीप्रमुखास्तत्रननृतुश्चाप्सरसागणाः॥गंगाद्याःसरितस्तोयैःस्नानार्थमुप
तस्थिरे॥दिग्गजाहेमपात्रस्थमादायविमलंजलं॥स्नापयांचक्रिरेदेवींसर्वलोकमहेश्वरीं॥क्षीरोदोरूपधृक्तस्यैमालामा
म्लानपंकजां॥ददौविभूषणान्यंगेविश्वकर्माचकारच॥दिव्यमाल्यांबरधरास्नाताभूषणभूषिता॥पश्यतांसर्वदेवानांययौ
वक्षस्थलंहरेः॥तयावलोकितादेवाहरिवक्षस्थलस्थया॥लक्ष्म्यामैत्रेयसहसापरांनिर्वृत्तिमागताः॥उद्वेगंपरमंजग्मुर्दै
त्याविष्णुपराङ्मुखाः॥त्यक्तालक्ष्म्यामहाभागविप्रचित्तिपुरोगमाः॥ततस्तेजगृहुर्दैत्याधन्वंतरिकरेस्थितं॥कमंडलुंमहावीर्या
यत्रास्तेतद्द्विजामृतं॥माययालोभयित्वातान्विष्णुःस्त्रीरूपमास्थितः॥दानवेभ्यस्तदादायदेवेभ्यःप्रददौविभुः॥ततःपपुःसुरगणाः
शक्राद्यास्तत्तदामृतं॥उद्यतायुधनिस्त्रिंशादैत्यास्तांश्चसमभ्ययुः॥पीतेमृतेचबलिभिर्देवैर्दैत्यचमूस्तदा॥वध्यमानादिशोभेजे
पातालंचविवेशवै॥ततोदेवामुदायुक्ताःशंखचक्रगदाभृतं॥प्रणिपत्ययथापूर्वमाशासंस्तत्त्रिविष्टपं॥ततःप्रसन्नभाःसू
र्य्यःप्रययौस्वेनवर्त्मना॥ज्योतींषिचयथामार्गंप्रययुर्मुनिसत्तम॥जज्वालभगवांश्चोच्चैश्चारुदीप्तिर्विभावसुः॥धर्मेच

वि॰पु॰ १६

॥मैत्रेय उवाच॥ कथितं मे त्वया सर्वं यत्पृष्टोसि महामुने। भृगुसर्गात्प्रभृत्येषः सर्गो मे कथ्यतां पुनः॥ पराशर उवाच॥ भृगोः ख्या-
त्यां समुत्पन्ना लक्ष्मीर्विष्णुपरिग्रहः॥ तथा धातृविधातारौ ख्यात्यां जातौ सुतौ भृगोः॥ आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः॥
धातृविधात्रोस्ते भार्ये तयोर्जातौ सुतावुभौ॥ प्राणश्चैव मृकंडश्च मार्कण्डेयो मृकंडजः॥ ततो वेदशिरा जज्ञे प्राणस्यापि सुतं शृणु
॥प्राणस्य द्युतिमान्पुत्रो राजवांश्च ततोभवत्॥ ततोन्वयो महाभाग विस्तरं भार्गवो गतः॥ पत्नी मरीचेः संभूतिः पौर्णमासमसूय
त॥ विरजाः सर्वगश्चैव तस्य पुत्रौ महात्मनः॥ वंशसंकीर्तने पुत्रान्वदिष्येहि तयोर्द्विज॥ स्मृतिश्चांगिरसः पत्नी प्रसूता कन्य
कास्तथा॥ सिनीवाली कुहूश्चैव राका चानुमतिस्तथा॥ अनसूया तथैवात्रेर्जज्ञे पुत्रानकल्मषान्॥ सोमं दुर्वाससं चैव दत्ता
त्रेयं च योगिनम्॥ प्रीत्यां पुलस्त्यभार्यायां दत्तोलिस्तत्सुतोभवत्॥ पूर्वजन्मनि सोगस्त्यः स्मृतः स्वायंभुवेंतरे॥ कर्दमः शार्वरी
वांश्च सहिष्णुश्च सुतत्रयं॥ क्षमा तु सुषुवे भार्या पुलहस्य प्रजापतेः॥ क्रतोश्च सन्नतिर्भार्या वालखिल्यानसूयत॥ षष्टि
र्यानि सहस्राणि ऋषीणामूर्ध्वरेतसां॥ अंगुष्ठपर्वमात्राणां ज्वलद्भास्करतेजसां॥ ऊर्जायां च वसिष्ठस्य सप्ताजायंत वै सुताः
रजो गात्रोर्ध्वबाहुश्च सवनश्चानघस्तथा॥ सुतपाः शुक्र इत्येते सर्वे सप्तर्षयोमलाः॥ योसावग्न्यभिमानी ब्रह्मणस्तनयोग्रजः
तस्मात्स्वाहा सुतांल्लेभे त्रीनुदारौजसो द्विज॥ पावकं पवमानं च शुचिं चापि जलाशिनम्॥ एषां तु संतता ह्यन्ये चत्वारिंशच्च पंच च॥
॥ एवमेकोनपंचाशद्वह्नयः परिकीर्तिताः॥ कथ्यंते वह्नयश्चैते पिता पुत्रत्रयं च यत्॥ पितरो ब्रह्मणा सृष्टा व्याख्याता ये मया

लि

राम

६

श्रीः संस्तुता सम्यक् प्राह हृष्टा शतक्रतुं ॥ शृण्वतां सर्वदेवानां सर्वभूतस्थिता द्विज ॥ श्रीरुवाच ॥ परितुष्टास्मि देवेश
स्तोत्रेणानेन ते हरे ॥ वरं वृणीष्व यस्त्विष्टो वरदाहं तवागता ॥ इंद्र उवाच ॥ वरदा यदि मे देवि वरार्हो यदि वाप्यहं ॥ त्रैलोक्यं न
त्वया त्याज्यमेष मेस्तु वरः परः ॥ स्तोत्रेण यस्तथैतेन त्वां स्तोष्यत्यब्धिसंभवे ॥ स त्वया न परित्याज्यो द्वितीयोस्तु वरो मम ॥ श्रीरु
वाच ॥ त्रैलोक्यं त्रिदशश्रेष्ठ न संत्यक्ष्यामि वासव ॥ दत्तो वरो मया यस्ते स्तोत्राराधनतुष्टया ॥ यश्च सायं तथा प्रातः स्तोत्रेणा
नेन मानवः ॥ मां स्तोष्यति न तस्याहं भविष्यामि पराङ्मुखी ॥ पराशर उवाच ॥ एवं वरं ददौ देवी देवराजाय वै पुरा ॥ मैत्रेय श्रीर्म
हाभागा स्तोत्राराधनतोषिता ॥ भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्वमुदधेः पुनः ॥ देवदानवयत्नेन प्रसूतामृतमंथने ॥ एवं यथा ज
गत्स्वामी देवदेवो जनार्दनः ॥ अवतारं करोत्येषा तथा श्रीस्तत्सहायिनी ॥ पुनश्च पद्मादुद्भूता आदित्योभूद्यदा हरिः ॥ यदा तु भा
र्गवो रामस्तदाभूद्धरणी त्वियं ॥ राघवत्वे भवत्सीता रुक्मिणी कृष्णजन्मनि ॥ अन्येषु चावतारेषु विष्णोरेषा सहायिनी ॥ देवत्वे
देवदेहेयं मनुष्यत्वे च मानुषी ॥ विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुं ॥ यश्चैतच्छृणुयाज्जन्म लक्ष्म्या यश्च पठेन्नरः ॥ श्रियो
न विच्युतिस्तस्य गृहे यावत्कुलत्रयं ॥ पठ्यते येषु चैवेश गृहेषु श्रीस्तवो मुने ॥ अलक्ष्मीः कलहाधारा न तेष्वास्ते कदाचन ॥ एत
त्ते कथितं ब्रह्मन्यन्मां त्वं परिपृच्छसि ॥ क्षीराब्धौ श्रीर्यथा जाता पूर्वं भृगुसुता सती ॥ इति सकलविभूत्यवाप्तिहेतुः स्तुतिरियमिंद्रमु
खोद्गता हि लक्ष्म्याः ॥ अनुदिनमिह पठ्यते नृभिर्यैर्वसति न तेषु कदाचिदप्यलक्ष्मीः ॥ इति श्री विष्णुपुराणे प्रथमेंशे नवमोध्यायः ॥

17

नव ॥ अग्निष्वात्ता बर्हिषदोनग्नयः साग्नयश्च ये ॥ तेभ्यः स्वधा सुते जज्ञे मेनां वै धारिणीं तथा ॥ ते उभे ब्रह्मवादिन्यौ योगिन्यौ चा
प्युभे द्विज ॥ उत्तमज्ञानसंपन्ने सर्वैः समुदितैर्गुणैः ॥ इत्येषा दक्षकन्यानां कथितापत्यसंततिः ॥ श्रद्धावान्संस्मरेन्नेतामनपत्यो न
जायते ॥ इति श्रीविष्णुपुराणे प्रथमेंशे दशमोध्यायः ॥ पराशर उवाच ॥ प्रियव्रतोत्तानपादौ मनोः स्वायंभुवस्य तु ॥ द्वौ पुत्रौ सुम
हावीर्यौ धर्मज्ञौ कथितौ तव ॥ तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः ॥ अभीष्टायामभूद्ब्रह्मन्पितुरत्यंतवल्लभः ॥ सुनीतिर्नाम या
राज्ञस्तस्याभून्महिषी द्विज ॥ स नातिप्रीतिमांस्तस्यामभूद्यस्या ध्रुवः सुतः ॥ राजासनस्थितस्यांकं पितुर्भ्रातरमाश्रितम् ॥ दृष्ट्वोत्तमं
ध्रुवश्चक्रे तमारोढुं मनोरथं ॥ प्रत्यक्षं भूपतिस्तस्याः सुरुच्या नाभ्यनंदत ॥ प्रणयेनागतं तं च पुत्रमुत्संगारोहणोत्सुकं ॥ सपत्नीतनयं
दृष्ट्वा तमंकारोहणोत्सुकं ॥ पित्रा पुत्रं तथारूढं सुरुचिर्वाक्यमब्रवीत् ॥ क्रियते किं वृथा वत्स महानेष मनोरथः ॥ अन्यस्त्रीगर्भ
जातेन असंभूय ममोदरे ॥ उत्तमोत्तममप्राप्यमविवेको किं वांछसि ॥ सत्यं सुतस्त्वमप्यस्य किं तु न त्वं मया धृतः ॥ एतद्राजास
नं सर्वभूभृत्संश्रयकेतनं ॥ योग्यं ममैव पुत्रस्य किमात्मा क्लिश्यते त्वया ॥ उच्चैर्मनोरथस्तेयं मत्पुत्रस्येव किं वृथा ॥ सुनीत्यामा
त्मनो जन्म किं त्वया नावगम्यते ॥ पराशर उवाच ॥ उत्सृज्य पितरं बालस्तच्छ्रुत्वा मातृभाषितं ॥ जगाम कुपितो मातुर्निजाय
द्विज मंदिरं ॥ तं दृष्ट्वा कुपितं पुत्रमीषत्प्रस्फुरिताधरं ॥ सुनीतिरंकमारोप्य मैत्रेयेदमभाषत ॥ वत्स कः कोपहेतुस्ते कश्च त्वां
नाभिनंदति ॥ कोवजानाति पितरं तव यस्तेपराध्यते ॥ पराशर उवाच ॥ इत्युक्तः सकलं मात्रे कथयामास तद्यथा ॥ सुरुचिः

वि॰पु॰
९

प्राहभूपालभस्मत्तमपियर्विता ॥ विनिश्वस्येति कथिते तस्मिन्पुत्रेण दुर्मनाः ॥ श्वासमात्रेक्षणहीना सुनीतिर्वाक्यम ब्रवीत् ॥ सु
नीतिरुवाच ॥ सुरुचिः सत्यमाहेदं स्वल्पभाग्योसि पुत्रक ॥ नहि पुण्यवतां वत्स सपत्नैरेवमुच्यते ॥ नोद्वेगस्तात कर्तव्यः कृतंय
द्भवता पुरा ॥ तत्कोपहर्तुं शक्नोति दातुं कश्चाकृतं त्वया ॥ राजासनं तथा छत्रं वराश्चावरवारणाः ॥ यस्य पुण्यानि तस्यैते मत्वैवं
शाम्य पुत्रक ॥ अन्यजन्मकृतैः पुण्यैः सुरुच्यां सुरुचिर्नृपः ॥ भार्येति प्रोच्यते चान्या मद्विधा भाग्यवर्जिता ॥ पुण्योपचयसंपन्न
स्तस्याः पुत्रस्तथोत्तमः ॥ मम पुत्रस्तथा जातास्वल्पपुण्यो ध्रुवो भवान् ॥ तथापि दुःखं न भवान्कर्तुमर्हसि पुत्रक ॥ यस्य यावत्स
तेनैव स्वेन तुष्यति बुद्धिमान् ॥ यदि वा दुःखमत्यर्थं सुरुच्या वचसा तव ॥ तत्पुण्योपचये यत्नं कुरु सर्वफलप्रदे ॥ सुशील भव
धर्मात्मा मैत्रः प्राणिहिते रतः ॥ निम्नं यथापः प्रवणाः पात्रमायांति संपदः ॥ ध्रुव उवाच ॥ अंब यत्त्वमिदं प्राह प्रशमाय वचो मम ॥
नैतद्दुर्वचसा भिन्ने हृदये मम तिष्ठति ॥ सोहं तथा यतिष्यामि यथा सर्वोत्तमोत्तमं ॥ स्थानं प्राप्स्याम्यशेषाणां जगतामपि पूजि
तं ॥ सुरुचिर्दयिता राज्ञस्तस्या जातो स्मि नोदरात् ॥ प्रभावं पश्य मे चांब वृद्धस्यापि तवोदरे ॥ उत्तमः स मम भ्राता यो गर्भेण धृत
स्तया ॥ स राजासनमाप्नोतु पित्रा दत्तं तथास्तु तत् ॥ नान्यदत्तमभीप्सामि स्थानमंब स्वकर्मणा ॥ इच्छामि तदहं स्थानं यन्न प्रा
प पिता मम ॥ पराशर उवाच ॥ निर्जगाम गृहान्मातुरित्युक्त्वा मातरं ध्रुवः ॥ पुराच्च निष्क्रम्य ततस्तद्बाह्योपवनं ययौ ॥ स ददर्श
मुनीं स्तत्र सप्त पूर्वागतान्ध्रुवः ॥ कृष्णाजिनोत्तरीयेषु विष्टरेषु समास्थितान् ॥ स राजपुत्रस्तान्सर्वान्प्रणिपत्याभ्यभा

त

लो

राम
१२

विष्णु०
१८

कथितो देवो भवद्भिः प्रणतस्य मे ॥ मयास्य परितोषाय यज्ञमेवैतदुच्यतां ॥ यथाचाराधनं तस्य मया कार्य्यं महात्मनः ॥ प्रसादस्तु
मुखात्तस्मात्कथयंतु महर्षयः ॥ ऋषय ऊचुः ॥ राजपुत्र यथा विष्णोराराधनपरैर्नृभिः ॥ कार्य्यमाराधनं तन्नो यथावच्छ्रोतुमर्ह
सि ॥ बाह्यार्थानखिलांश्चित्तं त्याजयेत्प्रथमं नरः ॥ तस्मिन्नेव जगद्धाम्नि ततः कुर्वीत निश्चलं ॥ एवमेकाग्रचित्तेन तन्मयेन धृ
तात्मना ॥ जप्तव्यं तन्निबोधैतत्तत्त्वतः पार्थिवनंदन ॥ हिरण्यगर्भपुरुषप्रधानाव्यक्तरूपिणे ॥ ॐ नमो वासुदेवाय शुद्धज्ञान
स्वभाविने ॥ एतज्जजाप भगवान् जप्यं स्वायंभुवो मनुः ॥ पितामहस्तव पुरा तस्य तुष्टो जनार्द्दनः ॥ ददौ यथाभिलषितां ताम
प्सि त्रैलोक्यदुर्लभां ॥ तथा त्वमपि गोविंदं तोषयैतत्सदा जपन् ॥ इति श्रीविष्णुपुराणे प्रथमेंऽशे एकादशोऽध्यायः ॥ पराश
र उवाच ॥ निशम्यैतदशेषेण मैत्रेय नृपतेः सुतः ॥ निर्जगाम वनात्तस्मात्प्रणिपत्य स तानृषीन् ॥ कृतकृत्यमिवात्मानं मन्यमा
नस्ततो द्विज ॥ मधुसंज्ञं महापुण्यं जगाम यमुनातटं ॥ पुनश्च मधुसंज्ञेन दैत्येनाधिष्ठितं यतः ॥ ततो मधुवनं नाम्ना ख्यातमत्र
महीतले ॥ हत्वा च लवणं रक्षो मधुपुत्रं महाबलं ॥ शत्रुघ्नो मथुरां नाम पुरीं यत्र चकार वै ॥ यत्र वै देवदेवस्य सान्निध्यं ह
रिमेधसः ॥ सर्वपापहरे तस्मिंस्तपस्तीर्थे चकार सः ॥ मरीचिमुख्यैर्मुनिभिर्यथोद्दिष्टमभूत्तथा ॥ आत्मन्यशेषदेवेशं स्थि
तं विष्णुममन्यत ॥ अनन्यचेतसस्तस्य ध्यायतो भगवान्हरिः ॥ सर्वभूतगतो विप्र सर्वभावगतोऽभवत् ॥ मनस्यवस्थिते तस्मिन्विष्णौ
मैत्रेय योगिनः ॥ न शशाक धरा भारमुद्वोढुं भूतधारिणी ॥ वामपादस्थिते तस्मिन्ननामार्द्धेन मेदिनी ॥ द्वितीयं च ननामा
र्द्धं क्षितेर्दक्षिणसंस्थिते ॥ पादांगुष्ठेन संपीड्य यदा स वसुधां स्थितः ॥ ततो विश्वंभरा तत्र चचाल सह पर्वतैः ॥ नद्यो नदाः समु

एम
१८

-18

षत्तः॥ प्रश्रयावनतः सम्यगभिवादनपूर्वकं॥ ध्रुव उवाच॥ उत्तानपादतनयं मां निबोधत सत्तमाः। जातं सुनीत्यां निर्वेदाद्युष्माकं प्रा
प्तिमंतिकं॥ ऋषय ऊचुः॥ चतुःपंचाब्दसंभूतो बालस्त्वं नृपनंदन। निर्वेदकारणं किंचित्तव नाद्यापि विद्यते। न चिंत्यं भवतः किं
चिद्ध्रियते भूपतिः पिता। न चैवेष्टवियोगादि तव पश्याम बालक॥ शरीरे च न ते व्याधिरस्माभिरुपलक्ष्यते। निर्वेदः किं निमित्तं
ते कथ्यतां यदि विद्यते॥ पराशर उवाच॥ ततः स कथयामास सुरुच्या यदुदाहृतं। तन्निशम्य ततस्तौ चुर्मुनयस्ते परस्परं॥ अ
हो क्षात्रं परं तेजो बालस्यापि यदक्षमा। सपत्न्या मातुरुक्तं यद्धृदयान्नापसर्पति। भो भोः क्षत्रियदायाद निर्वेदाद्यत्त्वयाधुना॥ क
र्त्तुं व्यवसितं तन्नः कथ्यतां यदि रोचते। यच्च कार्यं तवास्माभिः साहाय्यममितद्युते॥ तदुच्यतां विवक्षुस्त्वमस्माभिरुपलक्ष्यसे॥
ध्रुव उवाच॥ नाहमर्थमभीप्सामि न राज्यं द्विजसत्तमाः॥ तत्स्थानमेकमिच्छामि भुक्तं नान्येन यत्पुरा। एतन्मे क्रियतां सम्यक्कथ्य
तां प्राप्यते यथा। स्थानमग्र्यं समस्तेभ्यः स्थानेभ्यो मुनिसत्तमाः॥ मरीचिरुवाच॥ अनाराधितगोविंदैर्नरैः स्थानं नृपात्मज। न हि सं
प्राप्यते श्रेष्ठं तस्मादाराधयाच्युतं॥ अत्रिरुवाच॥ परः पराणां पुरुषो यस्य तुष्टो जनार्दनः। स प्राप्नोत्यक्षयं स्थानमेतत्सत्यं मयोदि
तं॥ अंगिरा उवाच॥ यस्यांतः सर्वमेवेदमच्युतस्याव्ययात्मनः। तमाराधय गोविंदं स्थानमग्र्यं यदीच्छसि॥ पुलस्त्य उवाच॥ परं ब्रह्म
परं धाम योऽसौ ब्रह्म तथा परं। तमाराध्य हरिं याति मुक्तिमप्यतिदुर्लभं॥ क्रतुरुवाच॥ यो यज्ञपुरुषो यज्ञे योगे यः परमः पुमान्। तस्मिंस्तु
ष्टे यदप्राप्यं किं तदस्ति जनार्दने॥ पुलह उवाच॥ ऐंद्रमिंद्रः परं स्थानं यमाराध्य जगत्पतिं। प्राप यज्ञपतिं विष्णुं तमाराधय सुव्रत॥
वशिष्ठ उवाच॥ प्राप्नोष्याराधिते विष्णौ मनसा यद्यदिच्छसि। त्रैलोक्यांतर्गतं स्थानं किमु वत्सोत्तमोत्तमं॥ ध्रुव उवाच॥ आराध्यः

वि॰पु॰
१९

19

चेताः सततं विष्णुमेवात्मसंश्रयं॥ दृष्ट्वा पृथिवीनाथपुत्रेणात्मकंपेन च॥ ततः सर्वे समायाता विलीनाः सुपुनः सुराः॥
संक्षोभं परमं जग्मुस्तत्सहाशक्रसमन्विताः॥ ते समेत्य जगद्योनिमनादिनिधनं हरिं॥ शरण्यं शरणं याता स्तपसा तस्य तापि-
ताः॥ देवा ऊचुः॥ देवदेव जगन्नाथ परेश पुरुषोत्तम॥ ध्रुवस्य तपसा तप्ता स्त्वां वयं शरणं गताः॥ दिने दिने कलालेशैः श-
शांकः पूर्यते यथा॥ तथायं तपसा देव प्रयात्यृद्धिमहर्निशं॥ औत्तानपादितपसा वयमित्थं जनार्द्दन॥ भीतास्त्वां शरणं याता-
स्तपसस्तं निवर्त्तय॥ न विद्मः किं स शक्रत्वं किं सूर्यत्वमभीप्सति॥ वित्तपांबुपसोमानां साभिलाषः पदेषु किम्॥ तदस्माकं प्र-
सीदेश हृदयाच्छल्यमुद्धर॥ उत्तानपादतनयं तपसः संनिवर्त्तय॥ श्रीभगवानुवाच॥ नेंद्रत्वं न च सूर्यत्वं नैवांबुपध-
नेशतां॥ प्रार्थयत्येष यं कामं तं करोम्यखिलं सुराः॥ यात देवा यथाकामं स्वस्थानं विगतज्वराः॥ निवर्त्तयाम्यहं बालं त-
पस्यासक्तमानसं॥ पराशर उवाच॥ इत्युक्ता देवदेवेन प्रणम्य त्रिदशास्ततः॥ प्रययुः स्वानि धिष्ण्यानि शतक्रतुपुरोगमाः॥ भ-
गवानपि सर्वात्मा तन्मयत्वेन तोषितः॥ गत्वा ध्रुवमुवाचेदं चतुर्भुजवपुर्हरिः॥ श्रीभगवानुवाच॥ औत्तानपादे भद्रं ते तप-
सा परितोषितः॥ वरदोहमनुप्राप्तो वरं वरय सुव्रत॥ बाह्यार्थनिरपेक्षं ते मयि चित्तं यदाहितं॥ तुष्टोहं भवतस्तेन तद्वृणीष्व व-
रं परं॥ पराशर उवाच॥ श्रुत्वेत्थं गदितं तस्य देवदेवस्य बालकः॥ उन्मीलिताक्षो ददृशे ध्यानदृष्टं हरिं पुरः॥ शंखचक्रगदाशार्ङ्ग-
वरासिधरमच्युतं॥ किरीटिनं समालोक्य जगाम शिरसा महीं॥ रोमांचितांगः सहसा साध्वसं परमं गतः॥ स्तवाय देवदेवस्य
स चक्रे मानसं ध्रुवः॥ किं वदामि स्तुतावस्य केनोक्तेनास्य संस्तुतिः॥ इत्याकुलमतिर्देवं तमेव शरणं ययौ॥ ध्रुव उवाच॥ भगवन्

राम
१९

द्राश्च संक्षोभं परमं ययुः ॥ तत्क्षोभादमराः क्षोभं परं जग्मुर्महामुने ॥ यामा नाम तदा देवा मैत्रेय परमाकुलाः ॥ इंद्रेण सह संमंत्र्य ध्या
नभंगं प्रचक्रमुः ॥ कूष्मांडा विविधै रूपैः सहेंद्रेण महामुने ॥ समाधिभंगमत्यंतमारब्धाः कर्तुमातुराः ॥ सुनीतिर्नाम तन्माता सा
स्रा तत्पुरतः स्थिता ॥ पुत्रेति करुणां वाचमाह मायामयी तदा ॥ पुत्रकास्मान्निवर्तस्व शरीरव्ययदारुणात् ॥ निर्बंधतो मया लब्धो
बहुभिस्त्वं मनोरथैः ॥ दीनामेकां परित्यक्तुमनाथां न त्वमर्हसि ॥ सपत्नीवचनाद्वत्स अगतेस्त्वं गतिर्मम ॥ क्व च त्वं पंचवर्षीयः
क्व चैतद्दारुणं तपः ॥ निवर्त्यतां मनः कष्टान्निर्बंधात्फलवर्जितात् ॥ कालः क्रीडनकानां ते तदंतेध्ययनस्य च ॥ ततः समस्तभो
गानां तदंते चेष्यते तपः ॥ कालः क्रीडनकानां यस्तव बालस्य पुत्रक ॥ तस्मिंस्त्वमिच्छसि तपसे किं नाशायात्मनो रतः ॥ मत्प्रीतिः परमो
धर्मो वयोवस्थाक्रियाक्रमम् ॥ अनुवर्तस्व मा मोहं निवर्तास्मादधर्मतः ॥ परित्यजति वत्साद्य यद्येतन्न भवांस्तपः ॥ त्यक्ष्याम्यहम
पि प्राणांस्ततो वै पश्यतस्तव ॥ पराशर उवाच ॥ तां विलापवतीमेवं बाष्पाकुलितलोचनां ॥ समाहितमना विष्णौ पश्यन्नपि न दृ
ष्टवान् ॥ वत्स वत्स सुघोराणि रक्षांस्येतानि भीषणे ॥ वनेभ्युद्यतशस्त्राणि समायांत्यपगम्यतां ॥ इत्युक्त्वा प्रययौ सा थ रक्षांस्या
विर्बभूविरे ततः ॥ अभ्युद्यतोग्रशस्त्राणि ज्वालामालाकुलैर्मुखैः ॥ ततो नादानतीवोग्रान्राजपुत्रस्य ते पुरः ॥ मुमुचुर्दीप्तशस्त्रा
णि भ्रामयंतो निशाचराः ॥ शिवाश्च शतशो नेदुः सज्वालकवलैर्मुखैः ॥ त्रासाय तस्य बालस्य योगयुक्तस्य सर्वशः ॥ हन्यतां हन्य
तामेष छिद्यतां छिद्यतामयं ॥ भक्ष्यतां भक्ष्यतां चायमित्यूचुस्ते निशाचराः ॥ ततो नानाविधान्नादान्सिंहोष्ट्रमकराननाः ॥ त्रासाय
राजपुत्रस्य नेदुस्ते रजनीचराः ॥ रक्षांसि तानि ते नादाः शिवास्तान्यायुधानि च ॥ गोविंदासक्तचित्तस्य ययुर्नेंद्रियगोचरं ॥ एकाग्र

वि०पु०
२०

रजायत॥ नाभितोगगनंद्यौश्चशिरसः समवर्त्तत॥ दिशःश्रोत्रात्क्षितिःपद्भ्यांत्वत्तःसर्वमभूदिदं॥ न्यग्रोधःसुमहानल्पेयथ
थाबीजेव्यवस्थितः॥ संयमेविश्वमखिलंबीजभूतेतथात्वयि॥ बीजादंकुरसंभूतोन्यग्रोधस्तुसमुत्थितः॥ विस्तारंचयथा
यातित्वत्तःसृष्टौतथाजगत्॥ यथाहिकदलीनान्यात्वक्पत्रादपिदृश्यते॥ एवंविश्वस्यनान्यस्त्वंत्वत्स्थायीश्वरदृश्यते॥
एवंविश्वस्यनान्यस्त्वे ह्लादिनीसंधिनीसंवित्त्वय्येकासर्वसंस्थितौ॥ ह्लादतापकरीमिश्रात्वयिनोगुणवर्जिते॥ पृथग्भू
तैकभूतायभूतभूतायतेनमः॥ प्रभूतभूतभूतायतुभ्यंभूतात्मनेनमः॥ व्यक्तंप्रधानंपुरुषविराट्सम्राट्स्वराट्तथा॥ वि
भाव्यतेंतःकरणैःपुरुषेष्वक्षयोभवान्॥ सर्वस्मिन्सर्वभूतस्त्वंसर्वःसर्वस्वरूपधृक्॥ सर्वंत्वत्तस्ततश्चत्वंसर्वात्मनेनमो
स्तुते॥ सर्वात्मकोसिसर्वेशसर्वभूतस्थितोयतः॥ कथयामिततःकिंतेसर्वंवेत्सिहृदिस्थितः॥ सर्वात्मन्सर्वभूतेशसर्वस
वसमुद्भव॥ सर्वभूतोभवान्वेत्तिसर्वभूतमनोरथं॥ योमेमनोरथोनाथसफलःसत्वयाकृतः॥ तपश्चतप्तंसफलंयद्दृष्टो
सिजगत्पते॥ श्रीभगवानुवाच॥ तपसस्तत्फलंप्राप्तंयद्दृष्टोहंत्वयाध्रुव॥ मद्दर्शनंहिविफलंराजपुत्रनजायते॥ वरंवरय
तस्मात्त्वंयथाभिमतमात्मनः॥ सर्वंसंपद्यतेपुंसांमयिदृष्टिपथंगते॥ ध्रुवउवाच॥ भगवन्सर्वभूतेशसर्वस्यास्तेभवान्हृदि
॥ किमज्ञातंतवब्रह्मन्मनसायन्मयेप्सितं॥ तथापितुभ्यंदेवेशकथयिष्यामियन्मया॥ प्रार्थ्यतेदुर्विनीतेनहृदयेनातिदुर्ल
भं॥ किंवासर्वजगत्स्रष्टःप्रसन्नेत्वयिदुर्लभम्॥ त्वत्प्रसादफलंभुंक्तेत्रैलोक्यंमघवानपि॥ नैतद्राजासनंयोग्यमजातस्यमम

राम
२०

20

द्दिमेत्तोषं तपसा परमं गतः ॥ स्तोतुं तदहमिच्छामि वरमेतं प्रयच्छ मे ॥ ब्रह्माद्यैर्वेदवेदज्ञैर्ज्ञायते यस्य नो गतिः ॥ तं त्वां कथमहं देव स्तो
तुं शक्नोमि बालकः ॥ त्वद्भक्तिप्रवणं ह्येतत्परमेश्वर मे मनः ॥ स्तोतुं प्रवृत्तं त्वत्पादौ तत्र प्रज्ञां प्रयच्छ मे ॥ पराशर उवाच ॥ शंखप्र
ांतेन गोविंदस्तं पस्पर्श कृतांजलिं ॥ उत्तानपादतनयं द्विजवर्य्य जगत्पतिम् ॥ अथ प्रसन्नवदनः स क्षणान्नृपनंदनः ॥ तुष्टा
व प्रणतो भूत्वा भूतधातारमच्युतं ॥ ध्रुव उवाच ॥ भूमिरापोनलो वायुः खं मनो बुद्धिरेव च ॥ भूतादिरादिप्रकृतिर्यस्य रूपं नतोस्मि
तं ॥ शुद्धः सूक्ष्मोखिलव्यापी प्रधानात्परतः पुमान् ॥ यस्य रूपं नमस्तस्मै पुरुषाय गुणात्मने ॥ भूरादीनां समस्तानां गंधादीनां च
शाश्वतः ॥ बुध्यादीनां प्रधानस्य पुरुषस्य च यः परः ॥ तं ब्रह्मभूतमात्मानमशेषजगतः पतिं ॥ प्रपद्ये शरणं शुद्धं त्वद्रूपं परमेश्व
र ॥ बृहत्वाद्बृंहणत्वाच्च यद्रूपं ब्रह्म संज्ञितं ॥ तस्मै नमस्ते सर्वात्मन्योगिचिंत्याविकारवत् ॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्र
पात् ॥ सर्वव्यापी भुवः स्पर्शादत्यतिष्ठद्दशांगुलम् ॥ यद्भूतं यच्च वै भाव्यं पुरुषोत्तम तद्भवान् ॥ त्वत्तो विराट् स्वराट् सम्राट् त्वत्त
श्चाप्यधिपूरुषः ॥ अत्यरिच्यत सोधश्च तिर्य्यगूर्ध्वं च वै भुवः ॥ त्वत्तो विश्वमिदं जातं त्वत्तो भूतं भविष्यति ॥ त्वद्रूपधारिणश्चां
तः सर्वभूतमिदं जगत् ॥ त्वत्तो यज्ञः सर्वहुतः पृषदाज्यं पशुर्द्विधा ॥ त्वत्त ऋचोथ सामानि त्वत्तः छंदांसि जज्ञिरे ॥ त्वत्तो यजूंष्यजा
जायंत त्वत्तोश्वाश्चैकतोदतः ॥ गावस्त्वत्तः समुद्भूतास्त्वत्तोजा अवयो मृगाः ॥ त्वन्मुखाद्ब्राह्मणास्त्वत्तो बाहोः क्षत्रमजायत ॥ वै
श्यास्तवोरुजाः शूद्रास्तव पद्भ्यां समुद्गताः ॥ अक्ष्णोः सूर्योनिलः प्राणाच्चंद्रमा मनसस्तव ॥ प्राणोंतः सुषिराज्जातो मुखादग्नि
स

वि०पु०
२१

रायति॥ स्थानं प्राप्त वैरेकृत्वायाकुहि विवरेध्रुवं॥ यश्चैतत्कीर्त्तयेन्नित्यं ध्रुवस्यारोहणं दिवि॥ ससर्वपापनिर्मुक्तः स्वर्गलोके महीयते॥ स्थानभ्रंशं न चाप्नोति दिवि वायदि वा भुवि॥ सर्वकल्याणसंयुक्तो दीर्घकालं च जीवति॥ इति श्री विष्णुपुराणे प्रथमेंशे द्वादशो ध्यायः॥ पराशर उवाच॥ ध्रुवाच्छिष्टिं च भव्यं च भव्याच्छंभुर्व्यजायत॥ शिष्टेराधत्त सुछाया पंच पुत्रानकल्मषान्॥ रिपुंजयं रिपुंजयं विप्रं वृकलं वृकतेजसं॥ रिपोराधत्त वृहती चक्षुषं सर्वतेजसं॥ अजीजनत्पुष्करिण्यां वारुण्यां चाक्षुषो मनुं॥ प्रजापतेरात्मजायामरण्यस्य महात्मनः॥ मनोरजायंत दश नड्वलायां महौजसः॥ कन्यायां तपतां श्रेष्ठ वैराजस्य प्रजापतेः॥ उरूः पुरुः शतद्युम्नस्तपस्वी सत्यवाक्शुचिः॥ अग्निष्टोमोतिरात्रश्च सुद्युम्नश्चेति ते नव॥ अभिमन्युश्च दशमो नड्वलायां महौजसः॥ उरोरजनयत्पुत्रान्षडाग्नेयी महाप्रभान्॥ अंगं सुमनसं ख्यातिं क्रतुमंगिरसं शिवं॥ अंगात्सुनीथापत्यं वै वेनमेकमजायत॥ प्रजार्थमृषयस्तस्य ममंथुर्दक्षिणं करं॥ वेनस्य पाणौ मथिते संबभूव महामुने॥ वैनो नाम महीपालो यः पृथुः परिकीर्त्तितः॥ येन दुग्धा मही पूर्वं प्रजानां हितकारणात्॥ मैत्रेय उवाच॥ किमर्थं मथितः पाणिर्वेनस्य परमर्षिभिः॥ यत्र यज्ञे महावीर्य्यः स पृथुर्मुनिसत्तम॥ पराशर उवाच॥ सुनीथा नाम या कन्या मृत्योः प्रथमजो भवत्॥ अंगस्य भार्य्या सा दत्ता तस्यां वेनो व्यजायत॥ स मातामहदोषेण तेन मृत्योः व्यजायत॥ अभिषिक्तो यथा राज्ये स वेनः परमर्षिभिः॥ घोषयामास स तदा पृथिव्यां पृथिवीपतिः॥ न यष्टव्यं न होतव्यं न दातव्यं कदाचन॥ भोक्ता यज्ञस्य कस्त्वन्यो ह्यहं यज्ञपतिः प्रभुः॥ ततस्तमृषयः पूर्वं संपूज्य जगतीपतिं॥ ऊचुः सामकलं सम्यक् मैत्रेय समुपस्थिताः॥ ऋषय ऊचुः॥ भो भो राजन् शृणुष्व त्वं यद्वदाम स्तव

जन ४

राम
२१

२१

वि

मोदराज ॥ इति गर्वादवोचन्मां सपत्नी मातुरुच्चकैः ॥ आधारभूतं जगतः सर्वेषामुत्तमोत्तमं ॥ प्रार्थयामि प्रभो स्थानं त्वत्प्रसादादतोऽव्य
यं ॥ श्रीभगवानुवाच ॥ यत्त्वया प्रार्थितं स्थानमेतत्प्राप्स्यसि वै भवान् ॥ त्वयाहं तोषितः पूर्वमन्यजन्मनि बालक ॥ त्वमासीर्ब्राह्मणः
पूर्वं मय्येकाग्रमतिः सदा ॥ मातापित्रोश्च शुश्रूषुर्निजधर्मानुपालकः ॥ कालेन गच्छता मित्रं राजपुत्रस्तवाभवत् ॥ यौवनेऽखिलभोगा
ढ्यो दर्शनीयोज्ज्वलाकृतिः ॥ तत्संगात्तस्य तामृद्धिमवलोक्यातिदुर्लभां ॥ भवेयं राजपुत्रोऽहमिति वाञ्छा त्वया कृता ॥ ततो यथा
भिलषिता प्राप्ता ते राजपुत्रता ॥ उत्तानपादस्य गृहे जातोऽसि ध्रुव दुर्लभे ॥ अन्येषां तद्वरं स्थानं कुले स्वायंभुवस्य यत् ॥ तस्यैत
दपरं बाल येनाहं परितोषितः ॥ मामाराध्य नरो मुक्तिमवाप्नोत्यविलंबितं ॥ मय्यर्पितमना बाल किमु स्वर्गादिकं पदं ॥ त्रैलोक्याद
धिके स्थाने सर्वताराग्रहाश्रयः ॥ भविष्यति न संदेहो मत्प्रसादाद्भवान् ध्रुवः ॥ सूर्यात्सोमात्तथा भौमात्सोमपुत्राद्बृहस्पतेः ॥ सि
तार्कतनयादीनां सर्वर्क्षाणां तथा ध्रुव ॥ सप्तर्षीणामशेषाणां ये च वैमानिकाः सुराः ॥ सर्वेषामुपरि स्थानं तव दत्तं मया ध्रुव ॥ के
चिच्चतुर्युगं यावत्केचिन्मन्वंतरं सुराः ॥ तिष्ठंति भवतो दत्ता मया वै कल्पसंस्थितिः ॥ सुनीतिरपि ते माता त्वदासन्नातिनिर्मला ॥ विमाने ता
रका भूत्वा तावत्कालं निवत्स्यति ॥ ये च त्वां मानवाः प्रातः सायं च सुसमाहिताः ॥ कीर्तयिष्यंति तेषां च महत्पुण्यं भविष्यति ॥ पराशर उ
वाच ॥ एवं पूर्वं जगन्नाथाद्देवदेवाज्जनार्दनात् ॥ वरं प्राप्य ध्रुवः स्थानमध्यास्ते स महामते ॥ तस्याभिमानवृद्धिं च महिमानं निरीक्ष्य च ॥
देवासुराणामाचार्यः श्लोकमत्रोशना जगौ ॥ अहो ऽस्य तपसो वीर्यमहो ऽस्य तपसः फलं ॥ यदेनं पुरतः कृत्वा ध्रुवं सप्तर्षयः स्थि
ताः ॥ ध्रुवस्य जननी चेयं सुनीतिर्नाम सूनृता ॥ अस्याश्च महिमानं कः शक्तो वर्णयितुं भुवि ॥ त्रैलोक्याश्रयतां प्राप्तं परं स्थानं स्थि

वि॰ पु॰
२९
४२

मंथुरूरुं पुत्रार्थमनपत्यस्य यत्नतः ॥ मथ्यमानात्समुत्तस्थौ तस्योरोः पुरुषः किल ॥ दग्धस्थूणाप्रतीकाशः खर्वटास्योतिह्रस्व
कः ॥ किं करोमीति तान्सर्वान्विप्रानाह त्वरान्वितः ॥ निषीदेति तमूचुस्ते निषादस्तेन सोभवत् ॥ ततस्तत्संभवा जाता विंध्यशैल
निवासिनः ॥ निषादा मुनिशार्दूल पापकर्मोपलक्षणाः ॥ तेन द्वारेण तत्पापं निःक्रांतं तस्य भूपतेः ॥ निषादास्ते ततो जाता वेनक
ल्मषसंभवाः ॥ ततोस्य दक्षिणं हस्तं ममंथुस्तस्य ते द्विजाः ॥ मथ्यमाने च तत्रास्य पृथुर्वैन्यः प्रतापवान् ॥ दीप्यमानः स्ववपुषा सा
क्षादग्निरिव ज्वलन् ॥ आद्यमाजगवं नाम खात्पपात ततो धनुः ॥ शराश्च दिव्या नभसः कवचं च पपात ह ॥ तस्मिन्जाते तु
भूतानि संप्रहृष्टानि सर्वशः ॥ सत्पुत्रेण च जातेन वेनोपि त्रिदिवं ययौ ॥ पुन्नाम्नो नरकात्त्रातः स तेन सुमहात्मना ॥ तं समुद्राश्च नद्य
श्च रत्नान्यादाय सर्वशः ॥ तोयानि चाभिषेकार्थं सर्वाण्येवोपतस्थिरे ॥ पितामहश्च भगवान्देवैरांगिरसैः सह ॥ स्थावराणि
च भूतानि जंगमानि च सर्वशः ॥ समागम्य तदा वैन्यमभिषिंचन्नराधिपं ॥ हस्ते तु दक्षिणे चक्रं दृष्ट्वा तस्य पितामहः ॥ विष्णोरंशं पृथुं
मत्वा परितोषं परं ययौ ॥ विष्णुचिह्नं करे चक्रं सर्वेषां चक्रवर्तिनां ॥ भवत्यव्याहतो यस्य प्रभावस्त्रिदशैरपि ॥ महता राजराज्येन
पृथुर्वैन्यः प्रतापवान् ॥ सोभिषिक्तो महातेजा विधिवद्धर्मकोविदैः ॥ पित्रापरंजितास्तस्य प्रजास्तेनानुरंजिताः ॥ अनुरागात्तत
स्तस्य नाम राजेत्यजायत ॥ आपस्तस्तंभिरे चास्य समुद्रमभियास्यतः ॥ पर्वताश्च ददुर्मार्गं ध्वजभंगश्च नाभवत् ॥ अकृ
ष्टपच्या पृथिवी सिध्यंत्यन्नानि चिंतया ॥ सर्वकामदुघा गावः पुटके पुटके मधु ॥ तस्य वै जातमात्रस्य यज्ञे पैतामहे शुभे ॥ सू

राम
२२

प्रभो ॥ राज्यं देहोपकाराय प्रजानां च हितं परं ॥ दीर्घसत्रे पुरा देवेशं सर्वयज्ञेश्वरं हरिं ॥ पूजयिष्यामि भद्रं ते तत्रांशस्ते भविष्यति ॥ प
ज्ञेन यज्ञपुरुषो विष्णुः संपूजितो नृप ॥ अस्माभिर्भावितः कामान् सर्वान्नेव प्रदास्यति ॥ यज्ञैर्यज्ञेश्वरो येषां राष्ट्रे संपूज्यते हरिः
तेषां सर्वेप्सितावाप्तिं ददाति नृप भूभुजां ॥ वेन उवाच ॥ मत्तः कोभ्यधिकोन्योस्ति यश्चाराध्यो ममापरः ॥ कोयं हरिरिति ख्यातो यो
यं यज्ञेश्वरो मतः ॥ ब्रह्मा जनार्दनः शंभुरिंद्रो वायुर्यमो रविः ॥ हुतभुग्वरुणो धाता भूषा भूमिर्निशाकरः ॥ एते चान्ये च ये देवाः शापानु
ग्रहकारिणः ॥ नृपस्यैते शरीरस्थाः सर्वदेवमयो नृपः ॥ एतज्ज्ञात्वा मयाज्ञप्तं यद्यथा च क्रियतां तथा ॥ न दातव्यं न होतव्यं न यष्टव्यं
कथंचन द्विजाः ॥ भर्तृशुश्रूषणं धर्मो यथा स्त्रीणां परो मतः ॥ ममाज्ञापालनं धर्मो भवतां च तथा द्विजाः ॥ ऋषय ऊचुः
देह्यनुज्ञां महाराज मा धर्मो यातु संक्षयं ॥ हविषां परिणामोयं यद्देतेद्दखिलं जगत् ॥ पराशर उवाच ॥ इति विज्ञाप्यमा
नोपि स वेनः परमर्षिभिः ॥ यदा ददाति नानुज्ञां प्रोक्तः प्रोक्तः पुनः पुनः ॥ ततस्तु मुनयः सर्वे कोपामर्षसमन्विताः ॥ हन्यतां हन्यतां
पापः इत्यूचुस्ते परस्परम् ॥ यो यज्ञपुरुषं देवमनादिनिधनं प्रभुं ॥ विनिंदत्यधमाचारो न स योग्यो भुवः पतिः ॥ इत्युक्त्वा
मंत्रपूतैस्तैः कुशैर्मुनिगणा नृपं ॥ निजघ्नुर्निहतं पूर्वं भगवन्निंदनादिना ॥ ततश्च मुनयो रेणुं ददृशुः सर्वतो द्विजं ॥ किमे
तदिति चासन्नं पप्रच्छुस्ते जनं तदा ॥ आख्यातं च जनैस्तेषां चौरभूते राजके ॥ राष्ट्रे तु लोकैरारब्धं परस्वादानमातुरैः ॥ तेषामु
दीर्णवेगानां चौराणां मुनिसत्तमाः ॥ सुमहान् दृश्यते रेणुः परवित्तापहारिणां ॥ ततः संमंत्र्य ते सर्वे मुनयस्तस्य भूभृतः ॥ म

रां॥ ततो ननाश त्वरिता गौर्भूत्वा तु वसुंधरा॥ सा लोकान् ब्रह्मलोकादीन् संत्रासादगमन्मही॥ यत्र यत्र ययौ देवी सा तदा भूत
धारिणी॥ तत्र तत्र तु सा वैण्यं ददृशेऽभ्युद्यतायुधं॥ ततस्तां प्राह वसुधा पृथुं पृथुपराक्रमं॥ प्रवेपमाना तद्बाणपरित्राणप
रायणा॥ पृथिव्युवाच॥ स्त्रीवधे त्वं महापापं किं नरेंद्र न पश्यसि॥ येन मां हंतुमत्यर्थं प्रकरोषि नृपोद्यमं॥ पृथुरुवाच॥ ए
कस्मिन्यत्र निधनं प्रापिते दुष्टकारिणि॥ बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः॥ पृथिव्युवाच॥ प्रजानामुपकाराय यदि मां
त्वं हनिष्यसि॥ आधारः कः प्रजानां ते नृपश्रेष्ठ भविष्यति॥ पृथुरुवाच॥ त्वां हत्वा वसुधे बाणैर्मच्छासनपराङ्मुखीं॥ आत्मयो
गबलेनेमां धारयिष्याम्यहं प्रजाः॥ पराशर उवाच॥ ततः प्रणम्य वसुधा तं भूयः प्राह पार्थिवं॥ प्रवेपितांगी परमं साध्वसं समु
पागता॥ पृथिव्युवाच॥ उपायतः समारब्धाः सर्वे सिध्यंत्युपक्रमाः॥ तस्माद्वदाम्युपायं ते तं कुरुष्व यदिच्छसि॥ समस्ता या
मया जीर्णा नरनाथ महौषधीः॥ यदीच्छसि प्रदास्यामि ताः क्षीरपरिणामिनीः॥ तस्मात्प्रजाहितार्थाय मम धर्मभृतां वर॥ तं
तु वत्सं कुरुष्व त्वं क्षरेयं येन वत्सला॥ समां च कुरु सर्वत्र येन क्षीरं समंततः॥ वरौषधीबीजभूतं वीर्यं सर्वत्र भावयेत्॥ पराशर
उवाच॥ तत उत्सारयामास शैलांछतसहस्रशः॥ धनुःकोट्या तदा वैण्यस्ततः शैला विवर्द्धिताः॥ न हि पूर्वविसर्गे वै विषमे पृ
थिवीतले॥ प्रविभागः पुराणां वा ग्रामाणां वा तदाभवत्॥ न सस्यानि न गोरक्षं न कृषिर्न वणिक्पथः॥ वैण्यात्प्रभृति मैत्रेय सर्व
स्यैतस्य संभवः॥ यत्र यत्र समं त्वस्या भूमेरासीन्नराधिप॥ तत्र तत्र प्रजानां हि निवासं समरोचयत॥ आहारः फलमूला

तः सूतः समुत्पन्नः सौत्येऽहनि महामतिः ॥ तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः ॥ प्रोक्तौ तदा मुनिवरैस्तावुभौ सूतमागधौ ॥ स्तू-
यतामेष नृपतिः पृथुर्वैण्यः प्रतापवान् ॥ कर्मैतदनुरूपं च पात्रं स्तोत्रस्य चाप्ययं ॥ ततस्तावूचतुर्विप्रान्सर्वानेव कृतांजली ॥ अद्य
जातस्य नो कर्म चक्रवर्ती महाबलः ॥ गुणा न विख्यायेचास्य तैरयं स्तूयतां नृपः ॥ पराशर उवाच ॥ ततः स नृपतिस्तोषं तच्छ्रु-
त्वा परं ययौ ॥ सद्गुणैः श्लाघ्यतामेति स्तव्याश्लाघ्यां गुणा मम ॥ तस्मादद्य वरस्तोत्रेण गुणनिर्वर्णनं त्विमौ ॥ करिष्यतः करिष्या-
मि तदेवाहं समाहितः ॥ यदिमौ वर्जनीयं च किंचित्तत्र वदिष्यतः ॥ तदहं वर्जयिष्यामि एवं चक्रे मतिं नृपः ॥ गायंतौ चक्रतुः स्तो-
त्रं पृथोर्वैण्यस्य धीमतः ॥ भविष्यैः कर्मभिः सम्यक्सुस्वरौ सूतमागधौ ॥ सत्यवाग्दानशीलोऽयं सत्यसंधो नरेश्वरः ॥ ह्रीमान्मै-
त्रः क्षमाशीलो विक्रांतो दुष्टशासनः ॥ धर्मज्ञश्च कृतज्ञश्च दयावान्प्रियभाषकः ॥ मान्यमानयिता यज्वा ब्रह्मण्यः साधुसंमतः ॥ स-
मः शत्रौ च मित्रे च व्यवहारे स्थितो नृपः ॥ सूतेनोक्तान्गुणानित्थं स तदा मागधेन च ॥ चकार हृदि तादृक्स कर्मणा कृतवान-
सौ ॥ ततः स पृथिवीनाथ पालयन्वसुधामिमां ॥ इयाज विविधैर्यज्ञैर्महद्भिर्भूरिदक्षिणैः ॥ तं प्रजाः पृथिवीनाथमुपतस्थुः क्षुधा-
र्दिताः ॥ ओषधीषु प्रनष्टासु तस्मिन्काले ह्यराजके ॥ तमूचुस्ते नताः पृष्टास्तत्रागमनकारणं ॥ प्रजा ऊचुः ॥ अराजके नृपश्रेष्ठ
धरित्र्या सकलौषधी ॥ ग्रस्तास्ततः क्षयं यांति प्रजाः सर्वाः प्रजेश्वर ॥ त्वं नो वृत्तिप्रदो धात्रा प्रजापालो निरूपितः ॥ देहि नः क्षुत्परीत-
नां प्रजानां जीवनौषधीः ॥ पराशर उवाच ॥ ततोऽथ नृपतिर्दिव्यमादायाजगवं धनुः ॥ शरांश्च दिव्यान्कुपितः सोऽन्वधावद्वसुंध-

ब्रह्मणा देवदेवेन समादिष्टोस्म्यहं सुताः। प्रजाः संवर्द्धनीयास्ते मया चोक्तं तथेति तत्॥ तन्मम प्रीतये पुत्राः प्रजावृद्धिमतंद्रिताः। कुरु
ध्वं माननीया वः सम्यगाज्ञा च प्रजापतेः॥ पराशर उवाच॥ ततस्ते तत्पितुः श्रुत्वा वचनं नृपनंदनाः। तथेत्युक्त्वा तु तं भूयः पप्रच्छुः पित
रं मुने॥ प्रचेतस ऊचुः॥ येन तात प्रजावृद्धौ समर्थाः कर्मणा वयं। भवाम तत्समस्तं नः कर्म व्याख्यातुमर्हसि॥ पितोवाच॥ आराध्य
वरदं विष्णुमिष्टप्राप्तिमसंशयं। समेति नान्यथा मर्त्यः किमन्यत्कथयामि वः॥ तस्मात्प्रजाविवृद्ध्यर्थं सर्वभूतप्रभुं हरिं। आराध
यत गोविंदं यदि सिद्धिमभीप्सथ॥ धर्ममर्थं च कामं च मोक्षं चान्विच्छता सदा। आराधनीयो भगवाननादिः पुरुषोत्तमः॥ यस्मि
न्नाराधिते सर्गं चकारादौ प्रजापतिः। तमाराध्याच्युतं वृद्धिः प्रजानां वो भविष्यति॥ पराशर उवाच॥ इत्येवमुक्तास्ते पित्रा पुत्राः
प्राचेतसो दश। मग्नाः पयोधिसलिले तपस्तेपुः समाहिताः॥ दशवर्षसहस्राणि न्यस्तचित्ता जगत्पतौ। नारायणे मुनिश्रेष्ठ सर्व
लोकपरायणे॥ तत्रैव तस्थिता देवमेकाग्रमनसो हरिं। तुष्टुवुर्यस्तुतः कामान्स्तोतुरिष्टान्प्रयच्छति॥ मैत्रेय उवाच॥ स्तवं प्रचेतसो
विष्णोः समुद्रांभसि संस्थिताः। चक्रुस्तन्मे मुनिश्रेष्ठ सुपुण्यं वक्तुमर्हसि॥ पराशर उवाच॥ शृणु मैत्रेय गोविंदं यथापूर्वं प्रचेत
सः। तुष्टुवुस्तन्मयीभूताः समुद्रसलिलेशयाः॥ प्रचेतस ऊचुः॥ नताः स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती। तमाद्यंतमशेषस्य
जगतः परमं प्रभुं॥ ज्योतिराद्यमनौपम्यमण्वनंतमपारवत्। योनिभूतमशेषस्य स्थावरस्य चरस्य च॥ यस्याहः प्रथमं रूपमरू
पस्य तथा निशा। संध्या च परमेशस्य तस्मै कालात्मने नमः॥ भुज्यतेनुदिनं देवैः पितृभिश्च सुधात्मकः। जीवभूतः समस्तस्य तस्मै
सोमात्मने नमः॥ यस्तमांस्यत्ति तीव्रात्मा प्रभाभिर्भासयन्नभः। धर्मशीतांभसां योनिस्तस्मै सूर्यात्मने नमः॥ काठिन्यवान्यो बि

नि प्रजानामभवत्तदा ॥ कल्कुरणमहतासोपि प्रनष्टास्वौषधीषु वै ॥ सकल्पयित्वा वत्सं तु मनुं स्वायंभुवं प्रभुः ॥ स्वेपाणौ पृथिवीनो घो
दुदोह पृथिवीं पृथुः ॥ सस्यजातानि सर्वाणि प्रजानां हितकाम्यया ॥ तेनान्नेन प्रजास्तात वर्त्तते द्यापि नित्यशः ॥ प्राणप्रदाता स पृथुर्यस्मा
द्भूमेरभूत्पिता ॥ ततस्तु पृथिवीसंज्ञामवापाखिलधारिणी ॥ ततश्च देवैर्मुनिभिर्दैत्यै रक्षोभिरद्रिभिः ॥ गंधर्वैरुरगैर्यक्षैः पितृभिस्त
रुभिस्तथा ॥ तत्तत्पात्रमुपादाय तत्तद्दुग्धं मुने पयः ॥ वत्सदोग्धृविशेषाश्च तेषां तद्योनयोभवन् ॥ सैवा धात्री विधात्री च धारिणी
पोषणी तथा ॥ सर्वस्य जगतः पृथ्वी विष्णुपादतलोद्भवा ॥ एवं प्रभावः स पृथुः पुत्रो वैन्यस्य वीर्यवान् ॥ जज्ञे महीपतिः पूर्वो राजाभूज्ज
नरंजनात् ॥ य इदं जन्म वैन्यस्य पृथोः कीर्त्तयते नरः ॥ न तस्य दुःकृतं किंचित्फलदायि प्रजायते ॥ दुःस्वप्नोपशमं नॄणां शृण्वतां चैतदुज्ज
मं ॥ पृथोर्जन्म प्रभावश्च करोति सततं नृणां ॥ इति श्रीविष्णुपुराणे प्रथमेंशे त्रयोदशोध्यायः ॥ पराशर उवाच ॥ पृथोः पुत्रौ महावी
र्यौ जज्ञातेन्तर्द्धिपालिनौ ॥ शिखंडिनी हविर्धानमन्तर्द्धानाद्व्यजायत ॥ हविर्द्धानात्षडाग्नेयी धिषणाजनयत्सुतान् ॥ प्राचीनबर्हि
षं शुक्रं गयं कृष्णं व्रजाजिनौ ॥ प्राचीनबर्हिर्भगवान्महानासीत्प्रजापतिः ॥ हविर्द्धानान्महाराजो येन संवर्द्धिताः प्रजाः ॥ प्राचीनाग्रा
कुशास्तस्य पृथिव्यामभवन्मुने ॥ प्राचीनबर्हिर्भगवान्सोतितोभुवि महाबलः ॥ समुद्रतनयायां तु कृतदारो महीपतिः ॥ महतस्तपसः
पारे सवर्णायां महीपतेः ॥ सवर्णाधत्त सामुद्री दश प्राचीनबर्हिषः ॥ सर्वे प्रचेतसो नाम धनुर्वेदस्य पारगाः ॥ अपृथग्धर्मचरणा
स्तेतप्यंत महत्तपः ॥ दशवर्षसहस्राणि समुद्रसलिलेशयाः ॥ मैत्रेय उवाच ॥ यदर्थं ते महात्मानस्तपस्तेपुर्महामुने ॥ प्रचेतसः स

मुद्रांभस्येतदाख्यातुमर्हसि ॥ पराशर उवाच ॥ पित्रा प्रचेतसः प्रोक्ताः प्रजार्थममितात्मना ॥ प्रजापतिनियुक्तेन बहुमानपुरःसरं ॥

वृद्धिकारणं ॥ सर्वापि देवसंघात्राय स्याभिलषितं वरं ॥ अंतर्द्धानं जगाम स ते च निश्चक्रमुर्जलात् ॥ इति श्रीविष्णुपुराणे प्र
थमेंऽशे चतुर्दशोऽध्यायः ॥ पराशर उवाच ॥ तपश्चरत्सु पृथिवीं प्रचेतःसु महीरुहाः ॥ अरक्ष्यमाणामाववुर्बभूवाथ प्रजाक्षयः ॥ ना
शकन्मारुतो वातुं वृतं खमभवद्द्रुमैः ॥ दशवर्षसहस्राणि न शेकुश्चेष्टितुं प्रजाः ॥ तद्दृष्ट्वा जलनिष्क्रांताः सर्वे क्रुद्धाः प्रचेतसः
॥ मुखेभ्यो वायुमग्निं च ससृजुर्जातमन्यवः ॥ उन्मूलानथ तान्वृक्षान्कृत्वा वायुरशोषयत् ॥ तानग्निरदहद्घोरस्तत्राभूद्द्रुम
संक्षयः ॥ द्रुमक्षयमथो दृष्ट्वा किंचिच्छिष्टेषु शाखिषु ॥ उपगम्याब्रवीदेतान्राजा सोमः प्रजापतीन् ॥ कोपं यच्छत राजानः
श्रृणुध्वं च वचो मम ॥ संधानं वः करिष्यामि सह क्षितिरुहैरहं ॥ रत्नभूता च कन्येयं वार्क्षेयी वरवर्णिनी ॥ भविष्यं जानता
पूर्वं मया गोभिर्विवर्द्धिता ॥ मारिषा नाम नाम्नैषा वृक्षाणामिति निर्मिता ॥ भार्या वोस्तु महाभागा ध्रुवं वंशविवर्द्धिनी ॥ युष्माकं
तेजसोर्द्धेन मम चार्द्धेन तेजसः ॥ अस्यामुत्पत्स्यते विद्वान्दक्षो नाम प्रजापतिः ॥ मम चांशेन संयुक्तो युष्मत्तेजोमयेन वै ॥ अग्नि-
नाग्निसमो भूयः प्रजाः संवर्द्धयिष्यति ॥ कंडुर्नाम मुनिः पूर्वमासीद्वेदविदां वरः ॥ सुरम्ये गोमतीतीरे स तेपे परमं तपः ॥ तत्क्षोभा-
य सुरेंद्रेण प्रम्लोचाख्या वराप्सराः ॥ प्रयुक्ता क्षोभयामास तमृषिं सा शुचिस्मिता ॥ क्षोभितः स तया सार्द्धं वर्षाणामधिकं शतं
अतिष्ठन्मंदरद्रोण्यां विषयासक्तमानसः ॥ तं सा प्राह महाभाग गंतुमिच्छाम्यहं दिवं ॥ प्रसाद सुमुखो ब्रह्मन्ननुज्ञां दातुमर्हसि ॥ त-
यैवमुक्तः स मुनिस्तस्यामासक्तमानसः ॥ दिनानि कतिचिद्भद्रे स्थीयतामित्यभाषत ॥ एवमुक्ता ततस्तेन साग्रं वर्षशतं पुनः ॥

र्भर्त्ति जगत्तेन दृश्यते जनैः ॥ शब्दादिसंश्रयो योऽसावापीत्तस्मै भूम्यात्मने नमः ॥ यद्योनिभूतं जगतो बीजं यः सर्वदेहिनां तत्तोयरूपमीशस्य नमामो हर-
रिमेधसः ॥ यो मुखं सर्वदेवानां हव्यभुक् कव्यभुक् तथा ॥ पितॄणां च नमस्तस्मै विष्णवे पावकात्मने ॥ पंचधावस्थितो देहे यश्चेष्टां कुरुतेऽनि-
शं ॥ आकाशयोनिर्भगवांस्तस्मै वाय्वात्मने नमः ॥ अवकाशमशेषाणां भूतानां यः प्रयच्छति ॥ अनंतमूर्तिमाञ्शुद्धस्तस्मै व्योमात्मने नमः
समस्तेंद्रियवर्गस्य यः सदा स्थानमुत्तमं ॥ तस्मै शब्दादिरूपाय नमः कृष्णाय वेधसे ॥ गृह्णाति विषयान्नित्यमिंद्रियात्मा क्षराक्षरः ॥ यस्तस्मै
ज्ञानमूलाय नतास्स्मो हरिमेधसे ॥ गृहीतानिंद्रियैरर्थानात्मने यः प्रयच्छति ॥ अंतःकरणभूताय तस्मै विश्वात्मने नमः ॥ यस्मिन्ननंते
सकलं विश्वं यस्मात्तथोद्गतं ॥ लयस्थानं च यस्तस्मै नमः प्रकृतिधर्मिणे ॥ शुद्धः संलक्ष्यते भ्रांत्या गुणवानिव योऽगुणः ॥ तमात्मरूपिणं देवं
नताः स्म पुरुषोत्तमं ॥ अविकारमजं शुद्धं निर्गुणं यन्निरंजनं ॥ नताः स्म तत्परं ब्रह्म विष्णोर्यत्परमं पदं ॥ अदीर्घह्रस्वमस्थूलमनण्वश्याममलो-
हितं ॥ अस्नेहच्छायमतनुमसक्तमशरीरिणं ॥ अनाकाशमसंस्पर्शमगंधमरसं च यत् ॥ अचक्षुःश्रोत्रमचलमवाक्पाणिममानसं ॥ अ-
नामगोत्रमसुखमतेजस्कमहेतुकं ॥ अभयं भ्रांतिरहितमनिद्रमजरामरं ॥ अरजोऽशब्दममृतमप्लुतं यदसंवृतं ॥ पूर्वापरे न वै यस्मिंस्त-
द्विष्णोः परमं पदं ॥ परमेशित्वगुणवत्सर्वभूतमसंश्रयं ॥ नताः स्म तत्पदं विष्णोर्जिह्वादृग्गोचरं न यत् ॥ पराशर उवाच ॥ एवं प्रचेत-
सो विष्णुं स्तुवंतस्तत्समाधयः ॥ दशवर्षसहस्राणि तपश्चेरुर्महार्णवे ॥ ततः प्रसन्नो भगवांस्तेषामंतर्जले हरिः ॥ ददौ दर्शनमुन्निद्र-
नीलोत्पलदलच्छविः ॥ पतत्रिराजमारूढमवलोक्य प्रचेतसः ॥ प्रणिपेतुः शिरोभिस्तं भक्तिभारावनामितैः ॥ ततस्तानाह भगवान्व्रि-
यतामीप्सितो वरः ॥ प्रसादसुमुखोऽहं वो वरदः समुपस्थितः ॥ ततस्तमूचुर्वरदं प्रणिपत्य प्रचेतसः ॥ यथा पित्रा समादिष्टं प्रजानां

वि॰पु॰
२६

सोवाच ॥ निशम्य तद्वचः सत्यं स मुनिर्नृपनंदन ॥ धिग्मां धिग्मामतीवेत्थं विनिंदात्मानमात्मना ॥ मुनिरुवाच ॥ तपांसि मम नष्टानि
हतं ब्रह्मविदां धनं ॥ हतो विवेकसेना पियो विमोहाय निर्मिता ॥ ऊर्मिषट्कातिगं ब्रह्म ज्ञेयमात्मजयेन मे ॥ मतिरेषा हता येन धिक्तं का
ममहाग्रहं ॥ व्रतानि वेदविद्याश्च निकारणान्यखिलानि च ॥ नरकग्राममार्गोऽयं संगेनापहृतानि मे ॥ निर्भर्त्स्येत्थं स धर्मज्ञः स्वयमात्मा
नमात्मना ॥ तामप्सरसमासीनामिदं वचनमब्रवीत् ॥ गच्छ पापे यथाकामं यत्कार्यं तत्कृतं त्वया ॥ देवराजस्य मत्क्षोभं कुर्वन्त्या भावचे
ष्टितैः ॥ न त्वां करोम्यहं भस्म क्रोधतीव्रेण वह्निना ॥ सतां साप्तपदं मैत्रमुषितोऽयं त्वया सह ॥ अथवा तव को दोषः किं वा कुप्याम्यहं त
व ॥ ममैव दोषो नितरां येनाहमजितेंद्रियः ॥ यया शक्रप्रियार्थिन्या कृतो मे तपसो व्ययः ॥ त्वया धिक्तां महामोहमंजूषां सुजुगुप्सि
तां ॥ सोम उवाच ॥ यावदित्थं स विप्रर्षिस्तां ब्रवीति सुमध्यमां ॥ तावद्गलत्स्वेदजला सा बभूवाति वेपथुः ॥ प्रवेपमानां सततं खिन्नगा
त्रलतां सतीं ॥ गच्छ गच्छेति सक्रोधमुवाच मुनिसत्तम ॥ सा तु निर्भर्त्सिता तेन विनिष्क्रम्य तदाश्रमात् ॥ आकाशगामिनी स्वेदं ममार्ज तरुप
ल्लवैः ॥ वृक्षाद्वृक्षं ययौ बाला तदग्रारुणपल्लवैः ॥ निर्मार्जमाना गात्राणि गलत्स्वेदजलानि वै ॥ ऋषिणा यस्तदा गर्भस्तस्या देहे समाहि
तः ॥ निर्जगाम स रोमांचस्वेदरूपी तदंगतः ॥ तं वृक्षा जगृहुर्गर्भमेकं च कृतुमारुतः ॥ मया चाप्यायितो गोभिः स तदा ववृधे शनैः ॥
वृक्षाग्रगर्भसंभूता मारिषाख्या वरानना ॥ तां प्रदास्यंति वो वृक्षाः कोप एष प्रशाम्यतां ॥ कंडोरपत्यमेवं सा वृक्षेभ्यश्च समुद्गता ॥ म
मापत्यं तथा वायोः प्रम्लोचातनया च सा ॥ स चापि भगवान् कंडुः क्षीणे तपसि सत्तम ॥ पुरुषोत्तमाख्यं मैत्रेय विष्णोरायतनं ययौ ॥ त
त्रैकाग्रमतिर्भूत्वा चकाराराधनं हरेः ॥ ब्रह्मपारमयं कुर्वन् जपमेकाग्रमानसः ॥ ऊर्ध्वबाहुर्महायोगी स्थित्वासौ भूपनंदनाः ॥ प्रचे

बुभुजे विषयान्नन्दीते समर्द्धं महात्मना ॥ अनुज्ञां देहि भगवन् व्रजामि त्रिदिवालयं ॥ उक्तस्तयेति स तु निःश्वस्यायतमित्यभाषत ॥ पुन
र्गतवर्षशते साधिके सा शुभानना ॥ यामीत्याह हरिं वंद्य स्वमरण्यं स्मितशोभनं ॥ उक्तस्तयैवं स मुनिः सुप्रस्तुत्वा प्रणते त्वरणं ॥ प्राह तां
तरुणं शुभ्रु चिरकालं गमिष्यति ॥ तच्छापभीता सुश्रोणी सह तेनाचिरात् पुनः ॥ शतद्वयं किंचिदूनं वर्षाणामवतिष्ठत ॥ गमनाय
महाभागो देवराजनिवेशनं ॥ प्रोक्तः प्रोक्तस्तया तन्व्या स्थीयतामित्यभाषत ॥ तं सा शापभयाद्भीता दाक्षिण्येन च दक्षिणा ॥ प्रोक्ता प्र
णयभंगार्त्तिवेदनीं न जहौ मुनिं ॥ तया च रमतस्तस्य महर्षेस्तदहर्निशं ॥ नवं नवमभूत्प्रेम मन्मथाविष्टचेतसः ॥ एकदा त्वरयायुक्तो निः
श्वक्राम्योटजान्मुनिः ॥ निःक्रामन्तं च कुत्रेति गम्यते प्राह सा शुभा ॥ इत्युक्तः स तया प्राह परिवृत्तमहः शुभे ॥ संध्योपास्तिं करिष्यामि
क्रियालोपो न चाभवेत् ॥ ततः प्रहस्य मुदिता तं सा प्राह महामुनिं ॥ किमद्य सर्वधर्मज्ञ परिवृत्तमहः शुभे ॥ परिवृत्तमहस्तव च
हूनां विप्र वर्षाणां परिणाममहस्तव ॥ गतमेतन्न कुरुते विस्मयं कस्य कथ्यतां ॥ मुनिरुवाच ॥ प्रातस्त्वमागता भद्रे नदीतीरमि
दं शुभम् मया दृष्टासि तन्वंगि प्रविष्टा च ममाश्रमं ॥ इयं च वर्त्तते संध्या परिणाममहर्गतं ॥ उपहासः किमर्थोयं सद्भावः कथ्यतां
मम ॥ प्रम्लोचोवाच ॥ प्रत्यूषस्यागता ब्रह्मन् सत्यमेतन्न तन्मृषा ॥ किं त्वद्य तस्य कालस्य गतान्यब्दशतानि ते ॥ सोम उवाच ॥ ततः स
साध्वसो विप्रस्तां पप्रच्छायतेक्षणां ॥ कथ्यतां भीरु कः कालस्त्वया मे रमतः सह ॥ प्रम्लोचोवाच ॥ सप्तोत्तराण्यतीतानि नववर्षशता
नि ते ॥ मासाश्च षट् तथैवान्यत्समतीतं दिनत्रयं ॥ ऋषिरुवाच ॥ सत्यं भीरु वदस्येतत्परिहासोथवा शुभे ॥ दिनमेकमहं मन्ये
त्व यासार्द्धमिहासितं ॥ प्रम्लोचोवाच ॥ वदिष्याम्यनृतं ब्रह्मन् कथमत्र तवांतिके ॥ विशेषेणाद्य भवता पृष्टा मार्गानुवर्तिना ॥ सो
मि

वि०पु०
२७

27

लोचनं ॥ सोमश्चेयं मारिषा जाता पुत्र्यन् पत्नीनृपात्मजाः ॥ पराशर उवाच ॥ ततः सोमस्य वचनाज्जगृहुस्ते प्रचेतसः ॥ संहृत्य कोपं
वृक्षेभ्यः पत्नीधर्मेण मारिषां ॥ दशभ्यस्तु प्रचेतोभ्यो मारिषायां प्रजापतिः ॥ जज्ञे दक्षो महाभागो यः पूर्वं ब्रह्मणोभवत् ॥ स तु दक्षो म
हाभागः सृष्ट्यर्थं सुमहामते ॥ पुत्रानुत्पादयामास प्रजासृष्ट्यर्थमात्मनः ॥ अवरांश्च वरांश्चैव द्विपदोथ चतुःपदान् ॥ आदेशं
ब्रह्मणः कुर्वन् सृष्ट्यर्थं समुपस्थितः ॥ स सृष्ट्वा मनसा दक्षः पश्चादसृजत स्त्रियः ॥ ददौ स दश धर्माय कश्यपाय त्रयोद
श ॥ कालस्य नयने युक्ताः सप्तविंशतिमिंदवे ॥ तासु देवास्तथा दैत्या नागा गावस्तथा खगाः ॥ गंधर्वाप्सरसश्चैव दानवाद्याश्च
जज्ञिरे ॥ ततः प्रभृति मैत्रेय प्रजा मैथुनसंभवाः ॥ संकल्पाद्दर्शनात्स्पर्शात्पूर्वेषामभवत्प्रजाः ॥ तपोविशेषैः सिद्धानां तदात्यंतत
पस्विनां ॥ मैत्रेय उवाच ॥ अंगुष्ठाद्दक्षिणाद्दक्षः पूर्वं जातः श्रुतं मया ॥ कथं प्रचेतसो भूयः स संभूतो महामुने ॥ एष मे संशयो ब्रह्मन्
सुमहान् हृदि वर्त्तते ॥ यद्दौहित्रः स सोमस्य पुनः श्वशुरतां गतः ॥ पराशर उवाच ॥ उत्पत्तिश्च निरोधश्च नित्यौ भूतेषु सत्तम ॥ ऋष
योत्र न मुह्यन्ति ये चान्ये दिव्यचक्षुषः ॥ युगे युगे भवन्त्येते दक्षाद्या मुनिसत्तम ॥ पुनश्चैवं निरुध्यंते विद्वांस्तत्र न मुह्यति ॥ कानिष्ठ्यं ज्ये
ष्ठमप्येषां पूर्वं नाभिभवद्द्विजोत्तम ॥ तप एव गरीयोभूत्प्रभावश्चैव कारणं ॥ मैत्रेय उवाच ॥ देवानां दानवानां च गंधर्वोरगराक्ष
सां ॥ उत्पत्तिं विस्तरेणेह मम ब्रह्मन्प्रकीर्तय ॥ पराशर उवाच ॥ प्रजाः सृजेति व्यादिष्टः पूर्वं दक्षः स्वयंभुवा ॥ यथा ससर्ज भूता
नि तथा शृणु महामते ॥ मनसा त्वेव भूतानि पूर्वं दक्षोसृजत्तदा ॥ देवानृषीन् सगंधर्वान् सुरान्पन्नगांस्तथा ॥ यदास्य विसृजमा

राम
२७

ब्रह्मउवाच ॥ ब्रह्मापरं मुने श्रोतुमिच्छामः परमं स्तवं ॥ जपता कं तु नादेवो येनाराध्यत केशव ॥ सोमउवाच ॥ परंपरं विष्णुरपारपा
रः परः परेभ्यः परमार्थरूपी ॥ स ब्रह्मपारः परपारभूतः परः पराणामपि पारपारः ॥ स कारणं कारणतस्ततोपि तस्यापि हेतुः परहेतुहेतुः
कार्य्येषु चैवं सह कर्मकर्तृरूपैरशेषैरवतीह सर्वं ॥ ब्रह्म प्रभुर्ब्रह्म स सर्वभूतो ब्रह्म प्रजानां पतिरच्युतोसौ ॥ ब्रह्माव्ययं नित्यमजं
स विष्णुरपक्षयाद्यैरखिलैरसंगि ॥ ब्रह्माक्षरमजं नित्यं यथासौ पुरुषोत्तम ॥ तथा रागादयो दोषाः प्रयांतु प्रशमं मम ॥ सोम
उवाच ॥ एतद्ब्रह्मपराख्यं वै संस्तवं परमं जपन् ॥ अवाप परमां सिद्धिं समाराध्य स केशवं ॥ इयं च मारिषा पूर्वमासीद्या तां ब्र
वीमि वः ॥ कार्य्यगौरवमेतस्याः कथने फलदायिनः ॥ अपुत्रा प्रागियं विष्णुं मृते भर्तरि सत्तमाः ॥ भूपपत्नी महाभागा तोषया
मास भक्तितः ॥ आराधितस्तया विष्णुः प्राह प्रत्यक्षतां गतः ॥ वरं वृणीष्वेति शुभा सा च प्राहात्मवांछितं ॥ भगवन्बालवैध
व्याद्वृथा जन्माहमीदृशी ॥ मंदभाग्या समुत्पन्ना विफला च जगत्पते ॥ भवं पयः श्लाघ्यः मम जन्मनि जन्मनि ॥ त्वत्प्रसा
दात्तथा पुत्राः प्रजापतिसमोस्तु मे ॥ रूपसंपत्समायुक्ता सर्वस्य प्रियदर्शना ॥ अयोनिजा च जायेयं त्वत्प्रसादादधोक्षज
॥ सोमउवाच ॥ तथैवमुक्तो देवेशो हृषीकेश उवाच तां ॥ प्रणामनम्रामुत्थाप्य वरदः परमेश्वरः ॥ देवदेवउवाच ॥ भविष्यं
ति महावीर्य्या एकस्मिन्नेव जन्मनि ॥ प्रख्यातोदारकर्माणो भवत्याः पतयो दश ॥ पुत्रं च सुमहात्मानमतिवीर्यपराक्रमं ॥ प्र
जापतिगुणैर्युक्तमवाप्स्यसि शोभने ॥ वंशानां यस्य कर्तृत्वं जगत्यस्मिन्भविष्यसि ॥ इत्युक्त्वांतर्दधे देवस्तां विशालवि

तो

तुपत

वि॰ पु॰
२८

विश्वायाः साध्या साध्यान्व्यजायत ॥ मरुत्वत्यां मरुत्वन्तो वसोस्तु वसवः स्मृताः ॥ भानोस्तु भानवस्तद्वन्मुहूर्तायास्तु मुहूर्तजाः
॥ लंबायाश्चैव घोषोथ नागवीथी तु यामिजा ॥ पृथिवीविषयं सर्वमरुंधत्यां व्यजायत ॥ संकल्पायास्तु सर्वात्मा जज्ञे
संकल्प एव तु ॥ ये त्वनेकवसुप्राणा देवा ज्योतिःपुरोगमाः ॥ वसवोष्टौ समाख्यातास्तेषां वक्ष्यामि विस्तरं ॥ आपो ध्रुवश्च सो
मश्च धरश्चैवानिलोनलः ॥ प्रत्यूषश्च प्रभासश्च वसवो नामभिः स्मृताः ॥ आपस्य पुत्रो वैतंड्यः श्रमः शांतो ध्वनिस्त
था ॥ ध्रुवस्य पुत्रो भगवान्कालो लोकप्रकालनः ॥ सोमस्य भगवान्वर्चा वर्चस्वी येन जायते ॥ धरस्य पुत्रो द्रविणो हुतह
व्यवहस्तथा ॥ मनोहरायाः शिशिरः प्राणोथ रमणस्तथा ॥ अनिलस्य शिवा भार्या तस्याः पुत्रो मनोजवः ॥ अविज्ञातग
तिश्चैव द्वौ पुत्रावनिलस्य च ॥ अग्निपुत्रः कुमारस्तु शरस्तंबे व्यजायत ॥ तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठतः
॥ अपत्यं कृत्तिकानां तु कार्त्तिकेय इति स्मृतः ॥ प्रत्यूषस्य विदुः पुत्रमृषिं नाम्नाथ देवलं ॥ द्वौ पुत्रौ देवलस्यापि क्षमावन्तौ मनी
षिणौ ॥ बृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मचारिणी ॥ योगसिद्धा जगत्कृत्स्नमसक्ता विचरत्युत ॥ प्रभासस्य तु सा भार्या वसूनामष्टम
स्य च ॥ विश्वकर्मा महाभागस्तस्यां जज्ञे प्रजापतिः ॥ कर्त्ता शिल्पसहस्राणां त्रिदशानां च वर्द्धकिः ॥ भूषणानां च सर्वेषां कर्त्ता शिल्प
वतां वरः ॥ यः सर्वेषां विमानानि देवतानां चकार ह ॥ मनुष्याश्चोपजीवन्ति यस्य शिल्पं महात्मनः ॥ अजैकपादहिर्बुध्न्यस्त्वष्टा रुद्रश्च वी
र्य्यवान् ॥ त्वष्टुश्चाप्यात्मजः पुत्रो विश्वरूपो महायशाः ॥ हरश्च बहुरूपश्च त्र्यंबकश्चापराजितः ॥ वृषाकपिश्च शंभुश्च कपर्दी रैव
तस्तथा ॥ मृगव्याधश्च सर्वश्च कपाली च महामुने ॥ एकादशैते कथिता रुद्रास्त्रिभुवनेश्वराः ॥ शतं त्वेवं समाख्यातं रुद्राणाममि

राम
२८

नस्यो नाभ्यवर्द्धंत ताः प्रजाः ॥ ततः संचिंत्य स पुनः सृष्टिहेतोः प्रजापतिः ॥ मैथुनेनैव धर्मेण सिसृक्षुर्विविधाः प्रजाः ॥ असिक्नीमावहत्क
न्यां वीरणस्य प्रजापतेः ॥ सुतां सुतपसा युक्तां महतीं लोकधारिणीं ॥ अथ पुत्रसहस्राणि वैरिण्यां पंचवीर्यवान् ॥ असिक्न्यां जन
यामास सर्गहेतोः प्रजापतिः ॥ तान्दृष्ट्वा नारदो विप्रः संविवर्द्धयिषून्प्रजाः ॥ संगम्य प्रियसंवादो देवर्षिरिदमब्रवीत् ॥ हे हर्यश्वा म
हावीर्याः प्रजा यूयं करिष्यथ ॥ ईदृशो लक्ष्यते यत्नो भवतां श्रूयतामिदं ॥ बालिशा बत यूयं वै नास्याः जानीत वै भुवः ॥ अंतरू
र्द्धमधश्चैव कथं स्रक्ष्यथ वै प्रजाः ॥ ऊर्द्धं तिर्यगधश्चैव यदाप्रतिहता गतिः ॥ तदा स्म का भुवो नांतं सर्वं द्रक्ष्यथ बालिशाः ॥ पराश
र उवाच ॥ ते तु तद्वचनं श्रुत्वा प्रयाताः सर्वतो दिशं ॥ अद्यापि न निवर्त्तंते समुद्रेभ्य इवापगाः ॥ हर्यश्वेष्वथ नष्टेषु दक्षः प्राचेतसः पुनः ॥
वैरिण्यामथ पुत्राणां सहस्रमसृजत्प्रभुः ॥ विवर्द्धयिषवस्ते तु शबलाश्वाः प्रजाः पुनः ॥ पूर्वोक्तं वचनं ब्रह्मन्नारदेन प्रचोदिताः ॥ अन्यो
न्यमूचुस्ते सर्वे सम्यगाह महामुनिः ॥ भ्रातॄणां पदवी चैव गंतव्या नात्र संशयः ॥ ज्ञात्वा प्रमाणं पृथ्व्याश्च प्रजाः स्रक्ष्यामहे ततः ॥ ते पि ते
नैव मार्गेण प्रयाताः सर्वतो दिशं ॥ अद्यापि न निवर्त्तंते समुद्रेभ्य इवापगाः ॥ ततः प्रभृति वै भ्राता भ्रातुरन्वेषणे द्विज ॥ प्रया
तो नश्यति तथा तन्न कार्यं विजानता ॥ तांश्चापि नष्टान्विज्ञाय पुत्रान्दक्षः प्रजापतिः ॥ क्रोधं चक्रे महाभागो नारदं स शशाप च ॥
सर्गकामस्ततो विद्वान्स मैत्रेय प्रजापतिः ॥ षष्टिं दक्षोऽसृजत्कन्या वैरिण्यामिति नः श्रुतं ॥ ददौ स दश धर्माय कश्यपाय त्रयोदश ॥ सप्त
विंशति सोमाय चतस्रोऽरिष्टनेमिने ॥ द्वे चैव बहुपुत्राय द्वे चैवांगिरसे तथा ॥ कृशाश्वाय च विद्वांसे तासां नामानि मे शृणु ॥ अरुंधती व
सुर्यामी लंबा भानुर्मरुत्वती ॥ संकल्पा च मुहूर्त्ता च साध्या विश्वा च तादृशी ॥ धर्मपत्न्यो दश त्वेतास्तास्वपत्यानि मे शृणु ॥ विश्वेदेवास्तु

ते

वि०पु० २७.

वि

29

तेंद्रपातितैः ॥ शरीरमद्रिकठिनं सर्वचाच्युतचेतसः ॥ विषानलोज्वलमुखायस्यै दैत्यप्रचोदिताः ॥ नांतायसर्पपतयो बभूवुरु
रुतेजसः ॥ शैलैराक्रांतदेहोपियःस्मरन्पुरुषोत्तमं ॥ तत्याजनात्मनःप्राणान्विष्णुस्मरणदंशितः ॥ पतंतमुच्चादवनिर्यमुपेत्य
महामतिं ॥ दधार दैत्यपतिनाक्षिप्तं स्वर्गनिवासिनं ॥ यस्य संशोषको वायुर्देहे दैत्येंद्रयोजितः ॥ अवाप संक्षयं सद्यश्चित्तस्थे
मधुसूदने ॥ विषाणभंगमुन्मत्ता मदहानिं च दिग्गजाः ॥ यस्य वक्षस्थले प्राप्ता दैत्येंद्रपरिणामिताः ॥ यस्य चोत्पादिता कृत्या
दैत्यराजपुरोहितैः ॥ बभूव नांताय पुरा गोविंदासक्तचेतसः ॥ शंबरस्य च मायानां सहस्रमतिमायिनः ॥ यस्मिन्प्रयुक्तं चक्रेण
कृष्णस्य वितथीकृतं ॥ दैत्येंद्रसूदोपहृतं यस्तु हालाहलं विषं ॥ जरयामास मतिमाननविकारममत्सरी ॥ समचे
ताजगत्यस्मिन्यः सर्वेष्वेव जंतुषु ॥ यथात्मनि तथान्यत्र परं मैत्रगुणान्वितः ॥ धर्मात्मा सत्यशौचादिगुणानामाकरस्त
था ॥ उपमानमशेषाणां साधूनां यः सदाभवत् ॥ इति श्रीविष्णुपुराणे प्रथमेंशे पंचदशोध्यायः ॥ मैत्रेय उवाच ॥ कथि
तो भवता वंशो मानवानां महामुने ॥ कारणं चास्य जगतो विष्णुरेव सनातनः ॥ यत्त्वेतद्भगवानाह प्रह्लादं दैत्यसत्तमं ॥ ददाह ना
ग्निर्नास्त्रैश्च क्षुण्णस्तत्याज जीवितं ॥ जगाम वसुधा क्षोभं यत्राब्धिसलिले स्थिते ॥ बंधे बद्धेपि चलति विक्षिप्तांगैः समाहता ॥
शैलैराक्रांतदेहोपि न ममार च यः पुरा ॥ त्वयैवातीव माहात्म्यं कथितं यस्य धीमतः ॥ तस्य प्रभावमतुलं विष्णोर्भक्तिमतो मु
ने ॥ श्रोतुमिच्छामि यस्यैतच्चरितं दीप्ततेजसः ॥ किंनिमित्तमसौ शस्त्रैर्विक्षिप्तो दितिजैर्मुने ॥ किमर्थं चाब्धिसलिले निक्षिप्तो धर्म

राम

२७

तोमाम्॥ अदितिर्दितिर्दनुः काला अरिष्टा सुरसा तथा॥ सुरभिर्विनताचैव ताम्रा क्रोधवशा इरा॥ कद्रूर्मुनिश्च धर्मज्ञ तदपत्यानि मे शृणु॥ पू
र्वमन्वंतरे श्रेष्ठा द्वादशासन्सुरोत्तमाः॥ तुषिता नाम तेन्योन्यमूचुर्वैवस्वतेंतरे॥ उपस्थितेतियशसश्चाक्षुषस्यांतरे मनोः॥ समवायीकृताः
सर्वे समागम्य परस्परं॥ आगच्छत द्रुतं देवा अदितिं संप्रविश्य वै॥ मन्वंतरे प्रसूयामस्तन्नः श्रेयो भवेदिति॥ एवमुक्त्वा तु ते सर्वे चाक्षुष
स्यांतरे मनोः॥ मारीचात्कश्यपाज्जातास्तेदित्या दक्षकन्यया॥ तत्र विष्णुश्च शक्रश्च जज्ञाते पुनरेव च॥ अर्यमा चैव धाता च त्वष्टा पूषा
तथैव च॥ विवस्वान्सविता चैव मित्रो वरुण एव च॥ अंशो भगश्चातितेजा आदित्या द्वादश स्मृताः॥ चाक्षुषस्यांतरे पूर्वमासन्ये तुषि
ताः सुराः॥ वैवस्वतेंतरे ते वै आदित्या द्वादश स्मृताः॥ सप्तविंशति या प्रोक्ताः सोमपत्न्योथ सुव्रताः ———— सर्वा नक्षत्रयोगिन्यस्तन्नाम्न्यश्चै
व ताः स्मृताः॥ तासामपत्यान्यभवन्दीप्तान्यमिततेजसां॥ अरिष्टनेमिपत्नीनामपत्यानीह षोडश॥ बहुपुत्रस्य विदुषश्चतस्रो विद्युतः स्मृताः॥
प्रत्यंगिरसजाः श्रेष्ठाः ऋचो ब्रह्मर्षिसत्कृताः॥ कृशाश्वस्य तु देवर्षेर्देवप्रहरणाः स्मृताः॥ एते युगसहस्रांते जायंते पुनरेव हि॥ सर्वे देवगणास्तात
त्रयस्त्रिंशत्तु छंदजाः॥ तेषामपीह सततं निरोधोत्पत्तिरुच्यते॥ यथा सूर्यस्य मैत्रेय उदयास्तमनाविह॥ एवं देवनिकायास्ते संभवंति युगेयु
गे॥ दितिः पुत्रद्वयं जज्ञे कश्यपादिति नः श्रुतं॥ हिरण्यकशिपुश्चैव हिरण्याक्षश्च दुर्जयः॥ सिंहिका चाभवत्कन्या विप्रचित्तेः परिग्रहः॥ हि
रण्यकशिपोः पुत्राश्चत्वारः प्रथितौजसः॥ अनुह्लादश्च ह्लादश्च प्रह्लादश्चैव बुद्धिमान्॥ संह्लादश्च महावीर्या दैत्यवंशविवर्द्धनाः॥ तेषां
मध्ये महाभागः सर्वत्र समदृग्वशी॥ प्रह्लादः परमां भक्तिं य उवाह जनार्दने॥ दैत्येंद्रदीपितो वह्निः सर्वांगोपचितो द्विज॥ न ददाह च यं विप्र वासु
देवे हृदि स्थिते॥ महार्णवांतः सलिले स्थितस्य चलतो मही॥ चचाल सकला यस्य पाशबद्धस्य धीमतः॥ न भिन्नं विविधैः शस्त्रैः यस्य दै

भागः प्रह्लादो नाम नामतः ॥ पपाठ बालपठ्यानि गुरुगेहे गतोऽर्भकः ॥ एकदा तु स धर्मात्मा जगाम गुरुणा सह ॥ पानासक्तस्य पुरतः पितुर्दै
त्यपतेस्तदा ॥ पादप्रणामावनतं तमुत्थाप्य पिता सुतं ॥ हिरण्यकशिपुः प्राह प्रह्लादममितौजसं ॥ हिरण्यकशिपुरुवाच ॥ पठ्यतां भ
वता वत्स सारभूतं सुभाषितं ॥ कालेनैतावता यत्ते सदोद्युक्तेन शिक्षितं ॥ प्रह्लाद उवाच ॥ श्रूयतां तात वक्ष्यामि सारभूतं तवाज्ञया ॥
समाहितमना भूत्वा यन्मे चेतस्यवस्थितं ॥ अनादिमध्यान्तमजमवृद्धिक्षयमच्युतं ॥ प्रणतोऽस्म्यन्तसन्तानं सर्वकारणकारणं ॥ पराशर
उवाच ॥ एतन्निशम्य दैत्येन्द्रः क्रोधसंरक्तलोचनः ॥ विलोक्य तद्गुरुं प्राह स्फुरिताधरपल्लवः ॥ ब्रह्मबन्धो किमेतत्ते विपक्षस्तुतिसंहि
तं ॥ असारं ग्राहितो बालो मामवज्ञाय दुर्मते ॥ गुरुरुवाच ॥ दैत्येश्वर स्व कोपस्य वशमागन्तुमर्हसि ॥ ममोपदेशजनितं नायं वदति
ते सुतः ॥ हिरण्यकशिपुरुवाच ॥ अनुशास्तोऽसि केनेदृक् वत्स प्रह्लाद कथ्यतां ॥ ममोपदिष्टं नेत्येष प्रब्रवीति गुरुस्तव ॥ प्रह्लाद उवाच ॥
शास्ता विष्णुरशेषस्य जगतो यो हृदि स्थितः ॥ तमृते परमात्मानं तात कः केन शास्यते ॥ हिरण्यकशिपुरुवाच ॥ कोऽयं विष्णुः सुदुर्बुद्धे
यं ब्रवीषि पुनः पुनः ॥ जगतामीश्वरस्येह पुरतः प्रसभं मम ॥ प्रह्लाद उवाच ॥ न शब्दगोचरं यस्य योगिध्येयं परं पदं ॥ यतो यश्च स्वयं वि
श्वं स विष्णुः परमेश्वरः ॥ हिरण्यकशिपुरुवाच ॥ परमेश्वरसंज्ञोऽज्ञ किमन्यो मय्यवस्थिते ॥ तवास्ति मर्तुकामस्त्वं प्रब्रवीषि पुनः पुनः ॥
प्रह्लाद उवाच ॥ न केवलं तात मम प्रजानां स ब्रह्मभूतो भवतश्च विष्णुः ॥ धाता विधाता परमेश्वरश्च प्रसीद कोपं कुरुषे किमर्थं ॥ हिर
ण्यकशिपुरुवाच ॥ प्रविष्टः कोऽस्य हृदये दुर्बुद्धेरतिपापकृत् ॥ येनेदृशान्यसाधूनि वदत्याविष्टमानसः ॥ प्रह्लाद उवाच ॥ न केवलं म
द्धृदयं स विष्णुराक्रम्य लोकानखिलानवस्थितः ॥ स मां त्वदादींश्च पितः समस्तान् समस्तचेष्टासु युनक्ति सर्वगः ॥ हिरण्यकशिपुरुवाच

तत्परः॥ आक्रांतः पर्वतैः कस्मात्कस्माद्दष्टो महोरगैः॥ क्षिप्तः किमद्रिशिखरात्किं वा पावकसंचये॥ दिग्गजानां दंतभूमिं स च कस्मान्नि
रूपितः॥ संशोषकोनिलश्चास्य प्रयुक्तश्च महासुरैः॥ कृत्यां च दैत्यगुरवो युयुजुस्तु महात्मने॥ शंबरस्यापि मायानां सहस्रं किं प्रयुक्त
वान्॥ हालाहलं विषमहो दैत्यसूदैर्महात्मनः॥ कस्माद्दत्तं विनाशाय यज्जीर्णं तेन धीमता॥ एतत्सर्वं महाभाग प्रह्लादस्य महात्मनः
चरितं श्रोतुमिच्छामि महामाहात्म्यसूचकं॥ न हि कौतूहलं तत्र यद्दैत्यैर्न हतो हि सः॥ अनन्यमनसो विष्णुं कः शक्तो हि निपातने॥ तस्मि
न्धर्मपरे नित्यं केशवाराधनोद्यते॥ स्ववंशप्रभवैर्दैत्यैः कर्त्तुं द्वेषोतिदुष्करः॥ धर्मात्मनि महाभागे विष्णुभक्ते विमत्सरे॥ दैतेयैः
प्रहतं यस्मात्तन्ममाख्यातुमर्हसि॥ प्रहरंति महात्मानो विपक्षा अपि नेदृशे॥ गुणैः समन्विते साधौ किं पुनर्यः स्वपक्षजः॥ तदेतत्क
थ्यतां सर्वं विस्तरान्मुनिसत्तम॥ दैत्येश्वरस्य चरितं श्रोतुमिच्छाम्यशेषतः॥ इति श्री विष्णुपुराणे प्रथमेंशे षोडशोध्यायः॥ पराशर
उवाच॥ मैत्रेय श्रूयतां सम्यक् चरितं तस्य धीमतः॥ प्रह्लादस्य सदोदारचरितस्य महात्मनः॥ दितेः पुत्रो महावीर्यो हिरण्यकशि
पुः पुरा॥ त्रैलोक्यं वशमानिन्ये ब्रह्मणो वरदर्पितः॥ इंद्रत्वमकरोद्दैत्यः स चासीत्सविता स्वयं॥ वायुरग्निरपां नाथः सोमश्चाभून्म
हासुरः॥ धनानामधिपः सोभूत्स एवासीत्स्वयं यमः॥ यज्ञभागानशेषांस्तु स स्वयं बुभुजेसुरः॥ देवाः स्वर्गं परित्यज्य तत्त्रासान्मुनि
सत्तम॥ विचेरुरवनौ सर्वे बिभ्राणा मानुषीं तनुं॥ जित्वा त्रिभुवनं सर्वं त्रैलोक्यैश्वर्यदर्पितः॥ उपगीयमानो गंधर्वैर्बुभुजे विषयान्प्रिया
न्॥ पानासक्तं महात्मानं हिरण्यकशिपुं तदा॥ उपासांचक्रिरे सर्वे सिद्धगंधर्वपन्नगाः॥ अवादयन्त जगुश्चान्ये जयशब्दं तथा परे॥ दैत्यराज
स्य पुरतश्चक्रुः सिद्धा मुदान्विताः॥ तत्र प्रनृत्यदप्सरसि स्फाटिकाभ्रमयेसुरः॥ पपौ पानं मुदा युक्तः प्रासादे सुमनोहरे॥ तस्य पुत्रो महा

31

ध्यास्तरणात्त्वां निशीतानि सर्वाणि हि यो मुखानि ॥ पराशर उवाच ॥ अथ दैत्येश्वरं प्रोचुर्भार्गवस्यात्मजा द्विजा ॥ पुरोहिता महात्मा
नः सांत्वसंस्तूयवाग्मिनः ॥ पुरोहिता ऊचुः ॥ राजन्नियम्यतां कोपो बालेत्र तनये निजे ॥ कोपो देवनिकायेषु यत्रैव सफलो यतः ॥ तथा
तथैनं बालं ते शासितारो वयं नृप ॥ यथा विपक्षनाशाय विनीतस्ते भविष्यति ॥ बालत्वं सर्वदोषाणां दैत्यराजास्पदं यतः ॥ ततोत्र कोप
मत्यर्थं योक्तुमर्हसि नार्भके ॥ न त्यक्ष्यति हरेः पक्षमस्माकं वचनाद्यदि ॥ ततः कृत्यां वधायास्य करिष्यामो निवर्तिनीं ॥ पराशर उवाच
एवमभ्यर्थितस्तैस्तु दैत्यराजः पुरोहितैः ॥ दैत्यैर्निःकासयामास पुत्रं पावकसंचयात् ॥ ततो गुरुगृहे बालः स वसन्बालदानवान् ॥
अध्यापयामास मुहुरुपदेशांतरे गुरोः ॥ प्रह्लाद उवाच ॥ श्रूयतां परमार्थो मे दैतेया दितिजात्मजाः ॥ न चान्यथैतन्मंतव्यं नात्र
लोभादिकारणं ॥ जन्म बाल्यं ततः सर्वो जंतुः प्राप्नोति यौवनं ॥ अव्याहतैव भवति ततोनुदिवसं जरा ॥ ततश्च मृत्युमभ्येति जंतुर्दैत्येश्वरा
त्मजाः ॥ प्रत्यक्षं दृश्यते चैव अस्माकं भवतां तथा ॥ मृतस्य च पुनर्जन्म भवत्येतच्च नान्यथा ॥ आगमोयं तथा यच्च नोपादानं विनोद्भ
वः ॥ गर्भवासादि यावत्तु पुनर्जन्मोपपादनं ॥ समस्तावस्थकं तावद्दुःखमेवावगम्यतां ॥ क्षुत्तृष्णोपशमं तद्वच्छीताद्युपशमं सु
खं ॥ मन्यते बालबुद्धित्वाद्दुःखमेव हि तत्पुनः ॥ अत्यंतस्तिमितांगानां व्यायामेन सुखैषिणां ॥ भ्रांतिज्ञानावृताक्षाणां प्रहारोपि सुखा
यते ॥ क्व शरीरमशेषाणां श्लेष्मादीनां महाचयः ॥ क्व कांतिशोभासौंदर्यकमनीयादयो गुणाः ॥ मांसासृक्पूयविण्मूत्रस्नायु
मज्जास्थिसंहतौ ॥ देहे चेत्प्रीतिमान्मूढो नरके भवितापि सः ॥ अग्नेः शीतेन तोयस्य तृषा भक्तस्य च क्षुधा ॥ क्रियते सुखकर्तृत्वं तद्वि
लोमस्य चेतरैः ॥ करोति हे दैत्यसुता यावन्मात्रं परिग्रहं ॥ तावन्मात्रं स एवास्य दुःखं चेतसि यच्छति ॥ यावतः कुरुते जंतुः संबंधा

निःकाम्पत्तामर्थंदुष्टमास्यतां च गुरोर्गृहे ॥ योजितेदुर्म्मतिःकेनविपक्षविदुषस्तत ॥ पराशर उवाच ॥ इत्युक्ते स तदा दैत्यैर्नीतो गुरुगृहं पुनः
जग्राह विद्यामनिशं गुरुशुश्रूषणोद्यतः ॥ कालेतीते च महति प्रह्लादमसुरेश्वरः ॥ समाहूयाब्रवीत्पुत्र गाथा काचित्प्रगीयतां ॥ प्रह्लाद उवाच
यतः प्रधानपुरुषौ यतश्चैतच्चराचरं ॥ कारणं सकलस्यास्य स नो विष्णुः प्रसीदतु ॥ हिरण्यकशिपुरुवाच ॥ दुरात्मा वध्यतामेष नानेनार्थोस्ति
जीवता ॥ स्वपक्षहानिकर्तृत्वाद्यः कुलाङ्गारतां गतः ॥ पराशर उवाच ॥ इत्याज्ञप्तास्ततस्तेन प्रगृहीतमहायुधाः ॥ उद्यतास्तस्य नाशाय दै
त्याः शतसहस्रशः ॥ प्रह्लाद उवाच ॥ विष्णुः शस्त्रेषु युष्मासु मयि चासौ यथा स्थितः ॥ दैतेयास्तेन सत्येन माक्रामंत्वायुधानि मे ॥ पराश
र उवाच ॥ ततस्तैः शतशो दैत्यैः शस्त्रौघैराहतोपि सन् ॥ नावाप वेदनामल्पामभूच्चैव पुनर्नवः ॥ हिरण्यकशिपुरुवाच ॥ दुर्बुद्धे विनिवृ
त्तैष्व वैरिपक्षस्तवादृतः ॥ अभयं ते प्रयच्छामि मातिमूढमतिर्भव ॥ प्रह्लाद उवाच ॥ भयं भयानामपहारिणि स्थिते मनस्यनंते मम कुत्र ति
ष्ठति ॥ यस्मिन्स्मृते जन्मजरांतकादिभयानि सर्वाण्यपयांति तात ॥ हिरण्यकशिपुरुवाच ॥ भो भोः सर्प्पा दुराचारमेनमत्यंतदुर्म्मतिं ॥ विष
ज्वालाकुलैर्वक्त्रैः सद्यो नयत संक्षयं ॥ पराशर उवाच ॥ इत्युक्तास्ते ततः सर्प्पाः कुहकास्तक्षकादयः ॥ अदशन्त समस्तेषु गात्रेष्वति
विषोल्बणाः ॥ स त्वासक्तमतिः कृष्णे दश्यमानो महोरगैः ॥ न विवेदात्मनो गात्रं तत्स्मृत्याह्लादसंस्थितः ॥ सर्प्पा ऊचुः ॥ दंष्ट्रा विशीर्णा
मणयः स्फुटंति फणेषु तापो हृदयेषु कंपः ॥ नास्य त्वचः स्वल्पमपीह भिन्नं प्रसाधि दैत्येश्वर कार्यमन्यत् ॥ हिरण्यकशिपुरुवाच ॥
ज्वाल्यतामस्य वह्निरपसर्प्पत दिग्गजाः ॥ वायो समेधयाग्निं त्वं दह्यतामेष पापकृत् ॥ पराशर उवाच ॥ महाकाष्ठचयच्छन्नमसुरेंद्रसु
तं ततः ॥ प्रज्वाल्य दानवा वह्निं ददहुः स्वामिनोदिताः ॥ प्रह्लाद उवाच ॥ तातैष वह्निः पवनेरितोपि मां न दहत्यत्र समंततोहं ॥ पश्यामि प

विष्णु
३२

32

दंभेरैन विचरत्तोः ॥ समुत्सृज्यासुरं भावं तस्मात्यूयं तथा वयं ॥ तथा यत्नं करिष्यामो यथा प्राप्स्याम निर्वृतिं ॥ या नाग्निना न चार्कीण
नेंदुना नैव वायुना पर्जन्यवरुणाभ्यां च न सिद्धैर्न च राक्षसैः ॥ न यक्षैर्न च दैत्येंद्रैर्नोरगैर्न च किन्नरैः ॥ न मनुष्यैर्न पशुभिर्दोषैर्नैवात्म
संभवैः ॥ ज्वराक्षिरोगातीसारप्लीहगुल्मादिकैस्तथा ॥ द्वेषेर्ष्यामत्सराद्यैर्वा रागलोभादिभिः क्षयं ॥ न चान्यैर्नीयते कैश्चिन्नित्या यात्यं
तनिर्मला ॥ तामाप्नोति नरः कृत्वा केशवे हृदि संस्थिते ॥ असारसंसारविवर्तनेषु मा यात तोषं प्रसभं ब्रवीमि ॥ सर्वत्र दैत्याः समतामु
पेत्य समत्वमाराधनमच्युतस्य ॥ तस्मिन्प्रसन्ने किमिहास्त्यलभ्यं धर्मार्थकामैरलमल्पकास्ते ॥ समाश्रिताद्ब्रह्मतरोरनंतान्निःसंशयं
प्राप्स्यथ वै महत्फलं ॥ इति श्री विष्णुपुराणे प्रथमेंऽशे प्रह्लादानुशासनं नाम सप्तदशोऽध्यायः ॥ पराशर उवाच ॥ तस्यैवं दानवाः
चेष्टां दृष्ट्वा दैत्यपतेर्भयात् ॥ आचचख्युः स चोवाच सूदानाहूय सत्वरः ॥ हिरण्यकशिपुरुवाच ॥ हे सूदा मम पुत्रोऽसावन्येषा
मपि दुर्मतिः ॥ कुमार्गदेशको दुष्टो हन्यतामविलंबितं ॥ हालाहलं विषं तस्य सर्वभक्षेषु दीयतां ॥ अविज्ञातमसौ पापो हन्यतां मा विचार्य
तां ॥ पराशर उवाच ॥ ते तथैव ततश्चक्रुः प्रह्लादाय महात्मने ॥ विषदानं यथाज्ञप्तं पित्रा तस्य महात्मनः ॥ हालाहलं विषं घोरमनंतो
च्चारणेन सः ॥ अभिमंत्र्य सहान्नेन मैत्रेय बुभुजे तदा ॥ अविकारं स तद्भुक्त्वा प्रह्लादः स्वस्थमानसः ॥ अनंतख्यातिनिर्वीर्यं जरयामास
तद्विषं ॥ ततः सूदा भयत्रस्ता जीर्णं दृष्ट्वा महद्विषं ॥ दैत्येश्वरमुपागम्य प्रणिपत्येदमब्रुवन् ॥ सूदा ऊचुः ॥ दैत्यराज विषं दत्तमस्मा
भिरतिभीषणं ॥ जीर्णं तेन सहान्नेन प्रह्लादेन सुतेन ते ॥ हिरण्यकशिपुरुवाच ॥ त्वर्यतां त्वर्यतां हे हे सद्यो दैत्यपुरोहिताः ॥ कृत्यां तस्य

३२

न्मनसः प्रियान् ॥ तावंतो स्य निखन्यंते हृदये शोकशंकवः ॥ यद्यद्गृहे तन्मनसि यत्र तत्रावतिष्ठतः ॥ नाशदाहापहरणं तत्र तत्रैव तिष्ठति ॥ जन्मन्यत्र महद्दुःखं म्रियमाणस्य चापि तत् ॥ यातनासु यमस्योग्रं गर्भसंक्रमणेषु च ॥ गर्भे च सुखलेशोपि भवद्भिरनुमीयते ॥ यदि तत्कथ्यतामेवं सर्वं दुःखमयं जगत् ॥ तदेवमतिदुःखानामास्पदेत्र भवार्णवे ॥ भवतां कथ्यते सत्यं विष्णुरेकः परायणं ॥ मा जानीत वयं बाला देही देहेषु शाश्वतः ॥ जरायौवनजन्माद्या धर्म्मा देहस्य नात्मनः ॥ बालोहं तावदिच्छातो यतिष्ये श्रेयसे युवा ॥ युवाहं वार्द्धके प्राप्ते करिष्याम्यात्मनो हितं ॥ वृद्धोहं मम कर्माणि समस्तानि न गोचरे ॥ किं करिष्यामि मंदात्मा समर्थेन न यत्कृतं ॥ एवं दुराशया क्षिप्तमानसः पुरुषः सदा ॥ श्रेयसोभिमुखं याति न कदाचित्पिपासितः ॥ बाल्ये क्रीडनकासक्ता यौवने विषयोन्मुखाः ॥ अज्ञानयंत्यशक्त्या च वार्द्धकं समुपस्थितं ॥ तस्माद्बाल्ये विवेकात्मा यतेत श्रेयसे सदा ॥ बाल्ययौवनवृद्धाद्यैर्देहभावैरसंयुतः ॥ तदेतद्वो मयाख्यातं यदि जानीत नानृतं ॥ तदस्मत्प्रीतये विष्णुः स्मर्य्यतां बंधमुक्तिदः ॥ प्रयासः स्मरणे कोस्य स्मृतो यच्छति शोभनं ॥ पापक्षयश्च भवति स्मरतां तमहर्निशं ॥ सर्वभूतस्थिते तस्मिन्मतिर्मैत्री दिवानिशं ॥ भवतां जायतामेवं सर्वक्लेशान्प्रहास्यथ ॥ तापत्रयेणाभिहतं यदेतदखिलं जगत् ॥ तदा शोच्येषु भूतेषु द्वेषं प्राज्ञः करोति कः ॥ अथ भद्राणि भूतानि हीनशक्तिरहं परं ॥ मुदं तथापि कुर्वीत हानिर्द्वेषफलं यतः ॥ बद्धवैराणि भूतानि द्वेषं कुर्वंति चेत्ततः ॥ सुशोच्यान्यतिमोहेन व्याप्तानीति मनीषिणां ॥ एते भिन्नदृशां दैत्या विकल्पाः कथिता मया ॥ कृत्वाभ्युपगमं तत्र संक्षेपः श्रूयतां मम ॥ विस्तारः सर्वभूतस्य विष्णोर्विश्वमिदं जगत् ॥ द्रष्टव्यमात्मवत्तस्मा

वि॰पु॰ ३३

न्तुः कः केन रक्ष्यते हंति रक्षति चैवात्मा ह्यसत्साधु समाचरन् ॥ पराशर उवाच ॥ इत्युक्तास्ते ततः क्रुद्धा दैत्यराजपुरोहिताः कृत्यामुत्पादयाम्
आसुर्ज्वालामालोज्ज्वलाननां अतिभीमा समागम्य पादन्यासक्षतक्षितिः शूलेन साधुसंक्रुद्धा तं जघानाशु वक्षसि तत्तस्य हृदयं
प्राप्य शूलं बालस्य दीप्तिमत् जगाम खंडितं भूमौ तत्रापि शतधा गतं यत्रानपायी भगवान्हृद्यास्ते हरिरीश्वरः भंगो भवति व
ज्रस्य तत्र शूलस्य का कथा अपापे तत्र पापैश्च पातिता दैत्ययाजकैः तानेव सा जघानाशु कृत्या नाशं जगाम च कृत्यया दह्य
मानांस्तान्विलोक्य स महामतिः त्राहि कृष्णेत्यनंतेति वदन्नभ्यवपद्यत ॥ प्रह्लाद उवाच ॥ सर्वव्यापिन्जगद्रूप जगत्स्रष्टर्जनार्दन
पाहि विप्रानिमानस्माद्दुःसहान्मंत्रपावकात् यथा सर्वेषु भूतेषु सर्वव्यापी जगद्गुरुः विष्णुरेव तथा सर्वे जीवंत्वेते पुरोहिताः
यथा सर्वगतं विष्णुं मन्यमानोऽनपायिनं चिंतयाम्यरिपक्षेऽपि जीवंत्वेते पुरोहिताः ये हंतुमागता दत्तं यैर्विषं यैर्हुताशनः यैर्दिग्गजैरहं क्षु
ण्णो दष्टः सर्पैश्च यैरपि तेष्वहं मित्रभावेन समः पापोऽस्मि न क्वचित् यथा तेनाद्य सत्येन जीवंत्वसुरयाजकाः ॥ पराशर उवाच ॥ इत्युक्तास्

म

तेन ते सर्वे संस्पृष्टाश्च निरामयाः समुत्तस्थुर्द्विजा भूयस्तमूचुः प्रश्रयान्वितं ॥ पुरोहिता ऊचुः ॥ दीर्घायुरप्रतिहतो बलवीर्यसमन्वितः
पुत्रपौत्रधनैश्वर्यैर्युक्तो वत्स भवोत्तम ॥ पराशर उवाच ॥ इत्युक्त्वा तं ततो गत्वा यथावृत्तं पुरोहिताः दैत्यराजाय सकलमाचचक्षुर्म
हामुने ॥ इति श्रीविष्णुपुराणे प्रथमेंऽशे प्रह्लादचरितेऽष्टादशोऽध्यायः ॥ पराशर उवाच ॥ हिरण्यकशिपुः श्रुत्वा तां कृत्यां वितथीकृ
तां आहूय पुत्रं पप्रच्छ प्रभावस्यास्य कारणं ॥ हिरण्यकशिपुरुवाच ॥ प्रह्लाद सुप्रभावोऽसि किमेतत्ते विचेष्टितं एतन्मंत्रादिजनितमुत स
हजं तव ॥ पराशर उवाच ॥ एवं पृष्टस्तदा पित्रा प्रह्लादोऽसुरबालकः प्रणिपत्य पितुः पादाविदं वचनमब्रवीत् न मंत्रादिकृतं तात न च

राम ३३

प्रह्लाद उवाच

विनाशायोत्पादयत्नमचिरं ॥ पराशर उवाच ॥ सकाशमागम्य ततः प्रह्लादस्य पुरोहिताः ॥ सामपूर्वमथोचुस्ते प्रह्लादं विनयान्वितं ॥ पुरो
हिता ऊचुः जातस्त्रैलोक्यविख्यात आयुष्मान्ब्रह्मणः कुले ॥ दैत्यराजस्य तनयो हिरण्यकशिपोर्भवान् ॥ किं देवैः किमनंतेन किमन्येन तवा
श्रयाः ॥ पिता ते सर्वलोकानां त्वं तथैव भविष्यति ॥ तस्मात्परित्यजैनां त्वं विपक्षस्तुतिसंहितां ॥ वाच्यः पिता समस्तानां गुरूणां परमो गुरुः ॥ प्रह्ला
द उवाच ॥ एवमेतन्महाभागाः श्लाघ्यमेतन्महाकुलं मारीचेस्सकलेप्यस्मिन्त्रैलोक्ये कोन्यथा वदेत् ॥ पिता च मम सर्वस्मिञ्जगत्यु
त्कृष्टचेष्टितः ॥ एतदप्यवगच्छामि सत्यमत्रापि नानृतं ॥ गुरूणामपि सर्वेषां पिता परमको गुरुः ॥ यदुक्तं भ्रांतिस्तत्रापि स्वल्पापि हि
न विद्यते ॥ पिता गुरुर्न संदेहः पूजनीयः प्रयत्नतः ॥ तत्रापि नापराध्यामीत्येवं मनसि मे स्थितं ॥ यदेतत्किमनंतेनेत्युक्तं युष्माभिरीदृशं
॥ को ब्रवीति यथायुक्तं किं तु नैतद्वचोर्थवान् ॥ इत्युक्त्वा सोभवन्मौनी तेषां गौरवयंत्रितः ॥ प्रहस्य च पुनः प्राह किमनंतेन साध्विति
साधु भो किमनंतेन साधु भो गुरवो मम ॥ श्रूयतां यदनंतेन यदि खेदं न यास्यथ ॥ धर्मार्थकाममोक्षाख्याः पुरुषार्था उदाहृताः ॥ चतु
ष्टयमिदं यस्मात्तस्मात्किं किमिदं वृथा ॥ मरीचिमिश्रैर्दक्षाद्यैस्तथैवान्यैरनंततः ॥ धर्मः प्राप्तस्तथैवान्यैरर्थः कामस्तथापरैः ॥ तत्तत्त्ववेदिनो
भूत्वा ज्ञानध्यानसमाधिभिः ॥ अवापुर्मुक्तिमपरे पुरुषा ध्वस्तबंधनाः ॥ संपदैश्वर्यमाहात्म्यज्ञानसंततिकर्मणां ॥ विमुक्तेश्चैकतो लभ्यं मू
लमाराधनं हरेः ॥ यतो धर्मार्थकामाख्यं मुक्तिश्चापि फलं द्विजाः ॥ तेनापि हि किमित्येवमनंतेन किमुच्यते ॥ किं चात्र बहुनोक्तेन भवंतो गुरवो
मम ॥ वदंतु साधु वासाधु विवेकोस्माकमल्पकः ॥ पुरोहिता ऊचुः ॥ दह्यमानस्त्वमस्माभिरग्निना बाल रक्षितः ॥ भूयो न वक्ष्यसीत्येवं नैव ज्ञातो

स्यबुद्धिमान् ॥ यदास्मद्वचनान्मोहग्राहं न त्यजते भवान् ॥ ततः कृत्यां विनाशाय तव स्रक्ष्याम दुर्मते ॥ प्रह्लाद उवाच ॥ कः केन हन्यते जंतुर्जं

वि॰पु॰
३४

जनार्दनः क्रुद्धः समीपेयोप्यवनः हंयं क्षीणासु सर्वमायासु पवने चक्षयं गते॥ जगाम सोपि भवनं गुरोरेव महामतिः॥ अहन्यहन्यथाचार्यो

नी तिराज्यफलप्रदं॥ ग्राहयामास तं बालं राज्ञामुशनसा कृतां॥ गृहीतनीतिशास्त्रं तं विनीतं च यदा गुरुः॥ मेने तदैनं तत्पित्रे

कथयामास शिक्षितं॥ आचार्य उवाच॥ गृहीतनीतिशास्त्रोसौ पुत्रो दैत्यपते कृतः॥ प्रह्लादस्तत्त्वतो वेत्ति भार्गवेयत्प्रदीरितं॥

हिरण्यकशिपुरुवाच॥ शत्रुमित्रेषु वर्त्तेत कथमरिवर्गेषु भूपतिः॥ प्रह्लाद त्रिषु कालेषु मध्यस्थेषु कथं चरेत्॥ कथं मंत्रिष्वमात्येषु वा

ह्येष्वभ्यंतरेषु च॥ चारेषु पौरवर्गेषु शंकितेष्वितरेषु च॥ कृत्याकृत्यविधानं च दुःखदाविकसाधने॥ प्रह्लाद कथ्यतां सम्यक्क्रिया

कंटकनशोधने॥ एतच्चान्यच्च सकलमधीतं भवता यथा॥ तथा मे कथ्यतां ज्ञातुं तवेच्छामि मनोगतम्॥ पराशर उवाच॥ प्रणिपत्य पि

तुः पादौ तदा प्रश्रयभूषणः॥ प्रह्लादः प्राह दैत्येंद्रं कृतांजलिपुटस्तथा॥ प्रह्लाद उवाच॥ ममोपदिष्टं सकलं गुरुणा नात्र संशयः॥

गृहीतं च मया किंतु न सदेतन्मतं मम॥ सामचोपप्रदानं च भेददण्डौ तथापरौ॥ उपायाः कथिताः सर्वे मित्रादीनां च साधने॥ ता

नेवाहं न पश्यामि मित्रादींस्तात मा क्रुध॥ साध्याभावे महाबाहो साधनैः किं प्रयोजनं॥ सर्वभूतात्मके तात जगन्नाथे जगन्मये॥ परमा

त्मनि गोविंदे मित्रामित्रकथा कुतः॥ त्वय्यस्ति भगवान्विष्णुर्मयि चान्यत्र चास्ति सः॥ यतस्ततो यं मित्रं मे शत्रुश्चेति पृथक्कुतः॥ तदेभिरल

मत्यर्थं दुष्टारंभोक्तारंभो विस्तरैः॥ यः विद्यांतर्गतैर्यत्नः कर्तव्यस्तात शोभने॥ विद्याबुद्धिरविद्यायामज्ञानात्तात जायते॥ बालो

ग्निं किं न खद्योतमसुरेश्वर मन्यते॥ तत्कर्म यन्न बंधाय सा विद्या या विमुक्तये॥ आयासायापरं कर्म विद्यान्या शिल्पनैपुणं॥

तदेतदवगम्याहमसारं सारमुत्तमम्॥ निशामय महाभाग प्रणिपत्य ब्रवीमि ते॥ न चिंतयति को राज्यं को धनं नाभिवांछति॥ तथा

34

नि

ने

राम
३४

नैसर्गिकं मम॥ तथा भाव एष सामान्य यस्मात्सच्युतो हृदि॥ अन्येषां यो न पापानि चिंतयत्यात्मनो यथा॥ तस्य पापागमस्तात हेत्वभावान्न विद्य
ते॥ कर्मणा मनसा वाचा परपीडां करोति यः॥ तद्बीजं जन्म फलति प्रभूतं तस्य चाशुभं॥ सोहं न पापमिच्छामि न करोमि वदामि वा॥ चिंतयन् सर्वभू
तस्थमात्मन्यपि च केशवं॥ शारीरं मानसं दुःखं दैवं भूतभवं तथा॥ सर्वत्र शुभचित्तस्य तस्य मे जायते कुतः॥ एवं सर्वेषु भूतेषु भक्तिर
व्यभिचारिणी॥ कर्तव्या पंडितैर्ज्ञात्वा सर्वभूतमयं हरिं॥ पराशर उवाच॥ इति श्रुत्वा स दैत्येंद्रः प्रासादशिखरे स्थितः॥ क्रोधांधकारित
मुखः प्राह दैतेयकिंकरान्॥ दुरात्मा क्षिप्यतामस्मात्प्रासादाच्छतयोजनात्॥ गिरिपृष्ठे पतत्वस्मिन् शिलाभिन्नांगसंहतिः॥ ततस्तं च
क्षिपुः सर्वे बालं दैतेयदानवाः॥ पपात सोप्यधः क्षिप्तो हृदयेनोद्वहन् हरिं॥ पतमानं जगद्धात्री जगद्धातरि केशवे॥ भक्तियुक्तं दधा
रैनमुपसंगम्य मेदिनी॥ ततो विलोक्य तं स्वस्थमविशीर्णास्थिपंजरं॥ हिरण्यकशिपुरुवाच॥ नास्माभिः शक्यते हंतुमसौ दुर्बुद्धिबालकः॥
मायां वेत्ति भवांस्तस्मान्मायया एनं निषूदय॥ शंबर उवाच॥ सूदयाम्येष दैत्येंद्र पश्य मायाबलं मम॥ सहस्रमत्र मायानां पश्य को
टिशतं तथा॥ पराशर उवाच॥ ततः स ससृजे मायां प्रह्लादे शंबरोसुरः॥ विनाशमिच्छन् दुर्बुद्धिः सर्वत्र समदर्शिनि॥ समाहितमतिर्भू
त्वा शंबरेपि विमत्सरः॥ मैत्रेय सोपि प्रह्लादः सस्मार मधुसूदनं॥ ततो भगवता तस्य रक्षार्थं चक्रमुत्तमं॥ आजगाम समाज्ञप्तं ज्वालामालि
सुदर्शनं॥ तेन मायासहस्रं तच्छंबरस्याशुगामिना॥ बालस्य रक्षता देहमेकैकं च विशोधितं॥ संशोषकं तथा वायुं दैत्येंद्रस्त्विदम
ब्रवीत्॥ शीघ्रमेष ममादेशाद्दुरात्मा नीयतां क्षयं॥ तथेत्युक्त्वा तु सोप्येनं विवेश पवनो लघुः॥ शीतोतिरूक्षः शोषाय तद्देहस्यातिदुः
सहः॥ तेनाविष्टमथात्मानं स बुद्ध्वा दैत्यबालकः॥ हृदयेन महात्मानं दधार धरणीधरं॥ हृदयस्थस्ततस्तस्य तं वायुमतिभीषणं॥ पपौ

हरापक० वीचप ५ ह

ते
परा प्र
हं
म
स्या

न

देवानू

हानवाप्नुवंतिसंतंमहोदयो॥ आकुलस्त्वयनं चक्रुर्योऽस्मां नातिसहस्रशः॥ संचि तःपर्वतैरनास्रमुद्रस्थमहामतिः॥ तु
ष्टावाह्निकवेलायामेकाग्रमतिरच्युतं॥ प्रह्लाद उ० नमस्ते पुंडरीकाक्ष नमस्ते पुरुषोत्तम॥ नमस्ते सर्वलोका
त्मन्नमस्ते तिग्मचक्रिणे॥ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च॥ जगद्धिताय कृष्णाय गोविंदाय नमः॥ ब्रह्मत्वे सृ
जते विश्वं स्थितौ पालयते पुनः॥ रुद्ररूपाय कल्पांते नमस्तुभ्यं त्रिमूर्तये॥ देवा यक्षाः सुराः सिद्धाः नागा गंधर्वकिन्नराः॥
पिशाचा राक्षसाश्चैव मनुष्याः पशवस्तथा॥ पक्षिणः स्थावराश्चैव पिपीलिकसरीसृपाः॥ भूम्यापोग्निर्नभो वायुः शब्दः स्पर्शस्त
थारसः॥ रूपं गंधो मनो बुद्धिरात्मा कालस्तथा गुणाः॥ एतेषां परमार्थश्च सर्वमेतत्त्वमच्युत॥ विद्याविद्ये भवान्सत्यमस
त्यं त्वं विषामृते॥ प्रवृत्तं च निवृत्तं च कर्म वेदोदितं भवान्॥ समस्तकर्मभोक्ता च कर्मोपकरणानि॥ त्वमेव विष्णो सर्वाणि सर्व
कर्मफलं च यत्॥ मय्यन्यत्र तथाशेषभूतेषु भुवनेषु च॥ तवैव व्याप्तिरैश्वर्यगुणसंसूचिकी प्रभो॥ त्वां योगिनश्चिंतयंति त्वां
यजंति च यज्विनः॥ हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृक्॥ रूपं महत्ते स्थितमत्र विश्वं ततः सूक्ष्मं जगदेकईशः॥ रूपाणि
सर्वाणि च भूतभेदास्तेष्वंतरात्माख्यमतीवसूक्ष्मं॥ तस्माच्च सूक्ष्मादिविशेषणानामगोचरे यत्परमात्मरूपं॥ किम
प्यचिंत्यं तव रूपमस्ति तस्मै नमस्ते पुरुषोत्तमाय॥ सर्वभूतेषु सर्वात्मन्या शक्तिरपरा तव॥ गुणाश्रया नमस्तस्यै
शाश्वतायै सुरेश्वर॥ यातीतगोचरा वाचां मनसां चाविशेषणा॥ ज्ञानिज्ञानपरिछेद्या वंदे चेश्वरीं परां॥ ॐ नमो वा
सुदेवाय तस्मै भगवते सदा॥ व्यतिरिक्तं न यस्यास्ति व्यतिरिक्तोऽखिलस्य यः॥ नमस्तस्मै नमस्तस्मै नमस्तस्मै मह

३५

धृत्तंचनि

मैमप्यन्य
८

वे०

तत्क्षतसूक्ष्मं

ष्यापि भाग्यमेवैतदुत्तमं प्राप्यते नरैः ॥ सर्व एव महाभाग महत्त्वं प्रति सोद्यमाः ॥ तथापि पुंसां भाग्यानि नोद्यमा भूतिहेतवः ॥ जन्मकर्म
विवेकानामसस्त्राणामपि प्रभो ॥ भाग्यभोज्यानि राज्यानि संत्यनीतिमतामपि ॥ तस्माद्यतेत दुःखोदरक इच्छन्महतीं श्रियं ॥ यतितव्यं स
मत्वे च निर्वाणमपि चेच्छता ॥ देवा मनुष्याः पशवः पक्षिवृक्षसरीसृपाः ॥ रूपमेतदनंतस्य विष्णोर्भिन्नमिव स्थितं ॥ एतद्विजानता सर्वं ज
गत्स्थावरजंगमं ॥ द्रष्टव्यात्मवद्विष्णुर्यतोयं विश्वरूपधृक् ॥ एवं ज्ञाते स भगवाननादिः परमेश्वरः ॥ प्रसीदत्यच्युतस्तस्मिन्प्रस
न्ने क्लेशसंक्षयः ॥ पराशर उवाच ॥ एतच्छ्रुत्वा तु कोपेन समुत्थाय वरासनात् ॥ हिरण्यकशिपुः पुत्रं पदा वक्षस्यताडयत् ॥ उवा
च वेपमानः कोपेन सामर्षः प्रज्वलन्निव ॥ निष्पिष्य पाणिना पाणिं हंतुकामो जगद्यथा ॥ हिरण्यकशिपुरुवाच ॥ हे विप्रचित्ते हे रा
हो हे बलैष महार्णवे ॥ नागपाशैर्दृढैर्बद्ध्वा क्षिप्यतां मा विलंब्यतां ॥ अन्यथा सकला लोकास्तथा दैतेयदानवाः ॥ अनुयास्यंति मू
ढस्य मतमस्य दुरात्मनः ॥ बहुशो वारितोस्माभिरयं पापस्तथाप्यरेः ॥ स्तुतिं करोति दुष्टात्मा वध एवोपकारकः ॥ पराशर उवाच
ततस्ते सत्वरा दैत्या बद्ध्वा तं नागबंधनैः ॥ भर्तुराज्ञां पुरस्कृत्य चिक्षिपुः सलिलार्णवे ॥ ततश्चचाल चलता प्रह्लादेन महार्णवः ॥ उ
द्वेलोभूत्परं क्षोभमुपेत्य च समंततः ॥ भूर्लोकमखिलं दृष्ट्वा प्लाव्यमानं महीधरा ॥ हिरण्यकशिपुर्दैत्यानिदमाह महामते ॥ हिरण्य
कशिपुरुवाच ॥ दैतेयाः सकलैः शैलैरत्रैव वरुणालये ॥ निश्छिद्रैः सर्वशः सर्वैश्चीयतामेष दुर्मतिः ॥ नाग्निर्दहति नैवायं शस्त्रै
श्छिन्नो नोरगैः क्षय नीतो न वातेन न विषेण न कृत्यया ॥ न मायाभिर्न चैवोच्चात्पातितो न च दिग्गजैः ॥ बालोयं ति[illegible]
यं नानेनार्थोस्ति जीवता ॥ तदेष तोयमध्ये तु समाक्रांतो महीधरैः ॥ तिष्ठत्वब्दसहस्रांतं प्राणान्हास्यति दुर्मतिः ॥ ततो दैत्या

स्वपभहानिकर्पिचाय:क[illegible]गत

वि॰पु॰
३६
36

लक्षितः॥ एकानेक नमस्तुभ्यं वासुदेवादिकारण॥ यः स्थूलसूक्ष्मः प्रकटः प्रकाशो यः सर्वभूतो न च सर्वभूतः॥ विश्वं यतश्चै
तदविश्वहेतोर्नमोऽस्तु तस्मै पुरुषोत्तमाय॥ पराशर उवाच॥ तस्य तच्चेतसो देवः स्तुतिमित्थं प्रकुर्वतः॥ आविर्बभूव भगवान्पीतां ं
बरधरो हरिः॥ ससंभ्रमस्तमालोक्य समुत्थायाकुलाक्षरम्॥ नमोऽस्तु विष्णवेत्येतद्व्याजहारासकृद्द्विजः॥ प्रह्लाद उवाच॥ देव प्र
पन्नार्तिहर प्रसादं कुरु केशव॥ अवलोकनदानेन भूयो मां पावयाच्युत॥ श्रीभगवानुवाच॥ कुर्वतस्ते प्रसन्नोऽहं भक्तिमव्यभि
चारिणीम्॥ यथाभिलषितो मत्तः प्रह्लाद व्रियतां वरः॥ प्रह्लाद उवाच॥ नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम्॥ तेषु तेष्वच्युता
भक्तिरच्युतास्तु सदा त्वयि॥ या प्रीतिरविवेकानां विषयेष्वनपायिनी॥ त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु॥ श्रीभगवानु
वाच॥ मयि भक्तिस्तवास्त्येव भूयोऽप्येवं भविष्यति॥ वरस्तु मत्तः प्रह्लाद व्रियतां यस्तवेप्सितः॥ प्रह्लाद उवाच॥ मयि द्वेषा
नुबन्धोऽभूत्संस्तुतावुद्यते तव॥ मत्पितुस्तत्कृतं पापं देव तस्य प्रणश्यतु॥ शस्त्राणि पातितान्यङ्गे क्षिप्तो यच्चाग्निसंहतौ॥
दंशितश्चोरगैर्दत्तं यद्विषं मम भोजने॥ बद्ध्वा समुद्रे यत्क्षिप्तो यच्चितोऽस्मि शिलोच्चयैः॥ अन्यानि चाप्यसाधूनि यानि यानि लो
कृतानि मे॥ त्वयि भक्तिमतो द्वेषादघं तत्संभवं च यत्॥ त्वत्प्रसादात्प्रभो सद्यस्तेन मुच्येत मे पिता॥ श्रीभगवानुवाच॥
प्रह्लाद सर्वमेतत्ते मत्प्रसादाद्भविष्यति॥ अन्यं च ते वरं दद्मि व्रियतामसुरात्मज॥ प्रह्लाद उवाच॥ कृतकृत्योऽस्मि भगवन् राम
वरेणानेन यत्त्वयि॥ भवित्री त्वत्प्रसादेन भक्तिरव्यभिचारिणी॥ धर्मार्थकामैः किं तस्य मुक्तिस्तस्य करे स्थिता॥ समस्तजग ३६

त्रिरूपायशेषस्य पश्यन्तीशः स्वभावभुमंतं सर्वसाक्षिणं विघ्नं नमस्ये यस्मिन्त्वां नमोस्तु
विश्वमयेतस्मै यस्याभिन्नमिदं जगत् ध्येयः स जगतामाद्यः प्रसीदतु समेऽव्ययः यत्रोतमेतत्प्रोतं च अयं पूर्वं १ विश्वम सपतन्य अधः
तः सर्व

त्मने॥ नामरूपं न यस्यैको योस्तित्वेनोपलभ्यते॥ यस्यावताररूपाणि समर्च्चंति दिवौकसः॥ तं परं रूपं नमस्तस्मै महात्म
ने॥ योन्तस्तिष्ठ॥ सप्रसीदतु मे हरिः॥ नमोस्तु विश्ववेतस्मै नमस्तस्मै पुनः पुनः॥ यत्र सर्वं यतः सर्वं यः सर्वं सर्वसंश्रयः॥ सर्वगत्वा
दनंतस्य स एवाहमवस्थितः॥ मत्तः सर्वमहं सर्वं मयि सर्वं सनातने॥ अहमेवाक्षयो नित्यः परमात्मात्मसंश्रयः॥ ब्रह्मसंज्ञोह
मेवाग्रे तथांते च परः पुमान्॥ इति श्रीविष्णुपुराणे प्रथमेंशे एकोनविंशतितमोध्यायः॥ पराशर उवाच॥ एवं संचिंतयन्विष्णु
मभेदेनात्मनो द्विज॥ तन्मयत्वमवाप्याग्र्यं मेने चात्मानमच्युतं॥ विसस्मार तथात्मानं नान्यत्किंचिदजानत॥ अहमेवाव्य
यो नंत परमात्मेत्य चिंतयन्॥ तस्य तद्भावनायोगात्क्षीणपापस्य वै क्रमात॥ शुद्धेंतःकरणे विष्णुस्तस्थौ ज्ञानमयोच्युतः॥
योगप्रभावात्प्रह्लादे जाते विष्णुमयेसुरे॥ चलत्युरगबंधैस्तैर्मैत्रेय त्रुटितं क्षणात्॥ भ्रांतग्राहगणः सोर्मिर्ययौ क्षोभं मह
र्णवः॥ चचाल च मही सर्वा सशैलवनकाननम्॥ स च तं शैलसंघातं दैत्यैर्न्यस्तमथोपरि॥ प्रतिक्षिप्य तस्मात्सलिला न्निश्च
क्राम महामतिः॥ दृष्ट्वा च स जगद्भूयो गगनाद्युपलक्षणं॥ प्रह्लादोस्मीति सस्मार पुनरात्मानमात्मना॥ तुष्टाव च पुनर्धी
मानना दिपुरुषोत्तमं॥ एकाग्रमतिरव्यग्रो यतवाक्कायमानसः॥ प्रह्लाद उवाच॥ ॐ नमः परमार्थार्थ स्थूलसूक्ष्म क्षराक्षर
व्यक्ताव्यक्त कलातीत सकलेश निरंजन॥ गुणांजन गुणाधार निर्गुणात्मन् गुणस्थित॥ मूर्तामूर्त महामूर्ते सूक्ष्ममूर्ते स्फु
टास्फुट॥ करालसौम्यरूपात्मन् विद्याविद्यामयाच्युत॥ सदसद्रूप सद्भाव सदसद्भावभावन॥ नित्यानित्य प्रपंचात्मन् निष्प्रपंचाम

श्रयो विष्णु॰ ३७

॥ मुखः शंकुशिराः कपिलः शंवरस्तथा ॥ एकचक्रो महावाहुस्तारकश्च महावलः ॥ स्वर्भानुर्वृषपर्वा च पुलोमा च महा
वलः ॥ एते दनोः सुताः ख्याताः विप्रचित्तिश्च वीर्यवान् ॥ स्वर्भानोस्तु प्रभा कन्या शर्मिष्ठा वार्षपर्वणी ॥ उदानवी हय।
शिरः प्रख्याता वरकन्यकाः ॥ वैश्वानरसुते चोभे पुलोमा कालका तथा ॥ उभे सुते महाभागे मारीचेस्तु परिग्रहः
॥ ता सिंहिकायामथोत्पन्ना विप्रचित्तेः सुतास्तथा ॥ व्यंशः शल्यश्च वलवान्नभश्चैव महावलः ॥ वातापिर्नमुचिश्चै
व इल्वलः खस्रमस्तथा ॥ अंजिको नरकश्चैव कालनाभस्तथैव च ॥ स्वर्भानुश्च महावीर्यो चक्रयोधी महासुरः ॥ एते
ते दानवाः श्रेष्ठा दनुवंशविवर्द्धनाः ॥ एतेषां पुत्रपौत्राश्च शतशोथ सहस्रशः ॥ प्रह्लादस्य तु दैत्यस्य निवातकवचाः
कुले ॥ समुत्पन्नास्तु महता तपसा भावितात्मनः ॥ षट् सुताः सुमहासत्त्वास्ताम्रायाः परिकीर्तिताः ॥ शुकी श्येनी च भा
सी च सुग्रीवी शुचि गृध्रिका ॥ शुकी शुकानजनयदुलूकप्रत्युलूकिकाः ॥ श्येनी श्येनांस्तथा भासी भासान् गृध्रां
श्च गृध्र्यपि ॥ शुच्यौदकान्पक्षिगणान् सुग्रीवी तु व्यजायत ॥ अश्वानुष्ट्रान् गर्दभांश्च ताम्रावंशाः प्रकीर्तिताः ॥ विनता
यास्तु द्वौ पुत्रौ विख्यातौ गरुडारुणौ ॥ सुपर्णः पततां श्रेष्ठो दारुणः पन्नगाशनः ॥ सुरसायाः सहस्रं तु सर्पाणाममितो
जसां ॥ अनेकशिरसां ब्रह्मन् खेचराणां महात्मनां ॥ काद्रवेयास्तु वलिनः सहस्रममितौजसः ॥ सुपर्णवशगा ब्रह्मन्
जज्ञिरेनेकमस्तकाः ॥ तेषां प्रधानभूतास्तु शेषवासुकितक्षकाः ॥ शंखः श्वेतो महापद्मः कंवलाश्वतरौ तथा ॥ एला

37 न एम ३७

गतांमूर्ध्नेयस्यभक्तिःस्थिरात्वयि॥ श्रीभगवानुवाच॥ यथातेनिश्चलंचेतोमयिभक्तिसमन्वितं॥ तथात्वंमत्प्रसादेननिर्वाणं
परमाप्स्यसि॥ पराशरउवाच॥ इत्युक्त्वांतर्दधेविष्णुस्तस्यमैत्रेयपश्यतः॥ सचापिपुनरागम्यववंदेचरणौपितुः॥ तंपितामू
र्ध्न्युपाघ्रायपरिष्वज्यचपीडितं॥ जीवसीत्याहवत्सेतिबाष्पार्द्रनयनोद्विज॥ प्रीतिमांश्चाभवत्तस्मिन्ननुतापीमहासुरः॥
गुरुपित्रोश्चकारैवंशुश्रूषांसोपिधर्मवित्॥ पितर्युपरतिंनीतेनरसिंहस्वरूपिणा॥ विष्णुनासोपिदैत्यानांमैत्रेयाभूत्पति
स्ततः॥ ततोराज्यद्युतिंप्राप्यकर्मशुद्धिकरींद्विज॥ पुत्रपौत्रांश्चसुबहूनवाप्यैश्वर्यमेवच॥ क्षीणाधिकारःसयदापुण्य
पापविवर्जितः॥ तदासभगवद्ध्यानात्परंनिर्वाणमाप्तवान्॥ एवंप्रभावोदैत्योसौमैत्रेयासीन्महामतिः॥ प्रह्लादोभगवद्भ
क्तोयंत्वंमामनुपृच्छसि॥ यस्त्वेतच्चरितंतस्यप्रह्लादस्यमहात्मनः॥ शृणोतितस्यपापानिसद्योगच्छंतिसंक्षयं॥ अहोरात्रकृ
तंपापंप्रह्लादचरितंनरः॥ शृण्वन्पठंश्चमैत्रेयव्यपोहतिनसंशयः॥ पौर्णमास्याममावास्यामष्टम्यामथवापठन्॥ द्वादश्यां
वातदाप्नोतिगोप्रदानफलंद्विज॥ प्रह्लादंसकलापत्सुयथारक्षितवान्हरिः॥ तथारक्षतियस्तस्यशृणोतिचरितंसदा॥
॥इतिश्रीविष्णुपुराणेप्रथमेंशेविंशोध्यायः॥ पराशरउवाच॥ संह्रादपुत्रआयुष्मान्शिबिर्बाष्कलएवच॥ विरोचनस्
तुप्राह्लादिर्बलिर्जज्ञेविरोचनात्॥ बलेःपुत्रशतंत्वासीद्बाणज्येष्ठंमहामुने॥ हिरण्याक्षसुताश्चासन्सर्वएवमहाबलाः॥ भ
भुवःशकुनिश्चैवभूतसंतापनस्तथा॥ महानाभोमहाबाहुस्तारकश्चमहाबलः॥ अभवन्दनुपुत्राश्चद्विमूर्द्धाशंकरस्तथा

वि०पु० ५८ ८ 30 य

वाहयामास तस्याः कुक्षिं प्रविश्य ॥ वज्रपाणिर्महागर्भं चिच्छेदाथ सप्तधा ॥ सप्तधा भिद्यमानो वज्रेण प्ररुरोदातिदारुणं
मारोदीरिति तं शक्रः पुनः पुनरभाषत ॥ सोभवत्सप्तधा गर्भस्तमिंद्रः कुपितः पुनः ॥ एकैकं सप्तधा चक्रे वज्रेणारिविदा
रिणा ॥ मरुतोनामदेवास्ते बभूवुरतिवेगिनः ॥ यदुक्तं वै भगवता तेनेमे मरुतोभवन् ॥ देवाः एकोनपंचाशत्सहायावज्रपा
णिनः ॥ इति श्रीविष्णुपुराणे प्रथमेंशे दैत्यवंशकथनोनाम एकविंशतितमोध्यायः ॥ पराशर उवाच ॥ यदाभिषिक्तः स
पृथुः पूर्वं राज्ये महर्षिभिः ॥ ततः क्रमेण राज्यानि ददौ लोकपितामहः ॥ नक्षत्रग्रहविप्राणां वीरुधां चाप्यशेषतः ॥ सो
मं राज्ये ददद्ब्रह्मा यज्ञानां तपसामपि ॥ राज्ञां वैश्रवणं राज्ये जलानां वरुणं तथा ॥ आदित्यानां पतिं विष्णुं वसूनाम
थ पावकं ॥ प्रजापतीनां दक्षं तु वासवं मरुतामपि ॥ दैत्यानां दानवानां च प्रह्लादमधिपं ददौ ॥ पितॄणां धर्मराजं तं
यमं राज्येभ्यषेचयत् ॥ ऐरावतं गजेंद्राणामशेषाणां पतिं ददौ ॥ पतत्रिणां तु गरुडं देवानामपि वासवं ॥ उच्चैःश्रवा स
मश्वानां वृषभं तु गवामपि ॥ शेषं तु नागराजानं मृगाणां सिंहमीश्वरं ॥ वनस्पतीनां राजानं प्लक्षमेवाभ्यषेचयत् ॥ ए
वं विभज्य राज्यानि दिशां पालाननंतरं ॥ प्रजापतिपतिर्ब्रह्मा स्थापयामास सर्वतः ॥ पूर्वस्यां दिशि राजानं वैराजस्य प्र
जापतेः ॥ दिशापालं सुधन्वानं सुतं वै सोभ्यषेचयत् ॥ यस्येयं पृथिवी सर्वा सप्तद्वीपा सपत्तना ॥ दक्षिणस्यां दिशि
तथा कर्दमस्य प्रजापतेः ॥ पुत्रं शंखपदं नाम राजानं सोभ्यषेचयत् ॥ पश्चिमस्यां दिशि तथा रजसः पुत्रमच्युतं

राम ५८

पन्नगस्तथा नागाः कर्कोटकधनंजयौ ॥ एते चान्ये च बहवो दंदशूका विषोल्बणाः ॥ गणं क्रोधवशं विद्धि तस्याः सर्वे च दंष्ट्रिणः
॥ स्थलजाः पक्षिणो ऽब्जाश्च दारुणाः पिशिताशनाः ॥ क्रोधा तु जनयामास पिशाचांश्च महाबलान् ॥ गास्तु वै जनयामास सुरभि
र्महिषीस्तथा ॥ इरा वृक्षलतावल्लीस्तृणजातीश्च सर्वशः ॥ खसा तु यक्षरक्षांसि मुनिरप्सरसस्तथा ॥ अरिष्टा तु महासत्वान्
गंधर्वान्समजीजनत् ॥ एते कश्यपदायादाः कीर्तिताः स्थाणुजंगमाः ॥ तेषां पुत्राश्च पौत्राश्च शतशो ऽथ सहस्रशः ॥ एष मन्वं
तरे सर्गो ब्रह्मन्स्वारोचिषे स्मृतः ॥ वैवस्वते च महति वारुणे वितते क्रतौ ॥ जुह्वानस्य ब्रह्मणो वै प्रजासर्ग इहोच्यते ॥ पूर्वं यत्र
तु सप्तर्षीनुत्पन्नान्सप्त मानसान् ॥ पुत्रत्वे कल्पयामास स्वयमेव पितामहः ॥ गंधर्वभोगिदेवानां दानवानां च सत्तम ॥ दि
तिर्विनष्टपुत्रा वै तोषयामास कश्यपम् ॥ तया चाराधितः सम्यक्कश्यपस्तपतां वरः ॥ वरेण छंदयामास सा च वव्रे ततो वरं
॥ पुत्रमिंद्रवधार्थाय समर्थममितौजसं ॥ स च तस्यै वरं प्रादाद्भार्य्यायै मुनिसत्तम ॥ दत्वा च वरमत्युग्रं कश्यपस्तामुवा
च ह ॥ शक्रं पुत्रो निहंता ते यदि गर्भं शरच्छतं ॥ समाहितातिप्रयता शुचिनी धारयिष्यसि ॥ इत्येवमुक्त्वा तां देवीं संगतः क
श्यपो मुनिः ॥ दधार सा च तं गर्भं सम्यक्शौचसमन्वितं ॥ पिंडं कं वै मघवा ताते नैव मरुतोभवन् ॥ देवाः एकोनपंचाशन्महा
याव ज्जपागीतः ॥ गर्भमात्मवधार्थाय ज्ञात्वा तं मघवानपि ॥ शुश्रूषुस्तामथागच्छद्विनयादमराधिपः ॥ तस्याश्चैवांतरं
प्रेप्सुरतिष्ठत्पाकशासनः ॥ ऊने वर्षशते चास्या ददर्शांतरमात्मना ॥ अकृत्वा पादयोः शौचं दितिः शयनमाविशत् ॥ निद्रा

वि॰पु॰ ३९

२१

ते॥ कालस्वरूपो भगवान्स्सर्वभूतानि चापरः॥ विनाशं कुर्वतस्तस्य चतुर्द्धैवं महात्मनः॥ विभागकल्पना ब्रह्मन्कथ्य
ते सार्वकालिकी॥ ब्रह्मा दक्षादयः कालस्तथैवाखिलजन्तवः॥ विभूतयो हरेरेताः जगतः सृष्टिहेतवः॥ विष्णुर्मन्वादयः का
लः सर्वभूतानि च द्विज॥ स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः॥ रुद्रः कालान्तकाद्याश्च समस्ताश्चैव जन्तवः॥
चतुर्द्धा प्रलयायैता जनार्द्दनविभूतयः॥ जगदादौ तथा मध्ये सृष्टिराप्रलयाद्द्विज॥ धात्रा मरीचिमिश्रैश्च क्रियते जन्तु
भिस्तथा॥ ब्रह्मा सृजत्यादिकाले मरीचिप्रमुखास्ततः॥ उत्पादयन्त्यपत्यानि जन्तवश्च प्रतिक्षणं॥ कालेन न विना ब्र
ह्मा सृष्टिनिष्पादको द्विज॥ न प्रजापतयः सर्वे न चैवाखिलजन्तवः॥ एवमेव विभागोयं स्थितावप्युपदिश्यते॥ च
तुर्द्धा देवदेवस्य मैत्रेय प्रलये तथा॥ यत्किंचित्सृज्यते येन सत्वजातेन वै द्विज॥ तस्य सृज्यस्य संभूतौ तत्सर्वं वै
हरेस्तनुः॥ हन्ति यावच्च यत्किंचित्सत्वं स्थावरजंगमं॥ जनार्द्दनस्य तद्रौद्रं मैत्रेयान्तकरूपधृक्॥ एवमेव जगत्स्रष्टा जगत्पा
ता तथा जगत्॥ जगद्भक्षयिता देवः समस्तस्य जनार्द्दनः॥ सर्गस्थित्यन्तकालेषु त्रिधैवं संप्रवर्त्तते॥ गुणप्रवृत्त्या परमं
पदं तस्यागुणं महत्॥ तच्च ज्ञानमयं व्यापि स्वसंवेद्यमनौपमं॥ चतुःप्रकारं तदपि स्वरूपं परमात्मनः॥ मैत्रेय उवाच॥
चतुःप्रकारतां तस्य ब्रह्मभूतस्य हे मुने॥ ममाचक्ष्व यथान्यायं यदुक्तं परमं पदं॥ पराशर उवाच॥ मैत्रेय कारणं प्रोक्तं सा
धनं सर्ववस्तुषु॥ साध्यं च वस्त्वभिमतं यत्साधयितुमात्मनः॥ योगिनो मुक्तिकामस्य प्राणायामादि साधनं॥ साध्यं च

एम ३९

केतुमंतं महात्मानं राजानं सोभ्यषेचयत् ॥ तथा हिरण्यरोमाणं पर्जन्यस्य प्रजापतेः ॥ उदीच्यां दिशि दुर्धर्षं राजानं सोभ्यषे
चयत् ॥ तैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना ॥ यथाप्रदेशमद्यापि धर्मतः प्रतिपाल्यते ॥ एते सर्वे प्रवृत्तस्य स्थितौ विष्णो
र्महात्मनः ॥ विभूतिभूता राजानो ये चान्ये मुनिसत्तम ॥ ये भविष्यंति ये भूताः सर्वे भूतेश्वरा द्विज ॥ ते सर्वे सर्वभूतस्य वि
ष्णोरंशा द्विजोत्तम ॥ ये तु देवाधिपतयो ये च दैत्याधिपास्तथा ॥ दानवानां च ये नाथा ये नाथाः पिशिताशिनां ॥ पशूनां
ये च पतयः पतयो ये च पक्षिणां ॥ मनुष्याणां च सर्पाणां नागानां चाधिपाश्च ये ॥ वृक्षाणां पर्वतानां च ग्रहाणां चापि ये
धिपाः ॥ अतीता वर्त्तमानाश्च ये भविष्यंति चापरे ॥ ते सर्वे सर्वभूतस्य विष्णोरंशसमुद्भवाः ॥ न हि पालनसामर्थ्यमृ
ते सर्वेश्वरं हरिं ॥ स्थितौ स्थितं महाप्राज्ञ भवत्यन्यस्य कस्यचित् ॥ सृजत्येष जगत्सृष्टौ स्थितौ पाति सनातनः ॥ हंति चैवां
तकत्वेन रजःसत्वादिसंश्रयः ॥ चतुर्विभागः संसृष्टौ चतुर्द्धा संस्थितः स्थितौ ॥ प्रलयं च करोत्यंते चतुर्भेदो जनार्दनः ॥
एकेनांशेन ब्रह्मासौ भवत्यव्यक्तमूर्तिमान् ॥ मरीचिमिश्राः पतयः प्रजानामन्यभागतः ॥ कालस्तृती- यस्तस्यांशः सर्वभू
तानि चापरः ॥ इत्थं चतुर्द्धा संसृष्टौ वर्त्तते सौ रजोगुणः ॥ एकांशेन स्थितो विष्णुः करोति प्रतिपालनं ॥ मन्वादिरूप
श्चान्येन कालरूपोपरेण च ॥ सर्वभूतेषु चान्येन संस्थितः कुरुते स्थितिं ॥ सत्वं गुणं समाश्रित्य जगतः पुरुषोत्तमः ॥ आश्रि

त्य तमसो वृत्तिमंतकाले तथा पुनः ॥ रुद्रस्वरूपो भगवानेकांशेन भवत्यजः ॥ अग्न्यंतकादिरूपेण भागेनान्येन वर्त्तते

समनंतरः॥ मूर्त्तं ब्रह्म महाभाग सर्वब्रह्ममयो हरिः॥ तत्र सर्वमिदं प्रोतमोतं चैवाखिलं जगत्॥ ततो जगज्जगत्तस्मिन्स जगच्चाखिलं
मुने॥ तदाहरमयो विष्णुर्बिभर्त्यखिलमीश्वरः॥ पुरुषायाकृतमपंचभूषणास्त्रस्वरूपवत्॥ मैत्रेय उवाच॥ भूषणास्त्रस्वरूपस्थं
यथैतदखिलं जगत्॥ बिभर्त्ति भगवान्विष्णुस्तन्ममाख्यातुमर्हसि॥ पराशर उवाच॥ नमस्कृत्वाप्रमेयाय विष्णवे प्रभविष्णवे॥ क
थयामि यथाख्यातं वशिष्ठेन ममाभवत्॥ आत्मानमस्य जगतो निर्लेपमगुणामलं॥ बिभर्त्ति कौस्तुभमणिस्वरूपं भगवान्हरिः
श्रीवत्ससंस्थानधरमनंते च समाश्रितं॥ प्रधानं बुद्धिरप्यास्ते गदारूपेण माधवे॥ भूतादिमिंद्रियादिं च द्विधाहंकारमीश्वरः॥ बिभ
र्त्ति शंखरूपेण शार्ङ्गरूपेण च स्थितम्॥ चलस्वरूपमत्यंतजवेनांतरितानिलं॥ चक्रस्वरूपं च मनो धत्ते विष्णुकरे स्थितं॥ पंचरू
पा तु या माला वैजयंती गदाभृतः॥ सा भूतहेतुसंघाता भूतमाला च वै द्विज॥ यानींद्रियाण्यशेषाणि बुद्धिकर्मात्मकानि वै॥ शररूपा
ण्यशेषाणि तानि धत्ते जनार्दनः॥ बिभर्त्ति यच्चासिरत्नमच्युतोऽत्यंतनिर्मलं॥ विद्यामयं तु तज्ज्ञानमविद्याकोशसंस्थितं॥ इत्थं पु
मान्प्रधानं च बुध्याहंकारमेव च॥ भूतानि च हृषीकेशे मनः सर्वेंद्रियाणि च॥ विद्याविद्ये च मैत्रेय सर्वमेतत्समाश्रितं॥ अस्त्र
भूषणसंस्थानस्वरूपं रूपवर्जितः॥ बिभर्त्ति मायारूपोसौ श्रेयसे प्राणिनां हरिः॥ सविकारं प्रधानं च पुमांश्चैवाखिलं जगत्॥ बि
भर्त्ति पुंडरीकाक्षस्तदेवं परमेश्वरः॥ या विद्या या तथाविद्या यत्सद्यच्चासदव्ययं॥ तत्सर्वं सर्वभूतेशे मैत्रेय मधुसूदने॥ कलाकाष्ठानि
मेषादिदिनर्त्वयनहायनैः॥ कालस्वरूपो भगवान्पापो हरिरव्ययः॥ भूर्लोकोथ भुवर्लोकः स्वर्लोको मुनिसत्तम॥ महर्जनस्तपः

लु
पौ

परमं ब्रह्म पुनर्नावर्तयेयतः ॥ साधनालंबनं ज्ञानं द्वितीयोंशो महामुने ॥ युंजतः क्लेशमुक्त्यर्थं साध्यं यद्ब्रह्म योगिनः ॥ तदालं
बनविज्ञानं द्वितीयोंशो महामुने ॥ उभयोस्त्वविभागेन साध्यसाधनयोर्हि यत् ॥ विज्ञानमद्वैतमयं तद्भागोन्यो मयोदितः ॥ ज्ञान
त्रयस्य चैतस्य विशेषो यो महामुने ॥ तन्निराकरणद्वारदर्शितात्मस्वरूपवत् ॥ निर्व्यापारमनाख्येयं व्याप्तिमात्रमनोपमं ॥ आ
त्मसंबोधविषयं सत्तामात्रमलक्षणं ॥ प्रशांतमभयं शुद्धं दुर्विभाव्यमसंश्रितं ॥ विष्णोर्ज्ञानमयस्यैकं तज्ज्ञानं परमं पदं ॥ तत्राज्ञा
ननिरोधेन योगिनो यांति ये लयं ॥ संसारकर्षणोप्तौ ते यांति निर्बीजतां द्विज ॥ एवं प्रकारममलं नित्यं व्यापकमक्षयं ॥ समस्तहे
यरहितं विष्ण्वाख्यं परमं पदं ॥ तद्ब्रह्म परमं योगी यतो नावर्तते पुनः ॥ अपुण्यपुण्योपरमे क्षीणक्लेशोतिनिर्मलः ॥ द्वे रूपे ब्रह्म
णस्तस्य मूर्तं चामूर्तमेव च ॥ क्षराक्षरस्वरूपे ते सर्वभूतेष्ववस्थिते ॥ अक्षरं तत्परं ब्रह्म क्षरं सर्वमिदं जगत् ॥ एकदेशस्थित
स्याग्नेर्ज्योत्स्ना विस्तारिणी यथा ॥ परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् ॥ तत्राप्यासन्नदूरत्वाद्बहुत्वस्वल्पतामयः
ज्योत्स्नाभेदोस्ति तच्छक्तेस्तद्भेदोमैत्रेय विद्यते ॥ ब्रह्मविष्णुशिवा ब्रह्मन्प्रधाना ब्रह्मशक्तयः ॥ ततश्च देवा मैत्रेय न्यूना दक्षाद
यस्ततः ॥ ततो मनुष्याः पशवो मृगपक्षिसरीसृपाः ॥ न्यूनान्यूनतराश्चैव वृक्षगुल्मादयस्तथा ॥ तदेतदक्षयं नित्यं जगन्मुनिवरा
खिलं ॥ आविर्भावतिरोभावजन्मनाशविकल्पवत् ॥ सर्वशक्तिमयो विष्णुः स्वरूपं ब्रह्मणः परं ॥ मूर्तं यद्योगिभिः पूर्वं योगारंभे
षु चिंत्यते ॥ सालंबनो महायोगः सबीजो यत्र संस्थितः ॥ मनस्यव्याहते सम्यग्युंजतां जायते मुने ॥ स परः परशक्तीनां ब्रह्मणः

वि०पु० ४१

सुतोभवत्॥ प्रियव्रतस्य पुत्राणां ख्यातो वलवीर्य्यतां॥ मेधाग्निर्वाहुपुत्रास्तु त्रयो योगपरायणाः॥ जातिस्मरा महाभागा न राज्याय मनो द-
धुः॥ निर्म्ममाः सर्वकालेतु समस्तार्थेषु वै मुने॥ चक्रुः क्रियां यथान्यायमफलाकांक्षिणो हि ते॥ प्रियव्रतो ददौ तेषां
सप्तानां मुनिसत्तम॥ विभज्य सप्तद्वीपानि मैत्रेय सुमहात्मनां॥ जंबूद्वीपं महाभाग सोग्नीध्राय ददौ पिता॥ मेधातिथेस्तथा प्रादात्
प्लक्षद्वीपं तथापरं॥ शाल्मले च वपुष्मन्तं नरेन्द्रमभिषिक्तवान्॥ ज्योतिष्मन्तं कुशद्वीपे राजानं कृतवान् प्रभुः॥ द्युतिमन्तं च राजानं क्रौंच
द्वीपे समादिशत्॥ शाकद्वीपेश्वरं चापि भव्यं चक्रे च स प्रभुः॥ सवनं पुष्करद्वीपे राजानं समकारयत्॥ जंबूद्वीपेश्वरो यस्तु अग्नीध्रो मु-
निसत्तम॥ तस्य पुत्रा वभूवुस्ते प्रजापतिसमा नव॥ नाभिः किंपुरुषश्चैव हरिवर्ष इलावृतः॥ रम्यो हिरण्वान् षष्ठश्च कुरुर्भद्राश्व एव च
केतुमालस्तथैवान्यः साधुश्चेष्टोनृपोभवत्॥ जंबूद्वीपविभागांश्च तेषां विप्र निशामय॥ पित्रा दत्तं हिमाह्वं तु वर्षं नाभेस्तु दक्षिणं॥ हेमकू-
टं तथा वर्षं ददौ किंपुरुषाय सः॥ तृतीयं नैषधं वर्षं हरिवर्षाय दत्तवान्॥ इलावृताय प्रददौ मेरुर्यत्र तु मध्यमः॥ नीलाचलाश्रितं व-
र्षं रम्याय प्रददौ पिता॥ श्वेतं यदुत्तरं तस्मात्पित्रा दत्तं हिरण्वते॥ यदुत्तरं शृंगवतो वर्षं तत्कुरवे ददौ॥ मेरोः पूर्वेण यद्वर्षं भद्राश्वाय प्रदत्तवा-
न्॥ गंधमादनवर्षं तु केतुमालाय दत्तवान्॥ इत्येतानि ददौ तेभ्यः पुत्रेभ्यः स नरेश्वरः॥ वर्षेष्वेतेषु तान्पुत्रानभिषिच्य स भूमिपः॥ शालग्रामं महापु-
ण्यं मैत्रेय तपसे ययौ॥ यानि किंपुरुषादीनि वर्षाण्यष्टौ महामुने॥ तेषां स्वाभाविकी सिद्धिः सुखप्राया ह्ययत्नतः॥ विपर्य्ययो न तेष्वस्ति जरा-
मृत्युभयं च न॥ धर्माधर्मौ न तेष्वास्तां नोत्तमाधममध्यमाः॥ न तेष्वस्ति युगावस्था तेषु स्थानेषु सर्वदा॥ हिमाह्वयस्य वै वर्षं नाभेरासीन्महात्म-
नः॥ तस्यर्षभोभवत्पुत्रो मेरुदेव्यां महाद्युतिः॥ ऋषभाद्भरतो जज्ञे ज्येष्ठः पुत्रशतस्य सः॥ कृत्वा राज्यं स्वधर्मेण तथेष्ट्वा विविधान्मखान्॥ ऋ-

राम ४१

त

सत्यः समस्तलोकाढ्ये विभुः ॥ लोकात्समस्तात्रिः सर्वेषां पूर्वेषामपि पूर्वजः ॥ आधारः सर्वविद्यानां स्वयमेव हरिः स्थितः ॥ देवमानुष्यपश्वादिस्व
रूपैर्बहुभिः स्थितः ॥ ततः सर्वेश्वरोऽनंतो भूतमूर्तिरमूर्तिमान् ॥ ऋचो यजूंषि सामानि तथैवाथर्वणानि वै ॥ इतिहासोपवेदांस्तु वेदांतेषु तथो
क्तयः ॥ वेदांगानि समस्तानि मन्वादिगदितानि च ॥ शास्त्राण्यशेषाण्याख्यानान्यनुवाकाश्च ये क्वचित् ॥ काव्यालापाश्च ये केचिद्गीतकान्य
खिलानि च ॥ यच्च मूर्तिधरस्यैतद्विष्णोर्वै महात्मनः ॥ यानि मूर्तान्यमूर्तानि यान्यत्रान्यत्र वा क्वचित् ॥ संति वै वस्तुजातानि तानि सर्वा
णि तद्वपुः ॥ अहं हरिः सर्वमिदं जनार्दनो नान्यत्ततः कारणकार्यजातं ॥ ईदृङ्मनो यस्य न तस्य भूयो भवोद्भवा द्वंद्वगदा भवंति ॥ इत्येष तें
शः प्रथमः पुराणस्यास्य वै द्विज ॥ यथावत्कथितो यस्मिन् श्रुते पापैः प्रमुच्यते ॥ कार्तिक्यां पुष्करस्नाने द्वादशाब्देन यत्फलं ॥ तदस्य श्रवणा
त्सर्वं मैत्रेयाप्नोति मानवः ॥ देवर्षिपितृगंधर्वयक्षादीनां च संभवं भवंति शृण्वतः पुंसो देवाद्या वरदा मुने ॥ श्रुत्वा द्विजे वदांतया पाय
सं मधुसर्पिषा ॥ वाचकाय विशेषेण भोजनं सुपकामदं ॥ इति श्रीविष्णुपुराणे प्रथमेंऽशे द्वाविंशोऽध्यायः ॥ समाप्तोयं विष्णुपुराणे प्रथमों
शः ॥ मैत्रेय उवाच ॥ भगवन्सम्यगाख्यातं ममैतदखिलं त्वया ॥ जगतः सर्गसंबंधि यत्पृष्टोसि गुरो मया ॥ यो यमंशो जगत्सृष्टिसंबंधो ग
दितस्त्वया ॥ तत्राहं श्रोतुमिच्छामि भूयोपि मुनिसत्तम ॥ प्रियव्रतोत्तानपादौ सुतौ स्वायंभुवस्य वै ॥ तयोरुत्तानपादस्य ध्रुवः पुत्रस्त्वयोदि
तः ॥ प्रियव्रतस्य नैवोक्ता भवता द्विज संततिः ॥ तामहं श्रोतुमिच्छामि प्रसन्नो वक्तुमर्हसि ॥ पराशर उवाच ॥ कर्दमस्यात्मजां कन्यामुपयेमे
प्रियव्रतः ॥ सम्राट्कुक्षी च तत्कन्ये दश पुत्रास्तथापरे ॥ महाप्रज्ञा महावीर्या विनीता दयिताः पितुः ॥ प्रियव्रतसुताः ख्याताः तेषां ना
मानि मे शृणु ॥ अग्नीध्रश्चाग्निबाहुश्च वपुष्मान् द्युतिमांस्तथा ॥ मेधा मेधातिथिर्भव्यः सवनः पुत्र एव च ॥ ज्योतिष्मान् दशमस्तेषां सत्यनामा सु

वि०पु०
४२

42

राधारं यशात्मकं ॥ संस्थानमस्य च मुने यथावद्वक्तुमर्हसि ॥ पराशर उवाच ॥ मैत्रेय श्रूयतां मेतत्संक्षेपाद्गदतो मम ॥ नास्य वर्षशते
नापि वक्तुं शक्यो स्य विस्तरः ॥ जंबूप्लक्षाह्वयौ द्वीपौ शाल्मलिश्चापरो द्विज ॥ कुशः क्रौंचस्तथा शाकः पुष्करश्चैव सप्तमः ॥ एते द्वीपाः
समुद्रैस्तु सप्तसप्तभिरावृताः ॥ लवणेक्षुसुरासर्पिर्दधिदुग्धजलैः समं ॥ जंबूद्वीपः समस्तानामेतेषां मध्यतः स्थितः ॥ तस्यापि मे
रुर्मैत्रेय मध्ये कनकपर्वतः ॥ चतुराशीतिसाहस्रो योजनैरस्य चोच्छ्रयः ॥ प्रविष्टः षोडशाधस्ताद्द्वात्रिंशन्मूर्ध्नि विस्तृतः ॥ मूले षोड
शसाहस्रो विस्तारस्तस्य सर्वशः ॥ भूपद्मस्यास्य शैलो सौ कर्णिकाकारसंस्थितः ॥ हिमवान्हेमकूटश्च निषधश्चास्य दक्षिणे
॥ नीलः श्वेतश्च शृंगी च उत्तरे वर्षपर्वताः ॥ लक्षप्रमाणौ द्वौ मध्यौ दशहीनास्तथापरे ॥ सहस्रद्वितयोच्छ्रायास्तावद्विस्तारि
णश्च ते ॥ भारतं प्रथमं वर्षं ततः किंपुरुषं स्मृतं ॥ हरिवर्षं तथैवान्यन्मेरोर्दक्षिणतो द्विज ॥ रम्यकं चोत्तरं वर्षं तस्यैवानु हि
रण्मयं ॥ उत्तराः कुरवश्चैव यथा वै भारतं तथा ॥ नवसाहस्रमेकैकमेतेषां द्विजसत्तम ॥ इलावृतं च तन्मध्ये सौवर्णो मेरु
च्छ्रितः ॥ मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तृतं ॥ इलावृतं महाभाग चत्वारश्चात्र पर्वताः ॥ विष्कंभा रचिता मेरोर्योजनायु
तमुच्छ्रिताः ॥ पूर्वेण मंदरो नाम दक्षिणे गंधमादनः ॥ विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः ॥ कदंबस्तेषु जंबूश्च पिप्पलो व
ट एव च ॥ एकादशशतायामाः पादपा गिरिकेतवः ॥ जंबूद्वीपस्य सा जंबूर्नामहेतुर्महामुने ॥ महागजप्रमाणानि जंब्वास्तस्याः
फलानि वै ॥ पतंति भूभृतः पृष्ठे शीर्यमाणानि सर्वतः ॥ रसेन तेषां प्रख्याता तत्र जंबूनदीति वै ॥ सरित्प्रवर्तते सा च पीयते ज १

रम

४२

भिषिच्य सुतं वीरं भरतं पृथिवीपतिः ॥ तपसे स महाभागः पुलहस्याश्रमं ययौ ॥ वानप्रस्थविधानेन तत्रापि कृतनिश्चयः ॥ तपस्ते-
पे यथान्यायमियाज स महीपतिः ॥ तपसा कर्षितोऽत्यर्थं कृशो धमनिसंततः ॥ नग्नो वीटां ततो दत्वा वीराध्वानं ततो गतः ॥ ततश्च
भारतं वर्षमेतत् लोकेषु गीयते ॥ भरताय यतः पित्रा दत्तं प्रातिष्ठता वनं ॥ सुमतिर्भरतस्याभूत् पुत्रः परमधार्मिकः ॥ कृत्वा सम्यग्द-
दौ तस्मै राज्यमिष्टमखः पिता ॥ पुत्रसंक्रामितश्रीस्तु भरतः स महीपतिः ॥ योगाभ्यासरतः प्राणान् शालग्रामेऽत्यजन्मुने ॥ अजा-
यत च विप्रोऽसौ योगिनां प्रवरे कुले ॥ मैत्रेय तस्य चरितं कथयिष्यामि ते पुनः ॥ सुमतेस्तेजसस्तस्मादिन्द्रद्युम्नो व्यजायत ॥ प-
रमेष्ठी ततस्तस्मात् प्रतिहारस्तदन्वयः ॥ प्रतिहर्तेति विख्यात उत्पन्नस्तस्य चात्मजः ॥ भवस्तस्मादथोद्गीथः प्रस्तावस्तत्सुतो विभुः
॥ पृथुस्ततस्ततो नक्तो नक्तस्यापि गयः सुतः ॥ नरो गयस्य तनयस्तत्पुत्रोऽभूद्विराट् ततः ॥ तस्य पुत्रो महावीर्यो धीमांस्तस्मादजाय-
त ॥ महान्तोऽपि ततश्चाभून्मनस्युस्तस्य चात्मजः ॥ त्वष्टा त्वष्टुश्च विरजो रजस्तस्याप्यभूत्सुतः ॥ शतजिद्रजसस्तस्य जज्ञे पुत्र-
शतं मुने ॥ विष्वग्ज्योतिःप्रधानास्ते यैरिमा वर्द्धिताः प्रजाः ॥ तैरिदं भारतं वर्षं नवभेदमलंकृतम् ॥ तेषां वंशप्रसूतैश्च भुक्तेयं भा-
रती पुरा ॥ कृतत्रेतादिसर्गेण युगाख्या ह्येकसप्ततिः ॥ एष स्वायंभुवः सर्गो येनेदं पूरितं जगत् ॥ वाराहे तु मुने कल्पे पूर्वमन्वन्तरा-
धिपः ॥ इति श्रीविष्णुपुराणे द्वितीयेंऽशे प्रथमोऽध्यायः ॥ मैत्रेय उवाच ॥ कथितो भवता ब्रह्मन् सर्गः स्वायंभुवः समे ॥ श्रोतुमिच्छाम्यहं
त्वत्तः सकलं मंडलं भुवः ॥ यावन्तः सागरा द्वीपास्तथा वर्षाणि पर्वताः ॥ वनानि सरितः पुर्यो देवादीनां तथा मुने ॥ यत्प्रमाणमिदं सर्वं य

तुमालेलाश्च भद्राश्वाः कुरवस्तथा॥ पत्राणि लोकपद्मस्य मर्यादाशैलबाह्यतः॥ जठरो देवकूटश्च मर्यादापर्वतावुभौ॥ अशीतियोजना-
यामश्च पूर्णवांतरं व्यवस्थितौ॥ निषधः पारियात्रश्च मर्यादापर्वतावुभौ॥ मेरोः पश्चिमदिग्भागे यथा पूर्वौ तथा स्थितौ॥ त्रिशृंगो जारु-
धिश्चैव उत्तरौ वर्षपर्वतौ॥ पूर्वपश्चायतावेतावर्णवांतर्व्यवस्थितौ॥ इत्येते मुनिवर्योक्ता मर्यादापर्वतास्तव॥ जठराद्याः स्थिता मेरोस्ते-
षां द्वौ द्वौ चतुर्दिशं॥ मेरोश्चतुर्दिशं ये तु प्रोक्ताः केसरपर्वताः॥ शीतांताद्या मुने तेषामतीव हि मनोरमाः॥ शैलानामंतरं द्रोण्यः सिद्धचा-
रणसेविताः॥ सुरम्याणि तथा तासु काननानि पुराणि च॥ लक्ष्मीविष्णग्निसूर्यादिदेवानां मुनिसत्तम॥ तास्वायतनवर्याणि जुष्टा-
नि वरकिन्नरैः॥ गंधर्वयक्षरक्षांसि तथा दैतेयदानवाः॥ क्रीडंति तासु रम्यासु शैलद्रोणीष्वहर्निशं॥ भौमा ह्येते स्मृताः स्वर्गाः धर्मि-
णामालया मुने॥ नैतेषु पापकर्माणो यांति जन्मशतैरपि॥ भद्राश्वे भगवान्विष्णुरास्ते हयशिरा द्विज॥ वराहः केतुमाले तु भारते कू-
र्मरूपधृक्॥ मत्स्यरूपश्च गोविंदः कुरुष्वास्ते जनार्दनः॥ विश्वरूपेण सर्वत्र सर्वः सर्वत्रगो हरिः॥ सर्वस्याधारभूतोऽसौ मैत्रेयास्ते-
ऽखिलात्मकः॥ यानि किंपुरुषादीनि वर्षाण्यष्टौ महामुने॥ न तेषु शोको नायासो नोद्वेगः क्षुद्भयादिकं॥ स्वस्थाः प्रजा निरातंकाः स-
र्वदुःखविवर्जिताः॥ दशद्वादशवर्षाणां सहस्राणि स्थिरायुषः॥ न तेषु वर्षते देवो भौमान्यंभांसि तेषु वै॥ कृतत्रेतादिकं नैव तेषु
स्थानेषु कल्पना॥ सर्वेष्वेतेषु वर्षेषु सप्त सप्त कुलाचलाः॥ नद्यश्च शतशस्तेभ्यः प्रसूता या द्विजोत्तम॥ इति श्रीविष्णुपुराणे
द्वितीयेंऽशे द्वितीयोऽध्यायः॥ पराशर उवाच॥ उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणं॥ वर्षं तद्भारतं नाम भारती यत्र संततिः॥ नव॥

राम

न्निवासिभिः॥ नस्वेदोनचदौर्गंध्यंनजरानेंद्रियक्षयः॥ तत्पानात्स्वछमनसांजनानांतत्रजायते॥ तीरमृत्तत्रसंप्राप्यसुखवायुविशो
षिता॥ जांबूनदाख्यंभवतिसुवर्णंसिद्धभूषणं॥ भद्राश्वंपूर्वतोमेरोः केतुमालंचपश्चिमे॥ वर्षेद्वेतुमुनिश्रेष्ठ तयोर्मध्यमिलावृतं॥ व
नंचैत्ररथंपूर्वेदक्षिणेगंधमादनं॥ वैभ्राजंपश्चिमेतद्वदुत्तरेनंदनंस्मृतं॥ अरुणोदंमहाभद्रमसितोदंसमानसं॥ सरांस्येतानिचत्वा
रिदेवभोग्यानिसर्वदा॥ शीतांशश्चकमुंजश्चकुररीमाल्यवांस्तथा॥ वैकंकप्रमुखामेरोः पूर्वतः केसराचलाः॥ त्रिकूटः शिशिरश्चै
वपतंगोरुचकस्तथा॥ निषधाद्यादक्षिणतस्तस्यकेसरपर्वताः॥ शिखिवासाः सवैडूर्यः कपिलोगंधमादनः॥ जारुधिप्रमुखास्त
द्वत्पश्चिमेकेसराचलाः॥ मेरोरनंतरांगेषुजठरादिष्ववस्थिताः॥ शंखकूटोथऋषभोहंसोनागस्तथापरः॥ कालंजराद्याश्चतथाउ
त्तरेकेसराचलाः॥ चतुर्दशसहस्राणियोजनानांमहापुरी॥ मेरोरुपरिमैत्रेयब्रह्मणः प्रथितादिवि॥ तस्याः समंततश्चाष्टौदिशासु
विदिशासुच॥ इंद्रादिलोकपालानांप्रख्याताः प्रवराः पुरः॥ विष्णुपादविनिःक्रांताप्लावयित्वेंदुमंडलं॥ समंताद्ब्रह्मणः पुर्यांगंगापत
तिवैदिवः॥ सातत्रपतितादिक्षुचतुर्धाप्रतिपद्यते॥ सीताचालकनंदाचचक्षुर्भद्राचवैक्रमात्॥ पूर्वेणशैलात्सीतातुशैलंयात्यंत
रिक्षगा॥ ततश्चपूर्ववर्षेणभद्राश्वेनैतिसार्णवं॥ तथैवालकनंदापिदक्षिणेनैत्यभारतं॥ प्रयातिसागरंभूत्वासप्तभेदामहामुने॥ चक्षु
श्चपश्चिमगिरीनतीत्यसकलांस्ततः॥ पश्चिमंकेतुमालाख्यंवर्षंगत्वैतिसागरं॥ भद्रातथोत्तरगिरीनुत्तरांश्चतथाकुरून्॥ अतीत्यो
त्तरमंभोधिंसमभ्येतिमहामुने॥ आनीलनिषधायामौमाल्यवद्गंधमादनौ॥ तयोर्मध्यगतोमेरुः कर्णिकाकारसंस्थितः॥ भारताः के

वि॰पु॰
४४

हि कर्म्मभूरेषा ह्यतो न्या भोगभूम्यः ॥ अत्र जन्मसहस्राणां सहस्रैरपि सत्तम ॥ कदाचिल्लभते जंतुर्म्मानुष्यं पुण्यसंचयात् ॥ गायं
ति देवा किल गीतकानि धन्यास्तु ये भारतभूमिभागे ॥ स्वर्गापवर्ग्गास्पदमार्गभूते भवंति भूयः पुरुषाः सुरत्वात् ॥ कर्म्माण्यसंक
ल्पिततत्फलानि संन्यस्य विष्णौ परमात्मरूपे ॥ अवाप्य तां कर्म्ममहीमनंते तस्मिंल्लयं ये त्वमलाः प्रयांति ॥ जानीम नैतत् क्व
वयं विलीने स्वर्गप्रदे कर्म्मणि देहबंधं ॥ प्राप्स्याम धन्याः खलु ते मनुष्या ये भारतेनेंद्रियविप्रहीनाः ॥ नववर्षं तु मैत्रेय जंबू
द्वीपमिदं मया ॥ लक्षयोजनविस्तारं संक्षेपात्कथितं तव ॥ जंबूद्वीपं समावृत्य लक्षयोजनविस्तरः ॥ मैत्रेय वलयाकारः स्थितः

२

क्षारोदधिर्बहिः ॥ इति श्रीविष्णुपुराणे द्वितीयेंऽशे तृतीयोऽध्यायः ॥ पराशर उवाच ॥ क्षारोदेन यथा द्वीपो जंबूसंज्ञोऽभिवेष्टितः ॥ सं

44

वेष्ट्य क्षारमुदधिं प्लक्षद्वीपस्तथा स्थितः ॥ जंबूद्वीपस्य विस्तारः शतसहस्रसंमितः ॥ स एव द्विगुणो ब्रह्मन् प्लक्षद्वीप उदाहृतः
॥ सप्तमेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य वै ॥ ज्येष्ठः शांतभयो नाम शिशिरस्तदनंतरः ॥ सुखोदयस्तथानंदः शिवः क्षेमक एव च ॥ ध्रुवश्च
सप्तमस्तेषां प्लक्षद्वीपेश्वरा हि ते ॥ पूर्वं शांतभयं वर्षं शिशिरं सुखदं तथा ॥ आनंदं च शिवं चैव क्षेमकं ध्रुवमेव च ॥ मर्य्यादाकारकास्तेषां
तथान्ये वर्षपर्वताः ॥ सप्तैव तेषां नामानि शृणुष्व मुनिसत्तम ॥ गोमेदश्चैव चंद्रश्च नारदो दुंदुभिस्तथा ॥ सोमकः सुमनाश्चैव वैभ्राज

व

श्चैव सप्तमः ॥ वर्षाचलेषु रम्येषु वर्षेष्वेतेषु चानघ ॥ वसंति देवगंधर्वसहिताः सततं प्रजाः ॥ तेषु पुण्या जनपदाश्चिराच्च म्रियते जनाः

राम

ध

॥ नाधयो व्याधयो वापि सर्वकालसुखं हि तत् ॥ तेषां नद्यश्च सप्तैव वर्षाणां च समुद्रगाः ॥ नामतस्ताः प्रवक्ष्यामि श्रुताः पापं हरंति याः

४४

अनुतप्ता शिखी चैव विपाशा त्रिदिवा क्रमुः ॥ अमृता सुकृता चैव सप्तैतास्तत्र निम्नगाः ॥ एते शैलास्तथा नद्यः प्रधानाः कथितास्तव

म

योजनसाहस्रो विस्तारो स्य महामुने ॥ कर्म्मभूमिरियं स्वर्गमपवर्गं च गच्छतां ॥ तिर्य्यक्त्वं नरकं चापि यान्ति तः पुरुषा मुने ॥ इतः स्वर्गश्च मोक्षश्च
मध्यं चांतश्च गम्यते ॥ न खल्वन्यत्र मर्त्यानां कर्मभूमौ विधीयते ॥ भारतस्यास्य वर्षस्य नव भेदान्निशामय ॥ इंद्रद्वीपः कसेरुश्च ताम्रवर्णो
गभस्तिमान् ॥ नागद्वीपस्तथा सौम्यो गंधर्वस्त्वथ वारुणः ॥ अयं तु नवमस्तेषां द्वीपः सागरसंवृतः ॥ योजनानां सहस्रं तु द्वीपोयं दक्षिणोत्तरः ॥
पूर्वे किराता यस्यांते पश्चिमे यवनास्थिताः ॥ ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः ॥ इज्यायुद्धवणिज्याद्यैर्वर्त्तयंतो व्यवस्थिताः ॥ श
तद्रूचंद्रभागाद्या हिमवत्पादनिसृताः ॥ वेदस्मृतिमुखाद्याश्च पारियात्रोद्भवा मुने ॥ नर्मदासुरसाद्याश्च नद्यो विंध्याद्रिनिर्गताः ॥ तापी
पयोष्णीनिर्विंध्याप्रमुखा ऋक्षसंभवाः ॥ गोदावरी भीमरथी कृष्णवेण्यादिकास्तथा ॥ सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः ॥ कृत
मालाताम्रपर्णीप्रमुखा मलयोद्भवाः ॥ त्रिसामा चार्यकुल्याद्या महेंद्रप्रभवाः स्मृताः ॥ ऋषिकुल्याकुमार्याद्याः शुक्तिमत्पादसंभवाः ॥
शतद्रूचंद्रभागाद्या हिमवत्पादसंभवाः ॥ आसां नद्युपनद्यः संत्यन्याश्च सहस्रशः ॥ तास्विमे कुरुपांचाला मध्यदेशादयो जनाः ॥
पूर्वदेशादिकाश्चैव कामरूपनिवासिनः ॥ पुंड्राः कलिंगा मगधा दाक्षिणात्याश्च सर्वशः ॥ तथापरांताः सौराष्ट्राः शूराभीरास्तथार्बुदाः ॥
कारूषा मालवाश्चैव पारियात्रनिवासिनः ॥ सौवीराः सैंधवा हूणाः शाल्वाः कोशलवासिनः ॥ माद्रारामास्तथांबष्ठाः पारसीकाद
यस्तथा ॥ आसां पिबंति सलिलं वसंति सरितां सदा ॥ समीपतो महाभाग हृष्टपुष्टजनाकुलाः ॥ चत्वारि भारते वर्षे युगान्यत्र महा
मुने ॥ कृतं त्रेता द्वापरं च कलिश्चान्यत्र न क्वचित् ॥ तपस्तप्यंति यतयो जुह्वते चात्र यज्विनः ॥ दानानि चात्र दीयंते परलोकार्थमा
दरात् ॥ पुरुषैर्यज्ञपुरुषो जंबूद्वीपे सदेज्यते ॥ यज्ञैर्यज्ञमयो विष्णुरन्यद्वीपेषु चान्यथा ॥ अत्रापि भारतं श्रेष्ठं जंबूद्वीपे महामुने ॥ यतो

व

नामतः संस्थितिं ॥ देवानामत्र सान्निध्यमतीव सुमनोहरं ॥ शाल्मलश्च सुमहान्वृक्षो नाम्ना निर्वृतिकारकः ॥ एष द्वीपः समुद्रेण सुरोदेन समन्ततः
वृतः ॥ विस्ताराच्छाल्मलस्यैव समेन तु समन्ततः ॥ सुरोदकः परिवृतः कुशद्वीपेन सर्वतः ॥ शाल्मलस्य तु विस्ताराद्द्विगुणेन समन्ततः ॥
ज्योतिष्मतः कुशद्वीपे सप्तपुत्राश्च शृणु सुतान् ॥ उद्भिदो वेणुमांश्चैव स्वैरथो लंबनो धृतिः ॥ प्रभाकरोथ कपिलस्तन्नामा वर्षपद्ध
तिः ॥ तस्मिन्वसन्ति मनुजाः सह दैतेयदानवैः ॥ तथैव देवगंधर्वयक्षकिंपुरुषादयः ॥ वर्णास्तत्रापि चत्वारो निजानुष्ठानतत्पराः ॥ द
मिनः शुष्मिणः स्नेहा मंदेहाश्च महामुने ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चानुक्रमोदिताः ॥ यथोक्तकर्मकर्तृत्वात्स्वाधिकारक्षयाय ते
तत्रैव तत्कुशद्वीपे ब्रह्मरूपं जनार्दनं ॥ यजंतः क्षपयंत्युग्रमधिकारफलप्रदं ॥ विद्रुमो हेमशैलश्च द्युतिमान्पुष्पवांस्तथा ॥ कुशेशयो ह
रिश्चैव सप्तद्वीपे महामुने ॥ नद्यस्तु सप्त तासां च शृणु नामान्यनुक्रमात् ॥ धूतपापा शिवा चैव पवित्रा सम्मतिस्तथा ॥ विद्युदंभा मही चा
न्या सर्वपापहरास्त्विमाः ॥ अन्याः सहस्रशस्तत्र क्षुद्रनद्यस्तथाचलाः ॥ कुशद्वीपे कुशस्तंबः संज्ञया तस्य तत्स्मृतं ॥ तत्प्रमाणेन स द्वी
पो घृतोदेन समावृतः ॥ घृतोदश्च समुद्रो वै क्रौंचद्वीपेन संवृतः ॥ क्रौंचद्वीपो महाभाग श्रूयतां चापरो महान् ॥ कुशद्वीपस्य विस्तारा
द्द्विगुणोस्य विस्तरः ॥ क्रौंचद्वीपे द्युतिमतः पुत्राः सप्त महात्मनः ॥ तन्नामानि च वर्षाणि तेषां चक्रे महामतिः ॥ कुशलो मल्लगश्चोष्णः
पीवरोऽथांधकारकः ॥ मुनिश्च दुंदुभिश्चैव त्रितीयश्चांधकारकः ॥ देवावृत्पवनश्चान्यस्ततश्चानः पुण्डरीकवान् ॥ दुंदुभिश्च महाशैलो द्विगु
णास्ते परस्परं ॥ द्वीपे द्वीपेषु ये शैला यथा द्वीपानि ते तथा ॥ वर्षेष्वेतेषु रम्येषु वर्षशैलवरेषु च ॥ निवसंति निरातंकाः सह देवगणैः प्रजाः
पुष्कलाः पुष्करा धन्यास्तिष्याख्याश्च महामुने ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चानुक्रमोदिताः ॥ तेनात्र न यमैत्रेय यथाः पिबंति शरणे व्रजाः

राम
४५

वी॰पे

या॥ च्छुद्रमोलास्तथान्यास्तत्र संति सहस्रशः॥ ताः पिबंति सदा हृष्टा नदीर्जनपदास्तु ते॥ अपसर्पिणी न तेषां वै न चैवोत्सर्पिणी द्विजा॥
न त्वेवास्ति युगावस्था तेषु स्थानेषु सप्तसु॥ त्रेतायुगसमः कालः सर्वदैव महामते॥ प्लक्षद्वीपादिषु ब्रह्मन् शाकद्वीपांतिकेषु वै॥ पंचवर्ष
सहस्राणि जना जीवंत्यनामयाः॥ धर्माः पंच स्वतस्तेषु वर्णाश्रमविभागजाः॥ वर्णाश्च तत्र चत्वारस्तान्निबोध वदामि ते॥ आर्यकाः कुर
वश्चैव विविंशा भाविनश्च ये॥ विप्रक्षत्रियवैश्यास्ते शूद्राश्च मुनिसत्तम॥ जंबूवृक्षप्रमाणस्तु तन्मध्ये सुमहांस्तरुः॥ प्लक्षस्तन्नामसं
ज्ञोयं प्लक्षद्वीपो द्विजोत्तम॥ इज्यते तत्र भगवांस्तैर्वर्णैरार्यकादिभिः॥ सोमरूपी जगत्स्रष्टा सर्वः सर्वेश्वरो हरिः॥ प्लक्षद्वीपप्रमाणेन
प्लक्षद्वीपः समावृतः॥ तथैवेक्षुरसोदेन परिवेषानुकारिणा॥ इत्येवं तव मैत्रेय प्लक्षद्वीप उदाहृतः॥ संक्षेपेण मया भूयः शाल्मलं
मे निशामय॥ शाल्मलस्येश्वरो वीरो वपुष्मांस्तत्सुतान् शृणु॥ तेषां तु नामसंज्ञानि सप्त वर्षाणि तानि वै॥ श्वेतोथ हरितश्चैव जीमूतो रोहित
स्तथा॥ वैद्युतो मानसश्चैव सुप्रभश्च महामुने॥ शाल्मलेन समुद्रोसौ द्वीपेनेक्षुरसोदकः॥ विस्ताराद्द्विगुणेनाथ सर्वतः संवृतः स्थितः॥ तत्रा
पि पर्वताः सप्त विज्ञेया रत्नयोनयः॥ वर्षाभिव्यंजका ये तु तथा सप्त च निम्नगाः॥ कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहकः॥ द्रोणो यत्र
महौषध्यः स चतुर्थो महीधरः॥ कंकस्तु पंचमः षष्ठो महिषः सप्तमस्तथा॥ ककुद्मान्पर्वतवरः॥ सरितां नामानि मे शृणु॥ योनी तो
या वितृष्णा च चंद्रा मुक्ता विमोचनी॥ निवृत्तिः सप्तमी तासां स्मृतास्ताः पापशांतिदाः॥ श्वेतं च हरितं चैव वैद्युतं मानसं तथा॥ जीमूतं रोहि
तं चैव सुप्रभं चातिशोभनं॥ सप्तैतानि तु वर्षाणि चातुर्वर्ण्ययुतानि वै॥ शाल्मले ये तु वर्णाश्च वसंत्येते महामुने॥ कपिलाश्चारुणाः पीताः कृ
ष्णाश्चैव पृथक् पृथक्॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव यजंति तं॥ भगवंतं समस्तस्य विष्णुमात्मानमव्ययं॥ वायुभूतं मखैः श्रेष्ठैर्यज्वि

विष्णु
४६
च
46

तोऽसौ तेन विच्छिन्नं जातं तद्वर्षकद्वयं ॥ वलयाकारमेकैकं तयोर्वर्षं तथा गिरिः ॥ दशवर्षसहस्राणि तत्र जीवंति मानवाः ॥ निरामया विशो
काश्च रागद्वेषादिवर्जिताः ॥ अधमोत्तमौ न तेष्वास्तां न वध्यवधकौ द्विज ॥ नेर्ष्यासूया भयं द्वेषो लोभादिको न च ॥ महावीरं बहिर्वर्षं
धातकीखंडमंततः ॥ मानसोत्तरशैलस्य देवदैत्यादिसेवितं ॥ सत्यानृते न तत्रास्तां द्वीपे पुष्करसंज्ञिते ॥ न तत्र नद्यः शैला वा द्वीपे व
र्षद्वयान्विते ॥ तुल्यवेषास्तु मनुजा देवास्तत्रैकरूपिणः ॥ वर्णाश्रमाचारहीनं धर्माहरणवर्जितं ॥ त्रयीवार्तादंडनीतिशुश्रूषारहि
तं पतत् ॥ वर्षद्वयं तु मैत्रेय भौमस्वर्गोयमुत्तमं ॥ सर्वस्य सुखदः कालो जरारोगादिवर्जितः ॥ पुष्करे धातकीखंडे महावीरे च वै मुने ॥ न्य
ग्रोधः पुष्करद्वीपे ब्रह्मणः स्थानमुत्तमं ॥ तस्मिन्निवसते ब्रह्मा पूज्यमानः सुरासुरैः ॥ स्वादूदकेनोदधिना पुष्करः परिवेष्टितः ॥ समेन
पुष्करस्यैव विस्तारान्मंडलात्तथा ॥ एवं द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः ॥ द्वीपाश्चैव समुद्राश्च समाना द्विगुणाः परे ॥ पयां
सि सर्वदा सर्वसमुद्रेषु समानि वै ॥ न्यूनातिरिक्तता तेषां कदाचिन्नैव जायते ॥ स्थालीस्थमग्निसंयोगादुद्रेकि सलिलं यथा ॥ त
थेंदुवृद्धौ सलिलमंभोधौ मुनिसत्तम ॥ अन्यूनानातिरिक्ताश्च वर्धंत्यापो ह्रसंति च ॥ उदयास्तमयेष्विंदोः पक्षयोः शुक्लकृष्णयोः ॥
दशोत्तराणि पंचैव अंगुलानां शतानि वै ॥ अपां वृद्धिक्षयौ दृष्टौ सामुद्रीणां महामुने ॥ भोजनं पुष्करद्वीपे तत्र स्वयमुपस्थितं ॥ षड्रस
भुंजते विप्र प्रजाः सर्वाः सदैव हि ॥ स्वादूदकस्य पुरतो दृश्यते लोकसंस्थितिः ॥ द्विगुणा कांचनी भूमिः सर्वजंतुविवर्जिता ॥ लोकालोक
स्ततः शैलो योजनायुतविस्तृतः ॥ उच्छ्रायेणापि तावंति सहस्राण्यचलो हि सः ॥ ततस्तमः समावृत्य तं शैलं सर्वतः स्थितं ॥ तमश्चांडकटा
हेन समंतात्परिवेष्टितं ॥ पंचाशत्कोटिविस्तारा सेयमुर्वी महामुने ॥ सहैवांडकटाहेन सद्वीपाब्धिमहीधरा ॥ सेयं धात्री विधात्री

राम
४६

गा

२

क

सप्तप्रधानाः शतशस्तत्रान्याः क्षुद्रनिम्नगाः ॥ गौरी कुमुद्वती चैव संध्या रात्रीर्मनोजवा ॥ क्षांतिश्च पुंडरीका च सप्तैता वर्षनिम्नगाः ॥ तत्रापि विष्णुर्भ-
गवान्पुष्कराद्यैर्जनार्दनः ॥ यागौ रुद्रस्वरूपश्च इज्यते यज्ञसन्निधौ ॥ क्रौंचद्वीपः समुद्रेण दधिमंडोदकेन च ॥ आवृतः सर्वतः क्रौंचद्वीपतुल्ये-
नमानतः ॥ दधिमंडोदकश्चापि शाकद्वीपेन संवृतः ॥ क्रौंचद्वीपस्य विस्ताराद्द्विगुणेन महामुने ॥ शाकद्वीपेश्वरस्यापि भव्यस्य सुमहात्मनः ॥ स-
प्तैव तनयास्तेषां ददौ वर्षाणि सप्त सः ॥ जलदश्च कुमारश्च सुकुमारो मणीचकः ॥ पूर्वस्तत्रोदयगिरिर्जलधारस्तथापरः ॥ तथा रैवतकः श्याम-
स्तथैवास्तगिरिर्द्विज ॥ आंबिकेयस्तथा रम्यः केशरी पर्वतोत्तमः ॥ शाकस्तत्र महावृक्षः सिद्धगंधर्वसेवितः ॥ यत्पत्रवातसंस्पर्शादाह्लादो-
जायते परः ॥ तत्र पुण्या जनपदाश्चातुर्वर्ण्यसमन्विताः ॥ नद्यश्चात्र महापुण्याः सर्वपापभयापहाः ॥ सुकुमारी कुमारी च नलिनी वेनुका च
या ॥ इक्षुश्च वेणुका चैव गभस्ती सप्तमी तथा ॥ अन्याश्च शतशस्तत्र क्षुद्रनद्यो महामुने ॥ महीधरास्तथा संति शतशोथ सहस्रशः ॥ ताः
पिबंति मुदा युक्ता जलदादिषु ये स्थिताः ॥ वर्षेषु ते जनपदाः स्वर्गादभ्येत्य मेदिनीं ॥ धर्म्महानिर्न तेषु स्ति न संघर्षः परस्परं ॥ मर्यादाव्युत्क्रमो
नास्ति तेषु देशेषु सप्तसु ॥ मगाश्च मागधाश्चैव मानसा मंदगास्तथा ॥ मगा ब्राह्मणभूयिष्ठा मागधाः क्षत्रियास्तथा ॥ वैश्यास्तु मानसास्तेषां
शूद्रास्तेषां तु मंदगाः ॥ शाकद्वीपे तु तैर्विष्णुः सूर्यरूपधरो मुने ॥ यथोक्तैरिज्यते सम्यक्कर्म्मभिर्नियतात्मभिः ॥ शाकद्वीपस्तु मैत्रेय क्षीरोदेन
समावृतः ॥ शाकद्वीपप्रमाणेन वलयेनेव वेष्टितः ॥ द्वीपेन शाकद्वीपात्तु द्विगुणेन समंततः ॥ पुष्करे सवनस्यापि महावीरोभवत्सुतः ॥ धातकि-
श्च तयोस्तत्र द्वे वर्षे नामचिह्निते ॥ महावीरं तथैवान्यं धातकीखंडसंज्ञितं ॥ एकश्चात्र महाभाग प्रख्यातो वर्षपर्वतः ॥ मानसोत्तरसंज्ञो वै मध्यतो
वलयाकृतिः ॥ योजनानां सहस्राणि ऊर्द्धं पंचाशदुच्छ्रितः ॥ तावदेव च विस्तीर्णः सर्वतः परिमंडलः ॥ पुष्करद्वीपवलयं मध्येन विभजन्निव ॥ स्थि-

व

दैवैककुंडलः॥ किरीटीस्रग्धरोभातिसाग्निश्वेतइवाचलः॥ नीलावस्त्रामदोत्सिक्तःश्वेतहारोपशोभितः॥ साभ्रगंगाप्रपातोसौकैला
शाद्रिरिवोन्नतः॥ लांगलासक्तहस्ताग्रोविभ्रन्मुशलमुत्तमं॥ उपास्यतेस्वयंकांत्यायोवारुण्याचमूर्त्तया॥ कल्पांतेयस्यवक्त्रेभ्योवि
षानलशिखोज्वलः॥ संकर्षणात्मकोरुद्रोनिःक्रम्यांतिजगत्त्रयं॥ सविभ्रछेखरीभूतमशेषंक्षितिमंडलं॥ आस्तेपातालमू
लस्थःशेषोशेषसुरार्च्चितः॥ तस्यवीर्यंप्रभावश्चस्वरूपंरूपमेवच॥ नहिवर्णयितुंशक्यंज्ञातुंचत्रिदशैरपि॥ यस्यैषासक
लाःपृथ्वीफणामणिशिखारुणा॥ आस्तेकुसुममालेवकस्तद्वीर्यंवदिष्यति॥ यदाविजृंभतेनंतोमदाघूर्णितलोचनः॥
तदाचलतिभूरेषासाद्रितोयाब्धिकानना॥ गंधर्वाप्सरसःसिद्धाःकिंनरोरगचारणाः॥ नांतंगुणानांगच्छंतितेनानंतोयमव्य
यः॥ यस्यनागवधूहस्तैर्गलितंहरिचंदनं॥ मुहुःश्वासानिलापास्तंयातिदिक्सुरवासतां॥ यमाराध्यपुराणर्षिगर्गोज्योतींषि
तत्त्वतः॥ ज्ञातवान्सकलंचैवनिमित्तपठितंफलं॥ तेनेयंनागवर्येणशिरसाविधृतामही॥ विभर्तिमालांलोकानांसदेवासुरमा
नुषां॥ इतिश्रीविष्णुपुराणेद्वितीयेंशेपंचमोध्यायः॥ पराशरउवाच॥ ततश्चनरकाविप्रभुवोधःसलिलस्यच॥ पापिनोयेषु
पात्यंतेतांछृणुष्वमहामुने॥ रौरवःसूकरोरोधस्तालोविशसनस्तथा॥ महाज्वालस्तप्तकुंभःलवणोथविलोहितः॥ रुधिरांभोवैतर
णीकृमीशःकृमिभोजनः॥ असिपत्रवनंकृष्णोलालाभक्षश्चदारुणः॥ तथापूयवहःपापोवह्निज्वालोह्यधःशिराः॥ संदंशःकाल
सूत्रश्चतमश्चावीचिरेवच॥ श्वभोजनोथाप्रतिष्ठश्चावीचिश्चतथापरः॥ इत्येवमादयश्चान्येनरकाभृशदारुणाः॥ यमस्यविष
येघोराःशस्त्राग्निभयदायिनः॥ पतंतियेषुपुरुषाःपापकर्मरतास्तुये॥ कूटसाक्षीतथासम्यक्पक्षपातेनयोवदेत्॥ यश्चान्यद

च सर्वभूतगुणाधिका॥ आधारभूताः सर्वेषां मैत्रेय जगतामिति॥ इति श्रीविष्णुपुराणे द्वितीयेंशे चतुर्थोध्यायः॥ पराशर उवाच
विस्तार एष कथितः पृथिव्या भवतो मया॥ सप्ततिस्तु सहस्राणि द्विजोछ्रायोपि कथ्यते॥ दशसाहस्रमेकैकं पातालं मुनिसत्तम॥
अतलं वितलं चैव नितलं च गभस्तिमत्॥ महाख्यं सुतलं चाग्र्यं पातालं चापि सप्तमं॥ शुक्लकृष्णारुणाः पीताः शर्कराः शैलकांच
नाः॥ भूमयो यत्र मैत्रेय वरप्रासादमंडिताः॥ तेषु दानवदैतेया यक्षाश्च शतशस्तथा॥ निवसंति महानागजातयश्च महामुने॥ १
स्वर्लोकादपि रम्याणि पातालानीति नारदः॥ प्राह स्वर्गसदां मध्ये पातालेभ्यागतो दिवि॥ आह्लादकारिणः शुभ्रा मणयो य
त्र सुप्रभाः॥ नागाभरणभूषासु पातालं केन तत्समं॥ दैत्यदानवकन्याभिरितश्चेतश्च शोभिते॥ पाताले कस्य न प्रीतिर्विमुक्त
स्यापि जायते॥ दिवार्करश्मयो यत्र प्रभां तन्वंति नातपं॥ शशिनश्च न शीताय निशि द्योताय केवलं॥ भक्ष्यभोज्यमहापानमुदितै
रपि भोगिभिः॥ यत्र न ज्ञायते कालो गतोपि दनुजादिभिः॥ वनानि नद्यो रम्याणि सरांसि कमलाकराः॥ पुंस्कोकिलाभिलापाश्च
मनोज्ञान्यंबराणि च॥ भूषणान्यतिशुभ्राणि गंधाढ्यं चानुलेपनं॥ वीणावेणुमृदंगानां स्वनास्तूर्याणि च द्विज॥ एतान्यन्या
नि चोदारभाग्यभोग्यानि दानवैः॥ दैत्योरगैश्च भुज्यंते पातालांतरगोचरैः॥ पातालानामधश्चास्ते विष्णोर्या तामसी तनुः॥ शे
षाख्या यद्गुणान्वक्तुं न शक्ता दैत्यदानवाः॥ योनंतः कथ्यते सिद्धैर्देवो देवर्षिपूजितः॥ स सहस्रशिरा व्यक्तस्वस्तिकामलभूष
णः॥ फणामणिसहस्रेण यः स विद्योतयन्दिशः॥ सर्वान्करोति निर्वीर्यान्हिताय जगतोसुरान्॥ मदाघूर्णितनेत्रोसौ

ना ते

वि॰पु॰
४८

48

तेयेनरा ब्रह्मचारिणः॥ पुत्रैश्चाध्यापिता ये च ते पतंति कृमिभोजने॥ एते चान्ये च नरकाः शतशोथ सहस्रशः॥ येषु दुष्कृतकर्माणः पच्यंते
यातनांगताः॥ तथैव पापान्येतानि तथान्यानि सहस्रशः॥ भुज्यंते यानि पुरुषैः नरकांतरगोचरैः॥ वर्णाश्रमविरुद्धं च कर्म कुर्वंति ये नराः
कर्मणा मनसा वाचा निरयेषु पतंति ते॥ अधःशिरोभिर्दृश्यंते नारकैर्दिवि देवताः॥ देवाश्चाधोमुखान्सर्वानधः पश्यंति नारका-
न्॥ स्थावराः कृमयोब्जाश्च पक्षिणः पशवो नराः॥ धार्मिकास्त्रिदशास्तद्वन्मोक्षिणश्च यथाक्रमं॥ सहस्रभागप्रथमा द्वितीयानु-
क्रमास्तथा॥ सर्वे ह्येते महाभाग यावन्मुक्तिसमाश्रयाः॥ यावंतो जंतवः स्वर्गे तावंतो नरकौकसः॥ पापकृद्याति नरकं प्रायश्चित्ते
पराङ्मुखः॥ पापानामनुरूपाणि स्वल्पान्यल्पे च तद्विदः॥ प्रायश्चित्तानि मैत्रेय जगुः स्वायंभुवादयः॥ प्रायश्चित्तान्यशेषाणि
तपःकर्मात्मकानि वै॥ यानि तेषामशेषाणां कृष्णानुस्मरणं परं॥ कृते पापेनुतापो वै यस्य पुंसः प्रजायते॥ प्रायश्चित्तं तु तस्यै-
कं हरिसंस्मरणं परं॥ प्रातर्निशि तथा संध्यामध्याह्नादिषु संस्मरन्॥ नारायणमवाप्नोति सद्यः पापक्षयान्नरः॥ विष्णुसंस्मर-
णात्क्षीणसमस्तक्लेशसंचयः॥ मुक्तिं प्रयाति स्वर्गाप्तिः तस्य विघ्नोनुमीयते॥ वासुदेवे मनो यस्य जपहोमार्चनादिषु॥ तस्यां-
तरायो मैत्रेय देवेंद्रत्वादिकं फलं॥ क्व नाकपृष्ठगमनं पुनरावृत्तिलक्षणं॥ क्व जपो वासुदेवेति मुक्तिबीजमनुत्तमं॥ तस्मादहर्निशं
विष्णुं संस्मरन्पुरुषो मुने॥ न याति नरकं शुद्धः संक्षीणाखिलपातकः॥ मनःप्रीतिकरः स्वर्गो नरकस्तद्विपर्ययः॥ नरकस्वर्गसं-
ज्ञे वै पुण्यपापे द्विजोत्तम॥ वस्त्वेकमेव दुःखाय सुखायेर्ष्योद्भवाय च॥ कोपाय च यतस्तस्माद्वस्तु वस्त्वात्मकं कुतः॥ तदेव प्री-
तये भूत्वा पुनर्दुःखाय जायते॥ तस्माद्दुःखात्मकं नास्ति न च किंचित्सुखात्मकं॥ मनसः परिणामोयं सुखदुःखादिलक्षणं

राम
४८

तं वक्ति स नरो याति रौरवं ॥ भ्रूणहा उरहर्त्ता च गोघ्नश्च मुनिसत्तम ॥ यांति ते नरकं घोरं यश्चोच्छ्वासनिरोधकः ॥ सुरापो ब्रह्महं...श्च सुवर्ण
स्तेयी च सूकरे ॥ प्रयांति नरके यश्च तैः संसर्गमुपैति वै ॥ राजन्यवैश्यहा कालेतथैव गुरुतल्पगः ॥ तप्तकुंडे स्वसागामी हंति राजभटांश्च
यः ॥ साध्वीविक्रयकृद्बंधुपालको हयविक्रयी ॥ तप्तलोहे पतंत्येते यश्च भक्तं परित्यजेत् ॥ स्नुषां सुतां वापि गत्वा महाज्वाले निपा
त्यते ॥ अवमंता गुरूणां यो यश्चाक्रोष्टा नराधमः ॥ वेददूषयिता यश्च वेदविक्रयकश्च यः ॥ अगम्यागामी यश्च स्यात्ते यांति शबलं
द्विज ॥ चौरो विमोहे पतति मर्यादादूषकस्तथा ॥ देवद्विजपितृद्वेष्टा रत्नदूषयिता च यः ॥ स याति कृमिभक्षे वै कृमीश च दुरिष्टकृत् ॥
पितृदेवातिथींश्चैव नश्चाश्नाति नराधमः ॥ लालाभक्षे स याति यः शरकर्त्ता च वेधके ॥ करोति कर्णिनो यश्च यश्च खड्गादि
कृन्नरः ॥ प्रयांत्येते विशसने नरके भृशदारुणे ॥ असत्प्रतिग्रहीता सु नरको याति अधोमुखे ॥ अयाज्ययाजकश्चैव तथा नक्षत्रसूच
कः ॥ कृमिपूयवहे चैव को याति मिष्टान्नभुङ्नरः ॥ लाक्षामांसरसानां च तिलानां लवणस्य वा ॥ विक्रेता ब्राह्मणो वेगी तमेव न
रकं द्विज ॥ मार्जारकुक्कुटछागश्ववराहविहंगमान् ॥ पोषयन्नरकं याति तमेव द्विजसत्तम ॥ रंगोपजीवी कैवर्तः कुंडाशी
गरदस्तथा ॥ सूची माहिषकश्चैव पर्वकारी च यो द्विज ॥ आगारदाही मित्रघ्नः शाकुनिर्ग्रामयाजकः ॥ रुधिरांधे पतंत्येते सो
मं विक्रीणते च ये ॥ मधुहा ग्रामहंता च याति वैतरणीं नरः ॥ रेतःपानादिकर्त्तारो मर्यादाभेदिनो हि ये ॥ ते कृष्णे यांत्यशौचाश्च कु
हकाजीविनश्च ये ॥ असिपत्रवनं घोरं वनच्छेदी वृथैव यः ॥ औरभ्रिको मृगव्याधो वह्निज्वाले पतंति वै ॥ यांत्येते द्विज तत्रैव ये
श्वपाकेषु वह्निदः ॥ व्रतेषु लोपको यश्च स्वाश्रमाद्विच्युतश्च यः ॥ संदंशयातनामध्ये पतत स्तावुभावपि ॥ दिवा स्वप्ने च स्कंदं

प

वि॰पु॰
४९

क्षितिः पृथिवीमया ॥ स भूर्लोकः समाख्यातो विस्तारोस्य मयोदितः ॥ भूमिसूर्यांतरं यत्तु सिद्धादिमुनिसेवितं ॥ भुवर्लोकस्तु सोप्यु
क्तो द्वितीयो मुनिसत्तम ॥ ध्रुवसूर्यांतरं यच्च नियुतानि चतुर्दश ॥ स्वर्लोकः सोपि गदितो लोकसंस्थानचिंतकैः ॥ त्रैलोक्यमे
तत्कृतकं मैत्रेय परिपठ्यते ॥ जनस्तपस्तथा सत्यमिति चाकृतकं त्रयं ॥ कृतकाकृतयोर्मध्ये महर्लोक इति स्मृतः ॥ शून्यो भ
वति कल्पांते योत्यंतं न विनश्यति ॥ एते सप्त मया लोका मैत्रेय कथितास्तव ॥ पातालानि च सप्तैव ब्रह्मांडस्यैष विस्तरः ॥ ए
तदंडकटाहेन तिर्यक्चोर्द्ध्वमधस्तथा ॥ कपित्थस्य यथा बीजं सर्वतो वै समावृतं ॥ दशोत्तरेण पयसा मैत्रेयांडं च तद्वृतं ॥ स
र्वोंबुपरिधानोसौ वह्निना वेष्टितो बहिः ॥ वह्निश्च वायुना वायुर्मैत्रेय नभसा वृतः ॥ भूतादिना नभः सोपि महता परिवेष्टितः ॥ द
शोत्तराण्यशेषाणि मैत्रेयैतानि सप्त वै ॥ महांतं च समावृत्य प्रधानं समवस्थितं ॥ अनंतस्य न तस्यांतः संख्यानं चापि विद्यते ॥
तदनंतमसंख्यातप्रमाणं चापि वै यतः ॥ हेतुभूतमशेषस्य प्रकृतिः सा परा मुने ॥ अंडानां तु सहस्राणां सहस्राण्ययुतानि च ॥ ई
दृशानां तथा तत्र कोटिकोटिशतानि च ॥ दारुण्यग्निर्यथा तैलं तिले तद्वत्पुमानपि ॥ प्रधानेवस्थितो व्यापी चेतनात्मात्मवेदनः ॥ प्र
धानं च पुमांश्चैव सर्वभूतात्मभूतया ॥ विष्णुशक्त्या महाबुद्धे वृतौ संश्रयधर्मिणौ ॥ तयोः सैव पृथग्भावकारणं संश्रयस्य च ॥
क्षोभकारणभूता च सर्गकाले महामते ॥ यथा सक्तं जले वातो बिभर्ति कणिकाशतं ॥ शक्तिः सापि तथा विष्णोः प्रधानपुरुषात्म
कं ॥ यथा च पादपो मूलस्कंधशाखादिसंयुतः ॥ आदिबीजात्प्रभवति बीजान्यन्यानि वै ततः ॥ प्रभवंति ततस्तेभ्यः संभवंत्यपरे द्रुमाः
॥ तेपि तल्लक्षणद्रव्यकारणानुगता मुने ॥ एवमव्याकृतात्पूर्वं जायंते महदादयः ॥ विशेषांतास्ततस्तेभ्यः संभवंत्यसुरादयः ॥ तेभ्यश्च

ॐ

राम
४९

49

॥ज्ञानमेव परं ब्रह्म ज्ञानं बंधाय चेष्यते॥ ज्ञानात्मकमिदं विश्वं न ज्ञानाद्विद्यते परं॥ विद्याविद्येति मैत्रेय ज्ञानमेवोपधारय॥ एवमेतन्मयाख्यातं
भवतो मंडलं भुवः॥ पातालानि च सर्वाणि तथैव नरका द्विज॥ समुद्राः पर्वताश्चैव द्वीपाः वर्षाणि निम्नगाः॥ संक्षेपात्सर्वमाख्यातं किं भूयः
श्रोतुमिच्छसि॥ इति श्रीविष्णुपुराणे द्वितीयेंऽशे षष्ठोऽध्यायः॥ मैत्रेय उवाच॥ कथितं भूतलं ब्रह्मन्ममैतदखिलं त्वया॥ भुवर्ल्लोकादि
कान् लोकाञ्छ्रोतुमिच्छाम्यहं मुने॥ तथैव ग्रहसंस्थानं प्रमाणानि यथा तथा॥ समाचक्ष्व महाभाग तन्मह्यं परिपृच्छते॥ पराशर
उवाच॥ रविचंद्रमसोर्यावन्मयूखैरवभास्यते॥ ससमुद्रसरिच्छैला तावती पृथिवी स्मृता॥ यावत्प्रमाणा पृथिवी विस्तारपरिमं
डलात्॥ नभस्तावत्प्रमाणं वै व्यासमंडलतो द्विज॥ भूमेर्योजनलक्षे तु सौरं मैत्रेय मंडलं॥ [illegible] लक्षाद्दिवाकरस्यापि मं
डलं शशिनः स्थितं॥ पूर्णे शतसहस्रे तु योजनानां निशाकरात्॥ नक्षत्रमंडलं कृत्स्नमुपरिष्टात्प्रकाशते॥ द्वे लक्षे चोत्तरे ब्रह्मन्बुधो
नक्षत्रमंडलात्॥ तावत्प्रमाणभागे तु बुधस्याप्युशना स्थितः॥ अंगारकोपि शुक्रस्य तत्प्रमाणे व्यवस्थितः॥ लक्षद्वये तु भौमस्य
स्थितो देवपुरोहितः॥ सौरिर्बृहस्पतेश्चोर्ध्वं द्विलक्षे समवस्थितः॥ सप्तर्षिमंडलं तस्माल्लक्षमेकं द्विजोत्तम॥ ऋषिभ्यस्तु सह
स्राणां शतादूर्ध्वं व्यवस्थितः॥ मेढीभूतः समस्तस्य ज्योतिश्चक्रस्य वै ध्रुवः॥ त्रैलोक्यमेतत्कथितमुत्सेधेन महामुने॥ इज्याफलस्य भूरेषा
इज्या चात्र प्रतिष्ठिता॥ ध्रुवादूर्ध्वं महर्लोको यत्र ते कल्पवासिनः॥ एकयोजनकोटिस्तु यत्र ते कल्पवासिनः॥ द्वे कोट्यौ तु जनो लोको
यत्र ते ब्रह्मणः सुताः॥ सनंदनाद्याः प्रथिता मैत्रेयामलचेतसः॥ चतुर्गुणोत्तरे चोर्ध्वं जनलोकात्तपः स्मृतं॥ वैराजा यत्र ते देवाः स्थिता
दाहविवर्जिताः॥ षड्गुणेन तपोलोकात्सत्यलोको विराजते॥ अपुनर्मारका यत्र ब्रह्मलोको हि स स्मृतः॥ पादगम्यं तु यत्किंचिद्वस्त्व

द्वि

वि०पु०
५०

च। उत्तरेण च सोमस्य तासां नामानि मे शृणु॥ वस्वौकसारा शक्रस्य याम्या संयमनी तथा। पुरी सुखा जलेशस्य सोमस्य च विभावरी॥
काष्ठां गतो दक्षिणतः क्षिप्तेषुरिव सर्पति। मैत्रेय भगवान् भानुर्ज्योतिषां चक्रसंयुतः॥ अहोरात्रव्यवस्थानकारणं भगवान् रविः।
देवयानः परः पन्था योगिनां क्लेशसंक्षये॥ दिवसस्य रविर्मध्ये सर्वकालं व्यवस्थितः। सर्वद्वीपेषु मैत्रेय निशार्द्धस्य च सम्मुखः॥
उदयास्तमने चैव सर्वकालं तु सम्मुखे। विदिशासु त्वशेषासु तथा ब्रह्मन् दिशासु च॥ यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृ-
तः। तिरोभावं च यत्रैति तत्रैवास्तमनं रवेः॥ नैवास्तमनमर्कस्य नोदयः सर्वदा सतः। उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः॥ शक्रा-
दीनां पुरे तिष्ठन् स्पृशत्येष पुरत्रयं। विकोणौ द्वौ विकोणस्थस्त्रीन् कोणान् द्वे पुरे तथा॥ उदितो वर्द्धमानाभिरामध्याह्नात्तपन् रविः।
ततः परं ह्रसन्तीभिर्गोभिरस्तं नियच्छति॥ उदयास्तमनाभ्यां च स्मृते पूर्वापरे दिशौ। यावत्पुरस्तात्तपति तावत्पृष्ठे च पार्श्वयोः॥
ऋतेऽमरगिरेर्मेरोरुपरि ब्रह्मणः सभां॥ ये ये मरीचयोऽर्कस्य प्रयान्ति ब्रह्मणः सभां। ते ते निरस्तास्तद्भासा प्रतीपमुपयान्ति वै॥ त-
स्माद्दिश्युत्तरस्यां वै दिवारात्रिः सदैव हि। सर्वेषां द्वीपवर्षाणां मेरुरुत्तरतो यतः॥ प्रभा विवस्वतो रात्रावस्तं गच्छति भास्करे। विश-
त्यग्निमतो रात्रौ वह्निर्दूरात्प्रकाशते। वह्नेः पादस्तथा भानुर्दिनेष्वाविशति द्विज। अतीव वह्निसंयोगादतः सूर्यः प्रकाशते। तेज-
सी भास्कराग्नेये प्रकाशोष्णस्वरूपिणी॥ परस्परानुप्रवेशादाप्यायेते दिवानिशं॥ दक्षिणोत्तरभूम्यर्द्धे समुत्तिष्ठति भास्करे॥ अहो-
रात्रं विशत्यम्भस्तमःप्राकाश्यशीलवत्॥ आताम्रा हि भवन्त्यापो दिवा नक्तप्रवेशनात्। दिनं विशति चैवाम्भो भास्करेऽस्तमुपेयुषि।
षि॥ तस्माच्छुक्लीभवन्त्यापो नक्तमह्नः प्रवेशनात्। एवं पुष्करमध्येन यदा याति दिवाकरः। त्रिंशद्भागं तु मेदिन्यास्तदा मौहूर्ति

लो

राम
५०

पुत्रास्तेषांच पुत्राणामपरे पुत्रकाः॥ बीजाद्वृक्षप्ररोहेण यथा नापचयस्तरोः॥ भूतानां भूतसर्गेण नैवापचयस्तथा॥ सन्निधानाद्य-
थाकाशकालाद्याः कारणं तरोः॥ तथैवापरिणामेन विश्वस्य भगवान्हरिः॥ व्रीहिबीजे यथा मूलं नालं पत्रांकुरौ तथा॥ कांडंको-
शस्तु पुष्पं च क्षीरं तद्वच्च तंडुलाः॥ तुषाः कणाश्च संतो वै यांत्याविर्भावमात्मनः॥ प्ररोहहेतुसामग्रीमासाद्य मुनिसत्तम॥ तथा क-
र्मस्वनेकेषु देवाद्यास्तनवः स्थिताः॥ विष्णुशक्तिं समासाद्य प्ररोहमुपयांति वै॥ स च विष्णुः परं ब्रह्म यतः सर्वमिदं जगत्॥ जगच्च
यो यत्र चेदं यस्मिंश्च लयमेष्यति॥ तद्ब्रह्म तत्परं धाम सदसत्परमं पदं॥ यस्य सर्वमभेदेन जगदेतच्चराचरं॥ स एव मूलप्रकृ-
तिर्व्यक्तरूपी जगच्च सः॥ तस्मिन्नेव लयं सर्वं याति तत्र च तिष्ठति॥ कर्ता क्रियाणां स च इज्यते क्रतुः स एव तत्कर्मफलं च
तस्य यत्॥ स्रुगादि यत्साधनमप्यशेषतो हरेर्न किंचिद्व्यतिरिक्तमस्ति॥ इति श्री विष्णुपुराणे द्वितीयेंशे सप्तमोऽध्यायः॥ पराशर
उवाच॥ व्याख्यातमेतद्ब्रह्मांडसंस्थानं तव सुव्रत॥ ततः प्रमाणसंस्थाने सूर्यादीनां शृणुष्व मे॥ योजनानां सहस्राणि भास्करस्य र-
थो नव॥ ईषादंडस्तथैवास्य द्विगुणो मुनिसत्तम॥ सार्द्धकोटिस्तथा सप्त नियुतान्यधिकानि वै॥ योजनानां तु तस्याक्षस्तत्र चक्रं प्र-
तिष्ठितं॥ त्रिनाभिमति पंचारे षण्णेमिन्यक्षयात्मके॥ संवत्सरमये कृत्स्नं कालचक्रं प्रतिष्ठितं॥ चत्वारिंशत्सहस्राणि द्वितीयाक्षो
विवस्वतः॥ पंचान्यानि तु सार्द्धानि स्यंदनस्य महामते॥ अक्षप्रमाणमुभयोः प्रमाणं तद्युगार्द्धयोः॥ ह्रस्वोक्षस्तद्युगार्द्धेन ध्रुवाधा-
रे रथस्य वै॥ द्वितीयेक्षे तु तच्चक्रं संस्थितं मानसाचले॥ हयाश्च सप्त छंदांसि तेषां नामानि मे शृणु॥ गायत्री च बृहत्युष्णिग्जगती त्रि-
ष्टुबेव च॥ अनुष्टुप्पंक्तिरित्युक्ताश्छंदांसि हरयो रवेः॥ मानसोत्तरशैलस्य पूर्वतो वासवी पुरी॥ दक्षिणेन यमस्यान्या प्रतीच्यां वरुणस्य

वि॰पु॰
५१

दिनं॥ प्रोच्यते च तथा संध्या तु उषा व्युष्टोर्ध्वदंतरं॥ संध्याकाले च संप्राप्ते रौद्रे परमदारुणे॥ मंदेहा राक्षसा घोराः सूर्य्यमिच्छंति खादि-
तुं॥ प्रजापतिकृतः शापस्तेषां मैत्रेय राक्षसां॥ अक्षयत्वं शरीराणां मरणं च दिने दिने॥ ततः सूर्य्यस्य तैर्युद्धं भवत्यत्यंतदारुणं
ततो द्विजोत्तमास्तोयं यत् क्षिपंति महामुने॥ ॐकारब्रह्मसंयुक्तं गायत्र्या चाभिमंत्रितं॥ तेन दह्यंति ते पापा वज्रीभूतेन वारिणा॥
अग्निहोत्रे हूयते या समंत्रा प्रथमाहुतिः॥ सूर्यो ज्योतिः सहस्रांशुः सूर्यादीप्यति भास्करः॥ ॐकारो भगवान्विष्णुस्त्रिधामा व च-
सांपतिः॥ तदुच्चारणतस्ते तु विनाशं यांति राक्षसाः॥ वैष्णवांशः परः सूर्य्यो योंतर्ज्योतिरसंप्लवं॥ अभिधायक ॐकारस्तस्य स प्रेरकः प-
रः॥ तेन संप्रेरितं ज्योतिरोंकारेणाथ दीप्तिमत्॥ दहत्यशेषरक्षांसि मंदेहाख्यान्यघानि वै॥ तस्मान्नोल्लंघनं कार्य्यं संध्योपासनकर्मणः
॥ स हंति सूर्य्यं संध्यायां नोपास्तिं कुरुते तु यः॥ ततः प्रयाति भगवान्ब्राह्मणैरभिरक्षितः॥ वालखिल्यादिभिश्चैव जगतः पालनोद्य-
तः॥ काष्ठा निमेषा दश पंच चैव त्रिंशच्च काष्ठा गणयेत्कलां च॥ त्रिंशत्कलाश्चैव भवेन्मुहूर्त्तस्तैस्त्रिंशता रात्र्यहनी समेते॥ ह्रासव-
द्धी त्वहर्भागैर्दिवसानां यथाक्रमं॥ संध्या मुहूर्त्तमात्रा वै ह्रासवृद्धौ समा स्मृता॥ लेखाप्रभृत्यथादित्ये त्रिमुहूर्त्तगते तु वै॥ प्रात-
स्मृतस्ततः कालो भागश्चाह्नः स पंचमः॥ तस्मात्प्रातस्तनात्कालात्त्रिमुहूर्त्तस्तु संगवः॥ मध्याह्नस्त्रिमुहूर्त्तस्तु तस्मात्कालात्तु संग-
वात्॥ तस्मान्माध्याह्निकात्कालादपराह्ण इति स्मृतः॥ त्रय एव मुहूर्त्तास्तु कालभागः स्मृतो बुधैः॥ अपराह्णे व्यतीते तु कालः सायां-
ह्न एव च॥ दशपंच मुहूर्त्ता ह्नि मुहूर्त्तास्त्रय एव च॥ दशपंच मुहूर्त्तं वै अहर्वैषुवतं स्मृतं॥ वर्द्धते ह्रसते चैवाप्ययने दक्षिणोत्तरे॥ अ-
हस्तु ग्रसते रात्रिं रात्रिर्ग्रसति वासरं॥ शरद्वसंतयोर्मध्ये विषुवं तु विभाव्यते॥ तुलामेषगते भानौ समरात्रिदिनं तु तत्॥ कर्क्कटावस्थि

ह्रा
॥
एम
५१

(5)

कीगतिः॥ कुलालचक्रपर्यंतो भ्रमन्नेषु दिवाकरः॥ करोत्यहस्तथा रात्रिं विमुंचन्मेदिनीं द्विज॥ अयनस्योत्तरस्यादौ मकरं याति भास्करः
ततः कुंभं च मीनं च राशे राश्यंतरं द्विज॥ त्रिष्वेतेष्वथ भुक्तेषु ततो वैषुवतीं गतिं॥ प्रयाति सविता कुर्वन्नहोरात्रं ततः समं॥ ततो रात्रिः क्षयं या
ति वर्द्धते तु दिनं दिनं॥ ततश्च मिथुनस्यांते परां काष्ठामुपागतः॥ राशिं कर्कटकं प्राप्य कुरुते दक्षिणायनं॥ कुलालचक्रपर्यंतो य
था शीघ्रं प्रवर्त्तते॥ दक्षिणप्रक्रमे सूर्यस्तथा शीघ्रं प्रवर्त्तते॥ अतिवेगितया कालं वायुवेगबलाच्चलं॥ तस्मात्प्रकृष्टां भूमिं तु कालेना
ल्पेन गच्छति॥ सूर्यो द्वादशभिः शैघ्र्यान्मुहूर्त्तैर्दक्षिणायने॥ त्रयोदशार्द्धमृक्षाणामह्ना तु चरति द्विज॥ मुहूर्त्तैस्तावदृक्षाणि नक्तम
ष्टादशैश्चरन्॥ कुलालचक्रमध्यस्थो यथा मंदं प्रसर्प्पति॥ तथोदगयने सूर्यः सर्पते मंदविक्रमः॥ तस्माद्दीर्घेण कालेन भूमि
मल्पां तु गच्छति॥ अष्टादशमुहूर्त्तं यदुत्तरायणपश्चिमं॥ अहर्भवति तच्चापि चरते मंदविक्रमः॥ त्रयोदशार्द्धमह्ना तु ऋक्षाणां चरते
रविः॥ मुहूर्त्तैस्तावदृक्षाणि रात्रौ द्वादशभिश्चरन्॥ अतो मंदतरं नाभ्यां चक्रं भ्रमति वै यथा॥ मृत्पिंड इव मध्यस्थो ध्रुवो भ्रमति वै तथा
॥ कुलालचक्रनाभिस्तु यथा तत्रैव वर्त्तते॥ ध्रुवस्तथा हि मैत्रेय तत्रैव परिवर्त्तते॥ उभयोः काष्ठयोर्मध्ये भ्रमते मंडलानि च॥ दिवा
नक्तं च सूर्यस्य मंदा शीघ्रा च वै गतिः॥ मंदाह्नि यस्मिन्नयने शीघ्रा नक्तं तदा गतिः॥ शीघ्रा निशि यदा चास्य तदा मंदा दिवा गतिः
एकप्रमाणमेवैष मार्गं याति दिवाकरः॥ अहोरात्रेण यो भुंक्ते समस्ता राशयो द्विज॥ षडेव राशयो भुंक्ते रात्रावन्यांश्च षड् दिवा॥ रा
शिप्रमाणजनिता दीर्घह्रस्वात्मता दिने॥ तथा निशायां राशीनां प्रमाणैर्लघुदीर्घता॥ दिनादेर्दीर्घह्रस्वत्वं तद्भोगेनैव जायते
॥ उत्तरे प्रक्रमे शीघ्रा निशि मंदा गतिर्दिवा॥ दक्षिणे त्वयने चैव विपरीता विवस्वतः॥ उषा रात्रिः समाख्याता व्युष्टिश्चाप्युच्यते दि

वि॰पु॰ ५२

॥लोकपाला स्थितास्तेते लोकालोके चतुर्दिशं॥उत्तरं यदगस्त्यस्य अजवीथ्याश्च दक्षिणं॥पितृयानः स वै पंथा वैश्वानरपथा
द्बहिः॥तत्रासते महात्मान ऋषयो ये ग्निहोत्रिणः॥भूतारंभकृतं ब्रह्म शंसंतो ऋत्विगुद्यताः॥प्रारंभंते तु ये लोकास्तेषां पंथा स दक्षि
णः॥चलितं ते पुनर्ब्रह्म स्थापयंति युगे युगे॥संतत्या तपसा चैव मर्यादाभिः श्रुतेन च॥जायमानास्तु पूर्वे च पश्चिमानां गृहेषु वै॥प
श्चिमाश्चैव पूर्वेषां जायंते निधनेष्विह॥एवमावर्त्तमानास्ते तिष्ठंति नियतव्रताः॥सवितुर्दक्षिणं मार्गं श्रिता ह्याचंद्रतारकं॥
नागवीथ्युत्तरं यच्च सप्तर्षिभ्यश्च दक्षिणं॥उत्तरः सवितुः पंथा देवयानस्तु स स्मृतः॥तत्र ते वशिनः सिद्धा विमला ब्रह्मचारिणः॥
संततिं ते जुगुप्संति तस्मान्मृत्युर्जितश्च तैः॥अष्टाशीतिसहस्राणि मुनीनामूर्द्ध्वरेतसां॥उदक्पंथानमर्यम्णः स्थितान्याभूतसं
प्लवं॥तेसंप्रयोगाल्लोभस्य मैथुनस्य च वर्जनात्॥इछाद्वेषाप्रवृत्त्या च भूतारंभविवर्जनात्॥पुनश्चाकामसंयोगाच्छब्दादे
र्दोषदर्शनात्॥इत्येभिः कारणैः शुद्धास्तेमृतत्वं हि भेजिरे॥आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते॥त्रैलोक्यस्थितिकालोय
मपुनर्मार उच्यते॥ब्रह्महत्याश्वमेधाभ्यां पुण्यपापकृतो विधिः॥आभूतसंप्लवांतं तु फलमुक्तं तयोर्द्विज॥यावन्मात्रे प्रदेशे तु
मैत्रेयावस्थितो ध्रुवः॥क्षयमायाति तावत्तु भूमेराभूतसंप्लवे॥ऊर्द्ध्वोत्तरमृषिभ्यस्तु ध्रुवो यत्र व्यवस्थितः॥एतद्विष्णुपदं दिव्यं

ग

त्रितीयं व्योम्नि भासुरं॥निर्धूतदोषपंकानां यतीनां संयतात्मनां॥स्थानं तत्परमं विप्र पुण्यपापपरिक्षये॥अपुण्यपुण्योप
रमे क्षीणाशेषाप्तिहेतवः॥यत्र गत्वा न शोचंति तद्विष्णोः परमं पदं॥धर्मध्रुवाद्यास्तिष्ठंति यत्र ते लोकसाक्षिणः॥तत्सार्ष्टि

राम

५२

नेभानोर्दक्षिणायनमुच्यते॥ उत्तरायणमप्युक्तं मकरस्थे दिवाकरे॥ त्रिंशन्मुहूर्त्तं कथितमहोरात्रं तु पन्मया॥ तानि पंचदशाऽ
ह्नः पक्ष इत्यभिधीयते॥ मासः पक्षद्वयेनोक्तो द्वौ मासौ चार्कजो ऋतुः॥ ऋतुत्रयं चाप्ययनं द्वयेन वर्षसंज्ञितं॥ संवत्सरादयः पंच
चातुर्मास्यविकल्पिताः॥ निश्चयः सर्वकालस्य युगमित्यभिधीयते॥ संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः॥ इद्वत्सरस्तृतीयस्तु चतु
र्थश्चानुवत्सरः॥ वत्सरः पंचमश्चात्र कालोऽयं युगसंज्ञितः॥ यश्चैतस्योत्तरः शैलः शृंगवानिति विश्रुतः॥ त्रीणि तस्य तु शृंगाणि खेस्पृ
शृंगवान्स्मृतः॥ दक्षिणं चोत्तरं चैव मध्यं वैषुवतं तथा॥ शरद्वसंतयोर्मध्ये तद्भानुः प्रतिपद्यते॥ मेषादौ च तुलादौ च मैत्रेय विषुवत्
स्थितः॥ तदा तुल्यमहोरात्रं करोति तिमिरापहः॥ दशपंचमुहूर्त्तं वै तदुभयं स्मृतं॥ प्रथमे कृत्तिकाभागे यदा भास्वांस्तदा श
शी॥ विशाखानां चतुर्थेंशे मुने तिष्ठत्यसंशयं॥ विशाखानां यदा सूर्यश्चरत्यंशं तृतीयकं॥ तदा चंद्रं विजानीयात्कृत्तिकाशिरसि
स्थितं॥ तदैव विषुवाख्यो वै कालः पुण्योऽभिधीयते॥ तदा दानानि देयानि देवेभ्यः प्रयतात्मभिः॥ ब्राह्मणेभ्यः पितृभ्यश्च मुखमेतत्तु
दानजं॥ दत्तदानस्तु विषुवे कृतकृत्योऽभिजायते॥ अहोरात्रार्द्धमासौ तु कलाकाष्ठा क्षणास्तथा॥ पौर्णमासी तथा ज्ञेया अमावास्या तथै
व च॥ सिनीवाली कुहूश्चैव राका चानुमतिस्तथा॥ तपस्तपस्यौ मधुमाधवौ च शुक्रः शुचिश्चायनमुत्तरं स्यात्॥ नभो नभस्योऽथ इषश्च
सोर्जः सहः सहस्याविति दक्षिणं स्यात्॥ लोकालोकश्च यः शैलः प्रागुक्तो भवतो मया॥ लोकपालास्तु चत्वारस्तत्र तिष्ठंति सुव्रताः॥
सुधामा शंखपाच्चैव कर्दमस्यात्मजो द्विज॥ हिरण्यरोमा चैवान्यश्चतुर्थः केतुमानपि॥ निर्द्वंद्वा निरभिमाना निस्तंद्रा निःपरिग्रहाः॥

वि॰पु॰
५३

यस्याः स्नानैः पापं प्रणश्यति ॥ अपूर्वपुण्यप्राप्तिश्च सद्यो मैत्रेय जायते ॥ दत्ताः पितृभ्यो यत्रापस्तनयैः श्रद्धयान्वितैः ॥ समात्रयं प्रयच्छं
ति जो प्रीतिं मैत्रेय दुर्लभां ॥ यस्यामिष्ट्वा महायज्ञैर्यज्ञेशं पुरुषोत्तमं ॥ द्विजभूपाः परां सिद्धिमवापुर्दिवि चेह च ॥ स्नानाद्विधूतपापाश्च
पुज्जलैर्यतयस्तथा ॥ केशवासक्तमनसः प्राप्ता निर्वाणमुत्तमं ॥ श्रुताभिभाषिता दृष्टा स्पृष्टा पीतावगाहिता ॥ पापापवयति स्मृ
ता निकीर्तिता च दिने दिने ॥ गंगा गंगेति यैर्नाम योजनानां शतेष्वपि ॥ स्थितैरुच्चारितं हंति पापं जन्मत्रयार्जितं ॥ यतः सा पा
वनार्थाय त्रयाणां जगतामपि ॥ समुद्भूता परां तत्तु तृतीयं भगवत्पदं ॥ इति श्री विष्णुपुराणे द्वितीयेंऽशेऽष्टमोऽध्यायः ॥ पराश
र उवाच ॥ तारामयं भगवतः शिशुमाराकृति प्रभो ॥ दिवि रूपं हरेर्यत्तु तस्य पुच्छे स्थितो ध्रुवः ॥ सैष भ्रमन्भ्रामयति चंद्रादित्यादिका
न्ग्रहान् ॥ भ्रमंतमनु तं यांति नक्षत्राणि च चक्रवत् ॥ सूर्याचंद्रमसौ तारा नक्षत्राणि ग्रहैः सह ॥ वातानीकमयैर्बंधैर्ध्रुवे बद्धा
नि ते ॥ शिशुमाराकृति प्रोक्तं यद्रूपं ज्योतिषां दिवि ॥ नारायणः परं धाम्नां तस्याधारः स्वयं हृदि ॥ उत्तानपादपुत्रस्तु समाराध्य
जगत्पतिं ॥ स तारा शिशुमारस्य ध्रुवः पुच्छे व्यवस्थितः ॥ आधारः शिशुमारस्य सर्वाध्यक्षो जनार्दनः ॥ ध्रुवस्य शिशुमारस्तु ध्रुवे
भानुर्व्यवस्थितः ॥ तदाधारं जगच्चेदं सदेवासुरमानुषं ॥ येन विप्र विधानेन तन्मे एकमनाः शृणु ॥ विवस्वानष्टभिर्मासैर्ग्रसत्
यापो रसात्मकः ॥ वर्षत्यंबु ततश्चान्नमन्नादप्यखिलं जगत् ॥ विवस्वानंशुभिस्तीक्ष्णैरादाय जगतो जलं ॥ सोमं पुष्णात्यथेंदुश्च
वायुनाडीमयैर्दिवि ॥ नालैर्विक्षिपतेऽभ्रेषु धूमाग्न्यनिलमूर्तिषु ॥ न भ्रश्यंति यतस्तेभ्यो जलान्यभ्राणि तान्यतः ॥ अभ्रस्थाः प्र
पतंत्यापो वायुनासमुदीरिताः ॥ संस्कारं कालजनितं मैत्रेयासाद्य निर्मलाः ॥ सरित्समुद्रभौमास्तु तथापः प्राणिसंभवाः

राम
५३

स

स्तत्रयोगे ह्यस्त द्विजो: परमं पदं॥ यत्रोजमेतत्स्रोतंच यज्ञतं सचराचरं॥ भाव्यं चविष्णुमैत्रेयतद्विजो: परमं पदं॥ द्विवीव चक्षुरात
तं योगिनां तन्मयात्मनां॥ विवेकज्ञान दृष्टं च तद्विजो: परमं पदं॥ यस्मिन्प्रतिष्ठितो भास्वान्मेढीभूत: स्वयं ध्रुव:॥ ध्रुवे च सर्व ज्योती
षि ज्योतिषं तामुवो द्विज॥ मेघेषु संगतावृष्टिर्वृष्टेराघोष्यपोषणं॥ आप्यायनं च सर्वेषां देवादीनां महामुने॥ ततश्चाज्याहुति द्वा
रापोषितास्ते हविर्भुज:॥ वृष्टे: कारणतां यातिभूतानां स्थितये पुन:॥ एवमेतत्पदं विष्णोस्तृतीयममलात्मकं॥ आधारभूतं लो
कानां त्रयाणां वृष्टिकारणं॥ तत: प्रवर्त्तते ब्रह्मन्सर्वपापहरा सरित्॥ गंगा देवांगनांगीनामनुलेपनपिंजरा॥ वामपादाम्बुजांगु
ष्ठनखस्रोतोविनिर्गतां॥ विष्णोर्बिभर्त्ति यां भक्त्या शिरसाहर्निशं ध्रुव:॥ तत: सप्तर्षयो यस्या: प्राणायामपरायणा॥ तिष्ठंति वी
चिमालाभिरुह्यमानजटाजले॥ वार्यौघै: संतति यस्या: प्लावितं शशिमंडलं॥ भूयोधिकतरां कांतिं वहत्येतदुपक्षये॥ मेरुपृ
ष्ठे पतत्युच्चै: नि:क्रांताशशिमंडलात्॥ जगत: पावनार्थाय प्रयाति च चतुर्दिशं॥ इंद्रियस्तत्र विप्रस्तु भुवो यत्र व्यवस्थित:॥ एतद्वि
ष्णुपदं दिव्यं तृतीयं व्योम्नि भासुरं॥ निर्धूतपापपंकानां यतीनां संयतात्मनां॥ स्थानं तत्परमं विप्र पुण्यपापपरिक्षये॥ अपुण्यपु
ण्यापापुरमे क्षीणाशेषाप्तिहेतव:॥ यत्र गत्वा नशोचंति तद्विष्णो: परमं पदं॥ धर्मध्रुवाद्यास्तिष्ठंति यत्र ते लोकसाक्षिण:॥ तत्साम्र्योत्प
न्नयोगेद्धास्तद्विष्णो: परमं पदं॥ यत्रोजमेतत्प्रोतं च यज्ञतं सचराचरं॥ भाव्यं च विश्वं मैत्रेय तद्विष्णो: परमं पदं॥ सीता चालकनंदा च
चक्षुर्भद्रा च संस्थिता॥ एकैव या चतुर्भेदा दिग्भेदगतिलक्षणा॥ भेदं चालकनंदाख्यं यस्या: सर्वोपिदक्षिणं॥ दधार शिरसा प्रीत्या
वर्षाणामधिकं शतं॥ शंभोर्जटाकलापाच्च विनि:क्रांतास्थिशर्करा॥ प्लावयित्वा दिवं निन्ये या पापान्सगरात्मजान्॥ स्नातस्य सलिले

वि॰पु॰
५४

निवसंत्ये तेषु चिन्हांस्तेन्निबोध मे ॥ मित्रोत्रिस्तक्षको रक्षः पौरुषेयोथ मेनका हाहा रथस्वनश्चैव मैत्रेयैते वसंति वै ॥ वरुणो वशिष्ठो रंभा
सहजन्या हुहूर्बुधः ॥ रथचित्रस्तथा शुक्रो वसंत्याषाढसंज्ञिते ॥ इंद्रो विश्वावसुः श्रोता एलापत्रस्तथांगिराः ॥ प्रम्लोचा च नभस्ये-
ते सर्पिश्चार्के वसंति वै ॥ विवस्वानुग्रसेनश्च भृगुरापूरणस्तथा ॥ अनुम्लोचा शंखपालो व्याघ्रो भाद्रपदे तथा ॥ पूषा च सुरु-
चिर्धातो गौतमोथ धनंजयः ॥ सुषेणोन्यो घृताची च वसंत्याश्वयुजे द्विजे ॥ विश्वावसुर्भरद्वाजो पर्जन्यैरावतौ तथा ॥ विश्वाची
सेनजिच्चापि कार्त्तिके च वसंति वै ॥ अंशुः कश्यपतार्क्षौ तु महापद्मस्तथोर्वशी ॥ चित्रसेनस्तथा विद्युन्मार्गशीर्षेधिकारिणः
क्रतुर्भगस्तथोर्णायुः स्फूर्जः कर्कोटकस्तथा ॥ अरिष्टनेमिश्चैवान्या पूर्वचित्तिर्वराप्सरा ॥ पौषमासे वसंत्येते सप्त भास्कर-
मंडले ॥ लोकप्रकाशनार्थाय विप्रवर्याधिकारिणः ॥ त्वष्टाथ जमदग्निश्च कंबलोथ तिलोत्तमा ॥ ब्रह्मापेतोथ ऋतजिद्धृत-
राष्ट्रोथ सप्तमः ॥ माघमासे वसंत्येते सप्त मैत्रेय भास्करे ॥ श्रूयतां चापरे सूर्ये फाल्गुने निवसंति ये ॥ विष्णुरश्वतरो रंभा सूर्य-
वर्चाश्च सत्यजित् ॥ विश्वामित्रस्तथा रक्षो यज्ञापेतो महामुने ॥ मासेष्वेतेषु मैत्रेय वसंत्येते तु सप्तकाः ॥ सवितुर्मंडले ब्रह्मन्
विष्णुशक्त्युपबृंहिताः ॥ स्तुवंति मुनयः सूर्यं गंधर्वैर्गीयते पुरः ॥ नृत्यंत्यप्सरसो यांति सूर्यस्यानु निशाचराः ॥ वहंति पन्नगा
यक्षैः क्रियतेभीषुसंग्रहः ॥ वालखिल्यास्तथैवैनं परिवार्य समासते ॥ सोयं सप्तगणः सूर्यमंडले मुनिसत्तम ॥ हिमोष्णवारि-
वृष्टीनां हेतुत्वे समयं गतः ॥ इति श्रीविष्णुपुराणे द्वितीयेंशे दशमोध्यायः ॥ मैत्रेय उवाच ॥ यदेतद्भगवानाह गणः सप्तवि-

एम
५४

वृनुः श्रुत्वा भगवान्नादत्ते रश्मिसुते ॥ आकाशगंगासलिलं तथा दाप्यः भक्तिमान् ॥ अनन्तगतमेवोक्तं सद्यः क्षिपति रश्मिभिः ॥ तस्य सं
स्पर्शनिर्धूतपापपंको द्विजोत्तम ॥ न याति नरकं मर्त्यो दिव्यस्नानं हि तत्स्मृतं ॥ दृष्टसूर्ये हि यद्वारि पतत्यभ्रैर्विना दिवः ॥ आकाशगंगास
लिलं तथा दाप्यः भक्तिमान् ॥ अनन्तगतमेवो ॥ कृत्तिकादिषु ऋक्षेषु विषमेष्वंबु यद्दिवः ॥ दृष्टार्कं पतति ज्ञेयं तद्गांगं दिग्गजोज्झितं ॥ युग्म
र्क्षेषु च यत्तोयं पतत्यर्कोज्झितं दिवः ॥ तत्सूर्यरश्मिभिः सर्वं समादाय निरस्यति ॥ उभयं पुण्यमत्यर्थं नृणां पापभयापहं ॥ आकाशगंगासलि
लं दिव्यं स्नानं महामुने ॥ यत्तु मेघैः समुत्सृष्टं वारि तत्प्राणिनां द्विज ॥ पुष्णात्योषधयः सर्वा जीवनायामृतं हि तत् ॥ तेन वृद्धिं परां नीतः स
कलश्चौषधीगणः ॥ साधकः फलपाकाय प्रजानां द्विज जायते ॥ तेन यज्ञान् यथाप्रोक्तान् मानवाः शास्त्रचक्षुषः ॥ कुर्वंत्यहरहस्तैश्च देवा
नाप्याययंति ते ॥ एवं यज्ञाश्च वेदाश्च वर्णाश्च पृथुभूतगणाश्च ये ॥ वृष्ट्या धृतमिदं सर्वं भवत्यन्नं निष्पाद्यते यथा ॥ सापि निष्पाद्यते वृष्टिः सवित्रा मुनि
सत्तम ॥ आधारभूतः सवितुर्ध्रुवो मुनिवरोत्तम ॥ ध्रुवस्य शिशुमारोऽसौ सोऽपि नारायणात्मकः ॥ हृदि नारायणस्तस्य शिशुमारस्य संस्थितः
विभर्ता सर्वभूतानामादिभूतः सनातनः ॥ इति श्रीविष्णुपुराणे द्वितीयेंऽशे नवमोऽध्यायः ॥ पराशर उवाच ॥ साशीतिमंडलशतं काष्ठयो
रंतरं द्वयोः ॥ आरोहणावरोहाभ्यां भानोरब्देन या गतिः ॥ स रथोऽधिष्ठितो देवैरादित्यैरृषिभिस्तथा ॥ गंधर्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसैः
॥ धाता क्रतुस्थला चैव पुलस्त्यो वासुकिस्तथा ॥ रथकृद्ग्रामणीर्हेतिस्तुंबुरुश्चैव सत्तम ॥ एते वसंति वै चैत्रे मधुमासे सदैव हि ॥ मैत्रेय
स्यंदने भानोः सप्त मासाधिकारिणः ॥ अर्यमा पुलहश्चैव रथौजाः पुंजिकस्थला ॥ प्रहेतिः कच्छनीरश्च नारदश्च रथे रवेः ॥ माधवे

स्यरप्यैणास्ते त्रयीयमास्वेन तांगतः॥ छायादर्शनसंयोगं स तं प्राप्नोत्यथात्मनः॥ एवं सा वैष्णवी शक्तिर्नैवापैति ततो द्विज॥ मासानुमासं
भास्वंतमध्यास्ते तत्र संस्थिता॥ पितृदेवमनुष्यादीन्स सदाप्याययत्प्रभुः॥ परिवर्तत्यहोरात्रं कारणं सविता द्विज॥ सूर्यरश्मिसुषुम्णो य
स्तर्पितस्तेन चंद्रमाः॥ कृष्णपक्षेमरैः शश्वत्पीयते वै सुधामयः॥ पीतं तं द्विकलं सोमं कृष्णपक्षक्षये द्विज॥ पिबंति पितरस्तेषां भास्करात्तर्प
णं तथा॥ आदत्ते रश्मिभिर्यं तु क्षितिसंस्थं रसं रविः॥ तमुत्सृजति भूतानां पुष्ट्यर्थं सस्यवृद्धये॥ तेन प्रीणात्यशेषाणि भूतानि भगवान्
रविः॥ पितृदेवमनुष्यादीनेवमाप्याययत्यसौ॥ पक्षत्रिप्तिं तु देवानां पितॄणां चैव मासिकीं॥ शश्वत्रिप्तिं च मर्त्यानां मैत्रेयार्कः प्रयच्छ
ति॥ इति श्रीविष्णुपुराणे द्वितीयेंशे एकादशोध्यायः॥ पराशर उवाच॥ रथस्त्रिचक्रः सोमस्य कुंदाभास्तस्य वाजिनः॥ वामद
क्षिणतो युक्ता दश तेन चरत्यसौ॥ वीथ्याश्रयाणि ऋक्षाणि ध्रुवाधारेण वेगिना॥ ह्रासवृद्धिक्रमस्तस्य रश्मीनां सवितुर्यथा॥ अर्कस्ये
व हि तस्याश्वाः सकृद्युक्ता वहंति ते॥ कल्पमेकं मुनिश्रेष्ठ वारिगर्भसमुद्भवाः॥ क्षीणं पीतं सुरैः सोममाप्याययति दीप्तिमान्॥ मैत्रेयैकक
लं तं तु रश्मिनैकेन भास्करः॥ क्रमेण येन पीतोसौ देवैस्तेन निशाकरं॥ आप्याययत्यनुदिनं भास्करो वारितस्करः॥ संभृतं चार्धमासेन तत्
सोमस्थं सुधामृतं॥ पिबंति देवा मैत्रेय सुधाहारा यतोमराः॥ त्रयस्त्रिंशत्सहस्राणि त्रयस्त्रिंशच्छतानि च॥ त्रयस्त्रिंशत्तथा देवाः
पिबंति क्षणदाकरं॥ कलाद्वयावशिष्टस्तु प्रविष्टः सूर्यमंडलं॥ अमाख्यरश्मौ वसति अमावास्या ततः स्मृता॥ अप्सु तस्मिन्नहोरा
त्रे पूर्वं विशति चंद्रमाः॥ ततो वीरुत्सु वसति प्रयात्यर्कं ततः क्रमात्॥ छिनत्ति वीरुधो यस्तु वीरुत्संस्थे निशाकरे॥ पत्रं वा पातयत्येकं ब्र
ह्महत्यां स विंदति॥ सोमे पंचदशे भागे किंचिच्छिष्टे कलात्मके॥ अपराह्णे पितृगणा जघन्यं पर्युपासते॥ पिबंति द्विकलाकारं शिष्टा

घोरवेः॥ मंडले हिमतापादेः कारणं तन्मया श्रुतं॥ व्यापाराश्चापि कथिता गंधर्वोरगरक्षसां॥ ऋषीणां वालखिल्यानां तथैवाप्सरसां गुरो॥
यक्षाणां च रथे भानोर्विष्णुशक्तिधृतात्मनां॥ किं चादित्यस्य यत्कर्म तन्नोक्तमिह ते मुने॥ यदि सप्तगणो वारि हिममुष्णं च वर्षे-
ति॥ तत्किमत्र रवेर्येन वृष्टिः सूर्यादितीर्यते॥ विवस्वानुदितो मध्ये यात्यस्तमिति किं जनः॥ ब्रवीत्येतत्समं कर्म यदि सप्तगणा-
स्य तत्॥ पराशर उवाच॥ मैत्रेय श्रूयतामेतद्यद्भवान्परिपृच्छति॥ यथा सप्तगणेप्येकः प्राधान्येनाधिको रविः॥ सर्वशक्तिः
परा विष्णोर्ऋग्यजुःसामसंज्ञिता॥ सैषा त्रयी तपत्यंहो जगतश्च हिनस्ति यत्॥ सोयं विष्णुः स्थितः स्थित्यां जगतः पालनोद्यतः
ऋग्यजुःसामभूतोंतः सवितुर्द्विज तिष्ठति॥ मासि मासि रविर्यो यस्तत्र तत्र हि सा परा॥ त्रयीमयी विष्णुशक्तिरवस्थानं करो-
ति वै॥ ऋचस्तपंति पूर्वाह्णे मध्याह्नेथ यजूंषि वै॥ बृहद्रथंतरादीनि सामान्यह्नः क्षये रवौ॥ अंगमेषा त्रयी विष्णोर्ऋग्यजुःसाम-
संज्ञिता॥ विष्णुशक्तिरवस्थानं सदादित्ये करोति सा॥ न केवलं रवेः शक्तिर्वैष्णवी सा त्रयीमयी॥ सर्गादौ ऋङ्मयो ब्रह्मा स्थितौ
विष्णुर्यजुर्मयः॥ रुद्रः साममयोंताय तस्मात्तस्याशुचिर्ध्वनिः॥ एवं सा सात्विकी शक्तिर्वैष्णवी या त्रयीमयी॥ आत्मसप्तगणस्थं
तं भास्वंतमधितिष्ठति॥ तया चाधिष्ठितः सोपि जाज्वलीति स्वरश्मिभिः॥ तमः समस्तजगतां नाशं नयति चाखिलं॥ स्तुवंति तं वै
मुनयो गंधर्वैर्गीयते पुरः॥ नृत्यंत्योप्सरसो यांति तस्य चानु निशाचराः॥ वहंति पन्नगा यक्षैः क्रियतेभीषुसंग्रहः॥ वालखिल्याः
तथैवैनं परिवार्य समासते॥ नोदेता नास्तमेता च कदाचिच्छक्तिरूपधृक्॥ विष्णुर्विष्णोः पृथक् तस्य गणः सप्तविधोप्ययं॥ स्तंभ-

जु

वि॰ पु॰ ५६

श्चि न्नेौ सूर्वेपाद्दयोः॥ वरुणश्चोर्ध्वमाचैवपश्चिमे तस्य साक्थिनी॥ शिस्नः संवत्सर [illegible] वा [illegible] रत्वो [illegible] समाश्रितः॥ पुच्छे [illegible] ध्रुव

श्यपोथ ततोध्रुवः॥ तारकाशिशुमारस्य नास्तमेति चतुष्टयं॥ इत्येष संनिवेशोऽयं पृथि [illegible] द्वीपं [illegible]

नां च कीर्तितः॥ वर्षाणां च नदीनां च ये च तेषु वसंति वै॥ तेषां स्वरूपमाख्यातं संक्षेपः श्रूयतां पुनः॥ [illegible] कषा तु या॥ [illegible] ममूर्तिर्नां वपुर्व [illegible]

पुष्पाकारा स मुद्भूता पर्वताब्ध्यादि संयुता॥ ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च॥ न [illegible] प

दोऽस्तिय न्नास्ति च विप्रवर्य॥ ज्ञानस्वरूपो भगवान्यतोऽसावशेषमूर्तिर्न तु वस्तुभूतः॥ ततो हि शैलाब्धिधरादिभेदान् जानीहि विज्ञान

विजृंभितानि॥ यदा तु शुद्धं निजरूपि सर्वं कर्मक्षये ज्ञानमपास्तदोषं॥ तदा हि संकल्पतरोः फलानि भवंति नो वस्तुषु वस्तुभेदाः॥ वस्त्व

स्ति किं कुत्र चिदादिमध्यपर्यंतहीनं सततैकरूपं॥ यच्चान्यथात्वं द्विज याति भूयो न तत्तथा तत्र कुतो हि तत्वम्॥ मही घटत्वं घट

तः कपालिका कपालिका चूर्णरजस्ततोऽणुः॥ जनैः स्वकर्मस्तिमितात्मनिश्चयैरालक्ष्यते ब्रूहि किमत्र वस्तु॥ तस्मान्न विज्ञानमृतेऽस्ति

किंचित्क्वचित्कदाचिद्द्विज वस्तु जातं॥ विज्ञानमेकं निजकर्मभेदविभिन्नचित्तैर्बहुधाभ्युपेतं॥ ज्ञानं विशुद्धं विमलं विशोकमऽ

शेषलोभादिनिरस्तसंगं॥ एकं सदैकं परमः परेशः स वासुदेवो न यतोऽन्यदस्ति॥ सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यम

सत्यमन्यत्॥ एतत्तु यत्संव्यवहारभूतं तत्रापि चोक्तं भुवनाश्रितं ते॥ यज्ञः पशुर्वह्निरशेष ऋत्विक्सोमः सुराः स्वर्गमयश्च कामः॥ इ

त्यादिकर्माश्रितमार्गदृष्टं भूरादिभोगाश्च फलानि तेषां॥ यच्चैतद्भुवनगतं मया तवोक्तं सर्वत्र व्रजति हि यत्र कर्मवश्यः॥ ज्ञात्वै

कं ध्रुवमचलं सदैकरूपं तत्कुर्याद्विशति हि येन वासुदेवं॥ इति श्रीविष्णुपुराणे द्वितीयेंऽशे द्वादशोऽध्यायः॥ मैत्रेय उवाच

राम ५६

56

नै

वि॰
ते

तस्य कला तु या ॥ सुधामृतमयी पुण्यां तामिंदोः पितरो मुने ॥ निःसृतं तदमावास्यां गभस्तिभ्यः सुधामृतं ॥ मासतृप्तिमवाप्याग्र्यां पितरः संति नि
र्वृताः ॥ सौम्या बर्हिषदश्चैव अग्निष्वात्ताश्च ते त्रिधा ॥ एवं देवान् सितेपक्षे कृष्णपक्षे तथा पितॄन् ॥ वीरुधश्चामृतमयैः सुशीतैः परमाणुभिः ॥ वीरु
द्वौषधिनिष्पत्त्या मनुष्यपशुकीटकान् ॥ आप्याययति शीतांशुः प्राकाम्याह्लादनेन तु ॥ वाय्वग्निद्रव्यसंभूतो रथश्चंद्रसुतस्य च ॥ पिशंगैस्तुर
गैर्युक्तः सोष्टभिर्वायुवेगिभिः ॥ सवरूथः सानुकर्षो युक्तो भूसंभवैर्हयैः ॥ सोपासंगपताकस्तु शुक्रस्यापि रथो महान् ॥ अष्टाभिः कांचनः श्री
मान् भौमस्यापि रथो महान् ॥ पद्मरागारुणैरश्वैः संयुक्तो वह्निसंभवैः ॥ अष्टाभिः पांडुरैर्युक्तो वाजिभिः कांचनो रथः ॥ तस्मिंस्तिष्ठति वर्षांते
राशौ राशौ बृहस्पतिः ॥ आकाशसंभवैरश्वैः शबलैः स्यंदनं युतं ॥ तमारुह्य शनैर्याति मंदगामी शनैश्चरः ॥ स्वर्भानोस्तुरगा ह्यष्टौ भृंगाभा
धूसरं रथं ॥ सकृद्युक्तास्तु मैत्रेय वहंत्यविरतं सदा ॥ आदित्यान्निःसृतो राहुः सोमं गच्छति पर्वसु ॥ आदित्यमेति सोमाच्च पुनः सौरेषु पर्वसु ॥ तथा
केतुरथस्याश्वा अप्यष्टौ वातरंहसः ॥ पलालधूमवर्णाभा लाक्षारसनिभारुणाः ॥ एते मया ग्रहाणां वै तवाख्याता रथा नव ॥ सर्वे ध्रुवे महा
भाग निबद्धा वायुरश्मिभिः ॥ ग्रहर्क्षताराधिष्ण्यानि ध्रुवे बद्धान्यशेषतः ॥ भ्रमंत्युचितचारेण मैत्रेयानिलरश्मिभिः ॥ यावंत्यश्चैव तारास्तास्तावं
तो वातरश्मयः ॥ सर्वे ध्रुवे निबद्धास्ते भ्रमंतो भ्रामयंति तं ॥ तैलपीडा यथा चक्रं भ्रमंतो भ्रामयंति वै ॥ तथा भ्रमंति ज्योतींषि वाताविद्धानि
सर्वशः ॥ अलातचक्रवद्यांति वातचक्रेरितानि तु ॥ यस्माज्ज्योतींषि वहति प्रवहस्तेन स स्मृतः ॥ [illegible]
सन्निवेशं च यस्यापि श्रूयतां च मुनिसत्तम ॥ यद्दृष्ट्वा कुरुते पापं तद्दृष्ट्वा निशि मुच्यते ॥ पादं [illegible]
वर्षाणि जीवत्यधिकानि [illegible] विज्ञेयो [illegible] ॥ [illegible]

रानुदिनं चासौ मृगपोतस्स वै नृप ॥ पोष्यमाणश्च स तेनैव ववृधे मुने ॥ चचाराश्रमपर्य्यंते तृणानि गहनेषु सः ॥ दूरं गत्वा च
शार्दूलत्रासादभ्याययौ पुनः ॥ प्रातर्गत्वातिदूरं च सायमायात्यथाश्रमं ॥ पुनश्च भरतस्याभूदाश्रमस्योटजाजिरे ॥ तस्य तस्मिन्मृ
गे दूरं समीपपरिवर्त्तिनि ॥ आसीच्चेतः समासक्तं न ययावन्यतो द्विज ॥ विमुक्तराज्यतनयः प्रोज्झिताशेषबांधवः ॥ ममत्वं च च
कार तस्मिन्हरिणबालके ॥ किं वृकैर्भक्षितो व्याघ्रैः किं सिंहेन निपातितः ॥ चिरायमाणे निःक्रांते तस्यासीदिति मानसं ॥ एषा
वसुमती तस्य खुराग्रक्षतकर्बुरा ॥ प्रीतये मम जातोसौ क्व ममैणकबालकः ॥ विषाणाग्रेण मद्बाहुकंडूयनपरो हि सः ॥ क्षेमेणाभ्या
गतोरण्यादपि मां सुखयिष्यति ॥ एते लूनशिखास्तस्य दशनैरचिरोद्गतैः ॥ कुशाः काशा विराजंते बटवः सामगा इव ॥ इत्थं चिरगते त
स्मिन्स चक्रे मानसं मुनिः ॥ प्रीतिप्रसन्नवदनः पार्श्वस्थे चाभवन्मृगे ॥ समाधिभंगस्तस्यासीत्तन्मयत्वादृतात्मनः ॥ संत्यक्तराज्यभो
गर्द्धिस्वजनस्यापि भूपतेः ॥ चपलं चपले तस्मिन्दूरगं दूरगामिनि ॥ मृगपोतेभवच्चित्तं स्थैर्यवत्तस्य भूपतेः ॥ कालेन गच्छता सोथ कालं
चक्रे महीपतिः ॥ पितेव सास्रं पुत्रेण मृगपोतेन वीक्षितः ॥ मृगमेव तदाद्राक्षीत्त्यजन्प्राणानसावपि ॥ तन्मयत्वेन मैत्रेय नान्यत्किं
चिदचिंतयत् ॥ ततश्च तत्कालकृतां भावनां प्राप्य तादृशीं ॥ जंबूमार्गे महारण्ये जातो जातिस्मरो मृगः ॥ जातिस्मरत्वादुद्विग्नः संसा
रस्य द्विजोत्तम ॥ विहाय मातरं भूयः शालग्राममुपाययौ ॥ शुष्कैस्तृणैस्तथा पर्णैः स कुर्वन्नात्मपोषणं ॥ मृगत्वहेतुभूतस्य कर्म्म
णो निष्कृतिं ययौ ॥ तत्र चोत्सृष्टदेहोसौ जज्ञे जातिस्मरो द्विजः ॥ सदाचारवतां शुद्धे योगिनां प्रवरे कुले ॥ सर्वविज्ञानसंपन्नः सर्वशास्त्रा

च

सं
राम
५२

ल
स

भगवन्सर्वभूतेशयत्पृष्टोसिमयाखिलं॥ भूसमुद्रादिसरितांसंस्थानंग्रहसंस्थितिः॥ विष्ण्वाधारंतथाचैतत्त्रैलोक्यंसमवस्थितं॥ परमा
र्थस्तुतेप्रोक्तोयथाज्ञानंप्रधानतः॥ यत्त्वेतद्भगवानाहभरतस्यमहीपते॥ कथयिष्यामिचरितंतन्ममाख्यातुमर्हसि॥ भरतःसमहीपा
लःशालग्रामेवसत्किल॥ योगयुक्तःसमाधायवासुदेवेसदामनः॥ पुण्यदेशप्रभावेनध्यायतश्चसदाहरिं॥ कथंतुनाभवन्मुक्ति
र्यदभूत्सद्विजःपुनः॥ विप्रत्वेचकृतंतेनयद्भूयःसुमहात्मना॥ भरतेनमुनिश्रेष्ठतत्सर्वंवक्तुमर्हसि॥ पराशरउवाच॥ शालग्रा
मेमहाभागोभगवन्न्यस्तमानसः॥ सउवाससचिरंकालंमैत्रेयपृथिवीपतिः॥ अहिंसादिष्वशेषेषुगुणेषुगुणिनांवरः॥ अवापपरमां
काष्ठांमनसश्चापिसंयमे॥ यज्ञेशाच्युतगोविंदमाधवानंतकेशव॥ कृष्णविष्णोहृषीकेशेत्याहराजासकेवलं॥ नान्यज्जगादमैत्रे
यकिंचित्स्वप्नांतरेष्वपि॥ एतत्पदंतदर्थंचविनानान्यदचिंतयत्॥ समित्पुष्पकुशादानंचक्रेदेवक्रियाकृते॥ नान्यानिचक्रे
कर्माणिनिःसंगोयोगतापसः॥ जगामसोभिषेकार्थमेकदातुमहानदीं॥ सस्नौतत्रतदाचक्रेस्नानस्यानंतरेक्रियाः॥ अथाज
गामतत्तीर्थंजलंपातुंपिपासिता॥ आसन्नप्रसवाब्रह्मन्नेकैवहरिणीवनात्॥ ततःसमभवत्तत्रपीतप्रायेजलेतया॥ सिंहस्य
नादःसुमहान्सर्वप्राणिभयंकरः॥ ततःसासहसात्रासादाप्लुतानिम्नगातटं॥ अतस्तुच्चारोहणेनास्यानद्यांगर्भःपपातह॥ तमु
ह्यमानंवेगेनवीचिमालापरिप्लुतं॥ जग्राहसनृपोगर्भात्पतितंमृगपोतकं॥ गर्भप्रच्युतिदुःखेनप्रोत्तुंगाक्रमणेनच॥ मैत्रेय
सापिहरिणीपपातचममारच॥ हरिणींतांविलोक्याथविपन्नांनृपतापसः॥ मृगपोतंसमादायपुनराश्रममागतः॥ चक्रे

स

वि॰पु॰
५८

वा नचैवोढा शिबिका भवतो मया ॥ न श्रांतोस्मि न चायासो वोढव्योस्ति महीपते ॥ राजोवाच ॥ प्रत्यक्षं दृश्यते पीवानद्यापि शिबि
कात्वयि ॥ श्रम भारभारो वहने भवत्येव हि देहिनां ॥ ब्राह्मण उवाच ॥ प्रत्यक्षं भवता भूप यद्दृष्टं मम तद्वद ॥ बलवानबलश्चेति
वाच्यं पश्चाद्विशेषणं ॥ त्वयोढा शिबिका चेति त्वय्यद्यापि संस्थिता ॥ मिथ्यैतदत्र तु भवान् शृणोतु वचनं मम ॥ भूमौ पादयु
गस्यास्था जंघे पादद्वये स्थिते ॥ ऊरू जंघाद्वयावस्थौ तदाधारं तथोदरं ॥ वक्षस्थलं तथा बाहू स्कंधौ चोदरसंस्थितौ ॥ स्कंधाश्रि
ते यं शिबिका मम भारोत्र किं कृतः ॥ शिबिकायां स्थितं चेदं देहं त्वदुपलक्षितं ॥ तत्र त्वमहमप्यत्र प्रोच्यते चेदमन्यथा ॥ अहं त्वं च
तथान्ये च भूतैरुह्याम पार्थिव ॥ गुणप्रवाहपतितो भूतवर्गोपि यात्ययं ॥ कर्मवश्या गुणा ह्येते सत्वाद्याः पृथिवीपते ॥ अविद्यासं
चितं कर्म तच्चाशेषेषु जंतुषु ॥ आत्मा शुद्धोऽक्षरः शांतो निर्गुणः प्रकृतेः परः ॥ प्रवृद्ध्यपचयौ नास्य एकस्याखिलजंतुषु ॥ यदा नोपचयस्त
स्य न चैवापचयो नृप ॥ तदा पीवासि कस्मात्त्वं कया युक्त्या त्वयेरितं ॥ भूपादजंघाकट्यूरुजठरादिषु संस्थिते ॥ शिबिकेयं यथा स्कं
धे तथा भारः समस्त्वया ॥ तथान्यैर्जंतुभिर्भूप शिबिकोत्थेन केवलं ॥ शैलद्रुमगृहोत्थोपि पृथिवीसंभवोपि वा ॥ यदा पुंसः पृथग्भावः
प्राकृतैः कारणैर्नृप ॥ वोढव्यस्तु तदा भारः कथं वा नृपते मया ॥ यद्द्रव्या शिबिका चेयं तद्द्रव्यो भूतसंग्रहः ॥ भवतो मेऽखिलस्यास्य
ममत्वेनोपबृंहितः ॥ पराशर उवाच ॥ एवमुक्त्वाभवन्मौनी स वहन् शिबिकां द्विज ॥ सोपि राजावतीर्योर्व्यां तत्पादौ जगृहे त्वरन् ॥ रा
जोवाच ॥ भो भो विसृज्य शिबिकां प्रसादं कुरु मे द्विज ॥ कथ्यतां को भवानत्र जाल्मरूपधरः स्थितः ॥ यो भवान्यन्निमित्तं वा यदागमन
कारणं ॥ तत्सर्वं कथ्यतां विद्वन्मह्यं शुश्रूषवे त्वया ॥ ब्राह्मण उवाच ॥ श्रूयतां कोहमित्येतद्वक्तुं भूप न शक्यते ॥ उपभोगनिमि

घा
राम
५८

र्थतत्त्ववित्॥ अपश्यत्स च मैत्रेय आत्मानं प्रकृतेः परं॥ आत्मनोऽधिगतज्ञानो देवादीनि महामुने॥ सर्वभूतान्यभेदेन स ददर्श महामुने॥ न पपाठ गु
रुः प्रोक्तं कृतोपनयनः श्रुतं॥ न ददर्श च कर्माणि शास्त्राणि जगृहे न च॥ उक्तोऽपि बहुशः किंचिज्जडवाक्यमभाषत॥ तदप्यसंस्कारगुणं ग्राम्य
वाक्योक्तिसंश्रितं॥ अपध्वस्तवपुः सोऽप्यमलिनांबरसद्द्विजः॥ क्लिन्नदंतांतरः सर्वैः परिभूतः स नागरैः॥ संमाननापरां हानिं योगर्द्धेः कु
रुते जनः॥ जनेनावमतो योगी योगसिद्धिं च विंदति॥ तस्माच्चरेत वै योगी सतां मार्गमदूषयन्॥ जना यथावमन्येरन् गच्छेयुर्नैव संगतिं॥ हि
रण्यगर्भवचनं विचिंत्येत्थं महामतिः॥ आत्मानं दर्शयामास जडोन्मत्ताकृतिं जने॥ भुंक्ते कुल्माषवाट्यादि शाकं वन्यं फलं कणान्॥ यद्यदा
प्नोति सुबहु तदत्ति कालसंयमं॥ पितर्युपरते सोऽथ भ्रातृभ्रातृव्यबांधवैः॥ कारितः क्षेत्रकर्मादि कदन्नाहारपोषितः॥ स तूक्षपीनाव
यवो जडकारी च कर्मणि॥ सर्वलोकोपकरणं बभूवाहारवेतनः॥ तं तादृशमसंस्कारं विप्राकृतिविचेष्टितं॥ क्षत्ता सौवीरराजस्य विष्टियो
ग्यममन्यत॥ स राजा शिबिकारूढो गंतुं कृतमतिर्द्विज॥ बभूवेक्षुमतीतीरे कपिलर्षेर्वराश्रमं॥ श्रेयः किमत्र संसारे दुःखप्राये नृणामिति॥ प्र
ष्टुं तं मोक्षधर्मज्ञं कपिलाख्यं महामुनिं॥ उवाह शिबिकां तस्य क्षत्तुर्वचनचोदितः॥ नृणां विष्टिगृहीतानामन्येषां सोऽपि मध्यगः॥ गृहीतो वि
ष्टिना विप्रः सर्वज्ञानैकभाजनः॥ जातिस्मरोऽसौ पापस्य क्षयकाम उवाह तां॥ ययौ जडगतिः सोऽथ युगमात्रावलोकनं॥ कुर्वन्मतिमतां
श्रेष्ठस्तदन्ये त्वरितं ययुः॥ विलोक्य नृपतिः सोऽपि विषमां शिबिकागतिं॥ किमेतदित्याह समं गम्यतां शिबिकावहाः॥ पुनस्तथैव शिबिकां विलो
क्य विषमां हि सः॥ नृपः किमेतदित्याह भवद्भिर्गम्यतेऽन्यथा॥ भूपतेर्वदतस्तस्य श्रुत्वेत्थं बहुशो वचः॥ शिबिकोद्वाहकाः प्रोचुरयं यातीत्य
सत्वरं॥ राजोवाच॥ किं श्रांतोऽस्यल्पमध्वानं त्वयोढा शिबिका मम॥ किमायाससहो न त्वं पीवानसि निरीक्ष्यसे॥ ब्राह्मण उवाच॥ नाहं पी

भा ता

न देवो न नरो न पशुर्न च पादपः॥ शरीराकृतिभेदास्तु भूपैते कर्म्मयोनयः॥ वस्तु राजेति लोके यच्च राजभटात्मकं॥ तथान्यच्च नृपे
त्थं तन्न सत्संकल्पनामयं॥ यत्तु कालांतरेणापि नान्यां संज्ञामुपैति वै॥ परिणामादिसंभूतां तद्वस्तु नृप तच्च किं॥ त्वं राजा सर्वलोकस्य
पितुः पुत्रो रिपो रिपुः॥ पत्न्याः पतिः पिता सूनोः किं त्वां भूप वदाम्यहं॥ त्वं किमेतच्छिरः किंतु शिरस्तव तथोदरं॥ किमु पादादिकं त्वं वै
तवैतत् किं महीपते॥ समस्तावयवेभ्यस्त्वं पृथग्भूप व्यवस्थितः॥ कोहमित्यत्र निपुणो भूत्वा चिंतय पार्थिव॥ एवं व्यवस्थिते तत्वे
मयाहमिति भाषितुं॥ पृथक्करणनिःपाद्यं शक्यते नृपते कथं॥ इति श्रीविष्णुपुराणे द्वितीयेंशे त्रयोदशोध्यायः॥ पराशर उ
वाच॥ निशम्य तस्येति वचः परमार्थसमन्वितं॥ प्रश्रयावनतो भूत्वा तमाह नृपतिर्द्विजं॥ राजोवाच॥ भगवन् यत्त्वया प्रोक्तं परमार्थम
यं वचः॥ श्रुते तस्मिन् भ्रमंतीव मनसो मम वृत्तयः॥ एतद्विवेकविज्ञानं यदशेषेषु जंतुषु॥ भवता दर्शितं विप्र तत्परं प्रकृतेर्महत्॥ ना
हं वहामि शिबिकां शिबिका न मयि स्थिता॥ शरीरमन्यदस्मत्तो येनेयं शिबिका धृता॥ गुणप्रवृत्त्या भूतानां प्रवृत्तिः कर्मचोदिता॥
प्रवर्त्तंते गुणा ह्येते किं ममेति त्वयोदितं॥ एतस्मिन् परमार्थज्ञ मम श्रोत्रपथं गते॥ मनो विह्वलतामेति परमार्थार्थितां गतं॥ पूर्वमे
व महाभाग कपिलर्षिमहं द्विज॥ प्रष्टुमभ्युद्यतो गत्वा श्रेयः किं त्वत्र संशमे॥ तदंतरे च भवता यदेतद्वाक्यमीरितं॥ तेनैव परमा
र्थार्थं त्वयि चेतः प्रधावति॥ कपिलर्षिर्भगवतः सर्वभूतस्य वै द्विज॥ विष्णोरंशो जगन्मोहनाशायोर्वीमुपागतः॥ स एव भगवान्नूनम
स्माकं हितकाम्यया॥ प्रत्यक्षतामत्र गतो यथैतद्भवतोच्यते॥ तन्मह्यं प्रणताय त्वं यच्छ्रेयः परमं द्विज॥ तदशेषविज्ञानजल

त्वं च सर्वज्ञायमस्मत्क्रियया॥ सुखदुःखोपभोगौ तु तौ देहाद्युपपादकौ॥ धर्माधर्मोद्भवौ भोक्तुं जंतुर्देहादिमृछति॥ सर्वस्यैव हि भूपाल जंतोः
सर्वत्र कारणं॥ धर्माधर्मौ यतः स्मात्कारणं पृछ्यते कुतः॥ राजोवाच॥ धर्माधर्मौ न संदेहः सर्वकार्येषु कारणं॥ उपभोगनिमित्तं
च देहाद्देहांतरागमः॥ यत्वेतद्भवता प्रोक्तं कोहमित्येतदात्मनः॥ वक्तुं न शक्यते श्रोतुं तन्ममेछा प्रवर्त्तते॥ योस्ति सोहमिति ब्र
ह्मन्कथं वक्तुं न शक्यते॥ आत्मन्येष न दोषाय शब्दोहमिति यो द्विज॥ ब्राह्मण उवाच॥ शब्दोहमिति दोषाय नात्मन्येष तथैव त
त्॥ अनात्मन्यात्मविज्ञानं शब्दो वा भ्रांतिलक्षणः॥ जिह्वा ब्रवीत्यहमिति दंतोष्ठं तालुकं नृप॥ एते नाहं यतः सर्वे वाङ्निः
पादनहेतवः॥ किं हेतुभिर्वदत्येषा वागेवाहमिति स्वयं॥ तथापि वाग्नाहमेतद्वक्तुमित्थं न युज्यते॥ पिंडः पृथग्यतः पुंसः पाद
पाण्यादिलक्षणः॥ ततोहमिति कुत्रैतां संज्ञां राजन्करोम्यहं॥ यद्यन्योस्ति परः कोपि मत्तः पार्थिवसत्तम॥ तदैषोहमयं चान्यो वक्तु
मेवमपीष्यते॥ यदा समस्तदेहेषु पुमानेको व्यवस्थितः॥ तदा हि को भवान्कोहमित्येतद्विफलं वचः॥ त्वं राजा शिबिका चेयं
मे वाहाः पुरःसराः॥ अयं च भवतो लोको न सदेतन्नृपोच्यते॥ वृक्षाद्दारु ततश्चेयं शिबिका त्वदधिष्ठिता॥ का वृक्षसंज्ञा जातास्य
दारुसंज्ञाथवा नृप॥ वृक्षारूढो महाराजो नायं वदति ते जनः॥ न च दारुणि सर्वस्त्वां ब्रवीति शिबिकागतं॥ शिबिका दारुसं
घातो रचनास्थितिसंस्थितः॥ अन्विष्यतां नृपश्रेष्ठ तद्भेदे शिबिका त्वया॥ एवं छत्रशलाकानां पृथग्भावो विमृश्यतां॥ क्व जातं
छत्रमित्येष न्यायस्त्वयि तथा मयि॥ पुमान्स्त्री गौरजो वाजी कुंजरो विहगस्तरुः॥ देहेषु लोकसंज्ञेयं विज्ञेया कर्महेतुषु॥ पुमा

वि॰पु॰
६०

ज्ञिनोनतत्वदर्शिनः ॥ तेरूपं अविभेदेन भेदः षड्जादिसंज्ञितः ॥ अभेदव्यापिनो वायोस्तथा तस्य महात्मनः ॥ एकत्वं रूपभेदस्य बाह्यकर्म
प्रवृत्तिजः ॥ देवादिभेदे पध्वस्ते नास्त्येवावरणे हि सः ॥ इति श्रीविष्णुपुराणे द्वितीयेंशे चतुर्दशोऽध्यायः ॥ पराशर उवाच ॥ इत्युक्ते
मौनिनं भूयश्चिंतयानं महीपतिं ॥ प्रत्युवाचाथ विप्रो सावद्वैतांतर्गतां कथां ॥ ब्राह्मण उवाच ॥ श्रूयतां नृपशार्दूल पुरा गीतं ऋभु
णा पुरा ॥ अवबोधं जनयता निदाघस्य महात्मनः ॥ ऋभुर्नामाभवत्पुत्रो ब्रह्मणः परमेष्ठिनः ॥ विज्ञाततत्त्वसद्भावो निसर्गादेव भूप
ते ॥ तस्य शिष्यो निदाघोभूत्पुलस्त्यतनयः पुरा ॥ प्रादादशेषविज्ञानं स तस्मै परया मुदा ॥ अवाप्तज्ञानतत्वस्य न तस्याद्वैतवास
ना ॥ स ऋभुस्तर्कयामास निदाघस्य नरेश्वर ॥ देविकायास्तटे वीरनगरं नाम वै पुरं ॥ समृद्धमतिरम्यं च पुलस्त्येन निवेशितं ॥ रम्योप
वनपर्यंते स तस्मिन्पार्थिवोत्तम ॥ निदाघो नाम योगज्ञ ऋभुशिष्यो वसत्पुरा ॥ दिव्ये वर्षसहस्रे तु समतीतेस्य तत्पुरं ॥ जगाम
स ऋभुः शिष्यं निदाघमवलोकितुं ॥ स तस्य वैश्वदेवांते द्वारालोकनगोचरः ॥ स्थितस्तेन गृहीतार्घो निजवेश्म प्रवेशितः ॥ प्रक्षा
लितांघ्रिपाणिं च कृतासनपरिग्रहम् ॥ उवाच स द्विजश्रेष्ठो भुज्यतामिति सादरम् ॥ ऋभुरुवाच ॥ भो विप्रवर्य्य भोक्तव्यं यदन्नं
भवतो गृहे ॥ तत्कथ्यतां कदन्नेषु न प्रीतिः सततं मम ॥ निदाघ उवाच ॥ भक्तयावकवाट्यानामपूपानां च मे गृहे ॥ यद्रोचते द्विजश्रेष्ठ
तत्त्वं भुंक्ष्व यथेच्छया ॥ ऋभुरुवाच ॥ कदन्नानि द्विजैतानि मिष्टमन्नं प्रयच्छ मे ॥ संयावपायसादीनि द्रप्सफाणितवंति च ॥ नि
दाघ उवाच ॥ हे हे शालिनि मद्गेहे यत्किंचिदतिशोभनं ॥ भक्ष्योपसाधनं मिष्टं तेनास्यान्नं प्रसाधय ॥ ब्राह्मण उवाच ॥ इत्युक्ता तेन
न सा पत्नी मिष्टमन्नं द्विजस्य यत् ॥ प्रसाधितवती तद्वै भर्तुर्वचनगौरवात् ॥ तं भुक्तवंतमिच्छातो मिष्टमन्नं महामुनिं ॥ निदाघः

२

60

मो

राम
६०

वीर्य्युद्धिर्भवान्॥ ब्राह्मण उवाच॥ भूप पृच्छसि किं श्रेयः परमार्थं नु पृच्छसि॥ श्रेयांसि परमार्थानि अशेषाणि च भूपते॥ देवताराधनं कृ
त्वा धनसंपदमिच्छति॥ पुत्रानिच्छति राज्यं च श्रेयस्तस्यैव तन्नृप॥ कर्म्म यज्ञात्मकं श्रेयः स्वर्ल्लोकफलदायि च॥ श्रेयः प्रधानं च फले तदेवा
नभिसंहिते॥ आत्मा ध्येयः सदा भूप योगयुक्तैस्तथापरं॥ श्रेयस्तस्यैव संयोगः श्रेयो यः परमात्मनः॥ श्रेयांस्येवमनेकानि शतशोथ सहस्र
शः॥ सन्त्यत्र परमार्थास्तु न त्वेते श्रूयतां च मे॥ धर्माय त्यज्यते किं तु परमार्थो धनं यदि॥ व्ययश्च क्रियते कस्मात्कामप्राप्त्युपलक्षणः॥ पुत्रश्चे
त्परमार्थः स्यात् सोप्यन्यस्य नरेश्वर॥ परमार्थभूतः सोन्यस्य परमार्थो हि तत्पिता॥ एवं न परमार्थोस्ति जगत्यस्मिंश्चराचरे॥ परमार्था
नि कार्य्याणि कारणानामशेषतः॥ राज्यादिप्राप्तिरत्रोक्ता परमार्थतया यदि॥ परमार्था भवन्त्यत्र न भवन्ति च वै ततः॥ ऋग्यजुःसा
मनिष्पाद्यं यज्ञकर्म मतं तव॥ परमार्थभूतं तत्रापि श्रूयतां गदतो मम॥ यत्तु निष्पाद्यते कार्य्यं मृदा कारणभूतया॥ तत्कारणानुग
मता ज्ञायते नृप मृन्मयं॥ एवं विनाशिभिर्द्रव्यैः समिदाज्यकुशादिभिः॥ निष्पाद्यते क्रिया या तु सा भवित्री विनाशिनी॥ अनाशी परमा
र्थश्च प्राज्ञैरभ्युपगम्यते॥ तत्तु नाशि न संदेहो नाशिद्रव्योपपादितं॥ तदेवाफलदं कर्म्म परमार्थो मतो मम॥ मुक्तिसाधनभूतत्वात्प
रमार्थो न साधनं॥ ध्यानं चैवात्मनो भूप परमार्थार्थशब्दितं॥ भेदकारी परेभ्यस्तु परमार्थो न भेदवान्॥ परमात्मात्मनोर्योगः परमार्थ
इतीष्यते॥ मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः॥ तस्माच्छ्रेयांस्यशेषाणि नृपैतानि न संशयः॥ परमार्थस्तु भूपाल संक्षेपा
च्छ्रूयतां मम॥ एको व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः॥ जन्मवृद्ध्यादिरहित आत्मा सर्वगतोव्ययः॥ परज्ञानमयोसद्भिर्नाम

जात्यादिभिर्विभुः॥ न योगवान्न युक्तोभून्नैव पार्थिव योक्ष्यते॥ तस्यात्मपरदेहेषु सतोप्येकमयं हि यत्॥ विज्ञानं परमार्थोसौ द्वै

वि॰पु॰
द्वि॰

रस्मितवाचार्य्यः प्रजादानाय ते द्विज ॥ इहागतोहं यास्यामि परमार्थस्तवोदितः ॥ एवमेकमिदं विद्धि न भेदि सकलं जगत् ॥ वासुदेवाभि
धेयस्य स्वरूपं परमात्मनः ॥ ब्राह्मण उवाच ॥ तथेत्युक्त्वा निदाघेन प्रणिपातपुरःसरं ॥ पूजितः परया भक्त्या इच्छातः प्रययावृभुः
॥ इति श्री विष्णुपुराणे द्वितीयेंशे पंचदशोध्यायः ॥ ब्राह्मण उवाच ॥ ऋभुर्वर्षसहस्रे तु समतीते नरेश्वर ॥ निदाघज्ञानदानाय
तदेव नगरं ययौ ॥ नगरस्य बहिः सोथ निदाघं ददृशे मुनिः ॥ महाबलपरीवारे पुरं विशति पार्थिवे ॥ दूरे स्थितं महाभागं जनसंमर्दव
र्जकं ॥ क्षुत्क्षामकंठमायांतमरण्यात्समित्कुशं ॥ दृष्ट्वा निदाघं स ऋभुरुपगम्याभिवाद्य च ॥ उवाच कस्मादेकांते स्थीयते भवता द्वि
ज ॥ निदाघ उवाच ॥ भो विप्र जनसंमर्दो महानेष नरेश्वरे ॥ प्रविविक्षौ पुरं रम्यं तेनात्र स्थीयते मया ॥ ऋभुरुवाच ॥ नराधिपोत्र कत
मः कतमश्चेतरो जनः ॥ कथ्यतां मे द्विजश्रेष्ठ त्वमभिज्ञो मतो मम ॥ निदाघ उवाच ॥ योयं गजेंद्रमुन्मत्तमद्रिशृंगसमुच्छ्रितं ॥ अधिरू
ढो नरेंद्रोयं परलोकस्तथेतरः ॥ ऋभुरुवाच ॥ एतौ हि गजराजानौ युगपद्दर्शितौ मम ॥ भवता न विशेषेण पृथक् चिह्नोपलक्षणौ ॥
तत्कथ्यतां महाभाग विशेषो भवता तयोः ॥ ज्ञातुमिच्छाम्यहं कोत्र गजः को वा नराधिपः ॥ निदाघ उवाच ॥ गजो योयमधो ब्रह्मन्नु
पर्य्यस्यैष भूपतिः ॥ वाह्यवाहकसंबंधं को न जानाति वै द्विज ॥ ऋभुरुवाच ॥ जानाम्यहं यथा ब्रह्मन् तथा मामवबोधय ॥ अधः
शब्दनिगद्यं किं किं चोर्ध्वमभिधीयते ॥ ब्राह्मण उवाच ॥ इत्युक्तः सहसारुह्य निदाघः प्राह तं ऋभुं ॥ श्रूयतां कथयाम्येष यन्मां त्वं प
रिपृच्छसि ॥ उपर्य्यहं यथा राजा त्वमधः कुंजरो यथा ॥ अवबोधाय ते ब्रह्मन् दृष्टांतो दर्शितो मया ॥ ऋभुरुवाच ॥ त्वं राजेव द्विजश्रे

श्री

राम
61

प्राहभूपालप्रश्रयावनतःस्थितः ॥ निदाघउवाच ॥ अपितेपरमातृप्तिरुत्पन्नातुष्टिरेवच ॥ अपितेमानसंस्वस्थमाहारेणकृतंद्विज ॥
क्वनिवासोभवान्विप्रक्वगंतुंसमुद्यतः ॥ आगम्यतेचभवतायतस्तच्चद्विजोच्यतां ॥ ऋभुरुवाच ॥ क्षुद्यस्यतस्यभुक्तेन्नेतृप्तिर्ब्राह्म
णजायते ॥ नमेक्षुदभवत्तृप्तिःकस्मान्मांपरिपृच्छसि ॥ वह्निनापार्थिवेधातौक्षपितेक्षुत्समुद्भवः ॥ भवत्यंभसिचक्षीणेनृणांतृडपि
जायते ॥ क्षुत्तृष्णेदेहधर्माख्येनममैतेयतोद्विज ॥ ततःक्षुत्संभवाभावात्तृप्तिरस्त्येवमेसदा ॥ मनसःस्वस्थतातुष्टिश्चित्तधर्माविमौ
द्विज ॥ चेतसोयस्यतत्पृच्छपुमानेभिर्नयुज्यते ॥ क्वनिवासस्तवेत्युक्तंक्वगंतासिचयत्त्वया ॥ कुतश्चागम्यतेतत्रत्रितयेपिनिबोधमे ॥
पुमान्सर्वगतोव्यापीआकाशवदयंयतः ॥ कुतःकुत्रक्वगंतासीत्येतदप्यर्थवत्कथं ॥ नाहंगंतानचागंतानैकदेशनिकेतनः ॥
त्वंचान्येचनचत्वंचनान्येनैवाहमप्यहं ॥ मिष्टममिष्टमप्येषाजिज्ञासामेकृताद्विज ॥ किंवक्ष्यसीतितत्रापिश्रूयतांद्विजसत्तम ॥ कि
मस्वाद्यमथवामिष्टंभुंजतोन्नंद्विजोत्तम ॥ मिष्टमेवयदामिष्टंतदेवोद्वेगकारणं ॥ अमिष्टंजायतेमिष्टंमिष्टादुद्विजतेजनः ॥ आदि
मध्यावसानेषुकिमन्नंरुचिकारकं ॥ मन्मयंहिगृहंयद्वन्मृदालिप्तंस्थिरंभवेत् ॥ पार्थिवोयंतथादेहःपार्थिवैःपरमाणुभिः ॥ यवगो
धूममुद्गादिघृततैलंपयोदधि ॥ गुडःफलादीनितथापार्थिवाःपरमाणवः ॥ तदेतद्भवताज्ञात्वामिष्टामिष्टविचारियत् ॥ तन्मनः
समतालंबिकार्य्यंसाम्यंहिमुक्तये ॥ ब्राह्मणउवाच ॥ इत्याकर्ण्यवचस्तस्यपरमार्थाश्रितंनृप ॥ प्रणिपत्यमहाभागोनिदाघो
वाक्यमब्रवीत् ॥ प्रसीदमद्धितार्थायकथ्यतांयस्त्वमागतः ॥ नष्टोमोहस्तवाकर्ण्यवचांस्येतानिमेद्विज ॥ ऋभुरुवाच ॥ ऋभु

वि०पु०
६२

ति वै ॥ तान्यहं भवतः सम्यक्कथयामि यथाक्रमं ॥ स्वायंभुवो मनुः पूर्वं मनुः स्वारोचिषस्तथा ॥ औत्तमिस्तामसश्चैव रैवतश्चाक्षुषस्त-
था ॥ षडेते मनवोतीताः संप्रतस्तु रवेः सुतः ॥ वैवस्वतोयं यस्यैतत्सप्तमं वर्त्ततेंतरं ॥ स्वायंभुवंतु कथितं कल्पादावंतरं मया ॥ देवास्स-
प्तर्षयश्चैव यथावत्कथिता मया ॥ अत ऊर्ध्वं प्रवक्ष्यामि मनोः स्वारोचिषस्य तु ॥ मन्वंतराधिपांस्तद्वद्देवर्षीस्तत्सुतांस्तथा ॥ पारावताः
सतुषिताः देवाः स्वारोचिषेंतरे ॥ विपश्चित्तत्र देवेंद्रो मैत्रेयासीन्महाबलः ॥ ऊर्जस्तंबस्तथा प्राणो दत्तोलिऋषभस्तथा ॥ निश्चर-
श्चार्वरीवांश्च तत्र सप्तर्षयोभवन् ॥ चैत्रकिंपुरुषाद्याश्च सुताः स्वारोचिषस्य तु ॥ द्वितीयमेतत्कथितमंतरं शृणु चोत्तमं ॥ तृती-
येप्यंतरे ब्रह्मन्नौत्तमिर्नामयो मनुः ॥ सुशांतिर्नाम देवेंद्रो मैत्रेयासीत्सुरेश्वरः ॥ सुधामानस्तथा सत्यास्तथा शिवाश्चाथ प्रतर्दनाः ॥ व-
शवर्त्तिनः पंचैते गणा द्वादशकाः स्मृताः ॥ वशिष्ठतनयास्तत्र सप्त सप्तर्षयोभवन् ॥ अजः परशुर्दिव्याद्यास्तथोत्तमिमनोः सुताः ॥ तामस-
स्यांतरे देवाः सुरूपा हरयस्तथा ॥ सत्याश्च सुधियश्चैव सप्तविंशतिका गणाः ॥ शिबिरिंद्रस्तथा चासीच्छतयज्ञोपलक्षणः ॥ स-
प्तर्षयश्च वै तेषां तत्र नामानि मे शृणु ॥ ज्योतिर्धामा पृथुः काव्यश्चैत्रोग्निर्वरदस्तथा ॥ पीवरश्चर्षयो ह्येते सप्त तत्रापि चांतरे ॥ नरः
ख्यातिः शांतिहयो जानुजंघादयस्तथा ॥ पुत्रास्तु तामसस्यासन्राजानः सुमहाबलाः ॥ पंचमश्चापि मैत्रेय रैवतो नाम नामतः ॥ म-
नुर्विभुश्च तत्रेंद्रो देवांश्चात्रांतरे शृणु ॥ अमिताभा भूतरया वैकुंठाः ससुमेधसः ॥ एते देवगणास्तत्र चतुर्दश चतुर्दश ॥ हिरण्यरोमा
वेदश्रीरूर्द्ध्ववाहुस्तथापरः ॥ वेदबाहुः सुधामा च पर्जन्यश्च महामुनिः ॥ एते सप्तर्षयो विप्र तत्रासन्रैवतेंतरे ॥ बलबंधुश्च संभाव्यः

62

राम
६२

स्थितोहं गजवद्यस्मिंस्तदेतावं समाचक्ष्व कतमस्त्वमहं तथा ॥ ब्राह्मण उवाच ॥ इत्युक्तः स तदा तस्य प्रगृह्य चरणावुभौ ॥ निदाघः प्राह भगवा
नाचार्य्यस्त्वमृभुर्ध्रुवम् ॥ नान्यस्याद्वैतसंस्कारसंस्कृतं मानसं तथा ॥ यथाचार्य्यस्य तेन त्वां मन्ये प्राप्तमहं गुरुं ॥ ऋभुरुवाच ॥ तवोपदेशदा
नाय पूर्वशुश्रूषणादृतः ॥ गुरुस्तेहमृभुर्नाम्ना निदाघ समुपागतः ॥ तदेतदुपदिष्टं ते संक्षेपेण महामते ॥ परमार्थसारभूतं यदद्वैतमशेष
तः ॥ ब्राह्मण उवाच ॥ एवमुक्त्वा ययौ विद्वान्निदाघं स ऋभुर्गुरुः ॥ निदाघोप्युपदेशेन तेनाद्वैतपरोभवत् ॥ सर्वभूतान्यभेदेन ददृशे स तदा
त्मनः ॥ तथा ब्रह्म ततो मुक्तिमवाप परमां द्विज ॥ तथा त्वमपि धर्मज्ञ तुल्यात्मरिपुबांधवः ॥ भव सर्वगतं जानन्नात्मानमवनीपते ॥ सितनी
लादिभेदेन यथैकं दृश्यते नभः ॥ भ्रांतदृष्टिभिरात्मापि तथैवस पृथक् पृथक् ॥ एकः समस्तं यदिहास्ति किंचित्तदच्युतो नास्ति परं त
तोन्यत् ॥ सोहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहं ॥ पराशर उवाच ॥ इतीरितस्तेन स राजवर्य्यस्तत्याज भेदं परमार्थदृष्टिः ॥
स चापि जातिस्मरणाप्तबोधस्तत्रैव जन्मन्यपवर्गमाप ॥ इति भरतनरेंद्रसारवृत्तं कथयति यश्च शृणोति भक्तियुक्तः ॥ स विमलम
तिरेति नात्ममोहं भवति च संसरणेषु मुक्तियोग्यः ॥ इति श्रीविष्णुपुराणे द्वितीयेंशे षोडशोध्यायः ॥ मैत्रेय उवाच ॥ कथिता गुरुणा
सम्यग्भूसमुद्रादिसंस्थितिः ॥ सूर्य्यादीनां च संस्थानं ज्योतिषामतिविस्तरात् ॥ देवादीनां तथा सृष्टिरृषीणां चापि वर्णिता ॥ चातुर्व
र्ण्यस्य चोत्पत्तिस्तिर्य्यग्योनिगतस्य च ॥ ध्रुवप्रह्लादचरितं विस्तराच्च त्वयोदितं ॥ मन्वंतराण्यशेषाणि श्रोतुमिच्छाम्यनुक्रमात् ॥ मन्वं
तराधिपांश्चैव शक्रदेवपुरोगमान् ॥ भवता कथितानेतान् श्रोतुमिच्छाम्यहं गुरो ॥ पराशर उवाच ॥ अतीतानागतानीह यानि मन्वंतरा

ज्ञे वैकुंठैर्देवैतैः सह ॥ मन्वंतरे तु संप्राप्ते तथा वैवस्वते द्विज ॥ वामनः कश्यपाद्विष्णुरदित्यां संबभूव ह ॥ त्रिभिः क्रमैरिमाल्लोकाञ्जित्वा ये-
नमहात्मना ॥ पुरंदराय त्रैलोक्यं दत्तं निहतकंटकं ॥ इत्येतास्तनवस्तस्य सप्तमन्वंतरेषु वै ॥ सप्त स्वेवाभवन्विप्र याभिः संरक्षिताः प्रजाः
॥ यस्माद्विष्टमिदं सर्वं तस्य शक्त्या महात्मनः ॥ तस्मात्स प्रोच्यते विष्णुर्विशेर्धातोः प्रवेशनात् ॥ सर्वे च देवा मनवः समस्ताः सप्तर्ष-
यो ये मनुसूनवश्च ॥ इंद्रश्च योयं त्रिदशेशभूतो विष्णोरशेषास्तु विभूतयस्ताः ॥ इति श्रीविष्णुपुराणे तृतीयेंशे प्रथमोध्यायः ॥ मैत्रे-
य उवाच ॥ प्रोक्तान्येतानि भवता सप्त मन्वंतराणि वै ॥ भविष्याण्यपि विप्रर्षे ममाख्यातुं त्वमर्हसि ॥ पराशर उवाच ॥ सूर्यपत्नी त्वभूत्सं-
ज्ञा तनया विश्वकर्मणः ॥ मनुर्यमो यमी चैव तदपत्यानि वै मुने ॥ असहंती तु सा भर्तुस्तेजश्छायां युयोज वै ॥ भर्तुः शुश्रूषणे रण्यं
स्वयं च तपसे ययौ ॥ संज्ञेयमिति मत्वार्कश्छायायामात्मजत्रयं ॥ शनैश्चरं मनुं चान्यं तपतीं चाप्यजीजनत् ॥ छायासंज्ञा ददौ शापं
यमाय कुपिता यदा ॥ तदान्येयमसौ बुद्धिरित्यासीद्यमसूर्ययोः ॥ ततो विवस्वानाख्यातां तयैवारण्यसंस्थितां ॥ समाधिदृष्ट्या ददृ-
शे तामश्वीं तपसि स्थितां ॥ वाजिरूपधरः सोपि तस्यां देवावथाश्विनौ ॥ जनयामास रेवंतं रेतसोंते च भास्करः ॥ आनिन्ये च पुनः संज्ञां
स्वस्थानं भगवान्रविः ॥ तेजसः शमनं चास्य विश्वकर्मा चकार ह ॥ भ्रमिमारोप्य सूर्यं तु तस्य तेजो विशातनं ॥ कृतवानष्टमं भागं न व्यशा-
तयत्तदव्ययं ॥ यत्तस्माद्वैष्णवं तेजः शातितं विश्वकर्मणा ॥ जाज्वल्यमानमपतत्तद्भूमौ मुनिसत्तम ॥ त्वष्टैव तेजसा तेन विष्णोश्च-
क्रमकल्पयत् ॥ त्रिशूलं चापि शर्वस्य शिबिकां धनदस्य च ॥ शक्तिं गुहस्य देवानामन्येषां च यदायुधं ॥ तत्सर्वं तेजसा तेन विश्व-

सप्तकाद्याश्च तत्सुताः ॥ नरेंद्राः सुमहावीर्या बभूवुर्मुनिसत्तम ॥ स्वारोचिषस्तामसश्च उत्तमो रैवतस्तथा ॥ प्रियव्रतान्वया ह्येते चत्वा-
रो मनवः स्मृताः ॥ विष्णुमाराध्य तपसा स राजर्षिः प्रियव्रतः ॥ मन्वंतराधिपानेतान्लब्धवानात्मवंशजान् ॥ षष्ठे मन्वंतरे चासीच्चाक्षु-
षाख्यस्तथा मनुः ॥ मनोजवस्तथैवेंद्रो देवानपि निबोध मे ॥ आद्याः प्रसूता भव्याश्च पृथुगाश्च दिवौकसः ॥ महानुभावा लेखाश्च पं-
चैते ह्यष्टका गणाः ॥ सुमेधा विरजाश्चैव हविष्मानुत्तमो मधुः ॥ अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः ॥ ऊरुः पुरुः शतद्युम्नप्रमु-
खास्सुमहाबलाः ॥ चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोभवन् ॥ विवस्वतः सुतो विप्र श्राद्धदेवो महाद्युतिः ॥ मनुः संवर्तते धीमा-
न्सांप्रतं सप्तमेंतरे ॥ आदित्यवसुरुद्राद्या देवाश्चापि महामुने ॥ पुरंदरस्तथैवात्र मैत्रेय त्रिदशेश्वरः ॥ वशिष्ठः काश्यपोथात्रि-
र्जमदग्निः सगौतमः ॥ विश्वामित्रभरद्वाजौ सप्त सप्तर्षयोत्र तु ॥ इक्ष्वाकुश्च नृगश्चैव धृष्टः शर्यातिरेव च ॥ नरिष्यंतश्च नाभागो दिष्टश्चा-
रिष्ट एव च ॥ करूषश्च पृषध्रश्च सुमहाँल्लोकविश्रुतः ॥ मनोर्वैवस्वतस्यैते नवपुत्रा महाबलाः ॥ विष्णुशक्तिरनौपम्या सत्त्वोद्रि-
क्ता स्थितौ स्थिता ॥ मन्वंतरेष्वशेषेषु देवत्वेनाधितिष्ठति ॥ अंशेन तस्य जज्ञे सौ यज्ञः स्वायंभुवेंतरे ॥ आकूत्यां मानसो देव उत्पन्नः
प्रथमेंतरे ॥ ततः पुनः स वै देवः प्राप्ते स्वारोचिषेंतरे ॥ तुषितायां समुत्पन्नो ह्यजितस्तुषितैः सह ॥ औत्तमेप्यंतरे देवस्तुषितः स पुन-
स्स वै ॥ सत्यायामभवत्सत्यः सत्यैः सह सुरोत्तमैः ॥ तामसस्यांतरे चैव संप्राप्ते पुनरेव हि ॥ हर्यायां हरिभिः सार्द्धं हरिरेव बभूव ह ॥ रैवते-

प्यंतरे देवः संभूत्यां मानसोभवत् ॥ संभूतो रजसैः सार्द्धं देवैर्देववरो हरिः ॥ चाक्षुषे चांतरे देवो वैकुंठः पुरुषोत्तमः ॥ विकुंठायामसौ जज्ञे

विष्णु० ६४

64

मूर्त्तिस्तपोरतिः॥ तपो धृतिर्द्युतिर्मान्यः सप्तर्षिस्तु तपोधनाः॥ देववानुपदेवश्च देवश्रेष्ठादयस्तथा॥ मनोस्तस्य महावीर्या भविष्यंति नृपाः
सुताः॥ त्रयोदशो रोच्यमानाभविष्यति मुने मनुः॥ सुत्रामाणः सुकर्माणः सुधर्माणस्तथा सुराः॥ त्रयस्त्रिंशद्विभेदास्ते देवानां ये तु वै गणाः॥ दि
वस्पतिर्महावीर्यस्तेषामिंद्रो भविष्यति॥ निर्मोहस्तत्त्वदर्शी च निःप्रकंपो निरुत्सुकः॥ धृतिमानव्ययश्चान्यः सप्तमः सुतपा मुनिः॥ सप्तर्षय
स्त्विमे तस्य सुतानपि निबोध मे॥ चित्रसेनविचित्राद्या भविष्यंति महीक्षितः॥ भौमश्चतुर्दशश्चात्र मैत्रेय भविष्यता मनुः॥ शुचिरिंद्रः सुरग
णांस्तत्र पंच शृणुष्व मे॥ चाक्षुषाश्च पवित्राश्च कनिष्ठा भ्राजिरास्तथा॥ वाचावृद्धाश्च वै देवाः सप्तर्षीनपि मे शृणु॥ अग्निबाहुः शुचिः शुक्रो
मागधोऽग्नीध्र एव च॥ युक्तस्तथा जितः शक्रो मनुपुत्रानतः शृणु॥ ऊरुगंभीरबुद्ध्याद्या मनोस्तस्य सुता नृपाः॥ कथितास्तु मुनिशार्दूल पालयि
ष्यंति ये मही॥ चतुर्युगांते वेदानां जायते किल विप्लवः॥ प्रवर्तयंति तानेत्य भुवं सप्तर्षयो दिवः॥ कृते कृते स्मृते विप्र प्रणेता जायते मनुः॥
देवा यज्ञभुजस्तात्र यावन्मन्वंतरं स्मृतं॥ भवंति ये मनोः पुत्रा यावन्मन्वंतरं तु ते॥ तदन्वयोद्भवैश्चैव तावद्भूः परिपाल्यते॥ मनुः सप्तर्ष
यो देवाः भूपालाश्च मनोः सुताः॥ मन्वंतरा भवंत्येते शक्रश्चैवाधिकारिणः॥ चतुर्दशभिरेतैस्तु गतैर्मन्वंतरैर्द्विज॥ सहस्रयुगपर्यंतः क
ल्पो निःशेष उच्यते॥ तावत्प्रमाणा च निशा ततो भवति सत्तम॥ ब्रह्मरूपधरः शेते शेषाहावंबुसंभवे॥ त्रैलोक्यमखिलं ग्रस्त्वा भगवाना
दिकृद्विभुः॥ स्वमायासंस्थितो विप्र सर्वभूतो जनार्दनः॥ ततः प्रबुद्धो भगवान्यथा पूर्वं तथा पुनः॥ सृष्टिं करोत्यव्ययात्मा कल्पे क
ल्पे रजोगुणः॥ मनवो भूभुजः सेंद्रा देवाः सप्तर्षयस्तथा॥ सात्त्विकोंशः स्थितिकरो जगतो द्विजसत्तम॥ चातुर्युगेप्यसौ विष्णुः स्थिति
व्यापारलक्षणः॥ युगव्यवस्थां कुरुते यथा मैत्रेय तच्छृणु॥ कृते युगे परं ज्ञानं कपिलादिस्वरूपधृक्॥ ददाति सर्वभूतात्मा सर्वभूत

राम ६४

कर्म्मीयवर्ऽथन॥ छायासंज्ञासुतोयोसौद्वितीयःकथितोमनुः॥ पूर्वजस्यसवर्णोसौसावर्णिस्तेनकथ्यते॥ तस्यमन्वंतरंह्येतत्सावर्णिकमथाष्ट
मं॥ तच्छृणुष्वमहाभागभविष्यंकथयामिते॥ सावर्णिस्तुमनुर्योसौमैत्रेयभविताततः॥ सुतपाश्चामिताभाश्चमुख्याश्चापितदासुराः॥ तेषांगण
स्तुदेवानामेकैकोविंशकःस्मृतः॥ सप्तर्षीनपिवक्ष्यामिभाविष्यान्मुनिसत्तम॥ दीप्तिमान्गालवोरामःकृपोद्रौणिस्तथापरः॥ मत्पुत्रश्चतथाव्यासः
ऋष्यशृंगश्चसप्तमः॥ विष्णुप्रसादादनघःपातालांतरगोचरः॥ विरोचनसुतस्तेषांबलिरिंद्रोभविष्यति॥ विरजाश्चार्वरीवांश्चनिर्मोहाद्या
स्तथापरे॥ सावर्णेस्तुमनोःपुत्राभविष्यंतिनराधिपाः॥ नवमोदक्षसावर्णिर्मैत्रेयभवितामनुः॥ पारामरीचिगर्भाश्चसुधर्माणस्तथात्रिधा॥ भ
विष्यंतितदादेवाएकैकोद्वादशोगणः॥ तेषामिंद्रोमहावीर्योभविष्यत्यद्भुतोद्विज॥ सवनोद्युतिमान्हव्योवसुर्मेधातिथिस्तथा॥ ज्योतिष्मान्सप्तमः
सत्यस्तत्रैतेचमहर्षयः॥ धृतकेतुर्दीप्तकेतुःपंचहस्तोनिरामयः॥ पृथुश्रवाद्यास्तथाद्दक्षसावर्णिकात्मजाः॥ दशमोब्रह्मसावर्णिर्भविष्यतिमुने
मनुः॥ सुधामानोविरुद्धाश्चशतसंख्यास्तथासुराः॥ तेषामिंद्रश्चभविताशांतिर्नाममहाबलः॥ सप्तर्षयोभविष्यंतियेतदातान्शृणुष्वमे॥ हविष्मांस्सु
कृतिःसत्यस्तपोमूर्त्तिस्तथापरः॥ नाभागोप्रतिमौजाश्चसत्यकेतुस्तथापरः॥ सुक्षेत्रश्चोत्तमौजाश्चभूरिषेणादयोदश॥ ब्रह्मसावर्णिपुत्रास्तु
रक्षिष्यंतिवसुंधराम्॥ एकादशश्चभविताधर्मसावर्णिकोमनुः॥ विहंगमाःकामगमानिर्माणरतयस्तथा॥ गणास्त्वेतेतदामुख्यादेवानांहिभवि
ष्यतां॥ एकैकस्त्रिंशकस्तेषांगणश्चेंद्रश्चवैवृषः॥ निःस्वरश्चाग्नितेजाश्चवपुष्मान्घृणिरारुणिः॥ हविष्माननघश्चैवभाव्याःसप्तर्षयस्तथा
॥ सर्वत्रगःसुधर्माचदेवानीकादयस्तथा॥ भविष्यंतिमनोस्तस्यतनयाःपृथिवीश्वराः॥ रुद्रपुत्रस्तुसावर्णिर्भविताद्वादशोमनुः॥ ऋतधामा
चतत्रेंद्रोभविताशृणुमेसुरान्॥ हरितारोहितादेवास्तथासुमनसोद्विज॥ सुकर्माणःसुरापाश्चदशकाःपंचवैगणाः॥ तपस्वीसुतपाश्चैवतपो

वि॰पु॰
३५

65

र्णज्योऽष्टमो धनंजयः॥ कृतंजयः सप्तदशे ऋतंजयोऽष्टादशे स्मृतः॥ ततो व्यासो भरद्वाजो भरद्वाजात्तु गौतमः॥ गौतमादुत्तमो व्यासो हर्यात्मा योऽभिधीयते॥ अथ हर्यात्मनो वेनः स्मृतो वाजश्रवाश्च यः॥ सोमशुष्मायणस्तस्मात्तृणबिंदुरिति स्मृतः॥ ऋक्षोऽभूद्भार्गवस्तस्माद्वाल्मीकिर्योऽभिधीयते॥ तस्मादस्मत्पिता शक्तिर्व्यासस्तस्मादहं मुने॥ जातूकर्णोऽभवन्मत्तः कृष्णद्वैपायनस्ततः॥ अष्टाविंशतिरित्येते वेदव्यासाः पुरातनाः॥ एको वेदश्चतुर्धा तु तैः कृतो द्वापरादिषु॥ भविष्ये द्वापरे चापि द्रौणिर्व्यासो भविष्यति॥ व्यतीते मम पुत्रेऽस्मिन् कृष्णद्वैपायने मुने॥ ध्रुवमेकाक्षरं ब्रह्म ओमित्येव व्यवस्थितं॥ बृहत्वाद्बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयते॥ प्रणवावस्थितं नित्यं भूर्भुवःस्वरितीर्यते॥ ऋग्यजुःसामाथर्वाणो यत्तस्मै ब्रह्मणे नमः॥ जगतः प्रलयोत्पत्त्योर्यत्तत्कारणसंज्ञितं॥ महतः परमं गुह्यं तस्मै सुब्रह्मणे नमः॥ अगाधापारमक्षय्यं जगत्संमोहनालयं॥ स्वप्रकाशप्रवृत्तिभ्यां पुरुषार्थप्रयोजनं॥ सांख्यज्ञानवतां निष्ठा गतिः शमदमात्मनां॥ यत्तदव्यक्तममृतं प्रवृत्तिर्ब्रह्म शाश्वतं॥ प्रधानमात्मयोनिश्च गुहासंस्थं च शब्द्यते॥ अविभागं तथा शुक्रमक्षरं बहुधात्मकं॥ परमब्रह्मणे तस्मै नित्यमेव नमो नमः॥ यद्रूपं वासुदेवस्य परमात्मस्वरूपिणः॥ एतद्ब्रह्म त्रिधा भेदमभेदमपि स प्रभुः॥ सर्वभूतेष्वभेदोऽसौ भिद्यते भिन्नबुद्धिभिः॥ स ऋग्मयः साममयः स चात्मा स यजुर्मयः॥ ऋग्यजुःसामसारात्मा स एवात्मा शरीरिणां॥ स भिद्यते वेदमयः स वेदं करोति भेदैर्बहुभिः सशाखं॥ शाखाप्रणेता स समस्तशाखाज्ञानस्वरूपो भगवाननंतः॥ **इति श्रीविष्णुपुराणे तृतीयेंऽशे तृतीयोऽध्यायः॥ पराशर उवाच॥** आद्यो वेदश्चतुःपादः शतसाहस्रसंमितः॥ ततो दशगुणः कृत्स्नो यज्ञोऽयं सर्वकामधुक्॥ ततोऽत्र मत्सुतो व्यासः अष्टाविंशतिमेंऽतरे॥ वेदमेकं चतुःपादं चतुर्धा व्यभजत्प्रभुः॥ यथा तु तेन वै व्यस्ता वेदव्यासेन धीमता॥ वेदास्तथा समस्तैस्तैर्व्यस्ता व्यासैः

रा॰म
३५

हितेरतः॥ चक्रवर्त्तिस्वरूपेण त्रेतायामपि सत्तम॥ दुष्टानां निग्रहं कुर्वन्परिपाति जगत्त्रयं॥ वेदमेकं चतुर्भेदं कृत्वा शाखाशतैर्विभुः॥ करोति
बहुलं भूयो वेदव्याससस्वरूपधृक्॥ वेदांस्तु द्वापरे व्यस्य कलेरंते पुनर्हरिः॥ कल्किस्वरूपो दुर्वृत्तान्मार्गे संस्थापयिष्यति॥ एवमेष जगत्सर्वं ज
गत्पाति करोति च॥ हंति चांते द्यनंतात्मा नास्त्यस्माद्व्यतिरेकवत्॥ भूतं भव्यं भविष्यं च सर्वभूतान्महात्मनः॥ मद्त्रान्यत्र वा विप्र सद्भावः क
थितस्तव॥ मन्वंतराण्यशेषाणि कथितानि मया तव॥ मन्वंतराधिपाश्चैव किमन्यत्कथयामि ते॥ इति श्री विष्णुपुराणे तृतीयेंऽशे द्वि
तीयोऽध्यायः॥ मैत्रेय उवाच॥ ज्ञातमेतन्मया त्वत्तो यथा सर्वमिदं जगत्॥ विष्णुर्विष्णौ विष्णुतश्च न परं विद्यते ततः॥ एतत्तु श्रोतुमिच्छा
मि व्यस्ता वेदा महात्मना वेदव्यासस्वरूपेण यथा तेन युगे युगे॥ यस्मिन्यस्मिन्युगे व्यासो यो य आसीन्महामुने॥ तं तं ममाचक्ष्व भगवं छा
खाभेदांश्च मे वद॥ पराशर उवाच॥ वेदद्रुमस्य मैत्रेय शाखाभेदाः सहस्रशः॥ न शक्तो विस्तराद्वक्तुं संक्षेपेण शृणुष्व तत्॥ द्वापरे द्वापरे वि
ष्णुर्व्यासरूपी महामुने॥ वेदमेकं सुबहुधा कुरुते जगतो हितः॥ वीर्यं तेजो बलं चाल्पं मनुष्याणामवेक्ष्य च॥ हिताय सर्वभूतानां वेदभेदान्करो
ति सः॥ यथासौ कुरुते तन्वा वेदमेकं पृथक्प्रभुः॥ वेदव्यासाभिधाना तु सा मूर्त्तिर्मधुविद्विषः॥ यस्मिन्मन्वंतरे व्यासा ये ये स्युस्तान्निबोध मे॥ यथा
च भेदः शाखानां व्यासेन क्रियते मुने॥ अष्टाविंशतिकृत्वो वै वेदव्यासो महर्षिभिः॥ वैवस्वतेंतरे तस्मिन्द्वापरेषु पुनः पुनः॥ वेदव्यासा व्यतीता
ये त्वष्टाविंशति सत्तम॥ चतुर्धा यैः कृतो वेदो द्वापरेषु पुनः पुनः॥ द्वापरे प्रथमे व्यस्ताः स्वयं वेदाः स्वयंभुवा॥ द्वितीये द्वापरे चैव वेदव्यासः प्रजा
पतिः॥ तृतीये चोशना व्यासश्चतुर्थे तु बृहस्पतिः॥ सविता पंचमे व्यासो मृत्युः षष्ठे स्मृतः प्रभुः॥ सप्तमे च तथैवेंद्रो वसिष्ठश्चाष्टमे स्मृतः॥
सारस्वतश्च नवमे त्रिधामा दशमे स्मृतः॥ एकादशे तु त्रिवृषो भरद्वाजस्ततः परं॥ त्रयोदशे चांतरिक्षो धर्मश्चापि चतुर्दशे॥ त्रय्यारुणिः

त्स्यः शालीय एव च ॥ शिशिरः पंचमश्चासीन्मैत्रेय सुमहामतिः ॥ संहितात्रितयं चक्रे शाकपूणिस्तथेतरः ॥ निरुक्तमकरोत्तद्वच्चतुर्थं मुनि-
सत्तम ॥ क्रौंचः पैलालकिस्तद्वद्बलाकश्च महामुनिः ॥ निरुक्तकृच्चतुर्थोभूद्वेदवेदांगपारगः ॥ इत्येताः प्रतिशाखाभ्यो ह्यनुशाखा द्विजो-
त्तम ॥ बाष्कलश्चापरास्तिस्रः संहिताः कृतवान्द्विज ॥ शिष्याः कालायनिर्गार्ग्यस्तृतीयश्च कथाजवः ॥ इत्येते बह्वृचाः प्रोक्ताः संहि-
ता यैः प्रवर्तिताः ॥ इति श्रीविष्णुपुराणे तृतीयेंशे चतुर्थोध्यायः ॥ पराशर उवाच ॥ यजुर्वेदतरोः शाखाः सप्तविंशन्महामतिः ॥ वै-
शंपायननामासौ व्यासशिष्यश्चकार वै ॥ शिष्येभ्यः प्रददौ ताश्च जगृहुस्तेप्यनुक्रमात् ॥ याज्ञवल्क्यस्तु तस्याभूद्ब्रह्मरातसुतो द्विज ॥
शिष्यः परमधर्मज्ञो गुरुवृत्तिरतः सदा ॥ ऋषिर्योद्य महामेरौ समाजे नागमिष्यति ॥ तस्य वै सप्तरात्रात्तु ब्रह्महत्या भविष्यति ॥
पूर्वमेवं मुनिगणैः समयो यः कृतो द्विज ॥ वैशंपायन एकस्तु तं व्यतिक्रांतवांस्तदा ॥ स्वस्रीयं बालकं सोथ पदा स्पृष्टमघातय-
त् ॥ शिष्यानाह च भोः शि...ष्या ब्रह्महत्यापहं व्रतं ॥ चरध्वं मत्कृते सर्वे न विचार्यमिदं तथा ॥ अथाह याज्ञवल्क्यस्तु किमेभिर्भगवन्
भिर्द्विजैः ॥ क्लेशितैरल्पतेजोभिश्चरिष्येहमिदं व्रतं ॥ चरध्वं मत्कृते सर्वे न विचार्यमिदं तथा ॥ अथाह याज्ञवल्क्यस्तु किमेभिर्भगवन्भि-
र्द्विजैः ॥ क्लेशितैरल्पतेजोभिश्चरिष्येहमिदं व्रतं ॥ ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामतिः ॥ मुच्यतां यत्त्वयाधीतं मत्तो विप्रावमा-
नक ॥ निस्तेजसो वदस्येतान्यस्त्वं ब्राह्मणपुंगवान् ॥ तेन शिष्येण नार्थोस्ति मम आज्ञाभंगकारिणा ॥ याज्ञवल्क्यस्ततः प्राह भक्त्यैतत्तेमयो-
दितं ॥ ममाप्यलं त्वयाधीतं यन्मया तदिदं द्विज ॥ पराशर उवाच ॥ इत्युक्त्वा रुधिराक्तानि सरूपाणि यजूंष्यथ ॥ छर्दयित्वा द-

वि.पु.३

६६

५

राम

६६

८८

तथा मया ॥ तदनेनैव वेदानां शाखाभेदान्द्विजोत्तम ॥ चतुर्युगेषु रचितान्समस्तेष्ववधारय ॥ कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुं
को ह्यन्यो भुवि मैत्रेय महाभारतकृद्भवेत् ॥ तेन व्यस्ता यथा वेदा मत्पुत्रेण महात्मना ॥ द्वापरे ह्यत्र मैत्रेय तन्मे शृणु यथार्थतः ॥ ब्रह्मणा
चोदितो व्यासो वेदान्व्यस्तुं प्रचक्रमे ॥ अथ शिष्यान्स जग्राह चतुरो वेदपारगान् ॥ ऋग्वेदश्रावकं पैलं जग्राह स महामुनिः ॥ वैशंपाय
ननामानं यजुर्वेदस्य चाग्रहीत् ॥ जैमिनिं सामवेदस्य तथैवाथर्ववेदवित् ॥ सुमंतुस्तस्य शिष्योऽभूद्व्यासस्य धीमतः ॥ रोमहर्षणना
मानं महाबुद्धिं महामुनिः ॥ सूतं जग्राह शिष्यं स इतिहासपुराणयोः ॥ एक आसीद्यजुर्वेदस्तं चतुर्धा व्यकल्पयत् ॥ चातुर्होत्रमभू
द्यस्मिंस्तेन यज्ञमथाकरोत् ॥ आध्वर्यवं यजुर्भिस्तु ऋग्भिर्होत्रं महामुनिः ॥ औद्गात्रं सामभिश्चक्रे ब्रह्मत्वं चाप्यथर्वभिः ॥ ततः स
ऋचं उद्धृत्य ऋग्वेदं कृतवान्मुनिः ॥ यजूंषि च यजुर्वेदं सामवेदं च सामभिः ॥ राज्ञस्त्वथर्ववेदेन सर्वकर्माणि स प्रभुः ॥ कारयामास मै
त्रेय ब्रह्मत्वं च यथास्थिति ॥ सोऽयमेको महावेदतरुस्तेन पृथक्कृतः ॥ चतुर्धाथ ततो जातं वेदपादपकाननं ॥ बिभेद प्रथमं विप्र पैलः
ऋग्वेदपादपं ॥ इंद्रप्रमितये प्रादाद्बाष्कलाय च संहिते ॥ चतुर्धा स बिभेदाथ बाष्कलोऽपि च संहितां ॥ बोध्यादिभ्यो ददौ ताश्च शिष्येभ्यः स
महामुनिः ॥ बोध्याग्निमाठरौ तद्वद्याज्ञवल्क्यपराशरौ ॥ प्रतिशाखास्तु शाखायास्तस्यास्ते जगृहुर्मुने ॥ इंद्रप्रमितिरेकां तु संहितां
स्वसुतं ततः ॥ मांडुकेयं महात्मानं मैत्रेयाध्यापयत्तदा ॥ तस्य शिष्यप्रशिष्येभ्यः पुत्रशिष्यक्रमाद्ययौ ॥ वेदमित्रस्तु शाकल्यः संहि
तां तामधीतवान् ॥ चकार संहिताः पंच शिष्येभ्यः प्रददौ च ताः ॥ तस्य शिष्यास्तु ये पंच तेषां नामानि मे शृणु ॥ मुद्गलो गोमुखश्चैव वा

ज२

वि०पु० ६७

व्यासशिष्यः स जैमिनिः॥ क्रमेण येन मैत्रेय विभेद शृणु तन्मम॥ सुमंतुस्तस्य पुत्रोभूत्सुकर्मास्याप्यभूत्सुतः॥ अधीतवंतौ चैकैकां
संहितां तौ महामुनी॥ सहस्रसंहिताभेदं सुकर्मा तत्सुतस्ततः॥ चकार तं च तच्छिष्यौ जगृहाते महाव्रतौ॥ हिरण्यनाभः कौशल्यः पौ
ष्पिंजिश्च द्विजोत्तम॥ उदीच्याः सामगाः शिष्यास्तस्य पंचशतं स्मृताः॥ हिरण्यनाभात्तावत्यः संहिता यैर्द्विजोत्तमैः॥ गृहीतास्तेपि चोच्यं
ते पंडितैः प्राच्यसामगाः॥ लोकाक्षि कुथुमिश्चैव कुशीदिर्लांगलिस्तथा॥ पौष्पिंजिशिष्यास्तद्भेदैः संहिता बहुलीकृताः॥ अथर्वण
मथो वक्ष्ये संहितानां समुच्चयं॥ अथर्ववेदं स मुनिः सुमंतुरमितद्युतिः॥ शिष्यमध्यापयामास कबंधं सोपि तं द्विधा॥ कृत्वा तु देवदर्शा
य तथा पथ्याय दत्तवान्॥ देवदर्शस्य शिष्यास्तु मेधो ब्रह्मबलिस्तथा॥ शौल्कायनिः पिप्पलादस्तथान्यो मुनिसत्तम॥ पथ्यस्यापि
त्रयः शिष्याः कृता यैर्द्विजसंहिताः॥ जाजलिः कुमुदादिश्च तृतीयः शौनको द्विज॥ शौनकस्तु द्विधा कृत्वा ददावेकां तु बभ्रवे॥ द्वि
तीयां संहितां प्रादात्सैंधवाय निसंज्ञिने॥ सैंधवो मुंजकेशश्च भिन्नास्ते द्विधा पुनः॥ नक्षत्रकल्पो वेदानां संहितानां तथैव च॥ चतु
र्थः स्यादांगिरसः शांतिकल्पश्च पंचमः॥ श्रेष्ठास्त्वथर्वणामेते संहितानां विकल्पनः॥ आख्यानैश्चाप्युपाख्यानैर्गाथाभिः शुद्ध
कल्पभिः॥ पुराणसंहितां चक्रे पुराणार्थविशारदः॥ प्रख्यातो व्यासशिष्योभूत्सूतो वै रोमहर्षणः॥ पुराणसंहितां तस्मै ददौ व्यासो म
हामुनिः॥ सुमतिश्चाग्निवर्चाश्च मित्रायुः शांशपायनिः॥ अकृतव्रणसावर्णी षट् शिष्यास्तस्य चाभवन्॥ काश्यपः संहिता
कर्त्ता सावर्णिः शांशपायनिः॥ रोमहर्षणिका चान्या तिसृणां मूलसंहिता॥ चतुष्टयेनाप्येतेन संहिताभिदं मुने॥ आद्यं सर्वपुरा
णानां पुराणं ब्राह्ममुच्यते॥ अष्टादशपुराणानि पुराणज्ञाः प्रचक्षते॥ ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा॥ तथान्यं नारदीयं च पंचम

राम ६७

दौतस्मै ययौच्च स्वेच्छयामुनिः॥ यजूंष्यथ च विसृष्टानि याज्ञवल्क्येन वै द्विज। जगृहुस्तित्तिरा भूत्वा तैत्तिरीयास्तु ते ततः॥ ब्रह्महत्याव्रतं चीर्णं
गुरुणा चोदितैस्तु यैः। चरकाध्वर्यवस्ते तु चरणान्मुनिसत्तम॥ याज्ञवल्क्योपि मैत्रेय प्राणायामपरायणः॥ तुष्टाव प्रणतः सूर्यं य-
जूंष्यभिलषन्मुनिः॥ याज्ञवल्क्य उवाच॥ नमः सवित्रे द्वाराय मुक्तेरमिततेजसे॥ ऋग्यजुःसामभूताय त्रयीधाम्ने च ते नमः॥ नमो-
ग्नीषोमभूताय जगतः कारणात्मने॥ भास्कराय परं तेजः सौषुम्णमुरु बिभ्रते॥ कलाकाष्ठानिमेषादिकालज्ञानात्मने नमः॥ ध्येया-
य विष्णुरूपाय परमाक्षररूपिणे॥ बिभर्ति यः सुरगणानाप्यायेन्दुं स्वरश्मिभिः॥ स्वधामृतेन च पितॄंस्तस्मै तृप्त्यात्मने नमः॥ नमो वि-
सोमभूताय सर्वदा हितकराय च॥ हिमांबुघर्मवृष्टीनां कर्ता हर्ता च यः प्रभुः॥ तस्मै त्रिकालमूर्ताय नमः सूर्याय वेधसे॥ अपहंति तमो
यश्च जगतोस्य जगत्पतिः॥ सत्त्वधामधरो देवो नमस्तस्मै विवस्वते॥ सत्कर्मयोग्यो न जनो नैवापः शुद्धिकारणं॥ यस्मिन्ननुदिते तस्मै
नमो देवाय भास्वते॥ स्पृष्टो यदंशुभिर्लोकः क्रियायोग्यो हि जायते॥ पवित्रताकारणाय तस्मै शुद्धात्मने नमः॥ नमः सवित्रे सूर्याय भास्क-
राय विवस्वते॥ आदित्यायादिभूताय देवादीनां नमो नमः॥ हिरण्मयं रथं यस्य केतवो वामनवाजिनः॥ वहंति भुवनालोकि चक्षुषं तं नमाम्यहं॥
पराशर उवाच॥ इत्येवमादिभिस्तेन स्तूयमानः स वै रविः॥ वाजिरूपधरः प्राह व्रियतामिति वांछितं॥ याज्ञवल्क्यस्तदा प्राह प्रणिपत्य
दिवाकरं॥ यजूंषि तानि मे देहि यानि संति न मे गुरौ॥ पराशर उवाच॥ एवमुक्तो ददौ तस्मै यजूंषि भगवान् रविः॥ अयातयामसंज्ञानि यानि
वेत्ति न तद्गुरुः॥ यजूंषि यैरधीतानि तानि विप्रैर्द्विजोत्तम॥ वाजिनस्ते समाख्याताः सूर्योऽश्वः सोऽभवद्यतः॥ शाखाभेदास्तु तेषां वै दशपंच च वाजि-
नां॥ काण्वाद्यास्तु महाभाग याज्ञवल्क्याः प्रकीर्तिताः॥ इति श्रीविष्णुपुराणे तृतीयेंऽशे पंचमोऽध्यायः॥ पराशर उवाच॥ सामवेदतरोः शाखा॥

वि॰पु॰
६८

68

ज॥ मामुवाचमहात्मैवं मया जातिस्मरो मुनिः॥ तेनाख्यातमिदं सर्वमित्थं चैतद्भविष्यति॥ तथाचैतत्तदा भूतं यथा प्रोक्तं तेन धीमता॥
स पृष्टश्च मया भूयः श्रद्दधानेन वै द्विज॥ यद्यदाह न तद्दृष्टमन्यथा हि मया क्वचित्॥ एकदा तु मया पृष्टमेतत्सद्भावतो द्विज॥ आह
कालिंगको विप्रः स्मृत्वा तस्य मुनेर्वचः॥ जातिस्मरेण कथितो रहस्यः परमो मम॥ यमकिंकरयोर्योभूत्संवादस्तं ब्रवीमि ते॥ स्वपुरु
षमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले॥ परिहर मधुसूदनप्रपन्नान्प्रभुरहमन्यनृणां न वैष्णवानां॥ अहम
मरगणार्चितेन धात्रा यम इति लोकहिताहिते नियुक्तः॥ हरिगुरुवशगोस्मि न स्वतंत्रः प्रभवति संयमने ममापि विष्णुः॥ हरि
गुरुविमुखान्प्रशास्मि मर्त्यान् हरिचरणप्रणतान्नमस्करोमि॥ सुगतिमभिलषामि वासुदेवादहमपि भागवतस्थितांत॥ रात्म
यतमपि शारदा हित्वा महमानं व्रजति न कांचनतामयः कदाचित्॥ भगवति विमुखस्य नास्ति सिद्धिर्विषममृतं भवतीति नैतदस्ति॥
नहि सशशधरस्य कविः कदाचित्तिमिरपराभवतामुपैति चंद्रः॥ भगवति हृदि संस्थिते तथात्मा मलिनोपि विराजते मनुष्यः॥ व
मगणकराभहसंकराः किंतु यवलयं वधिरताझ्यादवाक्तान्॥ मद्धरपि सुविचार्य लोकजन्मभगवदुपास्तिमृते न सिद्धिरस्ति
॥मुकुलितकरकुड्मलैः सुरेंद्रैः सततनमस्कृतपादपंकजाय॥ अविहतगतये सनातनाय प्रथमजगत्पतये नमोस्त्वजाय॥
कटकमुकुटकर्णिकादिभेदैः कनकमभेदमपीष्यते यदेकं॥ सुरपशुमनुजादिकल्पनाभिर्हरिरखिलाभिरुदीर्यते तथैकः॥ क्षि
तितलपरमाणवोनिलांते पुनरुपयांति यथैकतां धरित्र्या॥ सुरपशुमनुजादयस्तथांते गुणकलुषेण सनातनेन तेन॥ हरिमम

राम
६८

र्कंडेयं च सप्तमं॥ आग्नेयमष्टमं चैव भविष्यं नवमं स्मृतं॥ दशमं ब्रह्मवैवर्तं लिंगमेकादशं स्मृतं॥ वाराहं द्वादशं चैव स्कंदं चात्र त्रयोदशं॥
चतुर्दशं वामनं च कौर्म्मं पंचदशं तथा॥ मात्स्यं च गारुडं चैव ब्रह्मांडं च ततः परं॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि च॥ सर्वेष्वेतेषु कथ्य-
ते वंशानुचरितं च यत्॥ यदेतत्तव मैत्रेय पुराणं कथ्यते मया॥ एतद्वैष्णवसंज्ञं वै पाद्मस्य समनंतरं॥ सर्गे च प्रतिसर्गे च वंशमन्वंतरादिषु॥ स
कथ्यते भगवान्विष्णुरशेषेष्वेव सत्तम॥ अंगानि चतुरो वेदा मीमांसा न्यायविस्तरः॥ पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश॥ आयुर्वेदो
धनुर्वेदो गांधर्वश्चापि ते त्रयः॥ अर्थशास्त्रं चतुर्थं च विद्या ह्यष्टादशैव तु॥ ज्ञेया ब्रह्मर्षयः पूर्वं तेभ्यो देवर्षयः पुनः॥ राजर्षयः पुनस्तेभ्य ऋषि-
प्रकृतयस्त्रयः॥ इति शाखाः समाख्याताः शाखाभेदास्तथैव च॥ कर्तारश्चैव शाखानां भेदहेतुस्तथोदितः॥ सर्वमन्वंतरेष्वेवं शाखाभेदाः समाः स्मृताः॥
प्राजापत्या श्रुतिर्नित्या तद्विकल्पास्त्विमे द्विज॥ एतत्ते कथितं सर्वं यत्पृष्टोहमिह त्वया॥ मैत्रेय वेदसंबंधे किमन्यत्कथयामि ते॥ इति श्री-
विष्णुपुराणे तृतीयेंशे षष्ठोध्यायः॥ मैत्रेय उवाच॥ यथावत्कथितं सर्वं यत्पृष्टोसि मया द्विज॥ श्रोतुमिच्छाम्यहं त्वेकं तद्भवान्प्रब्रवीतु मे
॥ सप्त द्वीपानि पातालं वीथ्यश्च सुमहामुने॥ सप्त लोका येंतस्था ब्रह्मांडस्यास्य सर्वतः॥ स्थूलैः सूक्ष्मैस्तथा सूक्ष्मैः सूक्ष्मैः सूक्ष्मतरैस्त-
था॥ स्थूलैः स्थूलतरैश्चैव सर्वं प्राणिभिरावृतं॥ अंगुलस्याष्टभागोपि न सोस्ति मुनिसत्तम॥ न संति प्राणिनो यत्र कर्मबंधनिबंधनाः॥ सर्वे
सर्वे चैते वशं यांति यमस्य भगवन्किल॥ आयुषोंते तथा यांति यातनास्तत्प्रचोदिताः॥ यातनाभ्यः परिभ्रष्टा देवाद्यास्वथ योनिषु॥ जंतवः
परिवर्तंते शास्त्राणामेष निर्णयः॥ सोहमिच्छामि तच्छ्रोतुं यमस्य वशवर्तिनः॥ न भवंति नरा येन तत्कर्म कथयामलं॥ पराशर उवाच॥ अय-
मेव मुने प्रश्नो नकुलेन महात्मना॥ पृष्टः पितामहः प्राह भीष्मो यत्तच्छृणुष्व मे॥ भीष्म उवाच॥ पुरा ममागतो वत्स सखा कालिंगको द्वि-

पु

त्रा

मार्थ्यविशालसंगमन्तः॥ त्यज भट दूरतरेण तान पापान्॥ सकलमिदमहं च वासुदेवः परमपुमान्परमे
श्वरः स एकः॥ इति मतिरमला भवत्यनंते हृदयगते व्रज तान्विहाय दूरात्॥ कमलनयन वासुदेव विष्णो धरणीधराच्युत शंखचक्रपा
णे॥ भव शरणमितीरयंति ये वै त्यज भट दूरतरेण तानपापान्॥ वसति मनसि यस्य सोव्ययात्मा पुरुषवरोस्य न तस्य दृष्टिपाते॥ तव ग
तिरथवा ममास्ति चक्रप्रतिहतवीर्य्यबलस्य सोन्यलोक्यः॥ कलिंग उवाच॥ इति निजभटशासनाय देवो रवितनयः स किलाह
धर्मराजः॥ मम कथितमिदं च तेन तुभ्यं कुरूवर सम्यगिदं मयापि चोक्तं॥ भीष्म उवाच॥ नकुलेदं ममाख्यातं पूर्वं तेन द्विजन्मना॥ का
लिंगदेशादभ्येत्य प्रीतेन सुमहात्मना॥ मयाप्येतद्यथान्यायं सम्यग्वत्स तवोदितं॥ यथा विष्णुमृते नान्यत्त्राणं संसारसागरे॥ किंकरा
दंडपाशा वा न यमो न च यातना॥ समर्थास्तस्य यस्यात्मा केशवालंबनः सदा॥ पराशर उवाच॥ एवं मुने तवाख्यातं गीतं वैवस्वतेन य
त्॥ त्वत्प्रश्नानुगतं सम्यक्किमन्यच्छ्रोतुमिच्छसि॥ इति श्रीविष्णुपुराणे तृतीयेंशे सप्तमोध्यायः॥ मैत्रेय उवाच॥ भगवन्भगवा
न्देवः संसारविजिगीषुभिः॥ समाख्याहि जगन्नाथो विष्णुराराध्यते यथा॥ आराधितश्च गोविंद आराधनपरैर्नरैः॥ यत्प्राप्यते फलं
श्रोतुं तच्चेच्छामि महामुने॥ पराशर उवाच॥ यत्पृच्छति भवानेतत्सगरेण महात्मना॥ और्वः प्राह यथा पृष्टस्तन्मे कथयतः शृणु॥ स
गरः प्रणिपत्यैनमौर्वं पप्रच्छ भार्गवं॥ विष्णोराराधनोपायसंबंधं मुनिसत्तम॥ फलं चाराधिते विष्णौ यत्पुंसामभिजायते॥ स चाह पृष्टो
यत्नेन तस्मै तच्छृणु चाखिलं मम॥ और्व उवाच॥ भौमं मनोरथं स्वर्गं स्वर्गिवंद्यं च यत्पदं॥ प्राप्नोत्याराधिते विष्णौ निर्वाणमपि चोत्तमं॥ प्र

विष्णु पु०

३

उ

69

राम

वि

रवरार्च्चितांघ्रिं प्रणमति यः परमार्थतो मनुष्यः ॥ तमपगतसमस्तपापबंधं व्रज परिहृत्य यथाग्निमाज्यसिक्तं ॥ इति यमवचनं निशम्य
पाशी यमपुरुषस्तमुवाच धर्मराजं ॥ कथय मम विभो समस्तधातुर्भवति हरेः खलु यादृशोस्य भक्तः ॥ यम उवाच ॥ न चलति निजवर्णधर्म्म
तो यः सममतिरात्मसुहृद्विपक्षपक्षे ॥ हरति न च हंति किंचिदुच्चैः सितमनसं तमवेहि विष्णुभक्तं ॥ कलिकलुषमलेन यस्य नात्मा विमलम
तेर्म्मलिनीकृतस्तमोहः ॥ मनसि कृतजनार्दनं मनुष्यं सततमवेहि हरेरतीव भक्तं ॥ कनकमपि रहस्यवेक्ष्य बुद्ध्या तृणमिव यः समवैति वै
परस्वं भवति च भगवत्यनन्यचेताः पुरुषवरं तमवेहि विष्णुभक्तं ॥ स्फटिकगिरिशिलामलः क्व विष्णुर्मनसि नृणां क्व च मत्सरादिदोषः ॥ न हि
तुहिनमयूखरश्मिपुंजे भवति हुताशनदीप्तिजः प्रतापः ॥ विमलमतिरमत्सरः प्रशांतः शुचिचरितोऽखिलसत्वमित्रभूतः ॥ प्रियहितव
चनोऽस्तमानमायो वसति सदा हृदि तस्य वासुदेवः ॥ वसति हृदि सनातने च तस्मिन् भवति पुमान् जगतोस्य सौम्यरूपः ॥ क्षितिरसमतिरम्यमात्मनो
न्तः कथयति चारुतयैव शालपोतः ॥ यमनियमविधूतकल्मषाणामनुदिनमच्युतसक्तमानसानां ॥ अपगतमदमानमत्सराणां व्रज भ
ट दूरतरेण मानवानां ॥ हृदि यदि भगवाननादिरास्ते हरिरसिशंखगदाधरोऽव्ययात्मा ॥ तदघमघविघातकर्तृ भिन्नं भवति कथं सति चांध
कारमर्के ॥ हरति परधनं निहंति जंतून् वदति तथानृतनिष्ठुराणि यश्च ॥ अशुभजनितदुर्मदस्य पुंसः कलुषमतेर्हृदि तस्य नास्त्यनंतः ॥ न स
हति परसंपदं विनिंदां कलुषमतिः कुरुते सतामसाधुः ॥ न यजति न ददाति यश्च संतं मनसि न तस्य जनार्दनोऽधमस्य ॥ परमसुहृदि बांधवे क
लत्रे सुततनयापितृमातृभृत्यवर्गे ॥ शठमतिरुपयाति योऽर्थतृष्णां तमधमचेष्टमवेहि नास्य भक्तं ॥ अशुभमतिरसत्प्रवृत्तिसक्तः सततम

का॥ तस्यापि प्रथमे कल्पे पृथिवीपरिपालनं॥ धरित्रीपालनेनैव कृतकृत्या नराधिपा॥ भवंति नृपतेरंशा यतो यज्ञादिकर्म्मणां॥ दुष्टा
नां शासनाद्राजा शिष्टानां परिपालनात्॥ प्राप्नोत्यभिमतांल्लोकान्वर्णसंस्थां करोति यः॥ पाशुपाल्यं च वाणिज्यं कृषिं च मनुजेश्वर
वैश्याय जीविकां ब्रह्मा ददौ लोकपितामहः॥ तस्याप्यध्ययनं यज्ञो दानं धर्म्मश्च शस्यते॥ नित्यनैमित्तिकादीनामनुष्ठानं च क
र्म्मणाम्॥ द्विजातिसंश्रयं कर्म्म तादर्थ्यं तेन पोषणं॥ क्रयविक्रयजैर्वापि धनैः कारुद्भवेन च॥ दानं च दद्याच्छूद्रोपि पाकयज्ञैर्यजे
त च॥ पित्रादिकं च वै सर्वं शूद्रः कुर्वीत तेन वै॥ भृत्यादिभरणार्थाय सर्वेषां च परिग्रहम्॥ ऋतुकालाभिगमनं स्वदारेषु महीपते
॥ दया समस्तभूतेषु तितिक्षा नाभिमानिता॥ सत्यं शौचमनायासो मंगलं प्रियवादिता॥ मैत्र्यस्पृहा तथा तद्वदकार्पण्यं नरेश्वर॥ अ
नसूया च सामान्या वर्णानां कथिता गुणाः॥ आश्रमाणां च सर्वेषामेते सामान्यलक्षणाः॥ गुणांस्तथापद्धर्म्मांश्च विप्रादीनां तथा शृ
णु॥ क्षात्रं कर्म्म द्विजस्योक्तं वैश्यकर्म्म तथापदि॥ राजन्यस्य च वैश्योक्तं शूद्रकर्म्म न चैतयोः॥ सामर्थ्ये सति तत्त्याज्यमुभाभ्यामपि पा
र्थिव॥ तदेवापदि च कर्त्तव्यं न कुर्यात्कर्म्मसंकरं॥ इत्येते कथिता राजन्वर्णधर्म्मा मया तव॥ धर्म्मानाश्रमिणां सम्यक् ब्रुवतो मे नि
शामय॥ इति श्री विष्णुपुराणे तृतीयेंशे अष्टमोध्यायः॥ और्व उवाच॥ बालः कृतोपनयनो वेदाहरणतत्परः॥ गुरुगेहे वसेद्भूप
ब्रह्मचारी समाहितः॥ शौचाचारवता तत्र कार्यं शुश्रूषणं गुरोः॥ व्रतानि चरता ग्राह्यो वेदश्च कृतबुद्धिना॥ उभे संध्ये रविं भूप तथैवा
ग्निं समाहितः॥ उपविष्ठेत्तथा कुर्याद्गुरोरप्यभिवादनं॥ स्थिते तिष्ठेद्व्रजेद्याति नीचैरासीत चासति॥ शिष्यो गुरौ नृपश्रेष्ठ प्रतिकू
लं न संचरेत्॥ तेनैवोक्तं पठेद्वेदं नान्यचित्तः पुरःस्थितः॥ अनुज्ञातश्च भिक्षान्नमश्नीयाद्गुरुणा ततः॥ अवगाहेदपः पूर्वमाचार्येणा

स्यन्ते२

च्छति यावच्च फलमाराधितेच्युते ॥ तत्तदाप्नोति राजेंद्र भूरि स्वल्पमथापि च ॥ यत्तु पृच्छसि भूपाल कथमाराध्यते हि सः ॥ तदहं सकलं तु
भ्यं कथयामि निबोध मे ॥ वर्णाश्रमाचारवता पुरुषेण परः पुमान् ॥ विष्णुराराध्यते पंथा नान्यस्तत्तोषकारकः ॥ यजन्यज्ञान्यजत्येनं जपत्ये
नं जपन्नृप ॥ घ्नत्यान्यान्हिनस्त्येनं सर्वभूतो यतो हरिः ॥ तस्मात्सदाचारवता पुरुषेण जनार्दनः ॥ आराध्यते स्ववर्णोक्तधर्मानुष्ठानकारि
णा ॥ ब्राह्मणक्षत्रियो वैश्याः शूद्रश्च पृथिवीपते ॥ स्वधर्मतत्परो विष्णुमाराधयति नान्यथा ॥ परापवादं पैशुन्यमनृतं च न भाषते
अन्योद्वेगकरं चापि तोष्यते तेन केशवः ॥ परदारपरद्रव्यं जीवहिंसासु यो मतिं ॥ न करोति पुमान्भूप तोष्यते तेन केशवः ॥ न ताडयति ना
हंति वा हिंसं कुरुते तु यः ॥ मनुष्यो हि मनुष्येंद्र तोष्यते तेन केशवः ॥ देवद्विजगुरूणां च शुश्रूषासु सदोद्यतः ॥ तोष्यते तेन गोविंदः पुरुषे
ण नरेश्वर ॥ यथात्मनि च पुत्रे च सर्वभूतेषु यस्तथा ॥ हितकामो हरिस्तेन तोष्यते सर्वदा सुखं ॥ यस्य रागादिदोषेण न दुष्टं नृप मानसं ॥ वि
शुद्धचेतसा विष्णुस्तोष्यते तेन सर्वदा ॥ वर्णाश्रमेषु ये धर्माः शास्त्रोक्ता नृपसत्तम ॥ तेषु तिष्ठन्नरो विष्णुमाराधयति नान्यथा ॥ सगर उ
वाच ॥ तदहं श्रोतुमिच्छामि वर्णधर्मानशेषतः ॥ तथैवाश्रमधर्मांश्च द्विजवर्य ब्रवीहि मे ॥ और्व उवाच ॥ ब्राह्मणक्षत्रियविशां शू
द्राणां च यथाक्रमं ॥ त्वमेकाग्रमना भूत्वा शृणु धर्मान्मयोदितान् ॥ दानं दद्याद्यजेद्देवान्यज्ञैः स्वाध्यायतत्परः ॥ नित्योदकी भवेद्विप्रः कुर्या
च्चाग्निपरिग्रहं ॥ वृत्त्यर्थं याजयेच्चान्यानन्यानध्यापयेत्तथा ॥ कुर्यात्प्रतिग्रहादानं शुक्लार्थान्न्यायतो द्विजः ॥ सर्वलोकहितं कुर्यान्नाहि
तं कस्यचिद्द्विजः ॥ मैत्री समस्तभूतेषु ब्राह्मणस्योत्तमं धनं ॥ ग्राह्ये रत्ने च पारक्ये समबुद्धिर्भवेद्द्विजः ॥ ऋतावभिगमः पत्न्यां शस्यते चास्य पा
र्थिव ॥ दानानि दद्यादिच्छातो द्विजेभ्यः क्षत्रियोपि हि ॥ यजेच्च विविधैर्यज्ञैरधीयीत च पार्थिवः ॥ शस्त्राजीवो महीरक्षा प्रवरा तस्य जीवि

वि॰पु॰
७१

तस्य स्वरूपं गदतो मम श्रोतुं नृपार्हसि ॥ पुत्रद्रव्यकलत्रेषु त्यक्तस्नेहो नराधिप ॥ चतुर्थमाश्रमस्थानं गच्छेन्निर्धूतमत्सरः ॥ त्रैवर्गि-
कांस्त्यजेत्सर्वानारम्भानवनीपते ॥ मैत्र्यादिषु समो मैत्रः समस्तेष्वेव जंतुषु ॥ जरायुजांडजादीनां वाङ्मनःकर्मभिः क्वचित् ॥ कुर्वीत
युक्तो न द्रोहं सर्वसंगांश्च वर्जयेत् ॥ एकरात्रस्थितिर्ग्रामे पंचरात्रस्थितिः पुरे ॥ तथा तिष्ठेद्यथा प्रीतिर्द्वेषो वा नास्य जायते ॥ प्राणया-
त्रानिमित्तं च व्यंगारे भुक्तवज्जने ॥ काले प्रशस्तवर्णानां भिक्षार्थं पर्यटेद्गृहान् ॥ कामः क्रोधस्तथा दर्पो दंभो लोभमोहादयश्च ये ॥
तांस्तु दोषान्परित्यज्य परिव्राड् निर्ममो भवेत् ॥ अभयं सर्वसत्वेभ्यो दत्वा यश्चरते मुनिः ॥ न तस्य सर्वभूतेभ्यो भयमुत्पद्यते क्वचित् ॥
कृत्वाग्निहोत्रं स्वशरीरसंस्थं शारीरमग्निं स्वमुखे जुहोति ॥ विप्रस्तु भैक्षोपगतैर्हविर्भिश्चिताग्निनां स व्रजति स्म लोकान् ॥ मोक्षाश्र-
मं यश्चरते यथोक्तं शुचिः ससंकल्पितबुद्धियुक्तः ॥ अनिंधनं ज्योतिरिव प्रशांतं स ब्रह्मलोकं श्रयते द्विजातिः ॥ इति श्रीविष्णुपु-
राणे तृतीयेंऽशे नवमोऽध्यायः ॥ सगर उवाच ॥ कथितं चातुराश्रम्यं चातुर्वर्ण्यक्रियास्तथा ॥ पुंसः क्रियामहं श्रोतुमिच्छामि द्विजसत्त-
म ॥ नित्यनैमित्तिकीः काम्याः क्रियाः पुंसामशेषतः ॥ समाख्याहि भृगुश्रेष्ठ धर्मज्ञो ह्यसि मे मतः ॥ और्व उवाच ॥ यदेतदुक्तं भवता
नित्यनैमित्तिकाश्रितं ॥ तदहं कथयिष्यामि शृणुष्वैकमना मम ॥ जातस्य जातकर्मादिक्रियाकांडमशेषतः ॥ पुत्रस्य कुर्वीत
पिता श्राद्धं चाभ्युदयात्मकं ॥ युग्मांस्तु प्राङ्मुखान्विप्रान्भोजयेन्मनुजेश्वर ॥ यथावृत्ति तथा कुर्याद्दैवं पित्र्यं द्विजन्मनां ॥ दध्ना य-
वैः सबदरैर्मिश्रान्पिंडान्मुदा युतः ॥ नांदीमुखेभ्यस्तीर्थेन दद्याद्दैवेन पार्थिव ॥ प्राजापत्येन वा सर्वमुपचारं प्रदक्षिणं ॥ कुर्वीत त-

राम
७१

वेगाहिता॥ समित्कुशादिकं चास्य कल्यं कल्यमुपाहरेत्॥ ग्रहीतग्राह्यवेदस्तु ततोनुज्ञामवाप्य वै॥ गार्हस्थ्यमाविशेत्प्राज्ञो निष्प
न्नगुरुनिःकृतिः॥ विधिनावाप्तदारस्तु धनं प्राप्य स्वकर्मणा॥ गृहस्थः कार्यमखिलं कुर्याद्भूपाल शक्तितः॥ निवापेण पितॄन्नर्च्ये
द्यज्ञैर्देवांस्तथातिथीन्॥ अन्नैर्मुनींश्च स्वाध्यायैरपत्येन प्रजापतिः॥ बलिकर्मणा च भूतानि वात्सल्येनाखिलं जगत्॥ प्राप्नोति लो
कान्पुरुषो निजकर्मसमार्जितान्॥ भिक्षाभुजश्च ये केचित्परिव्राड्ब्रह्मचारिणः॥ तेप्यत्रैव प्रतिष्ठंति गार्हस्थ्यं तेन वै परं॥ वेदाहरण
कार्येण तीर्थस्नानाय च प्रभो॥ अटंति वसुधां विप्राः पृथिवीदर्शनाय च॥ अनिकेता ह्यनाहारा यत्र सायंगृहास्तु ये॥ तेषां गृहस्थः
सततं प्रतिष्ठा योनिरेव च॥ तेषां स्वागतदानादि वक्तव्यं मधुरं नृप॥ गृहागतानां दद्याच्च शयनासनभोजनं॥ अतिथिर्यस्य भग्ना
शो गृहात्प्रतिनिवर्तते॥ स दत्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति॥ अवज्ञानमहंकारो दंभश्चैव गृहे सतः॥ परितापोपघातौ च पा
रुष्यं च न शस्यते॥ यस्तु सम्यक्करोत्येवं गृहस्थः परमं विधिं॥ सर्वबंधविमुक्तोसौ लोकानाप्नोत्यनुत्तमान्॥ वयःपरिणतो राजन्कृतकृ
त्यो गृहाश्रमी॥ पुत्रेषु दारान्निःक्षिप्य वनं गच्छेत्सहैव वा॥ पर्णमूलफलाहारः केशश्मश्रुजटाधरः॥ भूमिशायी भवेत्तत्र मुनिः सर्वातिथि
र्नृप॥ चर्मकाशकुशैः कुर्यात्परिधानोत्तरीयके॥ तद्वत्त्रिषवणं स्नानं शस्तं सम्यङ्नरेश्वर॥ देवताभ्यर्चनं होमः सर्वाभ्यागतपूजनं॥ २
भिक्षाबलिप्रदानं च शस्तमस्य नरेश्वर॥ वन्यस्नेहेन गात्राणामभ्यंगश्चास्य शस्यते॥ तपश्च तस्य राजेंद्र शीतोष्णादिसहिष्णुता॥ यस्ते
तां नियतश्चर्यां वानप्रस्थश्चरेन्मुनिः॥ स दहत्यग्निवद्दोषाञ्जयेल्लोकांश्च शाश्वतान्॥ चतुर्थश्चाश्रमो भिक्षोः प्रोच्यते यो मनीषिभिः

मुहूर्ते हृष्टेन सम्यग्गृह्य महाफलं॥ इति श्रीविष्णुपुराणे तृतीयेंऽशे दशमोऽध्यायः॥ सगर उवाच॥ गृहस्थस्य सदाचारं श्रोतुमि
च्छाम्यहं मुने॥ लोकादस्मात्परस्माच्च यमातिष्ठन्न हीयते॥ और्व उवाच॥ श्रूयतां पृथिवीपाल सदाचारस्य लक्षणं॥ सदाचारवता पुंसा जि
तौ लोकावुभावपि॥ साधवः क्षीणदोषास्तु सच्छब्दः साधुवाचकः॥ तेषामाचरणं यत्तु स सदाचार उच्यते॥ सप्तर्षयोऽथ मनवः प्रजानां
पतयस्तथा॥ सदाचारस्य वक्तारः कर्तारश्च महीपते॥ ब्राह्मे मुहूर्ते सुस्थे च मानसे मतिमान्नृप॥ विबुद्धश्चिंतयेद्धर्ममर्थं चास्याविरोधि
नं॥ अपीडया तयोः काममुभयोरपि चिंतयेत्॥ दृष्टादृष्टविनाशाय त्रिवर्गे समदर्शिता॥ परित्यजेदर्थकामौ धर्मपीडाकरौ नृप॥ ध
र्ममप्यसुखोदर्कं लोकविक्रुष्टमेव च॥ ततः कल्यं समुत्थाय कुर्यान्मैत्रं नरेश्वर॥ नैरृत्यामिषुविक्षेपमतीत्याभ्यधिकं गृहात्॥
दूरादावसथान्मूत्रं पुरीषं च समाचरेत्॥ पादावसेचनोच्छिष्टं प्रक्षिपेन्न गृहांगणे॥ आत्मच्छायां तरुच्छायां गोसूर्याग्न्यनिलांस्त
था॥ गुरुद्विजादींश्च बुधो नमेहेत कदाचन॥ न कृष्टे सस्यमध्ये वा गोव्रजे जनसंसदि॥ न वर्त्मनि न नद्यादितीर्थेषु पुरुषर्षभ॥ नाप्सु नै
वांभसस्तीरे न श्मशाने समाचरेत्॥ उत्सर्गं वै पुरीषस्य मूत्रस्य च विसर्जनं॥ उदङ्मुखो दिवा मूत्रं विपरीतमुखो निशि॥ कुर्वीतानाप
दि प्राज्ञो मलोत्सर्गं च पार्थिव॥ तृणैरास्तीर्य वसुधां वस्त्रप्रावृतमस्तकः॥ तिष्ठेन्नातिचिरं तत्र नैव किंचिदुदीरयेत्॥ वल्मीक
मूषकोत्खातां मृदं नांतर्जलां तथा॥ शौचावशिष्टां गेहाच्च नादद्याल्लेपसंभवां॥ अंतःप्राण्यवपन्नां च हलोत्खातां च पार्थिव॥ परित्यजे
न्मृदस्त्वेतास्सकलाः शौचसाधने॥ एका लिंगे गुदे तिस्रो दश वामकरे नृप॥ हस्तद्वये च सप्तान्या मृदः शौचोपपादिकाः॥ अच्छेनागंध
फेनेन जलेनाबुद्बुदेन च॥ आचामेत मृदं भूयस्तथा समाहितः॥ निःपादितांघ्रिशौचस्तु पादावभ्युक्ष्य वै पुनः॥ त्रिः पिबेत्सलिलं तेन तथा

रद्यात

तथाप्रोष्ठवृष्टिकालेषुभूपते। ततश्चनामकुर्वीतपितैवदशमेहनि। देवपूर्वंनरख्यंहिशर्म्मवर्म्मादिसंयुतं। शुभदास्यान्वितंनामप्र
शस्तंवैश्यशूद्रयोः। अर्थहीनंनवाशस्तंनापशब्दयुतंतथा। नामंगल्यंजुगुप्स्यंवानामकुर्यात्समाक्षरं। नातिदीर्घंनह्रस्वंचनातिगुर्व
क्षरान्वितं। सुखोच्चार्यंतुतन्नामकुर्याद्यत्प्रणवाश्रितं। ततोनंतरसंस्कारसंस्कृतोगुरुवेश्मनि। यथोक्तंविधिमास्थायकुर्याद्विद्यापरि
ग्रहं। गृहीतविद्योगुरवेदत्वातुगुरुदक्षिणां। गार्हस्थ्यमिच्छन्भूपालकुर्याद्दारपरिग्रहं। ब्रह्मचर्येणवाकालंकुर्यात्संकल्पपूर्वकं
गुरोःशुश्रूषणंकुर्यात्तत्पुत्रादेरथापिवा। वैखानसोवापिभवेत्परिव्राड्यथेच्छया। पूर्वसंकल्पितंयादृक्कुर्यात्तन्महीपते। वयसेक
गुणांभार्यामुद्वहेद्विगुणःस्वयं। नातिकेशामकेशांवानातिकृष्णांनपिंगलां। निसर्गतोधिकांगींवान्यूनांगीमपिनोद्वहेत्। नाविशु
द्धांसरोगांवाकुलेजांवातिरोगिणीं। नदुष्टांदुष्टवाचालांव्यंगिनींपितृमातृतः। नश्मश्रुव्यंजनवतींनचैवपुरुषाकृतिं। नघर्घरस्वरांक्षा
मांतथाकाकस्वरांनच। नातिबद्धेक्षणांतद्वद्वृत्ताक्षींनोद्वहेद्बुधः। यस्याश्चरोमशेजंघेगुल्फौयस्यास्तथोन्नतौ। गंडयोःकूपकौ
यस्याहसंत्यास्तांचनोद्वहेत्। नातिरूक्षच्छविंपांडुकरजामरुणेक्षणां। आपीनहस्तपादांचनकन्यामुद्वहेद्बुधः। नवामनांनाति
दीर्घांनोद्वहेत्संहतभ्रुवं। नचातिच्छिद्रदशनांनकरालमुखींनरः। पंचमींमातृपक्षाच्चपितृपक्षाच्चसप्तमीं। गृहस्थउद्वहेत्कन्यां
न्यायेनविधिनानृप। ब्राह्मोदैवस्तथैवार्षःप्राजापत्यस्तथासुरः। गांधर्वराक्षसौचान्यौपैशाचश्चाष्टमोधमः। एते[illegible]
यो धर्म्मोवर्णस्योक्तोमहर्षिभिः। कुर्वीतदारग्रहणंतेनान्यंपरिवर्जयेत्। सधर्मचारिणींप्राप्यगार्हस्थ्यंसहितस्तया। स

ग्र.२ री२

वि॰पु॰ ७२

73

दभीष्टं सुरपूजनं ॥ जलाभिषेकपुष्पाणां धूपादेश्च निवेदनं ॥ अपूर्वमग्निहोत्रं च कुर्यात्प्राग्ब्रह्मणे नृप ॥ प्रजापतिं समुद्दिश्य दद्यादाहुतिमादरा
त् ॥ गुह्येभ्यः काश्यपायाथ ततोनुमतये क्रमात् ॥ तच्छेषं मणिकोदेशे पर्जन्यायापि निक्षिपेत् ॥ द्वारे धातुर्विधातुश्च मध्ये च ब्रह्मणे क्षिपेत् ॥ गृहस्य पुरुष
व्याघ्र दिग्देवानपि मे शृणु ॥ इंद्राय धर्मराजाय वरुणाय तथेंदवे ॥ प्राच्यादिषु बुधो दद्याद्धुतशेषात्मकं बलिं ॥ प्रागुत्तरे च दिग्भागे धन्वंतरिबलिं
बुधः ॥ निर्वपेद्वैश्वदेवं च कर्म कुर्यादतः परं ॥ वायव्यां वायवे दिक्षु समस्तासु ततो दिशां ॥ ब्रह्मणे चांतरिक्षाय भानवे च क्षिपेद्बलिं ॥ विश्वेदे
वान्विश्वभूतांस्तथा विश्वपतीन्पितॄन् ॥ यक्ष्माणं च समुद्दिश्य बलिं दद्यान्नरेश्वर ॥ ततोन्यदन्नमादाय भूमिभागे शुचौ बुधः ॥ दद्यादशेषभू
तेभ्यः स्वेच्छया तत्समाहितः ॥ देवा मनुष्याः पशवो वयांसि सिद्धाः सयक्षोरगदैत्यसंघाः ॥ प्रेताः पिशाचास्तरवः समस्ता ये चान्नमिच्छंति म
या प्रदत्तं ॥ पिपीलिकाः कीटपतंगकाद्याः बुभुक्षिताः कर्मनिबंधबद्धाः ॥ प्रयांतु ते तृप्तिमिदं मयान्नं तेभ्यो विसृष्टं सुखिनो भवंतु ॥ येषां न मा
ता न पिता न बंधुर्नैवान्नसिद्धिर्न तथान्नमस्ति ॥ तत्तृप्तयेन्नं भुवि दत्तमेतत्ते यांतु तृप्तिं मुदिता भवंतु ॥ सर्वाणि भूतानि तथान्नमेतदहं च
विष्णुर्न यतोन्यदस्ति ॥ तस्मादहं भूतनिकायभूतमन्नं प्रयच्छामि भवाय तेषां ॥ चतुर्दशो भूतगणो य एष तत्र स्थिता येखिलभूतसंघाः
॥ तृप्त्यर्थमन्नं हि मया विसृष्टं तेषामिदं ते मुदिता भवंतु ॥ इत्युच्चार्य नरो दद्यादन्नं श्रद्धासमन्वितः ॥ भुवि भूतोपकाराय गृही सर्वाश्रयो यतः
॥ श्वचांडालविहंगानां भुवि दद्यात्ततो नरः ॥ ये चान्ये पतिताः केचिदपुत्राः संति मानवाः ॥ ततो गोदोहमात्रं वै कालं तिष्ठेद्गृहांगणे ॥ अति
थिग्रहणार्थाय तदूर्ध्वं वा यथेच्छया ॥ अतिथिं तत्र संप्राप्तं पूजयेत्स्वागतादिना ॥ तथासनप्रदानेन पादप्रक्षालनेन च ॥ श्रद्धया चान्नदा
नेन प्रियप्रश्नोत्तरेण च ॥ गच्छतश्चानुयानेन प्रीतिमुत्पादयेद्गृही ॥ अज्ञातकुलनामानमन्यतः समुपागतं ॥ पूजयेदतिथिं सम्यङ्नैक

एक ७२

द्भिः परिमार्जयेत् ॥ शीर्षण्यानि ततः खानि मूर्द्धनि च समालभेत् ॥ बाहू नाभिं च तोयेन हृदयं चापि संस्पृशेत् ॥ स्वाचांतश्च ततः कुर्यात्पुमा
न्केशप्रसाधनं ॥ आदर्शाञ्जनमांगल्यदूर्वाद्यालंभनानि च ॥ ततः स्ववर्णधर्मेण वृत्त्यर्थं च धनार्जनम् ॥ कुर्वीत श्रद्धासंपन्नो यजेत च
पृथिवीपते ॥ सोमसंस्था हविःसंस्था पाकसंस्थाश्च संस्थिताः ॥ धनाद्यतो मनुष्याणां यत्नस्तस्माद्धनार्जने ॥ नदीनदतडागेषु देवखातज
लेषु च ॥ नित्यक्रियार्थं स्नायीत गिरिप्रस्रवणेषु च ॥ कूपेषूद्धृततोयेन स्नानं कुर्वीत वा भुवि ॥ स्नायीतोद्धृततोयेन अथवा भुव्यसंभवे
शुचिवस्त्रधरः स्नातो देवर्षिपितृतर्पणं ॥ तेषामेव हि तीर्थेन कुर्वीत सुसमाहितः ॥ त्रिरपः प्रीणनार्थाय देवानामपवर्जयेत् ॥ ऋषी
णां च यथान्यायं सकृच्चापि प्रजापतेः ॥ पितॄणां प्रीणनार्थाय त्रिरपः पृथिवीपते ॥ पितामहेभ्यश्च तथा प्रीणयेत्प्रपितामहान् ॥ मातामहाय
तत्पित्रे तत्पित्रे च समाहितः ॥ दद्यात्पैत्रेण तीर्थेन काम्यं चान्यच्छृणुष्व मे ॥ मात्रे प्रमात्रे तन्मात्रे गुरुपत्न्यै तथा नृप ॥ उपकाराय भूतानां कृतदेवादि
तर्पणः ॥ देवासुरास्तथा यक्षा नागा गंधर्वराक्षसाः ॥ पिशाचा गुह्यकाः सिद्धाः कूष्मांडास्तरवः खगाः ॥ जलेचरा भूनिलया वाय्वाधाराश्च जंत
वः ॥ तृप्तिमेतेन यांत्वाशु मद्दत्तेनांबुनाखिलाः ॥ नरकेषु समस्तेषु यातनासु च ये स्थिताः ॥ तेषामाप्यायनायैतद्दीयते सलिलं मया ॥ येऽबांधवा
बांधवा ये येऽन्यजन्मनि बांधवाः ॥ ते तृप्तिमखिला यांतु यश्चास्मत्तोंबुवांछति ॥ गुरुदेवमातुलादीनां स्निग्धमित्राय भूभुजे ॥ इदं चापि जपेद्द
द्यात्स्वेच्छया नृप ॥ यत्र क्वचन संस्थानां क्षुत्तृष्णोपहतात्मनां ॥ इदमप्यक्षयं चास्तु मया दत्तं तिलोदकं ॥ काम्योदकप्रदानं ते मयैतत्कथितं
नृप ॥ यद्दत्वा प्रीणयत्येतन्मनुष्यः सकलं जगत् ॥ जगदाप्यायनोद्भूतं पुण्यमाप्नोति चानघ ॥ दत्वा काम्योदकं सम्यगेतेभ्यः श्रद्धयान्वितः ॥ आच
म्य च ततो दद्यात्सूर्याय सलिलांजलिं ॥ नमो विवस्वते ब्रह्मन्भास्वते विष्णुतेजसे ॥ जगत्सवित्रे शुचये सवित्रे कर्मसाक्षिणे ॥ ततो गृहार्चनं कुर्या

प

प

मा:

विष्णु०
७४

174

केभ्यश्च गुडपक्केभ्य एव च॥ भुंजीतोद्धृतसाराणि न कदाचिन्नरेश्वर॥ नाशेषं पुरुषोश्नीयादन्यत्र जगतीपते॥ मध्वंबुदधिसर्पिभ्यः सक्तुभ्यश्च
विवेकवान्॥ अश्नीयात्तन्मयो भूत्वा पूर्वं तु मधुरं रसं॥ लवणाम्लौ तथा मध्ये कटुतिक्तादिकं ततः॥ प्राग्द्रवं पुरुषोश्नीत्वै मध्ये च कठिनाशनः
पुनरंते द्रवाशी स्याद्बलारोग्ये न मुंचति॥ अनिंद्यं भक्षयेदित्थं वाग्यतोन्नमकुत्सयन्॥ पंच ग्रासं महामौनं प्राणाद्याप्यायनाय तत्॥ भुक्त्वा स
म्यगथाचम्य प्राङ्मुखोदङ्मुखोपि वा॥ यथावत्पुनराचामेत्पाणी प्रक्षाल्य मूलतः॥ स्वस्थः प्रशांतचित्तस्तु कृतासनपरिग्रहः॥ अभी
ष्टदेवतानां तु कुर्वीत स्मरणं नरः॥ अग्निराप्यायनं धातोः पार्थिवं पवनेरितः॥ दत्तावकाशं नभसो जरयत्वस्तु मे सुखं॥ अन्नं बलाय मे भूमे
रपामग्न्यनिलस्य च॥ भवत्वेतत्परिणतं ममास्त्वव्याहतं सुखं॥ प्राणापानसमानानामुदानव्यानयोस्तथा॥ अन्नं पुष्टिकरं चास्तु ममास्त्व
व्याहतं सुखं॥ अगस्तिरग्निर्वडवानलश्च भुक्तं मयान्नं जरयत्वशेषं॥ सुखं च मे तत्परिणामसंभवं यच्छत्वरोग्यं मम चास्तु देहे॥ विष्णुः स
मस्तेंद्रियदेहदेही प्रधानभूतो भगवान्यथैकः॥ सत्येन तेनान्नमशेषमेतदारोग्यदं मे परिणाममेतु॥ विष्णुरत्ता यथैवान्नं परिणामश्च वै
यथा॥ सत्येन तेन मद्भुक्तं जीर्यत्वन्नमिदं तथा॥ इत्युच्चार्य स्वहस्तेन परिमार्ज्य तथोदरं॥ अनायासप्रदायानि कुर्यात्कर्माण्यतंद्रितः॥ सच्छास्त्रादि
विनोदेन सन्मार्गाद्विरोधिना॥ दिनं नयेत्ततः संध्यामुपतिष्ठेत्समाहितः॥ दिनांतसंध्यां सूर्येण पूर्वामृक्षैर्युतां बुधः॥ उपतिष्ठेद्यथान्यायं
सम्यगाचम्य पार्थिव॥ सर्वकालमुपस्थानं संध्ययोः पार्थिवेष्यते॥ अन्यत्र सूतकाशौचविभ्रमातुरभीतितः॥ सूर्येणाभ्युदितो यश्च त्यक्तः
सूर्येण च स्वयं॥ अन्यत्रातुरभीतिभ्यः प्रायश्चित्तीयते नरः॥ तस्मादनुदिते सूर्ये समुत्थाय महीपते॥ उपतिष्ठेन्नरः संध्यामस्वपंश्च दि
नांतजं॥ उपतिष्ठंति ये संध्यां न पूर्वां न च पश्चिमां॥ व्रजंति ते दुरात्मानस्तामिस्रं नरकं नृप॥ पुनः पाकमुपादाय सायमप्यवनीपते॥ वै

य
या
या
:
राम
७४

74

ॐ

ग्रामनिवासिनं ॥ अकिंचनमसंबद्धमन्यदेशात्समुपागतं ॥ असंपूज्यातिथिं भुंजन्भोक्तुकामो व्रजत्यधः ॥ स्वाध्यायगोत्रचरणमपृष्ट्वा च तथा
कुलं ॥ हिरण्यगर्भबुध्या तं मन्येताभ्यागतं गृही ॥ पित्रर्थं चापरं विप्रमेकमप्याशयेन्नृप ॥ तद्देश्यं विदिताचारसंभूतिं पांचयज्ञिकं ॥ अन्नाग्रं च समु-
द्धृत्य हंतकारोपकल्पितं ॥ निर्वापभूतं भूपाल श्रोत्रियायोपपादयेत् ॥ दद्याच्च भिक्षात्रितयं परिव्राड्ब्रह्मचारिणां ॥ इच्छया च ततो दद्याद्विभवे सत्य-
वारितां ॥ इत्येतेतिथयः प्रोक्ताः प्रागुक्ता भिक्षवश्च ये ॥ चतुरः पूजयेन्नेतान्नृप पापात्प्रमुच्यते ॥ अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ॥ स तस्य
दुःकृतं दत्वा पुण्यमादाय गच्छति ॥ धाता प्रजापतिः शक्रो वह्निर्वसुगणोऽर्यमः ॥ प्रविश्यातिथिमेते वै भुंजतेन्नं नरेश्वर ॥ तस्मादतिथिपूजायां यतेत स-
ततं नरः ॥ स केवलमलं भुंक्ते यो भुंक्ते ह्यतिथिं विना ॥ ततः स्ववासिनीदुःखितागर्भिणीवृद्धबालकान् ॥ भोजयेत्संस्कृतान्नेन प्रथमं चरमं गृही ॥ अ-
भुक्तवत्सु चैतेषु भुंजन्भुंक्ते सुदुःकृतं ॥ मृतश्च गत्वा नरकं श्लेष्मभुग्जायते नरः ॥ अस्नाताशी मलं भुंक्ते अजपी पूयशोणितं ॥ असंस्कृतान्नभुङ्मू-
त्रं बालादिप्रथमं शकृत् ॥ तस्मा[च्छृणु] राजेंद्र यथा भुंजीत वै गृही ॥ भुंजतश्च यथा पुंसः पापबंधो न जायते ॥ इह चारोग्यमतुलं बलं भागं च प्राप्नुयात् पा-
पा भवत्यनिष्टशांतिश्च वैरपक्षाभिचारिका ॥ स्नातो यथावत्कृत्वा च देवर्षिपितृतर्पणं ॥ प्रशस्तरत्नपाणिस्तु भुंजीत प्रयतो गृही ॥ कृते जप्ये हु-
ते वह्नौ शुद्धवस्त्रधरो नृप ॥ दत्वातिथिभ्यो विप्रेभ्यो गुरुभ्यः संश्रितास्तथा ॥ पुण्यगंधधरः शस्तमाल्यधारी नरेश्वर ॥ नैकवस्त्रधरोथार्द्रपाणिपा-
दो नरेश्वर ॥ विशुद्धवदनः प्रीतो भुंजीत न विदिङ्मुखः ॥ प्राङ्मुखोदङ्मुखो वापि न चैवान्यमना नरः ॥ अन्नं प्रशस्तं पथ्यं च प्रोक्षितं प्रोक्षणोदकैः ॥ न
कुत्सिताहृतं नाप्यान्नं जुगुप्सावदसंस्कृतं ॥ दत्वा तु भुंक्ते शिष्येभ्यः क्षुधितेभ्यस्तथा गृही ॥ प्रशस्तशुद्धपात्रे तु भुंजीताकुपितो नृप ॥ नासंदीसंस्थिते पात्रे नादेशे
च नरेश्वर ॥ नाकाले नातिसंकीर्णे दत्वाग्रं च नरो ग्नये ॥ मंत्राभिमंत्रितं शस्तं न च पर्युषितं नृप ॥ अन्यत्र फलमांसेभ्यः शुष्कशाकादिकं तथा ॥ तद्वद्द्रावर

ध

२

त

प

वि॰पु॰
७५

75

॥ विष्णुपुराणे तृतीयेंशे एकादशोध्यायः॥ और्व उवाच॥ देवगोब्राह्मणान्सिद्धवृद्धाचार्यांस्तथार्चयेत्॥ द्विकालं च नमेत्संध्याम
ग्नीनुपचरेत्तथा॥ सदानुपहते वस्त्रे प्रशस्ताश्च तथौषधीः॥ गारुडानि च रत्नानि बिभृयात्प्रयतो नरः॥ प्रसिद्धामलकेशश्च सुगंधश्चा
रुवेषधृक् सदा॥ सिताः सुमनसो हृद्या बिभृयाच्च नरः सदा॥ किंचित्परस्वं न हरेन्नाल्पमप्यप्रियं वदेत्॥ प्रियं च नानृतं ब्रूयान्नान्यदोषा
नुदीरयेत्॥ नान्यस्त्रियं तथा वैरं रोचयेत्पुरुषर्षभ॥ न दुष्टं यानमारोहेत्कूलच्छायां च वर्जयेत्॥ विद्विष्टपतितोन्मत्तबहुवैरातिकी
टकैः॥ बंधकीबंधकीभर्तृक्षुद्रानृतकथैः सह॥ तथातिव्ययशीलैश्च परिवादरतैः शठैः॥ बुधो मैत्रीं न कुर्वीत नैकः पंथान
माव्रजेत्॥ नावगाहेज्जलौघस्य वेगमग्रे नरेश्वर॥ प्रदीप्तं वेश्म न विशेन्नारोहेच्छिखरं तरोः॥ न कुर्याद्दंतसंघर्षं न कुष्णीयाच्च ना
सिकां॥ नासंवृतमुखो जृंभेच्छ्वासकासौ च वर्जयेत्॥ नोच्चैर्हसेत्सशब्दं च न मुंचेत्पवनं बुधः॥ नखान्न खादयेत्॥ न तृणं न म
हीं लिखेत्॥ न श्मश्रु भक्षयेल्लोष्टं न मृद्नीयाद्विचक्षणः॥ ज्योतींष्यमेध्यशस्तानि नाभिवीक्षेत च प्रभो॥ नग्नां परस्त्रियं चैव सू
र्यं चास्तमनोदये॥ न हुंकुर्याच्छवं चैव शवगंधो हि सोमजः॥ चतुःपथं चैत्यतरुं श्मशानोपवनानि च॥ दुष्टस्त्रीसंनिकर्षं च वर्जये
न्निशि सर्वदा॥ पूज्यदेवद्विजज्योतिश्छायां नातिक्रमेद्बुधः॥ नैकः शून्याटवीं गच्छेन्न च शून्यगृहे वसेत्॥ केशास्थिकंटकामेध्यब
लिभस्मतुषांस्तथा॥ स्नानार्द्रां धरणीं चैव दूरतः परिवर्जयेत्॥ नानार्यानाश्रयेत्कांश्चिन्न जिह्मं रोचयेद्बुधः॥ उपसर्पेन्न व्यालांश्चि
रं तिष्ठेन्न चोत्थितः॥ अतीव जागरस्वप्नौ तद्वत्स्नानासने बुधः॥ न सेवेत तथा शय्यां व्यायामं च नरेश्वर॥ दंष्ट्रिणः शृंगिणश्चैव प्रा

त्रि

छिंद्यान्

राम
७५

च देवनिमित्तं वै पत्यं भक्तं बलिं हरेत् ॥ तत्रापि भिक्षुपद्मादिस्पर्शस्त्यैवान्नापवर्जनं ॥ अतिथिं चागतं दृष्ट्वा स्वशक्त्या पूजयेद्बुधः ॥ नाहं शौचा
सनं भूहः स्वागतोक्त्या च पूजनं ॥ ततस्तान् प्रेषयेद्धीमान् शयनेन च पार्थिव ॥ द्विजातिर्योऽतिविमुखो गतो यत्पातकं नृप ॥ तदेवाष्टगुणं संभूय
दे विमुखे गते ॥ तस्मात्स्वशक्त्या राजेन्द्र सूर्यादिमतिथिं नरः ॥ पूजयेत्पूजिते तस्मिन् पूजिताः सर्वदेवताः ॥ अन्नशाकाम्बुदानेन स्वशक्त्या प्रीण
येत्पुमान् ॥ शयनप्रस्तरमहीगच्छेता स्फुटितास्य प्यामिकं दातुमयी नृप ॥ सार्द्रवस्त्रपत्रः पुंसो विपरीतं तु रोगदं ॥ कृतानुपदैंगमाशस्त्र स्नान
त्यां भवनीपते ॥ पुत्रामहोदश्च भकालेज्येष्ठ सुम्मा सुराम्निषु ॥ नास्नातां तु स्त्रियं गच्छेन्नातुरां न रजस्वलां ॥ नानिष्टां न प्रकुपितां नप्रशस्तां
प्रगुर्विणीं ॥ नाहदिणां नान्यकामां नाकामां नान्ययोषितं ॥ क्षुत्क्षामां नातिभुक्तां वा स्वयं चैभिर्गुणैर्युतः ॥ स्नातः स्वगंधधृक् प्रीतो नाध्मा
तः क्षुधितोऽपि वा ॥ सकामः सानुरागश्च व्यवायं पुरुषो व्रजेत् ॥ चतुर्दश्यष्टमी चैव तथामावास्याथ पूर्णिमा ॥ पर्वाण्येतानि राजेन्द्र रवि
संक्रान्तिरेव च ॥ तैलस्त्रीमांससंभोगी पर्वस्वेतेषु वै पुमान् ॥ विण्मूत्रभोजनं नाम प्रयाति नरकं मृतः ॥ अशेषपर्वस्वेतेषु तस्मात्संयमि
भिर्बुधैः ॥ भाव्यं सच्छास्त्रदेवेज्याध्यानजाप्यपरैर्नरैः ॥ नान्ययोनावयोनौ वा नोपयुक्तौषधेस्तथा ॥ द्विजदेवगुरूणां च व्यवायी नाश्रमे
भवेत् ॥ चैत्यचत्वरतीर्थेषु गोष्ठे नैव चतुःपथे ॥ नैव श्मशानोपवने सलिलेषु महीपते ॥ प्रोक्तपर्वस्वशेषेषु नैव भूपाल संध्ययोः ॥ गच्छे
द्व्यवायं मतिमान् न मूत्रोच्चारपीडितः ॥ पर्वस्वभिगमोऽधन्यो दिवा पापप्रदो नृप ॥ भुवि रोगावहो नृणामप्रशस्तो जलाशये ॥ परदारान्न ग
च्छेत मनसापि कदाचन ॥ किमु वाचास्थिबन्धोऽपि नास्ति तेषु व्यवायिनां ॥ मृतो नरकमभ्येति हीयतेऽत्रापि चायुषः ॥ परदाररतिः
पुंसामुभयत्रापि भीतिदा ॥ इति मत्वा स्वदारेषु ऋतुमत्सु नरो व्रजेत् ॥ यथोक्तदोषहीनेषु सकामेष्वनृतावपि ॥ इति श्री

८३ पः

नः॥ अकालगर्जिते वापि पर्वस्वाशौचकादिषु॥ अनध्यायं बुधः कुर्यादुपरागादिके तथा॥ शमं नयति यः क्रुद्धान्सर्वबन्धुरमत्सरी॥ भी-
ताश्वासनकृत्साधुः स्वर्गस्तस्याल्पकं फलं॥ वर्षातपादिके छत्री दण्डी रात्र्यटवीषु च॥ शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत्॥ नोर्द्ध्वं न ति-
र्यग्दूरं वा निरीक्षन्पर्यटेद्बुधः॥ युगमात्रं महीपृष्ठं नरो गच्छेद्विलोकयन्॥ दोषहेतूनशेषांश्च वश्यात्मा यो निरस्यति॥ तस्य धर्मार्थका-
मानां हानिर्नाल्पापि जायते॥ पापेप्यपापः परुषेप्यभिधत्ते प्रियाणि यः॥ मैत्रीद्रवान्तःकरणस्तस्य मुक्तिः करे स्थिता॥ ये कामक्रोधलोभानां
वीतरागा न गोचरे॥ सदाचारस्थितास्तेषामनुभावैर्धृता मही॥ तस्मात्सत्यं वदेत्प्राज्ञो यत्परप्रीतिकारणं॥ सत्यं यत्परदुःखाय तत्र मौनप-
रो भवेत्॥ प्रियं युक्तं हितं नैतदिति मत्वा न तद्वदेत्॥ श्रेयस्तत्र हितं वाक्यं यद्यप्यत्यन्तमप्रियं॥ प्राणिनामुपकाराय यदेवेह परत्र च॥ कर्मणा
मनसा वाचा तदेव मतिमान्भवेत्॥ इति श्रीविष्णुपुराणे तृतीयेंशे द्वादशोऽध्यायः॥ और्व उवाच॥ सचैलस्य पितुः स्नानं जाते पुत्रे विधीयते॥ जात-
कर्म तदा कुर्याच्छ्राद्धमभ्युदये च यत्॥ युग्मान्देवांश्च पित्र्यांश्च सम्यक्सव्यक्रमाद्द्विजान्॥ पूजयेद्भोजयेच्चैव तन्मना नान्यमानसः॥ दध्यक्षतैः स-
बदरैः प्राङ्मुखोदङ्मुखोपि वा॥ देवतीर्थेन वै पिण्डान्दद्यात्कायेन वा नृप॥ नान्दीमुखः पितृगणस्तेन श्राद्धेन पार्थिव॥ प्रीणयेत्तत्तु कर्तव्यं पुरुषैः
सर्ववृद्धिषु॥ कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः॥ नामकर्मणि बालानां चूडाकर्मादिके तथा॥ सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने॥
नान्दीमुखं पितृगणं पूजयेत्प्रयतो गृही॥ पितृपूजाक्रमः प्रोक्तो वृद्धावेष समासतः॥ श्रूयतामवनीपाल प्रेतकर्मक्रियाविधिः॥ प्रेतदेहं शु-
भैः स्नानैः स्नापितं स्रग्विभूषितं॥ दग्ध्वा ग्रामाद्बहिः स्नात्वा सचैलाः सलिलाशये॥ यत्र तत्र स्थितायैतदमुकायेति वादिनः॥ दक्षिणाभि-
मुखा दद्युर्बान्धवाः सलिलाञ्जलिं॥ प्रविष्टाश्च समं गोभिर्ग्रामं नक्षत्रदर्शने॥ कटधर्मं ततः कुर्युर्भूमौ प्रस्तरणादिकं॥ दातव्योऽहर्दिनं

वि ७६ 76 पु पं राम ९६

सो दूरेण वर्जयेत्॥ अश्वस्य पंचहस्तेन्द्रं पुरो वाताऽतपौ तथा॥ नस्नायान्नस्वपेन्नग्नो न चैवोपस्पृशेद्बुधः॥ मुक्तः कक्षं नाचामेद्वै त
वाधोऽर्ध्वं वर्जयेत्॥ होमदेवार्चनाद्यासु क्रियास्वाचमने तथा॥ नैकावस्त्रः प्रवर्तेत द्विजवाचनकेजये॥ नासमं जसशीलैः सुस
हासीत कदाचन॥ सद्वृत्तसन्निकर्षो हि क्षणार्धमपि शस्यते॥ विरोधं नोत्तमैर्गच्छेन्नाधमैश्च सदा बुधः॥ विवाहश्च विवादश्च तुल्यशी
लैर्नृप इष्यते॥ नारभेत कलिं प्राज्ञः शुष्कवैरं च वर्जयेत्॥ अप्यल्पहानिः सोढव्या वैरेणार्थागमं त्यजेत्॥ स्नातो नांगानि निर्मार्जयेत्
स्नानशाटेन पाणिना॥ न च निर्धूनयेत्केशान्नाचामेन्नैव चोत्थितः॥ पादेन नाक्रमेत्पादं न पूज्याभिमुखं नयेत्॥ वीरासनं गुरोरग्रे भ
जेत विनयान्वितः॥ अपसव्यं न गच्छेच्च देवागारचतुःपथान्॥ मंगल्यपूज्यांश्च तथा विपरीतान्न दक्षिणान्॥ चन्द्रसूर्याग्निवारिविप्राणां
देवानां चैव संमुखं॥ कुर्यान्न ष्ठीवनविण्मूत्रसमुत्सर्गं च पंडितः॥ तिष्ठन्न मूत्रयेत्तद्वत्पथ्यानं नावमूत्रयेत्॥ श्लेष्मविण्मूत्ररक्तानि सर्वदै
व न संघयेत्॥ श्लेष्मासिंघाणकोत्सर्गो नान्नकाले प्रशस्यते॥ बलिमंगलजप्यादौ न होमे न महाजने॥ योषितो नावमन्येत न चासां
विश्वसेद्बुधः॥ न चैवेर्ष्युर्भवेत्तासु नाधिकुर्यात्कथंचन॥ मंगल्यपुष्परत्नाज्यपूज्याननभिवाद्य च॥ न निःक्रमेद्गृहात्प्राज्ञः सदाचारपरो
नृप॥ चतुष्पथं नमः कुर्यात्काले होमपरो भवेत्॥ दीनानभ्युद्धरेत्साधूनुपासीत बहुश्रुतान्॥ देवर्षिपूजकः सम्यक्पितृपिं
डोदकप्रदः॥ सत्कर्ता चातिथीनां यः स लोकानुत्तमान्व्रजेत्॥ हितं मितं प्रियं काले वश्यात्मा योऽभिभाषते॥ स याति लोका
नाह्लादहेतुभूतान्नृपाक्षयान्॥ धीमान्ह्रीमान्क्षमायुक्तो ह्यास्तिको विनयान्वितः॥ विद्याभिजनवृद्धानां याति लोकाननुत्तमा

ते

वि॰पु॰ ७७

बंधुरित्यस्माद्याकार्य्यो हवनीपते॥ पूर्वाः क्रियामध्यमाश्च तथा चैवोत्तराः क्रियाः॥ त्रिःप्रकाराः क्रिया ह्येतास्तासां भेदं शृणुष्व मे॥ आदाहवार्यायुधादिस्पर्शाद्यान्ताश्च याः क्रियाः॥ ताः पूर्वा मध्यमा मासि मास्येकोद्दिष्टसंज्ञिताः॥ प्रेतपिंडसमापन्ने सपिंडीकरणादनु॥ क्रियंते याः क्रियाः पित्र्याः प्रोच्यंते ता नृपोत्तराः॥ पितृमातृसपिंडैस्तु समानसलिलैस्तथा॥ तत्संघातगतैश्चैव राज्ञा वा धनहारिणा॥ पूर्वाः क्रियास्तु कर्त्तव्याः पुत्राद्यैरेव चोत्तराः॥ दौहित्रैर्वा नरश्रेष्ठ कार्य्यास्तत्तनयैस्तथा॥ मृतेऽहनि च कर्त्तव्याः स्त्रीणामप्युत्तराः क्रियाः॥ प्रतिसंवत्सरं राजन्नेकोद्दिष्टविधानतः॥ तस्मादुत्तरसंज्ञाया क्रियायाः शृणु पार्थिव॥ यदा यदा च कर्त्तव्या विधिर्येन च पार्थिव॥ इति श्रीविष्णुपुराणे तृतीयेंशे त्रयोदशोऽध्यायः॥ और्व उवाच॥ ब्रह्मेंद्ररुद्रनासत्यसूर्याग्निवसुमारुतान्॥ विश्वेदेवान्पितृगणान्श्चान्यद्भूतसंघकं॥ श्राद्धं श्रद्धान्वितः कुर्वन्प्रीणयत्यखिलं हितान्॥ मासि मास्यसिते पक्षे पंचदश्यां नरेश्वर॥ तथाष्टकासु कुर्वीत काम्यान्कालान् शृणुष्व मे॥ श्राद्धार्हमागतं द्रव्यं विशिष्टमथवा द्विजं॥ श्राद्धं कुर्वीत विज्ञाय व्यतीपातेऽयने तथा॥ विषुवे चैव संप्राप्ते ग्रहणे चंद्रसूर्ययोः॥ समस्तेष्वेव भूपाल राशिष्वर्के च गच्छति॥ नक्षत्रग्रहपीडासु दुष्टस्वप्नावलोकने॥ इच्छाश्राद्धानि कुर्वीत नवसस्यागमे तथा॥ अमावास्या यदा मैत्रविशाखास्वातियोगिनी॥ श्राद्धैः पितृगणास्तृप्तिं तदाप्नोत्यष्टवार्षिकीं॥ अमावास्या यदा पुष्ये रौद्रे चर्क्षे पुनर्वसौ॥ द्वादशाब्दं तथा तृप्तिं प्रयांति पितरोऽर्चिताः॥ वासवाजैकपादर्क्षे पितॄणां तृप्तिमिच्छतां॥ वारुणे वाप्यमावास्या देवानामपि दुर्लभा॥ नवस्वृक्षेष्वमावास्या यदैतेष्ववनीपते॥ तदा हि तृप्तिदं श्राद्धं पितॄणां शृणु चापरं॥ गीतं सनत्कुमारेण यथैलाय महात्मने॥ पृच्छते पितृभक्ताय प्रश्रयावनताय

३

77

राम

७७

पिंडः प्रेताय पुंसि पार्थिव ॥ स्विन्न भक्तं भोक्तव्यमस्नात्सं मनुजेश्वर ॥ दिवान्येतानि नैवकार्यांजः कर्त्तव्यं वंधुभोजनं ॥ प्रेतस्य पिंडं दद्याद्यातिवं धुवर्गे
ण भुंजता ॥ अयुग्मेष्वहः सु विप्राणां भोजनं च भुजेन पिता ॥ व स्त्रमार्गं बहिः स्नानं कर्त्तव्यं दशाह इत्येतिलोदकं ॥ तत्रानुबंधु वर्गेण दद्यात्तिलोदकं ॥ चतुर्थेऽहि
च कर्त्तव्यं भस्मास्थिचयनं नृप ॥ तद् ऊर्ध्वमंगसंस्पर्शः स्याद्पिंडनामपीष्यते ॥ योग्याः सर्वक्रियायां तु समानसलिलास्थिता ॥ अनुलेपनपुष्पादिभो
गाद् मत्र पार्थिव ॥ शय्यासनोपभोगश्च सपिंडानाम पीष्यते ॥ भस्मास्थिचयनादूर्ध्वं संयोगोऽनुयोषितां ॥ कालेष्वंतर स्थेषु पतितेषु मुनौ स्नाते ॥ स
द्यः शौचं तथेच्छातो जलाग्न्युद्वंधनादिषु ॥ मृतवंधोर्दशाहानि कुलस्यान्नं न भुज्यते ॥ दानं प्रतिग्रहो यज्ञः स्वाध्यायश्च निवर्त्तते ॥ विप्रस्यैतद्वाद
शाहं राजन्यस्याप्यशौचकं ॥ अर्धं मासं तु वैश्यस्य मासः शूद्रस्य शुद्धये ॥ अयुजो भोजयेत्कामं द्विजानंतेततो दिने ॥ दद्याद्दर्भेषु पिंडं च प्रेतायो
च्छिष्टसंनिधौ ॥ वार्य्यायुधप्रतोदास्तु दंडस्तु द्विजभोजनात् ॥ स्प्रष्टव्यानंतरं वर्णैः शुद्धेरंस्ते ततः क्रमात् ॥ ततः स्ववर्णधर्माये विप्रादीनां सुदाहृता ॥ त
त्कुर्वीत पुमान् जीवेन्निजधर्मार्जनैः सदा ॥ मृतेऽहनि च कर्त्तव्यमेकोद्दिष्टमतः परं ॥ आहूतादि क्रियाशेषं नियोगरहितं हितत ॥ एकोऽर्घ्यस्तत्र दातव्यस्त
थैवैकं पवित्रकं ॥ प्रेताय पिंडो दातव्यो भुक्तवत्सु द्विजातिषु ॥ प्रश्नश्च तत्राभिरतिर्यजमानैर्द्विजन्मनां ॥ अक्षय्यममुकस्येति वक्तव्यं विरतौ नृप ॥ ए
कोद्दिष्टमयो धर्म इत्थमा वत्सरात्स्मृत ॥ सपिंडीकरणं तस्मिं काले राजेंद्र तच्छृणु ॥ एकोद्दिष्टविधानेन कार्य्यं तदपि पार्थिव ॥ तिलगंधोदकैर्युक्तं त
त्पात्रचतुष्टयं ॥ पात्रं प्रेतस्य तत्रैकं पैत्रं त्रयं तथा ॥ सिंचयेत्पितृपात्रेषु प्रेतपात्रं नृपत्रिषु ॥ ततः पितृत्वमापन्ने तस्मिन्प्रेते महीपते ॥ श्राद्धधर्मैरशेषै
स्तु तत्पूर्वानर्चयेत्पितॄन् ॥ पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रातृसंततिः ॥ सपिंडसंततिर्वापि क्रियार्हो नृप जायते ॥ तेषामभावे सर्वेषां समानोदकसं
ततिः ॥ मातृपक्षस्य पिंडेन संबंधा ये जलेन वा ॥ कुलद्वयेऽपि चोत्सन्ने स्त्रीभिः कार्य्या क्रिया नृप ॥ संघातांतर्गतैर्वापि कार्य्या प्रेतस्य या क्रिया ॥ उत्सन्न

पात्र

२

वि॰पु॰
७८

78

हेनरः॥ नमेस्ति वित्तंनधनंनचान्यच्छ्राद्धोपयोग्यंस्वपितॄन्नतोस्मि॥ तृप्यंतुभक्त्यापितरोमयैतौकृतौभुजौवर्त्मनिमारुतस्य॥ और्व उवाच
इत्येतत्पितृभिर्गीतंभावाभावप्रयोजनं॥ यःकरोतिकृतंतेनश्राद्धंभवतिपार्थिव॥ इतिश्रीविष्णुपुराणेतृतीयेंशेचतुर्दशोध्यायः॥ और्व
उवाच॥ ब्राह्मणान्भोजयेच्छ्राद्धेयद्गुणांस्तान्निबोधमे॥ त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णःषडंगवित्॥ वेदविच्छ्रोत्रियोयोगीतथावैज्येष्ठसाम
गः॥ ऋत्विक्स्वस्रीयदौहित्रजामातृश्वशुरास्तथा॥ मातुलोथतपोनिष्ठःपंचाग्निभिरतःसदा॥ शिष्याःसंबंधिनश्चैवमातापितृरतश्च
यः॥ एतान्नियोजयेच्छ्राद्धेपूर्वोक्तान्प्रथमंनृप॥ ब्राह्मणान्पितृतुष्ट्यर्थमनुकल्पेष्वनंतरान्॥ मित्रध्रुक्कुनखीक्लीबःश्यावदंतस्त
थाद्विजः॥ कन्यादूषयितावह्निवेदोज्झःसोमविक्रयी॥ अभिशस्तस्तथास्तेनःपिशुनोग्रामयाजकः॥ भृतकाध्यापकस्तद्वद्भृतकाध्यापि
तश्चयः॥ परपूर्वापतिश्चैवमातापित्रोस्तथोज्झकः॥ वृषलीसूतिपोष्टाचवृषलीपतिरेवच॥ तथादेवलकश्चैवश्राद्धेनार्हतिकेत
नं॥ प्रथमेह्निबुधःशस्तान्छ्रोत्रियादीन्निमंत्रयेत्॥ कथयेच्चतथैवैषांनियोगान्पितृदैविकान्॥ ततःक्रोधव्यवायादीनायासंचद्विजैःस
ह॥ यजमानोनकुर्वीतदोषस्तत्रमहानयं॥ श्राद्धेनियुक्तोभुक्त्वावाभोजयित्वानियुज्यच॥ व्यवायीरेतसोगर्त्तेमज्जयत्यात्मनःपि
तॄन्॥ तस्मात्प्रथममत्रोक्तंद्विजाग्र्याणांनिमंत्रणं॥ अनिमंत्र्यद्विजान्गेहमागतान्भोजयेद्यतीन्॥ पादशौचादिनागेहमागतान्पूजये
द्द्विजान्॥ पवित्रपाणिराचांतानासनेषूपवेशयेत्॥ पितॄणामयुजोयुग्मान्देवानामिच्छयाद्विजान्॥ देवानामेकमेकंवापितॄणांच
नियोजयेत्॥ तथामातामहश्राद्धंवैश्वदेवसमन्वितं॥ कुर्वीतभक्तिसंपन्नस्तंत्रंवावैश्वदेविकं॥ प्राङ्मुखान्भोजयेद्विप्रान्देवानामुभ
यात्मकान्॥ पितृमातामहानांचभोजयेच्चाप्युदङ्मुखान्॥ पृथक्तयोःकेचिदाहुःश्राद्धस्यकरणंनृप॥ एकत्रैकेनपाकेनवदंत्यन्येमह

राम
७८

च ॥ वैशाखमासस्य तु या तृतीया नवम्यसौ कार्त्तिकशुक्लपक्षे ॥ नभस्यमासस्य तु कृष्णपक्षे त्रयोदशी पंचदशी च माघे ॥ एता युगाद्याः कथिताः पुराणे अनंतपु
ण्यास्तिथयश्चतस्रः ॥ उपप्लवे चंद्रमसो रवेश्च त्रिष्वष्टकास्वप्ययनद्वये पि ॥ चंद्रसूर्यग्रहमाघवृमासियत्रदिनत्रयष्टकाप्ययने द्वे च ॥ मन्वंतराद्यास्तिथयस्तथैव छ
ायागजस्य व्यतीपातकाले ॥ पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्यः ॥ श्राद्धं कृतं तेन समाः सहस्रं रहस्यमेतत्पितरो वदंति ॥ माघासिते पंच
दशी कदाचिदुपैति योगं किल वारुणेन ॥ ऋक्षेण कालः स परः पितॄणां न ह्यल्पपुण्यैर्नृप लभ्यते सौ ॥ काले धनिष्ठा यदि नाम तस्मिन् भवंति भूपाल तदा पितृ
भ्यः ॥ दत्तं जलान्नं प्रददाति तृप्तिं वर्षायुतं तत्कुलजैर्मनुष्यैः ॥ तत्रैव चेद्भाद्रपदास्तु पूर्वाः काले तदा यत्क्रियते पितृभ्यः ॥ श्राद्धं परां तृप्तिमुपैति तेन युगं
सहस्रं पितरः स्वपंति ॥ गंगां शतद्रूमथ यामुनां च विपाशां सरस्वतीं नैमिषगोमतीं वा ॥ तत्रावगाह्यार्चनमादरेण कृत्वा पितॄणां दुरितानि हंति ॥ गायंति
चैतत्पितरः सदैव वर्षामघातृप्तिमवाप्य भूयः ॥ माघासितांते शुभतीर्थतोयैर्यास्याम तृप्तिं तनयादिदत्तैः ॥ चित्तं च वित्तं च नृणां विशुद्धं शस्तश्च कालः
कथितो विधिश्च ॥ पात्रं यथोक्तं परमा च भक्तिर्नृणां प्रयच्छंत्यभिवांछितानि ॥ पितृगीतांस्तथैवात्र श्लोकांस्तांश्छृणु पार्थिव ॥ श्रुत्वा तथैव भवता भाव्यं त
त्रादृतात्मना ॥ अपि धन्यः कुले जायादस्माकं मतिमान्नरः ॥ अकुर्वन्वित्तशाठ्यं यः पिंडान्नो निर्वपिष्यति ॥ रत्नं वस्त्रं महायानं सर्वभोगादिकं वसु
॥ विभवे सति विप्रेभ्यो योस्मानुद्दिश्य दास्यति ॥ अन्नेन वा यथाशक्त्या कालेस्मिन्भक्तिनम्रधीः ॥ भोजयिष्यति विप्राग्र्यांस्तन्मात्रविभवो नरः ॥ असमर्थो
न्नदानस्य धान्यमामं स्वशक्तितः ॥ प्रदास्यति द्विजाग्र्येभ्यः स्वल्पाल्पां वापि दक्षिणां ॥ तत्राप्यसामर्थ्ययुतः कराग्राग्रस्थितांस्तिलान् ॥ प्रणम्य द्विजमुख्या
य कस्मैचिद्भूप दास्यति ॥ तिलैः सप्ताष्टभिर्वापि समवेतं जलांजलीन् ॥ भक्तिनम्रः समुद्दिश्य भुव्यस्माकं प्रदास्यति ॥ यतः कुतश्चित्संप्राप्य गोभ्यो
वापि गवाह्निकं ॥ अभावे प्रीणयन्नस्माञ्छ्रद्धायुक्तः प्रदास्यति ॥ सर्वाभावे वनं गत्वा कक्षामूलप्रदर्शकः ॥ सूर्यादिलोकपालानामिदमुच्चैः प्र

वि०पु०
७९

79

गंधाद्यैः सुसमाहितः॥ पितृतीर्थेन सतिलं दद्याच्च सलिलांजलिं॥ मातामहेभ्यस्तेनैव पिंडांस्तीर्थेन निर्वपेत्॥ दक्षिणाग्रेषु दर्भेषु पुष्प
धूपेन॥ तेषु काशेषु रोपेषु अलतीषुच्चेव हि॥ दक्षिणाग्रेषु दर्भेषु पुष्पधूपादिपूजितं॥ स्वपित्रे प्रथमं पिंडं दद्यादुच्छिष्टसंनिधौ॥ पित
महाय चैवान्यं तत्पित्रे च तथा परं॥ दर्भमूले लेपभुजः प्रीणयेल्लेपघर्षणैः॥ पिंडैर्मातामहांस्तद्वद्गंधमाल्यादिसंयुतैः॥ पूजयित्वा द्वि
जाग्र्याणां दद्याच्चाचमनं ततः॥ पितृभ्यः प्रथमं भक्त्या तन्मनस्को नरेश्वर॥ सुस्वधेत्याशिषा युक्तां दद्याच्छक्त्या च दक्षिणां॥ दत्वा च दक्षि
णां तेभ्यो वाचयेद्वैश्वदेविकान्॥ प्रीयंतामिति ये विश्वेदेवास्तेषु तथेरयेत्॥ तथेति चोक्ते तैर्विप्रैः प्रार्थनीयास्तथाशिषः॥ पश्चाद्वि
सर्जयेद्देवान्पूर्वं पित्र्यान्महामते॥ मातामहानामप्येवं सह देवैः क्रमः स्मृतः॥ भोजने च स्वशक्त्या च दाने तद्वद्विसर्जने॥ आपादशौ
चनात्पूर्वं कुर्याद्देवद्विजन्मसु॥ विसर्जनं तु प्रथमं पितृमातामहेषु ते॥ विसर्जयेत्प्रीतिवचःसन्मानाभ्यर्चितांस्ततः॥ निवर्त्तेताभ्यनुज्ञा
तः श्राद्धांते तामनुव्रजन्॥ ततस्तु वैश्वदेवाख्यां कुर्यान्नित्यक्रियां बुधः॥ भुंजीयाच्च समं पूज्यभृत्यबंधुभिरात्मनः॥ एवं श्राद्धं बुधः कु
र्यात्पैत्रं मातामहं तथा॥ श्राद्धैराप्यायिता दद्युः सर्वकामान्पितामहाः॥ त्रीणि श्राद्धे पवित्राणि दौहित्रं कुतपस्तिलाः॥ रजतस्य तथा दा
नं कथासंदर्शनादिकं॥ वर्ज्यानि कुर्वता श्राद्धं कोपोध्वगमनं त्वरा॥ भोक्तुरप्यत्र राजेंद्र त्रयमेतन्न शस्यते॥ विश्वेदेवाः सपितरस्तथा माता
महा नृप॥ कुलं चाप्यायते पुंसां सर्वं श्राद्धं प्रकल्पतां॥ सोमाधारः पितृगणो योगाधारश्च चंद्रमाः॥ श्राद्धे योगिनियोगस्तु तस्माद्भूपाल
शस्यते॥ सहस्रस्यापि विप्राणां योगी चेत्पुरतः स्थितः॥ सर्वान्भोक्तॄंस्तारयति यजमानं तथा नृप॥ इति श्री विष्णुपुराणे तृतीयेंशे पंचद
शोध्यायः॥ और्व उवाच॥ हविष्यमत्स्यमांसैस्तु शशस्य नकुलस्य च॥ सौकरच्छागलैणेयरौरवैर्गवयेन च॥ औरभ्रगव्यैश्च तथा मास

ता

एम

७९

र्यः॥ विष्टरार्थं कुशान् दत्वा संपूज्यार्घ्यविधानतः॥ कुर्यादावाहनं प्राज्ञो देवानां तदनुज्ञया॥ यवांबुना च देवानां दद्यादर्घ्यं विधानवित्॥ स्रग्गंधधूपदी
पांश्च दत्वा तेभ्यो यथाविधि॥ पितॄणामपसव्यं च सर्वमेवोपकल्पयेत्॥ अनुज्ञां च ततः प्राप्य दत्वा दर्भान् द्विधाकृतान्॥ मंत्रपूर्वं पितॄणां तु कुर्या
दावाहनं बुधः॥ तिलांबुना चापसव्यं दद्यादर्घ्यादिकं नृप॥ काले तत्रातिथिं प्राप्तं मंत्रकामं नृपाध्वगं॥ ब्राह्मणैरभ्यनुज्ञातः कामं तमपि भोजयेत्॥
योगिनो विविधै रूपैर्नराणामुपकारिणः॥ भ्रमंति पृथिवीमेतामविज्ञातस्वरूपिणः॥ तस्मादभ्यर्चयेत्प्राप्तं श्राद्धकालेऽतिथिं बुधः॥ श्राद्धक्रि
याफलं हंति नरेंद्रापूजितोऽतिथिः॥ जुहुयाद्व्यंजनक्षारवर्जमन्नं ततोऽनले॥ अनुज्ञातो द्विजैस्तैस्तु त्रिः कृत्वा पुरुषर्षभ॥ अग्नये कव्यवाहनाय
स्वाहेत्यादौ नृपाहुतिः॥ सोमाय पितृमते दातव्या तदनंतरं॥ वैवस्वताय चैवान्या तृतीया दीयते ततः॥ हुतावशिष्टमल्पाल्पं विप्रपात्रेषु
निर्वपेत्॥ ततोऽन्नं मृष्टमत्यर्थमभीष्टमतिसंस्कृतं॥ दत्वा जुषध्वमिच्छातो वाच्यमेतदनिष्ठुरं॥ भोक्तव्यं तैश्च तच्चित्तैर्मौनिभिः सुमुखैः सुखं॥ अ
क्रुध्यता चात्वरता देयं तेनापि भक्तितः॥ रक्षोघ्नमंत्रपठनं भूमेरास्तरणं तिलैः॥ कृत्वा ध्येयाः स्वपितरस्त एव द्विजसत्तमाः॥ पिता पितामहश्चैव त
थैव प्रपितामहः॥ मम तृप्तिं प्रयांत्वद्य विप्रदेहेषु संस्थिताः॥ पिता पितामहश्चैव तथैव प्रपितामहः॥ मम तृप्तिं प्रयांत्वग्निहोमाप्यायितमूर्त
यः॥ पिता पितामहश्चैव तथैव प्रपितामहः॥ तृप्तिं प्रयांतु पिंडेन मया दत्तेन भूतले॥ पिता पितामहश्चैव तथैव प्रपितामहः॥ तृप्तिं प्रयांतु मे भ
क्त्या यन्मयैतदुदाहृतं॥ मातामहस्तृप्तिमुपैतु तस्य तथा पिता तस्य पिता तु योऽन्यः॥ विश्वे च देवाः परमां प्रयांतु तृप्तिं प्रणश्यंतु च यातुधानाः॥
यज्ञेश्वरो हव्यसमस्तकव्यभोक्ताव्ययात्मा हरिरीश्वरोऽत्र॥ तत्संनिधानादपयांतु सद्यो रक्षांस्यशेषाण्यसुराश्च सर्वे॥ तृप्तेषु तेषु
विकिरेदन्नं विप्रेषु भूतले॥ दद्याच्चाचमनार्थाय तेभ्यो वारि सकृत्सकृत्॥ सुतृप्तैस्तैरनुज्ञातः सर्वेणान्नेन भूतले॥ सतिलेन ततः पिंडान् सम्य

विष्णु॰ ८०

नं॥ मैत्रेयउवाच॥ खंडापकिंठअमुख्याविदिताभगवन्मया॥ उदकमात्राश्रुते सर्वे नग्नमिच्छामि वेदितुं॥ कोनग्नः किं समाचारो नग्नसंज्ञां न
रो भवेत्॥ नग्नस्वरूपमिच्छामि यथावत्कथितं मया॥ पराशरउवाच॥ ऋग्यजुःसामसंज्ञेयं त्रयी वर्णावृतिर्द्विज॥ एतामुज्झति यो मोहात्स
नग्नः पातकी स्मृतः॥ त्रयी समस्तवर्णानां द्विज संवरणं यतः॥ नग्नो भवत्युज्झितायामतस्तस्यामसंशयं॥ इदं च श्रूयतामन्यद्भीष्माय
सुमहात्मने॥ कथयामास धर्मज्ञो वशिष्ठोस्मत्पितामहः॥ मयापि तस्य गदतः श्रुतमेतन्महात्मनः॥ नग्नसंबंधि मैत्रेय यत्पृ-
ष्टोहमिह त्वया॥ देवासुरमभूद्युद्धं दिव्यमब्दशतं पुरा॥ तस्मिन्पराजिता देवा दैत्यैर्ह्रादपुरोगमैः॥ क्षीरोदस्योत्तरं कूलं गत्वातप्यंत वै त-
पः॥ विष्णोराराधनार्थाय जगुश्चेमं स्तवं तदा॥ देवाऊचुः॥ आराधनाय लोकानां विष्णोरीशस्य यां गिरं॥ वक्ष्यामो भगवानाद्यस्तया वि-
ष्णुः प्रसीदतु॥ यतो भूतान्यशेषाणि प्रसूतानि महात्मनः॥ यस्मिंश्च लयमेष्यंति कस्तं संस्तोतुमीश्वरः॥ तथाप्यरातिविध्वंसध्वस्तवी-
र्या भयार्थिनः॥ त्वां स्तोष्यामस्तवोक्तीनां याथार्थ्यं नैव गोचरे॥ त्वमुर्वी सलिलं वह्निर्वायुराकाशमेव च॥ समस्तमंतःकरणं तत्परः
परमः पुमान्॥ एकं तवैतद्भूतात्मन्मूर्तामूर्तमयं वपुः॥ आब्रह्मस्तंबपर्यंतं स्थानकालविभेदवत्॥ तत्रेश तव यत्पूर्वं त्वन्नाभिक-
मलोद्भवं॥ रूपं सर्गोपकाराय तस्मै ब्रह्मात्मने नमः॥ शक्रार्करुद्रवस्वश्विमरुत्सोमादिभेदवत्॥ वयमेकं स्वरूपं ते तस्मै देवात्मने न-
मः॥ दंभप्रायमसंबोधि तितिक्षादमवर्जितं॥ यद्रूपं तव गोविंद तस्मै दैत्यात्मने नमः॥ नातिज्ञानवहा यस्मिन्नाड्यः स्तिमिततेजसि॥
शब्दादिलोभि यत्तस्मै तुभ्यं यक्षात्मने नमः॥ क्रौर्यमायामयं घोरं यच्च रूपं तवासितं॥ निशाचरात्मने तस्मै नमस्ते पुरुषोत्तम॥ स्वर्ग-
स्थधर्मिसद्धर्मफलोपकरणं तव॥ धर्माख्यं च तथा रूपं नमस्तस्मै जनार्दन॥ हर्षप्रायमसंसर्गि गतिमद्गमनादिषु॥ सिद्धाख्यं त

म 88 ग

राम ८०

ऽर्व्या पितामहाः ॥ प्रयांति तृप्तिं मांसैश्च नित्यं वार्ध्रीणसामिषैः ॥ खड्गमांसमतीवात्र कालशाकं तथा मधु शस्तानि च ----- तदानि नरेश्वर
गयामुपेत्य यः श्राद्धं करोति पृथिवीपते ॥ सफलं तस्य तज्जन्म जायते पितृतुष्टिदं ॥ प्रशांतिकाः सनीवाराः श्यामाका द्विविधास्तथा ॥ वन्यौषधी
प्रधानास्तु श्राद्धार्हाः पुरुषर्षभ ॥ यवाः प्रियंगवो मुद्गा गोधूमा व्रीहयस्तिलाः ॥ निःष्पावाः कोविदाराश्च सर्षपाश्चात्र शोभनाः ॥ अकृताग्रयणं
यच्च धान्यजातं नरेश्वर ॥ राजमाषानणूंश्चैव मसूरांश्च विवर्जयेत् ॥ अलाबुं गृंजनं चैव पलांडुं पिंडमूलकं गंधारककरंभानि लवणान्यौषराणि च ॥
आरक्तांश्चैव निर्यासास्प्रत्यक्ष ----- वर्ज्यान्येतानि वै श्राद्धे यच्च वाचा न शस्यते ॥ नक्ताहृतमनुच्छिन्नं तृप्यते न च यत्र गौः ॥ दुर्गंधिफेनिलं
चांबु श्राद्धयोग्यं न पार्थिव ॥ क्षीरमेकशफानां च यदौष्ट्रमाविकमेव च ॥ मार्गं च माहिषं चैव वर्जयेच्छ्राद्धकर्मणि ॥ षंडापविद्धचंडालपापिपाषंडि
रोगिभिः ॥ कृकवाकुश्वनग्नैश्च वानरग्रामसूकरैः ॥ उदक्यासूतिकाशौचिमृतहारैश्च वीक्षिते ॥ श्राद्धे सुरा न पितरो भुंजते पुरुषर्षभ ॥ त
स्मात्परिश्रिते कुर्याच्छ्राद्धं श्रद्धासमन्वितः ॥ उर्व्यां तिलविक्षेपाद्यातुधानान्निवारयेत् ॥ नखादि चैव न पूतं केशकीटादिभिर्नृप ॥ न चैवाभिष
वैर्मिश्रमन्नं पर्युषितं तथा ॥ श्रद्धासमन्वितैर्दत्तं पितृभ्यो नामगोत्रतः ॥ यदाहारास्तु ते जातास्तदाहारत्वमेति तत् ॥ तस्मात् श्रूयते चापि पितृभिर्गीता
गाथा महीपते ॥ इक्ष्वाकोर्मनुपुत्रस्य कलापोपवने पुरा ॥ अपि नस्ते भविष्यंति कुले सन्मार्गशीलिनः ॥ गयामुपेत्य ये पिंडान् दास्यंत्यस्माकमाद
रात् ॥ अपि नः स कुले जायाद्यो नो दद्यात्त्रयोदशीं ॥ पायसं मधुसर्पिर्भ्यां वर्षासु च मघासु च ॥ गौरीं वाप्युद्वहेत्कन्यां नीलं वा वृषमुत्सृजेत् ॥
यजेत वाश्वमेधेन विधिवद्दक्षिणावता ॥ इति श्रीविष्णुपुराणे तृतीयेंऽशे षोडशोऽध्यायः ॥ पराशर उवाच ॥ इत्याह भगवानौर्वः सगराय महा
त्मने ॥ सदाचारान्पुरा सम्यङ् मैत्रेय परिपृच्छते ॥ मयाप्येतदशेषेण कथितं भवतो द्विज ॥ समुल्लंघ्य सदाचारं कश्चिन्नाप्नोति शोभ

धि कारस्सदेवैर्दैत्यादिकाः सुराः॥ तदहं छत्तनभीः कार्य्यामायामोहेप्यमयत॥ गच्छन्नशेषपकारायभवतांभवितासुराः॥ पराशरउवाच॥ ३
स्तुक्ताः प्रणिपत्यैनं ययुर्देवायथागतं॥ मायामोहोपितैः सार्द्धं ययौ यत्र महासुराः॥ इतिश्रीविष्णुपुराणेतृतीयेंशे मायामोहोत्पत्तिर्नाम सप्त
दशोध्यायः॥ पराशरउवाच॥ तपस्यभिरतान्सोथ मायामोहो महासुरान्॥ मैत्रेय ददृशे गत्वा नर्मदातीरसंश्रयान्॥ ततोदिगंबरो मुंडो
बर्हिपत्रधरो द्विज॥ मायामोहो सुरान्श्लक्ष्णमिदं वचनमब्रवीत्॥ भो दैत्यपतयो ब्रूत यदर्थं तप्यते तपः॥ ऐहिकार्थं तु पारत्र्यं तपसः फ
लमिच्छथ॥ असुरा ऊचुः॥ पारत्र्यफललाभाय तपश्चर्या महामते॥ अस्माभिरियमारब्धा किंच तेत्र विवक्षितं॥ मायामोहोवाच॥
कुरुध्वं मम वाक्यानि यदि मुक्तिमभीप्सथ॥ अर्हध्वं धर्ममेतं च मुक्तिद्वारमसंवृतं॥ धर्मो विमुक्तेरर्होयं नैतस्मादपरः परः॥ अत्रैव संस्थि
ताः स्वर्गं विमुक्तिं वा गमिष्यथ॥ अर्हध्वं धर्ममेतं च सर्वे यूयं महाबलाः॥ पराशरउवाच॥ एवंप्रकारैर्बहुभिर्युक्तिदर्शनवर्जितैः॥
मायामोहेन ते दैत्या वेदमार्गादपाकृताः॥ धर्मायैतदधर्माय सदेतन्न सदित्यपि॥ विमुक्तये त्विदं नैतद्विमुक्तिं संप्रयच्छति॥ परमार्थो
यमत्यर्थं परमार्थो न चाप्ययं॥ कार्यमेतदकार्यं च नैतदेवं स्फुटं त्विदं॥ दिग्वाससामयं धर्मो धर्मोयं बहुवाससां॥ इत्यनेकान्तवादं च माया
मोहेन नैकधा॥ तेन दर्शयता दैत्याः स्वधर्मं त्याजिता द्विज॥ अर्हतैतं महाधर्मं मायामोहेन ते यतः॥ प्रोक्तास्तमाश्रिता धर्ममार्हतास्तेन
तेभवन्॥ त्रयीधर्मसमुत्सर्गं मायामोहेन तेसुराः॥ कारितास्तन्मया ह्यासंस्तथान्ये तत्प्रबोधिताः॥ तैरप्यन्ये परेतैश्च तैरप्यन्ये परे च तैः॥ अल्पै
रहोभिः संत्यक्ता तैर्दैत्यैः प्रायशस्त्रयी॥ पुनश्च रक्तांबरधृङ्मायामोहोजितेक्षणः॥ अन्यानाहासुरान्गत्वा मृद्वल्पमधुराक्षरं॥ माया
मोह उवाच॥ स्वर्गार्थं यदि वो वांछा निर्वाणार्थमथासुराः॥ तदलं पशुघातादिदुष्टधर्मैर्निबोधत॥ विज्ञानमयमेवैतदशेषमवगछ

वद्रूपं पतस्मै स्वधात्मने नमः॥ तृप्तिनिःसाधनं नृणां सुखोपभोगग्रहहेरो॥ हि जिह्वं तदयद्रूपं तस्मै सर्वात्मने नमः॥ अदेवो मितुष श्रांतमसो
मपकल्मषं॥ ऋषिरूपात्मने तस्मै विष्णो रूपाय ते नमः॥ भक्ष्यं यस्य कल्पांते भूतानि यदवारितं॥ तद्रूपं पुंडरीकाक्ष तस्मै कालात्मने न
मः॥ संभक्ष्य सर्वभूतानि देवादीन्यविशेषतः॥ नृत्यत्यंते च यद्रूपं तस्मै रुद्रात्मने नमः॥ प्रवृत्त्या रजसो यच्च कर्मणां कारणात्मकं॥ जनार्द
न नमस्तस्मै यद्रूपाय नरात्मने॥ अष्टाविंशद्वधोपेतं यद्रूपं तामसं भव॥ उन्मार्गगामि सर्वात्मंस्तस्मै पश्वात्मने नमः॥ प्रधानबुद्ध्यादिमयाद न
शेषाद्यदन्यदस्मात्परमं परात्मन्॥ रूपं तवाद्यं न यदस्ति तुल्यं तस्मै नमः कारणकारणाय॥ शुक्लादिदीर्घादिघनादिहीनमगोचरं यच्च
विशेषणानां॥ शुद्धातिशुद्धं परमर्षिदृश्यं रूपाय तस्मै भगवन्नताः स्म॥ यन्नः शरीरेषु यदन्यदेहेष्वशेषवस्तुष्वजमव्ययं यत्॥ तस्मा
च्चान्यद्व्यतिरिक्तमस्ति ब्रह्मस्वरूपाय नताः स्म तस्मै॥ सकलमिदमजस्य यस्य रूपं परमपदात्मवतः सनातनस्य॥ तमनिधनम
शेषबीजभूतं प्रभुममलं प्रणताः स्म वासुदेवं॥ पराशर उवाच॥ स्तोत्रस्यास्यावसाने तु ददृशुः परमेश्वरं॥ शंखचक्रगदापाणिं गरुडस्थं सु
राः हरिं॥ तमूचुः सकला देवाः प्रणिपातपुरःसरं॥ प्रसीद देव दैत्येभ्यस्त्राहीति शरणार्थिनः॥ त्रैलोक्ययज्ञभागाश्च दैत्यैर्ह्रादपुरोगमैः॥ हृता
नो ब्रह्मणोऽप्याज्ञामुल्लंघ्य परमेश्वर॥ यद्यप्यशेषभूतस्य वयं ते च तवांशकाः॥ तथाप्यविद्याभेदेन भिन्नं पश्यामहे जगत्॥ स्ववर्णधर्माभिरता
वेदमार्गानुसारिणः॥ न शक्यास्तेऽरयो हंतुमस्माभिस्तपसावृताः॥ तमुपायमशेषात्मन्नस्माकं दातुमर्हसि॥ येन तानसुरान्हंतुं भवेम भगवन्
क्षमाः॥ पराशर उवाच॥ इत्युक्तो भगवांस्तेभ्यो मायामोहं शरीरतः॥ समुत्पाद्य ददौ विष्णुः प्राह चेदं सुरोत्तमान्॥ श्रीभगवानुवाच॥ मायामो
होऽयमखिलान्दैत्यांस्तान्मोहयिष्यति॥ ततो वध्या भविष्यंति वेदमार्गबहिष्कृताः॥ स्थितौ स्थितस्य मे वध्या यावंतः परिपंथिनः॥ ब्रह्मणो ये

ध्वं
हे

वि०पु०
८२
82

कथितो मैत्रेय नग्ना नवः ॥ संवत्सरं क्रियाहानिर्यस्य पुंसोभिजायते । तस्यावलोकनात्सूर्यो निरीक्ष्यः साधुभिः सदा ॥ स्पृष्टे स्नानं सचैलस्य
शुद्धेर्हेतुर्महामुने । पुंसो भवन्ति तस्योक्ता न शुद्धिः पापकर्मणः ॥ देवर्षिपितृभूतानि यस्य निःश्वस्य वेश्मनि । प्रयान्त्यनर्चितान्य
त्र नातः पापतरः परः ॥ देवादिनिःश्वासहतं शरीरं यस्य वेश्म च । न तेन संकरं कुर्याद्गृहासनपरिच्छदैः ॥ संभाषणानुप्रश्नादि
सहास्यं चैव कुर्वतः । जायते तुल्यता पुंसस्तेनैव द्विज वत्सरं ॥ अथ यो भुंक्ते गृहे तस्य करोत्यास्यां तथासने । शेते चाप्येकशयने स
स घ्राणतस्समो भवेत् ॥ देवतापितृभूतानि तथानभ्यर्च्य योतिथीन् । भुंक्ते स पातकं भुंक्ते निःकृतिस्तस्य कीदृशी ॥ ब्राह्मणाद्याः
अन्ये वर्णाः स्वधर्माद्न्यतोमुखं । यान्ति ते नग्नसंज्ञास्तु हीनकर्मस्ववस्थिताः ॥ चतुर्णां यत्र वर्णानां मैत्रेयात्यंतसंकरः । तत्रास्था
साधुवृत्तीनामुपघाताय जायते ॥ अनभ्यर्च्य ऋषीन्देवान्पितृभूतातिथींस्तथा । यो भुंक्ते तस्य संभाषात्पतंति नरके नराः ॥ तस्माद्दे
तान्नरो नग्नान् त्रयीसंत्यागदूषितान् । सर्वदा वर्जयेत्प्राज्ञ आलापस्पर्शनादिषु ॥ श्रद्धावद्भिः कृतं यत्नाद्देवान्पितृपितामहा
न् । न प्रीणयति तच्छ्राद्धं यद्येभिरवलोकितं ॥ श्रूयते च पुरा ख्यातो राजा शतधनुर्भुवि । पत्नी च शैब्या तस्याभूदतिधर्मपरायणा
पतिव्रता महाभागा सत्यशौचदयान्विता । सर्वलक्षणसंपन्ना विनयेन नयेन च ॥ स तु राजा तया सार्द्धं देवदेवं जनार्दनं । आरा
धयामास विभुं परमेण समाधिना ॥ होमैर्जपैस्तथा दानैरुपवासैश्च भक्तितः । पूजाभिश्चानुदिवसं तन्मना नान्यमानसः ॥ एकदा तु स
मं स्नातौ तौ तु भार्यापती जले । भागीरथ्याः समुत्तीर्णौ कार्त्तिक्यां समुपोषितौ ॥ पाषंडिनमपश्यतामायान्तं सन्मुखं द्विज । मायाचा
र्य्यस्य तस्यासौ सखा राज्ञो महात्मनः ॥ अतस्तद्गौरवात्तेन सखाभावमथाकरोत् । न तु सा वाग्यता देवी तस्य पत्नी पतिव्रता । उपोषिता-

हा ना

राम
८२

ता॥ बुध्यध्वं मे वचः सम्यग्बुध्यैर्वमुदीरितं॥ जगदेतदनाधारं भ्रांतिज्ञानार्थतत्परं॥ रागादिदुष्टमत्यर्थं भ्राम्यते भवसंकटे॥ पराशर उवाच॥ ए
वं बुध्यत बुध्यध्वं बुध्यतैवमुदीरयन्॥ मायामोहः स दैतेयान्धर्ममत्याजयन्निजान्॥ नानाप्रकारं वचनं तेषां युक्तियोजितं॥ तथा तथावद्ध
र्मं वेदस्तत्यजुर्द्विजपुंगव॥ अन्यानप्यन्यपाषंडप्रकारैर्बहुभिर्द्विज॥ दैतेयान्मोहयामास मायामोहोतिमोहकृत्॥ स्वल्पेनैव हि कालेन मायामोहे
न ते सुराः॥ मोहितास्तत्यजुः सर्वां त्रयीमार्गाश्रितां कथां॥ केचिद्विनिंदां वेदानां देवानामपरे द्विज॥ यज्ञकर्मकलापस्य तथान्ये च द्विजन्मनां॥
नैतद्युक्तिसहं वाक्यं हिंसा धर्माय चेष्यते॥ हवींष्यनलदग्धानि फलायेत्यर्भकोदितं॥ यज्ञैरनेकैर्देवत्वमवाप्येंद्रेण भुज्यते॥ शम्यादि यदि
चेत्काष्ठं तद्वरं पत्रभुक्पशुः॥ निहतस्य पशोर्यज्ञे स्वर्गप्राप्तिर्यदीष्यते॥ स्वपिता यजमानेन किन्नु तस्मान्न हन्यते॥ तृप्तये जायते पुंसो
भुक्तमन्येन चेत्ततः॥ कुर्याच्छ्राद्धं श्रमायान्नं न वहेयुः प्रवासिनः॥ जनश्रद्धेयमित्येतदवगम्य ततोत्र वः॥ उपेक्षा श्रेयसे वाक्यं रोचतां यन्म
येरितं॥ न ह्याप्तवादा नभसो निपतंति महासुराः॥ युक्तिमद्वचनं ग्राह्यं मयान्यैश्च भवद्विधैः॥ मायामोहेन ते दैत्याः प्रकारैर्बहुभिस्तथा॥ व्युत्था
पिता यथा नैषां त्रयीं कश्चिदरोचयत्॥ इत्थमुन्मार्गयातेषु तेषु दैत्येषु तेसुराः॥ उद्योगं परमं कृत्वा युद्धाय समुपस्थिताः॥ ततो देवासुरं यु
द्धं पुनरेवाभवद्द्विज॥ हताश्च तेसुरा देवैः सन्मार्गपरिपंथिनः॥ स्वधर्मकवचं तेषामभूद्यः प्रथमं द्विज॥ तेन रक्षाभवत्पूर्वं नेशुर्नष्टे च तत्र
ते॥ ततो मैत्रेय तन्मार्गवर्तिनो येभवञ्जनाः॥ नग्नास्ते तैर्यतस्त्यक्तं त्रयीसंवरणं वृथा॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थस्तथाश्रमाः॥ परि
व्राड् चतुर्थोत्र पंचमो नोपपद्यते॥ यस्तु संत्यज्य गार्हस्थ्यं वानप्रस्थो न जायते॥ परिव्राडपि मैत्रेय स नग्नः पापकृन्नरः॥ नित्यानां कर्म
णां विप्र तस्य हानिरहर्निशं॥ अकुर्वन्विहितं कर्म शक्तः पतति तद्दिने॥ प्रायश्चित्तेन महता शुद्धिमाप्नोत्यनापदि॥ पक्षं नित्यक्रियाहानेः

वि॰पु॰
८८

नयदा समक सोला मागध्रतां गतः॥ अथापसा पुनस्सैवं बोधयामास भामिनी॥ नरेंद्र स्मर्यतामात्मा ह्यलं ते श्वचेष्टया॥ पाषंडाला
पजातो यं सो वो यद्ध्रतां गतः॥ ततः काकत्वमापन्नः समनंतरजन्मनि॥ उवाच तन्वी भर्तारमुपलभ्य तयोगतं॥ त्वरोवाम्भ फः पू
र्वंवषपायसेव लिंदद्॥ सा त्वं काकत्वमापन्नो जातो भवति भुक्प्रभो॥ एवमेव वृकाकत्वे स्मारितः स पुराजनं॥ ततस्स जभूस पातेः प्रा
णान्मयूरत्वमवापस॥ मयूरत्वे ततः सा वै चकारानुगतं शुभा॥ हयैः भद्रविर्गौ ह्यधे वा खाततत्ज्ञातिभोजनैः॥ ततस्तु जनको राजावा
जिमेधं महाक्रतुं॥ चकार तस्यावभृथे स्नापयामास तं तदा॥ स स्नातस्स्वयं चतन्वं गी स्मारयामास चापितं॥ यथास्मै श्वश्रृगाला यो
निर्जग्राह पार्थिवः॥ स्मृतजन्मक्रमः सोथ तत्याज स्वकलेवरं॥ जज्ञे च जनकस्यैव पुत्रोसौ सुमहात्मनः॥ ततस्सा पितरं तन्वी विवाहार्थं
मचोदयत्॥ सचापि कारयामास तस्याः स्वयंवरं॥ स्वयंवरे कृते सा तं संप्राप्तं पतिमात्मनः॥ वरयामास भूयोपि भर्तृभावेन भामिनी॥
बुभुजे च तया सार्द्धं संभोगान्नृपनंदनः॥ पितर्युपरते राज्यं वैदेहेषु चकार सः॥ इयाज यज्ञांश्च बहून्ददौ दानानि चार्थिनां॥ पुत्रानुत्पादया
मास युयुधे च महारिभिः॥ राज्यं भुक्त्वा यथान्यायं पालयित्वा वसुंधरां॥ तत्याज स प्रियान्प्राणान्संग्रामे धर्मतो नृपः॥ ततश्चितास्थितं
भूयो भर्तारं सा शुभेक्षणा॥ अन्वारुरोह विधिवद्यथापूर्वं मुदा सती॥ ततोवाप तया सार्द्धं राजपुत्र्या स पार्थिवः॥ ऐंद्रानतीत्य वै लोका
न्लोकान्कामदुहो ह्ययान्॥ स्वर्गाक्षयत्वमतुलं दांपत्यमतिदुर्लभं॥ प्राप्तं पुण्यफलं प्राप्य संशुद्धिं तां द्विजोत्तम॥ एष पाषंडसंभाष
दोषः प्रोक्तो मया द्विज॥ तथाश्वमेधावभृथस्नानमाहात्म्यमेव च॥ तस्मात्पाषंडिभिः पापैरालापस्पर्शनं त्यजेत्॥ विशेषतः क्रियाका
ले यज्ञादौ चापि दीक्षितः॥ क्रियाहानिर्गृहे यस्य मासमेकं प्रजायते॥ तस्यावलोकनात्सूर्यं पश्येत मतिमान्नरः॥ किं पुनर्यैस्तु सं

४३

राम
८८

न्याद् २

सा नीरविता स्मिंदृष्टे ददर्श च॥ समागम्य यथान्यायं दंपती तौ यथाविधि॥ दिसोः पूजास्किं सर्वं कृतवंतौ द्विजोत्तम॥ कालेन गच्छता राजा ममारा-
रासौ सपत्नजित्॥ अन्वारुरोह तं देवी चितास्थं भूपतिं पतिं॥ स तु तेनापचारेण श्वा जज्ञे वसुधाधिपः॥ उपोषितेन पाषंडसंभाषो यः कृतो
ऽभवत्॥ सापि जातिस्मरा जज्ञे काशिराजसुता शुभा॥ सर्वविज्ञानसंपन्ना सर्वलक्षणपूजिता॥ तां पिता दातुकामोभूद्वराय विनिवारि- च
तः॥ तयैव तन्व्या विरतो विवाहारंभतो नृपः॥ ततः सा दिव्यया दृष्ट्या दृष्ट्वा श्वानं निजं पतिं॥ विदिशाख्यं पुरं गत्वा तदवस्थं ददर्श तं॥
तं दृष्ट्वैव महाभागं श्वभूतं पतिं तदा॥ ददौ तस्मै वराहारं सत्कारप्रवणं शुभं॥ भुंक्ते दत्तं तया सोन्नमतिमिष्टमभीप्सितं॥ स्वजा-
तिललितं कुर्वन्बहु चाटु चकार वै॥ अतीव व्रीडिता बाला कुर्वता चाटु तेन सा॥ प्रणाम पूर्वमाहेदं दयितं तं कुयोनिजं॥ संस्मर्यतां तन्म-
हाराज दाक्षिण्यललितं त्वया॥ येन श्वयोनिमापन्नो मम चाटुकरो भवान्॥ पाषंडिनं समाभाष्य तीर्थस्नानादनंतरं॥ प्राप्तोसि कु-
त्सितां योनिं किं न स्मरसि तत्प्रभो॥ पराशर उवाच॥ तयैवं स्मारिते तस्मिन्पूर्वजातिकृते तदा॥ दध्यौ चिरमथावाप निर्वेदमतिदुर्ल-
भं॥ निर्विण्णचित्तः स ततो निर्गम्य नगरात्कृतं॥ मरुत्प्रपतनं कृत्वा शार्गालीं योनिमागतः॥ भर्तारमपि चार्वंगी तनया पृथिवीक्षितः॥
पत्न्युवाच॥ अपि स्मरसि राजेंद्र श्वयोनिस्थस्य यन्मया॥ प्रोक्तं ते पूर्वचरितं पाषंडालापसंश्रयं॥ पुनस्तयोक्तं स ज्ञात्वा सत्यं सत्-
यवतां वरः॥ कानने स निराहारस्तत्याज स्वकलेवरं॥ भूयस्ततो वृको जातस्तं गत्वा निर्जने वने॥ स्मारयामास भर्तारं पूर्ववृत्तमनिं-
दिता॥ न त्वं वृको महाभाग राजा शतधनुर्भवान्॥ श्वा भूत्वा त्वं शृगालोभूर्वृकत्वं सांप्रतं गतः॥ पराशर उवाच॥ स्मारिते

न

वि०पु०
२४

84

परमर्षिभिरिष्टिमयङ्गऋग्यजुर्म्मयः साममयो थर्वमयः ॥ सर्वमयेमनोपदेशोयोग्यानमयो न किंचिन्मयो भगवान्यज्ञपुरुषस्तत्प्र
सुद्युम्नस्य पुंस्त्वमभिलषद्भिरिष्ट्या वसिष्ठकात्प्रसादादिला पुनरपि सुद्युम्नोभवत् ॥ तस्याप्युत्कलगयविनतसंज्ञास्त्रयः पुत्रा बभूवुः ॥
सुद्युम्नस्त्वी पूर्वत्वाद्राज्यभागं न लेभे तत्पित्रा तु वशिष्ठवचनात्प्रतिष्ठानं नाम नगरं सुद्युम्नाय दत्तं ॥ तच्चासौ पुरूरवसे प्रादात् ॥ पृषध्र
स्तु मनोः पुत्रो गुरुगोवधाच्छूद्रत्वमगमत् ॥ करूषात्कारूषाः क्षत्रिया महाबला बभूवुः ॥ नाभागो नेदिष्टपुत्रस्तु वैश्यतामगमत्त
स्माद्भलंदनः पुत्रोभवत् ॥ भलंदनाद्वत्सप्रिरुदारकीर्त्तिर्वत्सप्रेः प्रांशुरभवत्प्रांजलिश्च प्रांशोरेकोभवत्ततश्च खनित्रस्तस्माच्चक्षुपः च
क्षुपाच्चातिबलपराक्रमोविंशोभवत् ॥ ततो विविंशस्तस्मात्खनीनेत्रः तस्माच्चातिविभूतिर्भूरिबलपराक्रमः करंधमः पुत्रोभवत्
तस्मादप्यविक्षिरविक्षिरप्यतिबलः पुत्रो मरुत्तोभवत् ॥ यस्येमावद्याप्यश्लोकौ गीयते ॥ मरुत्तस्य यथायज्ञस्तथा कस्याभवद्भुवि ॥ सर्वं हि
रण्मयं यस्य यज्ञवस्त्वतिशोभनं ॥ अमाद्यदिंद्रः सोमेन दक्षिणाभिर्द्विजातयः ॥ मरुतः परिवेष्टारः सदस्याश्च दिवौकसः ॥ स मरुत्तश्चक्र
वर्ती नरिष्यंतनामानं पुत्रमवाप ॥ तस्माच्च दमो दमस्य पुत्रो राज्यवर्द्धनो जज्ञे राज्यवर्द्धनात्सुधृतिर्भूत्ततश्च नरस्तस्माच्च केवलो धुं केव
लद्धुंधुमान्वेगवान्वेगवतो बुधस्तस्मात्तृणबिंदुः तस्याप्येका कन्या इलविला नाम ॥ तं चालंबुषा नाम वराप्सरास्तृणबिंदुं भेजे
तस्यामप्यविशालो जज्ञे यः पुरीं वैशालीं नाम निर्ममे ॥ हेमचंद्रश्च विशालस्य विशालस्य पुत्रोभवत ॥ तस्माच्च चंद्रस्तत्तनयो धूम्राश्व
तस्यापि संजयोभूत्सृंजयात्सहदेवस्ततः कृशाश्वो नाम पुत्रोभूत्सोमदत्तः कृशाश्वाज्जज्ञे यो श्वमेधानाजहार ॥ ततश्च जनमेजयात्
सुमतिरेते वैशालका भूभृतः ॥ श्लोकोप्यत्रगीयते तृणबिंदोः प्रसादेन सर्वे वैशालका नृपाः ॥ दीर्घायुषो महात्मानो वीर्यवंतोति

२

एम
२४

त्यक्तात्रयी सर्वात्मनो द्विज॥ पाखंडैस्तैरभिजितः पापैर्वेदवादिविरोधिभिः॥ पाखंडिनो विकर्म्मस्थान्वैडालव्रतिकान्शठान्॥ हैतुकान्बक
वृत्तींश्च वाङ्मात्रेणापि नार्चयेत्॥ दूरापास्तस्तु संपर्कः सहसास्तापि पापिभिः॥ पाखंडिभिर्दुराचारैस्तस्मात्तान्परिवर्जयेत्॥ एते नग्नास्त
वाख्याता दृष्ट्या श्राद्धोपघातकाः॥ येषां संभाषणात्पुंसो दिनपुण्यं प्रणश्यति॥ एते पाखंडिनः पापा न ह्येतानालपेद्बुधः॥ पुण्यं नश्यति सं
भाषादेतेषां तद्दिनोद्भवं॥ पुंसां जटाधरणमौंडवतां वृथैव मोघाशिनामखिलशौचनिराकृतानां॥ तोयप्रदानपितृपिंडबहिष्कृता-
नां संभाषणादपि नरा नरकं प्रयांति॥ इति श्रीविष्णुपुराणे तृतीयेंशे अष्टादशोध्यायः॥ मैत्रेय उवाच॥ भगवन्यन्नरैः कार्यं साधु
कर्म्मण्यवस्थितैः॥ तन्मह्यं गुरुणा ख्यातं नित्यनैमित्तिकात्मकं॥ वर्णधर्मास्तथाख्याता धर्मा ये चाश्रमेषु वै॥ श्रोतुमिच्छाम्यहं वंशं राज्ञां तं प्रब्रू
हि मे गुरो॥ पराशर उवाच॥ मैत्रेय श्रूयतामयमनेकयज्वशूरवीरधीरभूपालालंकृतो ब्रह्मादिर्मानवो वंशः॥ तथा चोच्यते ब्रह्माद्यं यो
मनोर्वंशमहन्यहनि स्मरेत्॥ तस्य वंशसमुच्छेदो न कदाचिद्भविष्यति॥ तदस्य वंशानुपूर्वीमशेषपापप्रक्षालनाय मैत्रेय तां शृणु तथ
था॥ सकलजगतामनादिरादिभूतऋग्यजुःसामादिमयो भगवद्विष्णुमयस्य ब्रह्मणो मूर्तं रूपं हिरण्यगर्भो ब्रह्मांडतो ब्रह्मांडतो भगवा
न्ब्रह्मा प्राग्बभूव॥ ब्रह्मणश्च दक्षिणांगुष्ठजन्मा दक्षः प्रजापतिर्दक्षस्याप्यदितिरदितेर्विवस्वान् विवस्वतो मनुर्मनोरिक्ष्वाकुनृग
धृष्टशर्यातिनरिष्यंतनाभागनेदिष्टकरूषपृषध्राख्या मनोः पुत्रा बभूवुः॥ इष्टिं च मित्रावरुणयोर्मनुः पुत्रकामश्चकार॥ तत्रापहु
ते होतुरपचारादिलानामकन्याभवत्॥ सैव च मित्रावरुणप्रसादात्सुद्युम्नो नाम मनोः पुत्रो मैत्रेयासीत्॥ पुनश्चेश्वरकोपात्स्त्री सती
सोमसूनोर्बुधस्याश्रमसमीपे बभ्राम॥ सानुरागश्च तस्यां बुधः पुरूरवसमात्मजमुत्पादयामास॥ जाते च तस्मिन्नमिततेजोभिः

रूद्रस्वरूपेण च योन्ति विश्वं धत्ते तथानंतवपुः समस्तं ॥ शक्रादिरूपी परिपाति विश्वमर्केन्दुरूपेण तमो निहंति ॥ पाकाग्नयोग्नित्वमुपैति
लोकान्बिभर्त्ति विश्वं वपुरप्रमाणं ॥ चेष्टां करोति श्वसनस्वरूपी लोकस्य तृप्तिं जलान्नरूपी ॥ ददाति विश्वस्थिति तत्स्थितस्तु सर्वावका
शंनभसः स्वरूपी ॥ यः सृज्यते सर्गकृदात्मनैव यः पाल्यते पालयिता तदेवः ॥ विश्वात्मनः संह्रियते तत्कारी प्रपंचक्रियया स्वयमव्ययात्मा ॥
यस्मिंजगद्यो जगदेतदाद्यो यस्याश्रितो स्मिंजगति स्वयंभूः ॥ स सर्वभूतप्रभवो धरित्र्याः स्वांशेन विष्णुर्नृपतेवतीर्णः ॥ कुशस्थली यात
वभूपरस्मा पुरी पुराभूदमरावती च ॥ सा द्वारकाद्य त्रिनित्र चास्ते स केशवांशो बलदेवनाम ॥ तस्मै त्वमेनां तनयां नरेंद्र प्रयच्छ मायाम
नुजाय जायां ॥ श्लाघ्यो वरोसौ तनयां तवेयं स्त्रीरत्नभूता सदृशो हि योगः ॥ पराशर उवाच ॥ इतीरितोसौ कमलोद्भवेन भुवं समासाद्य पतिः
प्रजानां ॥ ददर्श ह्रस्वान्पुरुषानशेषानल्पौजसः स्वल्पविवेकवीर्यान् ॥ कुशस्थलीं तां च पुरीमुपेत्य दृष्ट्वान्यरूपां प्रददौ स्वकन्यां ॥ सीरध्व
जाय स्फटिकाचलाभवक्षःस्थलायातुलधीर्नरेंद्रः ॥ उच्चप्रमाणामतितामवेक्ष्य स लांगलाग्रेण स तालकेतुः ॥ विनामयामास ततश्च सापि वभू
व सद्यो वनितायथान्या ॥ तां रेवतीं रैवतराजकन्यां सीरायुधोसौ विधिनोपयेमे ॥ दत्वाथ कन्यां स नृपो जगाम हिमालयं वै तपसे धृतात्मा ॥
॥ इति श्रीविष्णुपुराणे चतुर्थेंशे प्रथमोध्यायः ॥ पराशर उवाच ॥ यावच्च ब्रह्मलोकात्ककुद्मी रैवतो नाभ्येति तावत्पुण्यजन संज्ञा राक्षसा
स्तामस्य पुरीं कुशस्थलीं जघ्नुः तच्चास्य भ्रातृशतं पुण्यजनत्रासाद्दिशो भेजे ॥ तदन्वयाश्च क्षत्रियाः सर्वदिक्ष्वभवन् नभगस्यात्मजो नाभाग
स्तस्याभवत् ॥ तस्याप्यंबरीषः ॥ अंबरीषस्यापि विरूपोभूत् विरूपात्पृषदश्वो जज्ञे ततश्च रथीतरः ॥ तत्रायं श्लोकः ॥ एते क्षत्रप्रसूता वै पु
नश्चांगिरसाः स्मृताः ॥ रथीतराणां प्रवराः क्षत्रोपेता द्विजातयः ॥ क्षुवतश्च मनोरिक्ष्वाकुर्घ्राणतः पुत्रो जज्ञे तस्य पुत्रशतप्रवरा विकु

वि०पु०
८५

85

षः

रा
ता
एम
८५

धार्म्मिकः॥ शर्य्यातेः कन्या सुकन्या नामा कन्याभवत्यामुपयेमे च्यवनः॥ आनर्त्तश्च नाम परमधार्म्मिकः शर्य्यातिपुत्रोऽभूत्॥ आनर्त्तस्यापि रेवत
नामा पुत्रो जज्ञे योसावानर्त्तविषयं बुभुजे॥ पुरीं च कुशस्थलीमध्युवास रेवतस्यापि रैवतः पुत्रः ककुद्मी नाम धर्म्मात्मा भ्रातृशतज्येष्ठोऽभव
त्॥ तस्य च रेवती नाम कन्याभूत् तामादाय कस्मै यमर्हतीति भगवन्तमब्जयोनिं प्रष्टुं ब्रह्मलोकं जगाम॥ तावच्च ब्रह्मणोन्तिके हाहाहूहूसंज्ञाभ्यां गंध
र्वाभ्यामतितानं नाम दिव्यं गांधर्व्वमगीयत॥ तावच्च त्रिमार्गपरिवर्त्तैरनेकयुगपरिवर्त्तिं तिष्ठन्नपि रैवतः क्षणमिव मुहूर्त्तमिव मेने॥ गीतावसा
ने च भगवन्तमब्जयोनिं प्रणम्य रैवतः कन्यायोग्यं वरमपृच्छत्॥ ततश्चाह भगवान्कथय यो भिमतस्ते वर इति॥ पुनश्च प्रणम्य भगवते त-
स्मै यथाभिमतान्वरान्कथयामास॥ क एषां भगवतोभिमत इति॥ कस्मै कन्यामिमां प्रयच्छामीति॥ ततः किंचिदवनतशिराः सस्मितं
भगवानब्जयोनिराह॥ य एते भवतोभिमता नैतेषां सांप्रतमपत्यापत्यसंततिरप्यवनीतलेऽस्ति॥ बहूनि तवात्रैव गांधर्वं शृण्वतश्चतुर्युगान्य
तीतानि॥ सांप्रतं हि भूतले अष्टाविंशतितमस्य मनोश्चतुर्युगमतीतप्रायमासन्नो हि तत्र कलिरन्यस्मै कन्यारत्नमिदं भवतैकाकिना देयं भ
वतोपि॥ मित्रमंत्रिभृत्यकलत्रबंधुबलकोशादयः समस्ताः कालेनैतेनात्यन्तमतीतास्ते पुनरप्युत्पन्नसाध्वसः स राजा भगवन्तं प्रणम्य पप्र
च्छ॥ भगवन्नेवमवस्थिते मयेयं कस्मै देयेति॥ ततः स भगवान्किंचिदवनतकंधरः कृतांजलिर्भूत्वा सर्वलोकगुरुरब्जयोनिराह॥ ब्रह्मोवाच॥
न ह्यादिमध्यान्तमजस्य यस्य विद्मो वयं सर्वगतस्य धातुः॥ न च स्वरूपं न परं स्वभावं न चैव सारं परमेश्वरस्य॥ कलामुहूर्त्तादिमयश्च का
लो न यद्विभूतेः परिणामहेतुः॥ अजन्मनाशस्य समस्तमूर्त्तेरनामरूपस्य सनातनस्य॥ यस्य प्रसादादहमच्युतस्य भूतः प्रजासृष्टि

करोंतकारी॥ क्रोधाच्च रुद्रः स्थितिहेतुभूतो यस्माच्च मध्ये पुरुषः परस्मात्॥ यद्रूपमाद्यं स्वजतः अजः स्थितौ च योसौ पुरुषस्वरूपी

वि॰पु॰
८६१

भगवंतं विष्णुममराः पुरंजयस्य कायमाजग्मुः ॥ ऊचुश्चैनं हे क्षत्रियवर्य्यास्माभिरभ्यर्थितेन भवतास्माकमभ्यागतानामप्रणयभंगो न का
र्य्य इत्युक्तः ॥ पुरंजयः प्राह सकलत्रैलोक्यनाथो योयं युष्माकमिंद्रः शतक्रतुरस्य यद्यहं स्कंधारूढो युष्मदरातिभिः सह योत्स्ये तदहं भ
वतां सहायः ॥ इत्याकर्ण्य समस्तदेवैरिंद्रेण वाढमित्युक्तं ॥ ततः शतक्रतोर्वृषभरूपधारिणः ककुत्स्थितो हर्षसमन्वितो भगवत
श्चराचरगुरोरच्युतस्य तेजसाप्यायितो देवासुरसंग्रामे समस्तानेवासुरान्निजघान ॥ ततश्च वृषभककुत्स्थेन तेन राज्ञा निसूदितमसुरबलं
॥ ततश्चासौ ककुत्स्थः संज्ञामवाप ॥ ककुत्स्थस्याप्यनेनाः पुत्रोभूत् पृथुरनेनसः ॥ पृथोर्विश्वगश्वस्तस्यापि चार्द्रोभूदार्द्रस्य युवनाश्वस्तस्य स श्राव
स्तो यः पुरीं श्रावस्तीं निवेशयामास ॥ श्रावस्तस्य बृहदश्वस्तस्यापि कुवलयाश्वो योसावुत्तंकस्य महर्षेरपकारिणं धुंधुनामानमसुरं वै
ष्णवेन तेजसाप्यायितः पुत्रसहस्रैरेकविंशतिभिः परिवृतो जघान धुंधुमारसंज्ञामवाप ॥ समस्ता एव ते पुत्रा धुंधुमुखनिःश्वासाग्नि
ना विनष्टा विनष्टेषु ॥ दृढाश्वश्चंद्राश्वकपिलाश्वाश्च त्रयः केवलमवशेषिताः ॥ दृढाश्वाद्धर्य्यश्वस्तस्मान्निकुंभस्ततो निकुंभस्तच्च संहिताश्वः ॥ त
तश्च कृशाश्वस्तस्मात्प्रसेनजित्ततो युवनाश्वोभवत्स चापुत्रः सन्निर्वेदान्मुनीनामाश्रममंडले न्यवसत् ॥ कृपालुभिस्तैर्मुनिभिरप
त्योत्पादनायेष्टिः कृता तस्यां च मध्यरात्रे निवृत्तायां मंत्रपूतः जलपूर्णः कलशो वेदीमध्ये निवेश्य ते मुनयः सुषुपुः ॥ सुप्तेषु तेषु अतीव
तृट्परीतः स भूपालस्तमाश्रमं विवेश ॥ सुप्तांस्तानृषीन्नैवोत्थापयामास ॥ तच्च कलशजलमपरिमेयमाहात्म्यं मंत्रपूतं पपौ ॥ प्रबुद्धा
श्चर्षयः पप्रच्छुः केनैतन्मंत्रपूतं वारि पीतं मत्र हि पीते राज्ञ्यस्य युवनाश्वस्य पत्नी महाबलपराक्रमं पुत्रं जनयिष्यतीत्याकर्ण्य स राजा
अजानता मया पीतमित्याह ॥ गर्भश्च युवनाश्वस्योदरेभवत्क्रमेण च ववृधे प्राप्तसमयश्च दक्षिणं कुक्षिमवनीपतेर्निर्भिद्य निश्च

86

राम
८६

हिनमंडाख्यास्त्रयःपुत्राःशकुनिप्रमुखाःपंचाशत्पुत्राउत्तरापथरक्षितारोबभूवुः॥चत्वारिंशदष्टौचदक्षिणापथभूपालाः॥सचेक्ष्वाकुर
ष्टकायामुत्पाद्यश्राद्धार्हंमांसमानयेतिविकुक्षिमाज्ञापयामास॥सतथेतिगृहीताज्ञोवनमभ्येत्यानेकान्मृगान्हत्वानिःश्रांतःक्षुत्परीतोवि
कुक्षिरेकंशशमभक्षयत॥शेषंचमांसमानीयपित्रेनिवेदयामास॥इक्ष्वाकुणापिइक्ष्वाकुकुलाचार्यस्तत्प्रोक्षणायवशिष्ठश्चोदितः
प्राहअलममेनेनामेध्येनामिषेणदुरात्मनानेनतेपुत्रेणैतन्मांसमुपहतंयतोनेनशशोभक्षितः॥ततश्चासौविकुक्षिर्गुरुणैवमुक्तःशशादसं
ज्ञामवापपित्रापिचपरित्यक्तः॥पितर्युपरतेचाखिलामेतांपृथ्वींधर्मतःशशास॥शशादस्यपुरंजयोनामपुत्रोऽभवदिदंचान्यत्पुरात्रेतायां
देवासुरमतीवभीषणंयुद्धमासीत्तत्रचातिबलिभिरसुरैरमराःपराजिताभगवंतंविष्णुमाराधयांचक्रुः॥प्रसन्नोदेवानामनादिनिध
नःसकलजगत्परायणोनारायणःप्राह॥ज्ञातमेवमयायुष्माभिर्यदभिलषितंतदर्थमिदंश्रूयतां॥पुरंजयोनामराजर्षेःशशादस्य
तनयःक्षत्रियवर्यस्तच्छरीरेहमंशेनस्वयमेवावतीर्यतानशेषानसुरान्हनिष्यामि॥तद्भवद्भिःपुरंजयोऽसुरवधार्थंकृतसमुद्योगःका
र्य्यतामित्येतच्छ्रुत्वाप्रणम्यपरिक्रम्यततस्तेनैवसहाहवेऽसुरानतिनिर्वृत्तारेमिरे॥सचपितृसंपत्पृथ्वीमवाप्यबहुप्रकारैर्यज्ञैर्बहुप्रकारंतत्सखैः
पुत्रपौत्रैरात्मजपौत्रदौहित्रादिभिःसहानुदिनंसुतरांरेमे॥अथान्तर्जलावस्थितःससौभरिरेकाग्रतानास्थितधीरमपश्यदनुदिनंतत्समत्स्यसा
त्मजपुत्रदौहित्रादिभिःसहातिरमणीयंललितमत्स्यंप्राचिंतयत्॥अहोधन्योयममीदृशमप्यनभिमतयोन्यंतरमवाप्यैभिरात्मजपौत्रादिभि
सहरममाणोतीवास्माकंस्पृहामुत्पादयति॥वयमप्येवंपुत्रादिभिःसहरमिष्यामः॥इत्येवमभिसमीक्ष्यसत्वरंमांधातारंराजानमभ्यगच्छदिति॥
कृतासनपरिग्रहःसौभरिरुवाचराजानं॥सौभरिरुवाच॥निष्पादकोमासिराजन्कन्यार्थमयमागमःप्रणयंविभंगीः॥नह्यर्थिनःकार्यवशाद्

व

वि॰पु॰ ८७

तिदुःखात॥पराशरउवाच॥इतिश्रुत्वैवकल्माकरपेस्माजाजरान्मृर्जरितदेहमृषिमवलोक्यतत्प्रत्याख्यानकातरस्तस्माच्चभगवतःशापतोविभ्य
त्किंचिदधोमुखश्चिरंस्थितो॥ऋषिरुवाच॥नरेंद्रकस्मात्तूष्णींचिंतामशोकमुक्तोनमयात्रकिंचित॥यावुश्पदेस्यात्तनयात्तथैवरूता
र्थतान्नोयदिकिंनलभ्यं॥अथतस्यभगवतःशापभीतःसप्रश्रयंस्तुवाचासौराजा॥राजोवाच॥भगवन्नस्मिन्कुलेस्थितिरियंयदेवक
न्यायाश्चाभिरुचितोभिजनवान्वरस्तस्मैकन्याप्रदीयते॥भगवद्याच्ञाच्चास्मन्मनोरथानामगोचरवर्तिनीकथमप्येषासंजातातदेवमवस्थि
तेनविघ्नःकिंकुर्मइत्येतन्नस्मादितिंसते॥इत्यभिहितेचतेनभूभुजामुनिरचिंतयद्होयमन्योसात्यातारवाप्तोपायोवञ्चयमभिमतास्त्र
णांकिमुतकन्यानामितिअमुनासंचिंत्यैतदभिहितमेवमस्तुतथाकरिष्यामीतिसंचिंत्यमांधातारमुवाच॥यद्येवंतदस्मिन्नस्माकंप्रवेशा
यकन्यांतःपुरवर्षधरोयदिकन्यैवकाचिन्मामभिलषितिततएवाहंदारसंग्रहंकरिष्यामीअन्यथाचेत्तदलमस्माकमेतेनातीवक्लेशारंभेणेत्युक्त्वा
विरराम॥पराशरउवाच॥ततश्चमांधातातंमुनिशापशंकितेनकन्यांतःपुरवर्षधरःसमाज्ञप्तः॥कन्यांतःपुरंप्रविशंतःपुरवर्षधरःसमाज्ञप्तः॥क
न्यांतःपुरंप्रविशन्नेवभगवानखिलसिद्धगंधर्वमनुष्येभ्योतिशयेनकमनीयंरूपमकरोत्॥प्रवेश्यतमृषिमंतःपुरवर्षधरस्ताःकन्याः
प्राह॥भवतीनांजनयितामहाराजःसमाज्ञापयतिअयमस्मान्ब्रह्मर्षिःकन्यार्थीसमभ्यागतोमयाचास्यप्रतिज्ञातंयद्यस्यकन्याकाचिद्भगवंतंव
रयतितत्कन्यायाश्छंदेनपरिपंथिकृष्यामीत्याकर्ण्यसर्वाएवताःकन्याःसानुरागाः॥समन्मथाःकरेणवइवेभयूथपतिंतमृषिमहमहमिक
यावत्रांवभूवुः॥ऊचुश्चालंभगिन्योहमिमंवृणोमिअयंचनतवानुरूपः॥ममैवभर्ताविधिनैवसृष्टःसृष्टाहमस्योपशमंप्रयाहि॥वृतोमया
यमत्रप्रथमंमयायंगृहंविशन्नेवविहन्यसेकिं॥मयामयेतिक्षितिपात्मजानांतदर्थमत्यर्थकलिर्बभूव॥यदातुसर्वाभिरतीवहार्दाद्वृतःसक
न्याभिरनिंद्यमूर्तिः॥तदासकन्याधिकृतोनृपाययथावदाचष्टविनम्रमूर्तिः॥तदवगम्यकिंकिमेतत्कथंकिंकरोमीतिकिंमयाभिहि

प

एम

८७

त्राः

कमनचासौराजाम्मार॥ जातोनामैषकंधास्यतीतिमुनयः प्रोचुः॥ अथागम्यदेवराजाब्रवीन्मामयंधास्यतीति ततोमांधातानामसोभवत्
॥वक्त्रेचास्यप्रदेशिनीदेवेंद्रेणन्यस्तातांचामृतस्राविणीमास्वाद्यपीत्वाचाह्नैवव्यवर्द्धत॥ ततस्तुमांधाताचक्रवर्तीसप्तद्वीपांचमहींबुभुजे॥ भ
वतिचात्रश्लोकः॥ यावत्सूर्यउदेतिस्मयावच्चप्रतितिष्ठति॥ सर्वंतद्यौवनाश्वस्यमांधातुःक्षेत्रमुच्यते॥ मांधाताशशबिंदोर्दुहितरंबिंदुमती
मुपयेमे॥ पुरुकुत्समंबरीषंमुचुकुंदंचतस्यांपुत्रत्रयमुत्पादयामास॥ पंचाशद्दुहितरस्तस्यामेवहितस्यनृपतेर्बभूवुः॥ बह्वृचश्चसौभ
रिनाममहर्षिरंतर्जलेद्वादशाब्दकालमुवास॥ तत्रांतर्जलेमत्स्यःसंमदोनामातिबहुप्रजोतिप्रमाणोमीनाधिपतिरासीत्तस्यचपुत्रपौत्रदौहि
त्राः पृष्ठतोग्रतःपार्श्वतोपक्षपुच्छशिरसांचोपर्युपरिभ्रमंतस्तेनैवसहाहर्निशमतिनिर्वृतारेमिरे॥ सचापितत्स्पर्शोपचीयमानहर्षप्रक
र्षोबहुप्रकारंतस्यर्षेःपश्यतस्तैरात्मजपौत्रदौहित्रादिभिःसहानुदिनंसुतरांरेमे॥ अथांतर्जलावस्थितःससौभरिरेकाग्रतासमाधि
मपहायानुदिनंतस्यमत्स्यस्यात्मजपुत्रदौहित्रादिभिःसहातिरमणीयंललितमवेक्ष्याचिंतयत्॥ अहोधन्योयमीदृशमप्यनभिमत
योन्यंतरमवाप्यैभिरात्मजपौत्रादिभिःसहरममाणोभीचास्माकंस्पृहमुत्पादयति वयमप्येवंपुत्रादिभिःसहरमिष्याम॥ इत्येवमभिसमीक्ष्यस
तस्मादंतर्जलान्निष्क्रम्यनिवेष्टुकामः कन्यार्थंमांधातारंराजानमगच्छत्॥ आगमनश्रवणसमनंतरंचोत्थायतेनराज्ञासम्यगर्घ्यादिनापूजितःकृता
सनपरिग्रहःसौभरिरुवाचराजानं॥ सौभरिरुवाच॥ निवेष्टुकामोस्मिनरेंद्रकन्यांप्रयच्छमेमाप्रणयंविभांक्षीः॥ नह्यर्थिनःकार्यवशाभ्युपे
ताःककुत्स्थवंशेविमुखाःप्रयांति॥ अन्येपिसंत्येवनृपाःपृथिव्यांमांधातरेषांतनयाःप्रसूताः॥ किंत्वर्थिनामर्थितदानदीक्षाकृत
व्रतंश्लाघ्यमिदंकुलंते॥ शतार्द्धसंख्यास्तवसंतिकन्यास्तासांममैकांनृपतेप्रयच्छ॥ यत्प्रार्थनाभंगभयाद्बिभेमितस्माद्राजवराति

ताभिस्तचैवाभिहितः परितोषविस्मयनिर्भरविकारहृदयो भगवंतं सौभरिमेकांतावस्थितमुपेत्य सपूजोब्रवीत् ॥ दृष्टस्ते भगवन्सुमहानेष
सिद्धिप्रभावो नेदंविधमन्यस्य कस्यचिदस्माभिर्विभूतिभिर्विलसितमुपलक्षितं ॥ किंयदेतद्भगवतस्तपसः फलमित्यभिपूज्य तमृषिं तेनैव ऋषि
वर्येण सह किंचित्कालमभिमतोपभोगं बुभुजे स्वपुरं च जगाम ॥ कालेन गच्छता तस्य तासु राजतनयासु पुत्रशतं सार्द्धमभवत् ॥ अनुदिना
नुरूढस्नेहप्रसरश्च स तत्रातीव ममताकृष्टहृदयोभवत् ॥ अप्येतेस्मत्पुत्राः कलभाषिणः पद्भ्यां गच्छेयुः अप्येते यौवनिनो भवेयुः अपि कृतदारा
नेतान्पश्येयमप्येतत्पुत्रान्पुत्रसमन्वितान्पश्येयमित्यादिमनोरथाननुदिनं कालसंपत्तिप्रवृद्धानवेक्ष्यैतत्संचिंतयामास ॥ अहो
मे मोहस्यातिविस्तरः ॥ मनोरथानां न समाप्तिरस्ति वर्षायुतेनाप्यथवापि लक्षैः ॥ पूर्णेषु पूर्णेषु पुनर्नवानामुत्पत्तयः संति मनोरथानां
॥ पद्भ्यां गता यौवनिनश्च जाता दारैश्च संयोगमिताः प्रसूताः ॥ दृष्टाः सुतास्तत्तनयप्रसूतिं द्रष्टुं पुनर्वांछति मेंतरात्मा ॥ द्रक्ष्यामि तेषामपि
चेत्प्रसूतिं मनोरथो मे भविता ततोन्यः ॥ पूर्णेपि तत्राप्यपरस्य जन्म निवार्यते केन मनोरथस्य ॥ आमृत्युतो नैव मनोरथानामंतोस्ति विज्ञा
तमिदं मयाद्य ॥ मनोरथासक्तिपरस्य चित्तं न जायते वै परमार्थसंगि ॥ स मे समाधिर्जलवासिमित्रमत्स्यस्य संगात्सहसैव नष्टः ॥ परि
ग्रहः संगकृतो ममायं परिग्रहोत्था च महाविधित्सा ॥ दुःखं यदैवैकशरीरजन्म शतार्द्धसंख्यं तदिदं प्रसूतं ॥ परिग्रहेण क्षितिपात्मजा
नां सुतैरनेकैर्बहुलीकृतं तत् ॥ सुतात्मजैस्तत्तनयैश्च भूयो भूयश्च तेषां च परिग्रहेण ॥ विस्तारमेष्यत्यतिदुःखहेतुः परिग्रहो वै ममता
भिधानं ॥ चीर्णं तपो यत्तु जलाश्रयेण तस्यर्द्धिरेषा तपसोंतरायः ॥ मत्स्यस्य संगादभवच्च यो मे सुताभिरागो मुषितोस्मि तेन ॥ सर्वस्य धा
तारमचिंत्यरूपमणोरणीयांसमतिप्रमाणं ॥ सितासितं चेश्वरमीश्वराणामाराधयिष्ये तपसैव विष्णुं ॥ तस्मिन्नशेषौजसि सर्वरूपि

न

तमित्थंकुलस्थितिरितिकृत्वानपिताकिमपिप्रत्याख्यातुंमेने॥ कृतानुरूपविवाहश्चमहर्षिःसकलाएवताःकन्याःस्वमाश्रममनयत्॥ तत्रचाशेषशिल्पि
शिल्पकल्पप्रणेतारंधातारमिवान्यंविश्वकर्माणमाहूयसकलकन्यानामेकैकस्याःप्रोत्फुल्लपंकजाःकूजत्कलहंसकारंडवादिविहंगमाभि
रामजलाशयाःसोपवनाःसावकाशाःसाधुशय्यापरिच्छदाःक्रियंतामित्यादिदेश॥ ४४॥ तच्चतथैवानुष्ठितमशेषशिल्पविशेषाचार्यस्त्वष्टाद
र्शितवान्॥ ततःपरमर्षिणासौभरिणाज्ञप्तस्तेषुगृहेष्वनपायीनंदमहानंदनामानिधिरासांचक्रे॥ ततोनवरतभक्ष्यभोज्यलेह्याद्युपभो
गैरागतानुगतभृत्यादीनहर्निशमशेषगृहेषुताःक्षितीशदुहितरोभोजयामास॥ एकदातुदुहितृस्नेहाकृष्टहृदयःसमहीपतिरतिदुः
खिताःसुखितावेतिविचिंत्यतस्यमहर्षेराश्रममुपेत्यस्फुरदंशुमालामलस्फटिकमयप्रासादमालामतिरम्योपवनजलाशयांददर्श॥ प्र
विश्यचैकंप्रासादमात्मजांपरिष्वज्यकृतासनपरिग्रहःप्रवृद्धस्नेहनयनांबुगर्भोब्रवीदप्यत्रवत्सेभवत्याः॥ सुखमुतकिंचिदसुखमपितेमह
र्षिःस्नेहवानुतस्मर्यतेस्मद्गृहवासइत्युक्तातनयापितरमाह॥ तातातिरमणीयःप्रासादोत्रातिमनोज्ञमुपवनमतिकलवाक्यविहं
गाभिरुताःप्रोत्फुल्लपद्माकरजलाशयाःमनोनुकूलभक्ष्यभोज्यानुलेपनवस्त्रभूषणादिभोगोपभोगोमृदूनिशयनानिसर्वसंप
त्समवेतमेतद्गार्हस्थ्यंतथापिकेनवाजन्मभूमिर्नस्मर्यते॥ त्वत्प्रसादादिदमशेषमतिशोभनंकिंत्वेकंममैतद्दुःखकारणंयदस्मद्गृहा
न्महर्षिरयंममभर्त्तानिष्क्रामतिममैवकेवलमतिप्रीत्यासमीपवर्त्तीनान्यासामस्मद्भगिनीनामेवंममसहोदरादुःखिताः॥ इत्येवमतीवदुःख
कारणमित्युक्तस्तयाद्वितीयंप्रासादमुपेत्यस्वतनयांपरिष्वज्योपविष्टस्तथैवपृष्टवान्तयापितथैवसर्वंतत्प्रासादाद्युपभोगसुखमा
ख्यातं॥ ममैवकेवलंपार्श्ववर्त्तीनान्यासामस्मद्भगिनीनामेवमादि [illegible] हेतुस्तदाख्यापिवेशतनयांतरप्येवापृष्टवान्॥ सर्वाभिश्च

न

रसातलं गत्वाऽसौ भगवत्तेजसाप्यायितात्मवीर्यः सकलगंधर्वान्‌जघान पुनश्च स्वपुरमाजगाम॥ सकलपन्नगपतयो नर्म्मदायै वरं ददुः॥ य
एतेनुस्मरणसमन्वितां नामग्रहणं करिष्यति न तस्य सर्प्पविषभयं भविष्यतीत्युक्तः॥ अत्र श्लोकः॥ नर्म्मदायै नमः प्रातर्नर्म्मदायै नमो निशि॥ नमो
स्तु नर्म्मदे तुभ्यं त्राहि मां विषसर्प्पतः॥ इत्युच्चार्याहर्निशमंधकारप्रवेशे वा सर्प्पैर्न दश्यते॥ न चापि कृतानुस्मरणभुजो विषमपि भुक्तमुपघाता
य भवति॥ पुरुकुत्साय च भवतः संततिविच्छेदो न भविष्यतीत्युरगपतयो वरं ददुः॥ पुरुकुत्सो नर्म्मदायां त्रसद्दस्युमजीजनत्॥ त्रसद्दस्युतः
संभूतो नरण्यस्तं रावणो दिग्विजये जघान॥ अनरण्यस्य वृषदश्वस्तस्य हर्यश्वः पुत्रोऽभवत्सुमनास्तस्यापि निधन्वा[illegible]न स्त्र्यारुण
स्तस्मात्सत्यव्रतः॥ यो सौ त्रिशंकुसंज्ञामवाप चांडालतामुपगतश्च द्वादशवार्षिकमनावृष्ट्यां विश्वामित्रकलत्रापत्यपोषणार्थं चांडा
लप्रतिग्रहपरिहरणाय च जाह्नवीतीरन्यग्रोधे मृगमांसमनुदिनं बबंध परितुष्टेन च विश्वामित्रेण सशरीरः स्वर्गमारोपितः॥ त्रिशंको
र्हरिश्चंद्रस्तस्माद्रोहिताश्वस्ततश्च हरितो हरितस्यापि चंचुः॥ चंचोर्विजयसुदेवौ रुरुको विजयाद्रुरुकस्य वृकस्ततो वृकस्य बाहुर्योसौ
हैहयतालजंघादिभिः पराजितोन्तर्वत्न्या महिष्या सह वनं विवेश॥ तस्याश्च सपत्न्या गर्भस्तंभनाय गरो दत्तस्तेनास्या गर्भः सप्तवर्षाणि ज
ठर एव तस्थौ॥ स बाहुर्वृद्धभावादौर्वाश्रमसमीपे ममार॥ सा तस्य भार्या चितां कृत्वा तमारोप्यानुमरणकृतनिश्चयाभूदथैनामतीता
नागतवर्त्तमानकालवेदी भगवानौर्वः स्वाश्रमान्निर्गत्याब्रवीत्॥ अलमलमनेनासद्ग्रहेणाखिलभूमंडलपतिरतिवीर्यपराक्रमो ने
कयज्ञकृदरातिपक्षक्षयकर्त्ता तवोदरे चक्रवर्त्ती तिष्ठति नैवमति साहसाध्यवसायिनी भवती भवत्वित्युक्ता सा तस्मादनुमरणनिर्बंधा

वि०पु०
८९

९७

८

ने

राम
८९

न्यमक्तविसरत्तताव नंतं ॥ भक्षावलं चित्तमपेतदुःखं सदा मुविष्ठ वश्चयाय भूयः ॥ समस्तभूतात्मलादनंतात्सर्वेश्वरात्सदसद्नादिमध्यात् ॥ य
स्मान्न किंचित्तमहं गुरूणां परं गुरुं संश्रयमेमि विष्णुं ॥ इति श्रीविष्णुपुराणे चतुर्थेंशे द्वितीयोध्यायः ॥ पराशर उवाच ॥ इत्यसावात्मानमात्म
नैवाभिधायासौ सौभरिरपहाय पुत्रगृहासनपरिच्छदादिकमशेषमर्थजातं सकलभार्यासमन्वितो वनं विवेश ॥ तत्राप्यनुदिनं वैखान
सनिःपाद्यमशेषं क्रियाकलापं निष्पाद्य क्षपितसकलपापः परिपक्वमनोवृत्तिरात्मन्यग्नीन्समारोप्य भिक्षुरभवत् ॥ भगवत्यासज्याखि
लं कर्मकलापं जरमविकारममरणादिधर्ममवाप ॥ परं परस्मादच्युतपदं मित्येतन्मांधातुर्दुहितृसंबंधादाख्यातं ॥ यश्चैतत्सौभरि
चरितमनुस्मरति पठति श्रावयत्यनित्यस्याष्टौ जन्मान्यसन्मतिरपधर्मो वाङ्मनसोरसन्मार्गचरणमशेषहेयेषु वा ममत्वं न भ
वतीति ॥ अतश्च मांधातुः पुत्रसंततिरभिधीयते ॥ अंबरीषस्य मांधातुस्तनयस्य युवनाश्वः पुत्रोभूत्तस्माद्धारीतो यतोंगिरसो हारीताः
॥ रसातले च मौनेया नाम गंधर्वा बभूवुः षट्कोटिसंख्यातास्तैरशेषाणि नागकुलान्यपहृतप्रधानरत्नाधिपत्यान्यक्रियंत ॥ तैश्च गंधर्व
वीर्यावधूतैरुरगैरीश्वरो भगवानशेषदेवेशः स्तवश्रवणोन्मीलितोन्निद्रपुंडरीकनयनो जलशयनो निद्रावसाने विबुद्धः ॥ प्रणिपत्याभिहि
तः भगवन्नस्माकमेतेभ्यो गंधर्वेभ्यो भयमुपशमम् एष्यतीत्याह ॥ भगवाननादिपुरुषः पुरुषोत्तमो योसौ यौवनाश्वस्य मांधातुः पुरुकुत्सनामा
पुत्रस्तमनुप्रविश्य तानहमशेषदुष्टगंधर्वानुपशमं नेष्यामीत्याकर्ण्य भगवते कृतप्रणामाः पुनर्नागलोकमागताः ॥ पन्न
गाधिपतयो नर्मदां च पुरुकुत्सानयनाय चोदयामासुः ॥ सा चैनं नागैः समं मांधातुः पुरुकुत्सं नामानमपहरसा चैनं रसातलं नीतवती ॥ र

वि॰पु॰
९०

तमनुगम्यते कश्चमेवाभिरक्षितुं सा हि हिरण्यगर्भविष्णोर्जयत्सुरित्राणाय च भगवतोऽत्र शरीरग्रहणमित्याद्यपि भगवताल्पैरेव दिनैरेते विनंक्ष्यन्तीत
न्तवान्॥ तत्रान्ते सगरो हयमेधमारेभे तत्र च पुत्रैरधिष्ठितमस्याश्वं कोऽप्यपहृत्य भुवो विलं प्रविवेश॥ ततोऽश्वान्वेषणाय तत्तनयास्तु पौञ्ज
ततस्तत्तनयास्तु गोजातखाते नयाश्चाश्वखुरपदवीमनुसरन्तो निर्बन्धेन वसुधातलमेकैको योजनं योजनमवनेश्चखान॥ पाताले चाश्वं प
रिभ्रमन्तमवनिपतितनयास्ते ददृशुः॥ नातिदूरावस्थितं च भगवन्तमपघने शरत्काले ऽर्कमिव तेजोभिरनवरतमूर्ध्वमधश्चाशेषदिशश्चो
द्भासयमानं कपिलर्षिमपश्यन्॥ ततश्चोद्यतायुधा दुरात्मानोऽयमस्मदपकारी यज्ञविघ्नकारी हन्यतां हन्यतामित्यभ्यधाव
न्॥ ततस्तेनापि भगवता किंचिदीषत्परिवर्तितलोचनेनावलोकिताः॥ स्वशरीरसमुत्थेनाग्निना दह्यमाना विनेशुः॥ सगरोऽप्यवग
म्याश्वानुसारि तत्पुत्रबलमशेषं परमर्षिं कपिलमुपगम्य भक्तिनम्रस्[illegible] तथा तुष्टाव अथैनं भगवानाह॥ गच्छैनं पितामहायाश्वं
प्रापय वरं वृणीष्व च पुत्र पौत्रश्च ते स्वर्गाद्गङ्गामानयिष्यति॥ अथांशुमानपि ब्रह्मदण्डहतानामस्मत्पितॄणां स्वर्गाय स्वर्गयोग्यानां
स्वर्गप्राप्तिकरं वरमस्माकं भगवान्प्रयच्छत्वित्याह॥ तं चाह भगवानुक्तमेवैतन्मया पौत्रस्ते त्रिदिवाद्गङ्गां भुवमानेष्यतीति तदम्भ
सा संस्पृष्टेष्वस्थिभस्मस्वेते स्वर्गमारोक्ष्यन्ति॥ भगवद्विष्णुपादाङ्गुष्ठविनिर्गतस्य हि जलस्यैतन्माहात्म्यं यन्न केवलमभिसंधिपूर्वकं
स्नानाद्युपभोगेषूपकारकमनभिसंधितमप्यपेतप्राणस्यास्थिचर्मस्नायुकेशाद्युपस्पृष्टं शरीरजमपि पतितं सद्यः शरीरिणं स्वर्गं नय
तीत्युक्तः प्रणम्यासौ भगवन्तमश्वमादाय पितामहयज्ञमाजगाम॥ सगरोऽप्यश्वमासाद्य तं यज्ञं समापयामास सागरं चात्मजप्रीत्या पु
त्रत्वे कल्पितवान्स्तस्यांशुमतो दिलीपः पुत्रोऽभवत्ततो भगीरथो योऽसौ गङ्गां स्वर्गादिहानीय भागीरथीसंज्ञां चकार॥ भगीरथात्सुहोत्रः सु

राम
९०

हृत्साम। तेनैव च भगवता स्वाश्रममनीयत। कृतोपयनादि नान्यंतरेण सहैव तेन गरेणातितेजस्वी बालको जज्ञे। तस्यौर्वो जातकर्मादिकाः क्रियां
निष्पाद्य सगर इति नाम चकार। कृतोपनयनं चैवं नमौर्वो वेदशास्त्राण्यस्त्रं चाग्नेयं भार्गवाख्यमध्यापयामास। उत्पन्नबुद्धिश्च मातरमपृच्छत्
अंब कथय मत्र वयं क्व तातः कोवास्माकमित्येवमादि पृच्छंतं माता सर्वमेवावोचत्। ततश्च पितृराज्यहरणामर्षितो हैहयतालजंघादिवधाय प्रतिज्ञा
मकरोत्। प्रायशश्च हैहयादीन् जघान। शकयवनकांबोजपारदपह्लवा हन्यमानास्तत्कुलगुरुं वशिष्ठं शरणं ययुः। अथैनान्वशिष्ठो जीवन्मृतकान्कृत्वा
सगरमाह। वत्सालमेभिर्जीवन्मृतकैरनुसृतैः। ते च मयैव त्वत्प्रतिज्ञापरिपालनाय निजधर्मद्विजसंगपरित्यागं कारिताः। स तथेति
तद्गुरुवचनमभिनंद्य तेषां वेषान्यत्वमकारयत्। यवनान्मुंडितशिरसोर्द्धमुंडान्शकान्प्रलंबकेशान्पारदान्पह्लवांश्च श्मश्रुधरान्निःस्वाध्याय
वषट्कारानेतानन्यांश्च क्षत्रियांश्चकार। ते चात्मधर्मपरित्यागाद्ब्राह्मणैः परित्यक्ता म्लेच्छतां ययुः। सगरोपि स्वमधिष्ठानमागम्यास्खलितचक्रः
सप्तद्वीपवतीमिमामुर्वीं प्रशशास। इति श्रीविष्णुपुराणे चतुर्थेंशे तृतीयोऽध्यायः। पराशर उवाच। काश्यपदुहिता सुमतिर्विदर्भराजतनया
च केशिनी द्वे भार्ये सगरस्यास्तां। ताभ्यां चापत्यार्थमौर्वः परमेण समाधिनाराधितो वरमदात्। एको वंशधरमेकं पुत्रमपरा षष्टिं पुत्रसहस्राणि
जनयिष्यतीति। यस्या यदभिमतं तदिच्छया गृह्यतामित्युक्ते केशिनी पुत्रमेकं सुमतिः सहस्राणि षष्टिं वव्रे। तथेत्युक्ते अल्पैरहोभिः
केशिनी पुत्रमेकमसमंजसनामानं वंशधरमसूयत। काश्यपतनयायास्तु सुमत्याः षष्टिपुत्रसहस्राण्यभवन्। तस्मादसमंजसादंशुमान्नाम
कुमारो जज्ञे। स चासमंजो बाल्यादेवासद्वृत्तः। पिता चास्याचिंतयदयमतीतबाल्यो बुद्धिमान्भविष्यतीति। अथ तत्रापि वयस्यतीते तमसच्चरितमेवं तं
पिता तत्याज। तान्यपि षष्टिः कुमारसहस्राण्यसमंजसचरितमेवानुचक्रुः। ततश्चासमंजसचरितानुकारिभिः सागरैरपध्वस्ते यज्ञादिसन्मार्गे जगति
देवाः सकलविद्यामयमसंस्पृष्टमशेषदोषैर्भगवन्तं पुरुषोत्तमस्यांशभूतं कपिलं प्रणम्य तदर्थमूचुः। भगवन्नेभिः सगरतनयैरसमंजसचरि

वि० पु०
पं१

91

स च पि नाभाग स्ततोंबरीष स्तत श्च सिंधुद्वीपः सिंधुद्वीपादयुतायुस्तस्मा त्त्वृतुपर्णो नलसहायोक्षहृदयज्ञो भूत्॥ ऋतुपर्णपुत्रस्स
र्वकामस्तत्तनयः सुदासः सुदासात्सौदासो मित्रसहनामा सोचाटव्यां मृगयामटन्व्याघ्रद्वयमपश्यत्ताभ्यां तद्वनमपमृगंतं॥ स तै
कं तयोर्बाणेन जघान म्रियमाणश्चासावतिभीषणाकृतिरतिकरालवदनो राक्षसोभवत्॥ द्वितीयोपि प्रतिक्रियां ते करिष्यामीत्युक्त्वा
न्तर्द्धानं जगाम॥ कालेन च गच्छता स सौदासो यज्ञमयजत्॥ परिनिष्ठितयज्ञे चाचार्य्ये वशिष्ठे निष्क्रांते तद्रक्षो वशिष्ठरूपमास्थाय यज्ञा
वसाने मम मांसभोजनं देयमिति तत्संस्क्रियतां क्षणादागमिष्यामीत्युक्त्वा निःक्रांतः॥ भूयश्च सूदवेषं कृत्वा राजाज्ञया मानुषमांसं सं
स्कृत्य राज्ञे न्यवेदयत्॥ आगताय वशिष्ठाय निवेदितवान्॥ स चाप्यचिंतयदहोस्य राज्ञो दौःशील्यं येनैतन्मांसमस्माकं प्रयच्छति॥ किमे
तद्द्रव्यजातमिति ध्यानपरोभवदपश्यच्च तन्मानुषं मांसं ततः क्रोधकलुषीकृतचेता राजानं प्रतिशापमुत्ससर्ज॥ यस्मादभोज्यमे
तदस्मद्विधानां तपस्विनामवगच्छन्नपि भवान्मह्यं ददाति तस्मात्तवैवात्र लोलुपा बुद्धिर्भविष्यतीत्यनंतरं च तेनापि भगवतैवाभिहितोस्मि ग
इत्युक्ते किं किं मयैवाभिहितमिति मुनिरपि समाधौ तस्थौ॥ समाधिविज्ञानावगतार्थश्चानुग्रहं तस्मै चकार नात्यंतिकमेतद्द्वादशाब्दं
भोजनं तव भविष्यतीति असावपि प्रगृह्योदकांजलिं मुनिशापप्रदानायोद्यतो भगवानयमस्मत्कुलगुरुर्नार्हस्येनं कुलदेवताभूतमाचा
र्य्यं शप्तुमिति मदयंत्या प्रसादितः शस्यांबुदरक्षणार्थं तच्छापांबु नोर्व्यां न चाकाशे चिक्षेप॥ तेनैव स्वपादौ सिषेच तेन च क्रोधाश्रिते
नांभसा दग्धच्छायौ तत्पादौ कल्माषतामुपगतौ॥ ततः स कल्माषपादसंज्ञामवाप॥ वशिष्ठशापाच्च षष्ठे काले राक्षसस्वभावमुपेत्या राम
टव्यां पर्य्यटन्ननेकशो मानुषानभक्षयत्॥ एकदा तु कंचिन्मुनिमृतुकाले भार्य्यया सह संगतं ददर्श॥ तयोश्च तमतिभीषणं राक्षस- पं१

तस्मादप्यजः॥ अजाद्दशरथोदशरथस्यापिभगवानब्जनाभोजगतस्थित्यर्थमात्मांशेनरामलक्ष्मणभरतशत्रुघ्नरूपेणचतुर्धा
पुत्रत्वमयासीद्रामोपिबालएवविश्वामित्रयज्ञरक्षणायगच्छन्पथिताडकांजघान॥ यज्ञेचमारीचमिषुपाताहतंद्रूंचिक्षेप॥ सु
बाहुप्रमुखांश्चक्षयमनयत्॥ दर्शनमात्रेणैवाहल्यामपापांचकार॥ जनकगृहेचमाहेश्वरंचापमनायासेनैवबभंज॥ सीतांचा
योनिजांजनकराजतनयांवीर्यशुल्कांलेभे॥ सकलक्षत्रक्षयकारिणमशेषहैहयकुलकेतुभूतंचपरशुराममपास्तवीर्याव
लेपंचकार॥ पितृवचनाच्चागणितराज्याभिलाषोभ्रातृभार्यासमेतोवनंप्रविवेश॥ विराधखरदूषणादीन्कबंधवालिनौ
चनिजघान॥ बध्वांचांभोधिमशेषराक्षसकुलक्षयंकृत्वादशाननापहृतांतद्वधापहृतकलंकामप्यनलशुद्धामशेषदेवसं
स्तूयमानांसीतांजनकराजतनयां॥ अयोध्यामानिन्ये॥ भरतोपिगंधर्वविषयसाधनायोग्रगांधर्वकोटीस्तिस्रोजघानशत्रुघ्ने
नाप्यमितबलपराक्रमोमधुपुत्रोलवणोनामराक्षसेश्वरोनिहितोमथुराचनिवेशिता॥ इत्येतुमाद्यतुलबलपराक्रमविक्रमै
रतिदुष्टनिवर्हिणोशेषस्यजगतोनिःपादितस्थितयोरामलक्ष्मणभरतशत्रुघ्नाःपुनरपिदिवमारूढाः॥ येपितेषुभगवदंशे
ष्वनुरागिणःकोशलनगरजनपदास्तेपितन्मनसस्तत्सालोकतामवापुः॥ रामस्यतुकुशलवौपुत्रौलक्ष्मणस्यांगदचंद्रकेतूतक्षपु
ष्कलौभरतस्यसुबाहुशूरसेनौशत्रुघ्नस्य॥ कुशस्यातिथिरतिथेरपिनिषधःपुत्रोभवत्निषधस्यापिनलस्ततोनभोनभसः
पुंडरीकस्तत्तनयःक्षेमधन्वातस्यदेवानीकस्तस्याप्यहीनगुः॥ अहीनगोरपिरुरुस्तस्यापिपारियात्रःपारियात्राद्दलोर

र

स्वरूपमवलोक्यत्रासानंदपत्योः प्रधावितयोर्ब्राह्मणं जग्राह ॥ ततः सा ब्राह्मणी बहुशस्तमभियाचितवती ॥ प्रसीदेक्ष्वाकुकुलति-
लकभूतस्त्वं महाराजो मित्रसहो न राक्षसो नार्हसि स्त्रीधर्मसुखाभिज्ञो मय्यकृतार्थायामिमम्मद्भर्तारं हन्तुमित्येवं बहुप्रकारं तस्यां वि-
लपन्त्यां व्याघ्रः पशुमिवाभिमतं ब्राह्मणमभक्षयत ॥ ततश्चातिकोपसमन्विता ब्राह्मणी तं राजानं शशाप यस्मादेवं मय्यतृप्तायां त्वयायं
मत्पतिर्भक्षितस्तस्मात्त्वमप्यन्तं कामोपभोगप्रवृत्तः प्राप्स्यसीति शप्त्वा पतिमादायाग्निं प्रविवेश ॥ ततस्तस्य द्वादशाब्दपर्याये विमुक्तशा-
पस्य स्त्रीविषयाभिलाषिणो मदयन्ती स्मारयामास ॥ ततः परमसौ गर्भेन जज्ञे ततस्तं गर्भमश्मना सा देवी जघान पुत्रश्चाजायत ॥ तस्य
चाश्मक एव नामाभवदश्मकस्य मूलको नाम पुत्रोऽभवत ॥ योऽसौ निःक्षत्रे क्ष्मातलेऽस्मिन् क्रियमाणे स्त्रीभिर्विवस्त्राभिः परिवार्य रक्षितः ॥ तत-
स्तं नारीकवचमुदाहरन्ति ॥ मूलकाद्दशरथस्तस्मादिलविलस्ततश्च विश्वसहस्तस्माच्च खट्वांगो दिलीपः ॥ योऽसौ देवासुराणां संग्रामे दे-
वैरभ्यर्थितोऽसुराञ्जघान ॥ स्वर्गे च कृतप्रियैर्देवैर्वरग्रहणाय चोदितः प्राह ॥ यद्यवश्यं वरो ग्राह्यस्तन्ममायुः कथ्यतामेतस्य नंतरं चैतैरु-
क्तमेकमुहूर्तप्रमाणं तवायुरित्युक्तो ॥ अथास्खलितगतिना विमानेन लघिमगुणो मर्त्यलोकमागम्येदमाह यथा न ब्राह्मणेभ्यः सका-
शादात्मापि मे प्रियतमो न च स्वधर्मोल्लंघनं मया कदाचिदप्यनुष्ठितं न च सकलदेवमनुष्यपशुवृक्षादिकेष्वच्युतव्यतिरेकवती दृष्टि-
र्ममाभूत ॥ यथा तमेव मुनिजनानुस्मृतं भगवन्तमस्खलितगतिः प्रापयेयमित्यशेषदेवगुरौ भगवत्यनिर्देश्यवपुषि सत्तामात्रात्म-
न्यात्मानं परमात्मनि वासुदेवाख्ये युयोज तत्रैव च लयमवाप ॥ अत्रापि श्रूयते श्लोको गीतः सप्तर्षिभिः पुरा ॥ खट्वांगेन समो नान्यः कश्चि-
दुर्व्यां भविष्यति ॥ येन स्वर्गादिहागम्य मुहूर्तं प्राप्य जीवितं त्रयोऽभिसंधिता लोका बुद्ध्या सत्येन चैव हि ॥ खट्वांगात्ततो दीर्घबाहुः पुत्रोऽभवत्ततो रघु-

व

वि॰पु॰
अं॰४

यज्ञसमाप्तौ च भागग्रहणाय देवानागतान् ऋत्विजो ब्रुवन्यजमानाय वरो दीयतामिति देवैश्च छंदितो निमिराह भगवंतोऽखिलसंसारदुःखसंघा
तस्य वेत्तारो न ह्येतावदन्यद्दुःखमस्ति यच्छरीरात्मनो र्वियोगे भवति तदहमिच्छामि सकललोकलोचनेषु वस्तुं न पुनः शरीरग्रह
णं कर्तुमित्येवमुक्तो देवैरसावशेषभूतानां नेत्रेष्ववतारितः ततो भूतान्युन्मेषनिमेषं चक्रुः अपुत्रस्य तस्य भूभुजः शरीरमराजकभीरवस्ते
मुनयोऽरण्यां ममंथुस्तत्र च कुमारो जज्ञे जननाज्जनकसंज्ञां चावाप अभूद्विदेहोऽस्य पितेति वैदेहो मथनान्मिथिरभूत् तस्योदावसुः पु
त्रोऽभवदुदावसोर्नंदिवर्द्धनस्ततश्च सुकेतुस्तस्माद्देवरातस्ततश्च बृहदुक्थस्तस्य महावीर्यस्तस्यापि सुधृतिस्ततश्च धृतिकेतुस्ततश्च धृष्ट
केतुस्तस्मादजायतः धृष्टकेतोर्हर्यश्वस्तस्य च मनुर्मनोः प्रतिबंधकस्तस्मात्कृतिरथस्तस्य च देवमीढस्तस्य विबुधो विबुधस्यापि महाधृ
तिस्ततश्च कृतिरातिस्ततो महारोमा तस्यापि पुत्रः स्वर्णरोमा तस्यापि ह्रस्वरोमा ह्रस्वरोम्णः सीरध्वजोऽभवत् यस्य पुत्रार्थं यजनभुवं कृषतः सीरे
ता सीदुहिता समुत्पन्ना शीरध्वजस्य भ्राता काश्याधिपतिः कुशध्वजनामासीत् शीरध्वजस्यापत्यं भानुमान्भानुमतः शतद्युम्नस्तस्य च शुचिस्त
स्मादूर्जवहो नाम पुत्रो जज्ञे तस्यापि भारद्वाजस्ततश्च कुणिः कुणेरंजनस्तत्सुतः ऋतुजित्ततोऽरिष्टनेमिस्तस्मात् श्रुतायुः श्रुतायुषः सुपा
र्श्वस्तस्मात्संजयस्ततः क्षेमजित्तस्मादनेनास्तस्मान्मीनरथस्तस्य सत्यरथिः सत्यरथेरुपगुप्तस्तस्मात्स्वागतध्वजस्तस्माच्छुनयस्तस्यापि
सुभाषस्ततः श्रुतः श्रुतस्तस्माज्जयो जयपुत्रो विजयो विजयस्य ऋतः ऋतात्सुनयः सुनयाद्वीतहव्यस्तस्मात्संजयस्ततः क्षेमाश्वस्तस्माद्धृ
तिर्धृतेर्बहुलाश्वस्तस्य पुत्रः कृतिः कृतौ संतिष्ठत्ययं जनकवंशः इत्येते मैथिलाः प्रायेणैते आत्मविद्याश्रयिणो भूपाला भविष्यंति॥इ
ति श्रीविष्णुपुराणे चतुर्थेंऽशे पंचमोऽध्यायः॥ मैत्रेय उवाच॥ सूर्यस्य भगवन्वंशः कथितो भवता मम सोमस्य वंशे चाखिलान् श्रोतुमिच्छामि पा

९३

राम
अं॰४

लाच्छलस्तस्मादुक्थः उक्थाद्वज्रनाभस्तस्माच्छङ्खनाभस्तस्मादभ्युत्थिताश्वस्ततश्च विश्वसहो जज्ञे हिरण्यनाभस्ततो महायोगीश्वरो
जैमिनेः शिष्यो यो याज्ञवल्क्याद्योगमवाप॥ हिरण्यनाभस्य पुत्रः पुष्यस्तस्माद्ध्रुवसंधिस्ततः सुदर्शनस्तस्मादग्निवर्णस्ततश्च शी
घ्रस्तस्मादपि मरुः पुत्रोभूत् योसौ योगमास्थायाद्यापि कलापग्राममाश्रित्य तिष्ठति॥ आगामियुगे सूर्यवंशक्षत्रप्रवर्तयिता भविष्यति॥ त
स्यात्मजः प्रसुश्रुतस्तस्यापि सुसंधिस्ततश्चामर्षस्तस्य च सहस्वांस्ततश्च विश्रुतवान् तस्माद्बृहद्बलो योर्जुनतनयेनाभिमन्युना भारतयुद्धे
क्षयमनीयत॥ एते हीक्ष्वाकुभूपालाः प्राधान्येन मयेरिताः॥ एतेषां चरितं शृण्वन्सर्वपापैः प्रमुच्यते॥ इति श्रीविष्णुपुराणे चतुर्थेंशे चतुर्थो
ध्यायः॥ पराशर उवाच॥ इक्ष्वाकुतनयो योसौ निमिर्नामा स तु सहस्रसंवत्सरं सत्रमारेभे वशिष्ठं च होतारं वरयामास॥ तमाह वशिष्ठोहमिन्द्रेण पञ्च
वर्षशतं यागार्थं प्रथमतरं वृतस्तावत्तदनंतरं प्रतिपाल्यतामागतस्तवापि ऋत्विग्भविष्यामीत्युक्ते स पृथिवीपतिर्न किंचिदुक्तवान्॥ व
शिष्ठोप्यनेन समन्विच्छितमित्यमरपतेर्यागमकरोत्॥ सोपि तत्कालमेवान्यैर्गौतमादिभि
र्यागमकारयत॥ समाप्ते चामरपतेर्यागे त्वरावान्वशिष्ठो निमेर्यज्ञं करिष्यामीत्याजगाम॥ तत्कर्मकर्तृत्वं च तत्र गौतमस्य दृष्ट्वा स्वपते
तस्मै राज्ञे मामप्रत्याख्यायैतदनेन गौतमाय कर्मान्तरं समर्पितं यस्मात्तस्माद्विदेहोयं भविष्यति इति शापं ददौ॥ प्रतिबुद्धश्चासाववनी
पतिरपि प्राह यस्मान्मामसंभाष्याज्ञानत एव शयानस्य शापोत्सर्गमसौ दुष्टगुरुश्चकार तस्मात्तस्यापि देहः पतितो भविष्यतीति प्रतिशा
पं दत्त्वा देहमत्यजत्॥ तच्छापाच्च मित्रावरुणयोस्तेजसि वशिष्ठतेजः प्रविष्टम् उर्वशीदर्शनादुद्भूतबीजप्रपातयोः सकाशाद्वशिष्ठो
देहमपरं लेभे॥ निमेरपि तच्छरीरमतिमनोहरतैलगंधादिभिरुपसंस्क्रियमाणं नैव क्लेदादिकं दोषमवाप सद्योमृतमिव तस्थौ॥

वि॰उ॰
९४
फ
३५

लज्जावत्यास्तस्याः शोधास्तिमप्यहं करोमि॥ यथा नैवमन्याप्यतिमर्यादस्खलना भविष्यतीति॥ अथ भगवान्पितामहस्तं कुमारं संनिवार्य
स्वयमुररीकृत्य तारां कथयद्वत्से कस्यायमात्मजः सोमस्याथ बृहस्पतेरिति॥ उक्तमात्मा सोमस्येति॥ ततः स्फुरद्दुग्धसितामलकपोल
कांतिर्भगवानुडुपतिरप्लिंप्य कुमारं साधु साधु वत्स प्रज्ञोसीति बुध इति नाम चक्रे॥ स चात्यात्मवैतद्यथा इडया आत्मजं पुरूरवस
मुत्पादयामास॥ सोपि पुरूरवास्तप्रतिष्ठानसीलोपि यज्ञातेज स्वीयं सत्यवादिनमतिरूपिणं मित्रावरुणशापान्मानुषलोके भुयावत्तत्व
मितिकृत्वा मतिरुर्वशी ददर्श॥ स दृष्टमात्रे यस्मिन्नपहाय मानमशेषमपास्य स्वर्गसुखाभिलाषं तेन मनस्कातमेवोपगतस्य॥ सोपि
चतामति घायित सकललोकस्त्रीकांतिसौकुमार्यलावण्यपगतिविलासप्रागल्भ्यादिगुणामवलोक्य तदा प्रभृति तच्चित्तवृत्तिर्बभूव
उभयपक्षपितृस्मन नखमनन्यहृदयपरिमक्तसमसमान्यप्रयोजनमभूत्॥ राजा प्रागल्भ्यांतमोह शंभुनामकामो स्मिप्रसीदानुराग
वशमनुरागमुद्रहेस्तु काल ज्ञावखंडितमुपुर्वशीमाह॥ भवतैवं पस्मिसमयपरिपालनं भवान्करोति॥ सा च्याहि मे समय मितिने
नृपश्चापुरम्प प्रदीत॥ सार्यन समीपे मणिकोरणकद्वयं पुत्र भूतं नापनेयं॥ भवांस्तु मया निर्मग्नो दृष्टव्यः घृतमात्रं च मम आहार इत्य
वमेवेति भूपतिराह॥ तया च सहावनिपतिरलकायां चित्ररथादिवने पद्मलपद्मखंडेषु मानसादिषु सरःसु अतिरमणीयेषु रममा
ण एकषष्टिवर्षाणानुदिनं प्रवर्द्धमानप्रमोदेनायत॥ उर्वशी च तदुपभोगाभ्यनुदिनं प्रवर्द्धमानानुरागा अमरलोकवासेपिनस्पृ
हांचकार॥ विना चोर्वश्या सुरलोकोप्सरसां सिद्धगंधर्वाणां च नातिरमणीयोभवत्॥ ततश्चोर्वशीपुरूरवसोः समयविदुषा विश्वावसुर्गंध
र्वसमवेतो निशि शयनोभ्याशादेकमुरणकं जहार॥ तस्य चाकाशे नीयमानस्योर्वशी शब्दमशृणोत्॥ आह च ममानाथायाः

राम
९४

र्यवान् ॥ कीर्त्तिते स्थिरकीर्त्तीनां तेषामपि संततिः ॥ प्रसादसुमुखस्त्वं मे ब्रह्मन्नाख्यातुमर्हसि ॥ पराशर उवाच ॥ श्रूयतां मुनिशार्दूल वं
शः प्रथिततेजसः ॥ सोमस्यानुक्रमात्ख्याता यत्रोर्वीपतयोऽभवन् ॥ अयं हि वंशोऽतिबलपराक्रमद्युतिशीलचेष्टावद्भिरतिगुणान्वितैर्नहुष
ययातिकार्त्तवीर्यार्ज्जुनादिभिर्भूपालैरलंकृतस्तमहं कथयामि श्रूयताम् ॥ अखिलजगत्स्रष्टुर्भगवन्नारायणस्य नाभिसरोजस
मुद्भवाब्जयोनेर्ब्रह्मणः पुत्रोऽत्रिरत्रेः सोमस्तं च भगवानब्जयोनिरशेषौषधिद्विजनक्षत्राणामाधिपत्येऽभ्यषेचयत् ॥ स राजसूयम
करोत् तत्प्रभावादत्युत्कृष्टाधिपत्याधिष्ठातृत्वाच्चैनं मद आविवेश ॥ मदावलेपाच्च सकलदेवगुरोर्बृहस्पतेस्तारां नाम पत्नीं जहार ॥ बहु
शश्च बृहस्पतिचोदितेन भगवता ब्रह्मणा चोद्यमानः सकलैश्च देवर्षिभिर्याच्यमानोऽपि न मुमोच तस्य हि बृहस्पतिद्वेषादुशना पार्ष्णि
ग्राहोऽभवत् ॥ अंगिरसः सकाशादुपलब्धविद्यो भगवान्रुद्रो बृहस्पतेः साहाय्यमकरोत् ॥ यतश्चोशना ततो हि जंभकुंभाद्याः समस्ता एव दै
त्यदानवनिकाया महान्तमुद्यमं चक्रुः ॥ बृहस्पतेरपि सकलदेवसैन्ययुतः सहायः शक्रोऽभवत् ॥ एवं च तयोरतीवोग्रः संग्रामस्तारानिमित्त
स्तारकामयो नामाभवत् ॥ ततश्च समस्तशस्त्राण्यसुरेषु रुद्रपुरोगमा देवा देवेषु चाशेषदानवा मुमुचुः ॥ एवं च देवासुराहवसंक्षोभक्षुब्धहृद
यमशेषमेव जगद्ब्रह्माणं शरणं जगाम ततश्च भगवानप्युशनसं शंकरमसुरान्देवांश्च निवार्य बृहस्पतये तारामदात् ॥ चान्तः
तां प्रसवामवलोक्य बृहस्पतिरप्याह ॥ नैष मम क्षेत्रे भवतान्यस्य सुतो धार्यः समुत्सृजैनमलमतिधार्ष्ट्येनेति ॥ सा च तेनैवमुक्तापतिव्रता भर्तृ
वचनात्तमिषीकास्तम्बे गर्भमुत्ससर्ज्ज स ॥ सस्तं कथयास्माकमिति सुभगे सोमस्याथ वा बृहस्पतेः पुत्रोऽयमिति पृष्टा तारा ह्रिया किंचिन्नो

वाच ॥ बहुशोऽप्यभिहिता यदासौ देवेभ्यो नाचचक्षे ॥ ततः स कुमारस्तां शप्तुमुद्यतः प्राह च दुष्टेऽम्ब कस्मान्मम तातं नाख्यासि अद्यैव ते लीक

विष्णु०
९५

95

स्वपुरं जगाम ॥ अतीतार्द्धरात्रिसमये विनिद्रश्च चिंतयन्नभोर्वशीसालोक्यप्राप्त्यर्थमग्निस्थालीगं[?]धर्वैर्दत्तां साच मयाटव्यां परित्यक्ता ॥ तदहं तत्र तदाहरणाय यास्यामीत्युत्थाय तत्राप्युपगम्य तेनाग्निस्थालीमपश्यन् शमीगर्भं चाश्वत्थमग्निस्थाने दृष्ट्वा चिंतयत् ॥ मयात्राग्निस्थाली निक्षिप्ता सा चाश्वत्थः शमीगर्भोऽभूत् ...कुर्वन्नायपुत्रो...पठन् ॥ पठतश्चांतरसंख्यान्येवांगुलानि श्चरणीभवत् ॥ तत्राग्निनिर्मथ्याग्नित्रयमाम्नायानुसारी भूत्वा जुहाव उर्वशीसालोक्यं वेदफलमभिसंहितवान् ॥ तेनैवाग्निविधिना बहुविधान् यज्ञानिष्ट्वा गंधर्वलोकानवाप्योर्वश्या सह वियोगं नावाप ॥ एकोग्निरादावभवत् ऐलेनत्वत्र मन्वंतरे त्रेता प्रवर्त्तितेति ॥ इति श्रीविष्णुपुराणे चतुर्थेंशे षष्ठोध्यायः ॥ पराशर उवाच ॥ तस्याप्यायुर्धीमानमावसुर्विश्वावसुः श्रुतायुः संज्ञाः षडभवन् पुत्राः ॥ अमावसोर्भीमो नाम पुत्रोऽभवत् ॥ भीमस्य कांचनः कांचनात्सुहोत्रस्तस्यापि जह्नुर्योसौ यज्ञवाटमखिलं गंगांभसा प्लावितमवलोक्य... ॥ जह्नोश्च सुजह्नुर्नाम पुत्रोऽभवत् तस्याप्यजकस्ततो बलाकाश्वस्तस्मात्कुशः कुशस्य कुशाम्बकुशनाभामूर्त्तरयो वसुश्चेति चत्वारः पुत्रा बभूवुः तेषां कुशाम्बः शक्रतुल्यो मे पुत्रो भवेदिति तपश्चचार ॥ तं चोग्रतपसमवलोक्य मा भवत्वन्योस्मत्तुल्यो वीर्येणेत्यात्मनैवास्येंद्रः पुत्रत्वमगच्छत् ॥ स गाधिर्नाम कौशिकोऽभवत् ॥ गाधिश्च सत्यवतीं कन्यामजनयत् तां च भार्गव ऋचीको वव्रे ॥ गाधिरप्यतिरोषणायातिवृद्धाय ब्राह्मणाय दातुमनिच्छन्नेकतः श्यामकर्णानामिन्दुवर्चसामनिलरंहसामश्वानां सहस्रं कन्याशुल्कमयाचत ॥ तेनाप्यृषिणा वरुणसकाशादुपलभ्याश्वतीर्थोत्पन्नं तादृशमश्वसहस्रं दत्तं ततस्तामृचीकः कन्यामुपयेमे ॥ ऋचीकश्च तस्याश्चरुमपत्यार्थं चकार ॥ तत्प्रसादितश्च तन्मात्रे क्षत्रवरपुत्रोत्पत्तये चरुमपरं साधयामास ॥ एष चरुर्भवत्या अयमपरश्चरुस्त्वन्मात्रा सम्यगुपयोज्य इत्युक्त्वा वनं जगाम ॥ उपयोगकाले च तां माता सत्यवतीमाह ॥ पुत्रि सर्व एवात्मनः

ए
स्य
र्थ

पुत्रः केनाप्यपहृियते कं शरणमुपयामीत्याकर्ण्य सहमाकाशे पुनरप्यनाथाहमभर्तृका कुपुरुषाश्रयेत्सार्त्तराविणी चोर्वशी राजानम

पगतीवरं दृष्ट्वा प्रवृत्तसमयानंतरमेवापक्रांता परित्यज्य वत्सवपुरणकौ गंधर्वाः सुरलोकमुपागताः॥ राजापि च तौ मेषावादा

यातिहृष्टमनाः स्वशयनमायातो नोर्वशीं ददर्श तां चापश्यन्नपगतवस्त्र एवोन्मत्तरूपो बभ्राम॥ कुरुक्षेत्रे चांभोजसरस्यन्याभिश्चत

सृभिरप्सरोभिः समेतामुर्वशीं ददर्श॥ ततश्चोन्मत्तरूपो जाजाये हे तिष्ठ स्वमनसि घोरे तिष्ठ वचसीत्यनेकप्रकारं सूक्तमवोचत् आ

ह चोर्वशी॥ महाराजालमनेनाविवेकचेष्टितेनांतर्वत्न्यहमब्दांते भवतात्रागंतव्यं॥ कुमारस्ते भविष्यत्येकां च निशामहं त्वया सह व

त्स्यामीत्युक्तः प्रहृष्टः स्वपुरमाजगाम॥ तासां चाप्सरसामुर्वशी कथयामास॥ अयं च पुरुषो येनाहमेतावंतं कालमनुरागाकृष्टमान

सा सहोषितेत्येवमुक्तास्ताश्चाप्सरस ऊचुः॥ साधु साध्वस्य रूपमनेन सहास्माकमपि सर्वकालमास्या भवेदित्यब्दे च पूर्णे स राजा तत्राज

गाम॥ कुमारं चायुषमस्मै चोर्वशी ददौ दत्त्वा चैकां निशां तेन राज्ञा सहोषित्वा पंचपुत्रोत्पत्तये गर्भमवाप॥ उवाच चैनं राजानमस्मत्प्रीत्या महा

राज सर्व एव गंधर्वा वरदाः संवृत्ता व्रियतां वर इत्याह॥ राजा विजितसकलारातिरविहतेंद्रियसामर्थ्यो बंधुमानमितबलकोशो नास्म

दस्माकमुर्वशीसालोक्यात्प्राप्यमस्ति॥ तदहमनया सहोर्वश्या कालं नेतुमभिलषामीत्युक्ते गंधर्वा राज्ञेऽग्निस्थालीं ददुः ऊचुश्चैनम

ग्निमाम्नायानुसारी भूत्वा त्रिधा कृत्वोर्वशीसलोकतामनोरथमुद्दिश्य सम्यग्यजेथाः॥ ततोऽवश्यमभिलषितमवाप्स्यसीत्युक्तस्तामग्नि

स्थालीमादाय जगामांतराटव्यां सोऽचिंतयदहो मेऽतिमूढतायदग्निस्थालीमयैषानीता नोर्वशीत्यथैनामटव्यामेवाग्निस्थालीं तत्याज

त्समद्स्तस्य पुत्रास्तपो वभूवुः ॥ गार्ग्यस्य शौनकश्चातुर्वर्ण्यप्रवर्त्तयिताभूत् ॥ काश्यस्य काशिराजस्ततो दीर्घतमाः पुत्रोभूत्
धन्वंतरिस्तु दीर्घतमसोभवत् स हि संसिद्धकार्य्यकारणः सकलसंभूतिष्वशेषज्ञानविद् भगवता नारायणेनातीतसंभूतौ त
स्मै वरो दत्तः ॥ काशिराजगोत्रेवतीर्य्य त्वमष्टधा सम्यगायुर्वेदं करिष्यसि यज्ञभागभुग्भविष्यसीत्यभिहितः तस्य च धन्वंत
रेः पुत्रः केतुमान्केतुमतो भीमरथस्तस्यापि दिवोदासो दिवोदासात्प्रतर्द्दनः स च भद्रश्रेण्यवंशविनाशनादशेषाः शत्रवोनेन जि
ता इति शत्रुजिदभवत् ॥ तेन च प्रीतिमतात्मपुत्रो वत्स वत्सेत्यभिहितः वत्सोभवत् ॥ सत्यपरतया ऋतध्वजसंज्ञामवाप
पुनश्च कुवलयाश्वनामानमश्वं लेभे ततः कुवलयाश्व इत्यस्यां पृथिव्यां प्रथितः ॥ तस्य च पुत्रोलर्को नामाभवद्यस्यायं श्लो
को गीयते ॥ षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च ॥ अलर्कादपरो नान्यो बुभुजे मेदिनीं युवा ॥ तस्याप्यलर्कस्य सन्नतिर्नामाभव
दात्मजस्ततः सुनीथस्तस्यापि सुकेतुस्तस्माच्च धर्मकेतुर्ज्जज्ञे ॥ ततश्च केतुस्तस्माद्विभुस्तत्तनयः सुविभुस्ततश्च सुकुमारस्तस्यापि धृ
ष्टकेतुस्ततश्च वीतिहोत्रस्ततश्च भार्गो भार्गस्य भार्गभूमिस्ततश्चातुर्वर्ण्यप्रवृत्तिरित्येते काश्यपाभूभृतः कथिताः रजेस्तु श्रूयतां सं
ततिरिति ॥ इति श्रीविष्णुपुराणे चतुर्थेंशे अष्टमोध्यायः ॥ पराशर उवाच ॥ रजेः पंचपुत्रशतान्यतुलबलपराक्रमवीर्य्यसाराण्यासन्
॥ देवासुरसंग्रामारंभे च परस्परवधेप्सवो देवाश्चासुराश्च ब्रह्माणं पप्रच्छुः ॥ भगवन्नस्माकमत्र विरोधे कतमः पक्षो जेता भविष्यतीत्या
ह ॥ भगवान्येषामर्थे रजिरात्तायुधो योत्स्यतीति ॥ अथ दैत्यैरुपेत्य रजिरात्मसाहाय्यदानायाभ्यर्थितः ॥ प्राह योत्स्येहं भवतामर्थे य एम
द्यहममरजयाइन्द्रो भविष्यामीत्याकर्ण्येतैरभिहितं नैवं वयमन्यथा वदिष्यामो यो यमस्माकमिंद्रः प्रह्लादस्तदर्थमेवा एहि

पुत्रमखिलगुणमखिलवंशातिगात्मजाया भ्रातृगुणश्लाघ्यतीयाद्भवतीति तदहमिमं त्वदर्थमसाधयं चरुं इमं मदीयं चरुमात्मनो मयोक्तं मत्पुत्रो

हि सकलभूमण्डलपरिपालनं कार्य्यं कियद्ब्राह्मणस्य बलवीर्य्यसंपदित्युक्त्वा सा स्वं चरुं मात्रे दत्तवती ॥ अथ वनादभ्यागम्य सत्यवतीमृषिरपश्य

द्याह देवि नातिपापे किमिदमकार्यं भवत्या कृतमतिरौद्रं ते वपुरालक्ष्यते नूनं त्वया त्वन्मात्रे संस्कृतश्चरुरुपयुक्तो न युक्तमेतन्मया हि तत्र च

यै सकलैश्वर्य्यशौर्य्यवीर्य्यबलसंपदारोपितास्त्वदीये चरावप्यखिलशान्तिज्ञानतितिक्षादिका ब्राह्मणगुणसंपदेतच्च विपरीतं कुर्व

न्त्यास्तवातिरौद्रास्त्रधारणनिष्ठः क्षत्रियाचारः पुत्रो भविष्यति तस्याश्चोपशमरुचिर्ब्राह्मणाचार इत्याकर्ण्यैव सा पादौ जग्राह ॥ प्रणि

पत्य चैनमाह ॥ भगवन्मयैतदज्ञानादनुष्ठितं प्रसादं मे कुरु मैवंविधः पुत्रो भवतु ॥ काममेवंविधः पौत्रो भवत्वित्युक्ते मुनिराहैवमस्त्वि

त्यनन्तरं च सा जमदग्निमजीजनत् ॥ तन्माता च विश्वामित्रं जनयामास सत्यवती च कौशिकी नाम नद्यभवत् ॥ जमदग्निरिक्ष्वाकुवंशो

द्भवस्य रेणोस्तनयां रेणुकामुपयेमे ॥ तस्यां चाशेषक्षत्रवंशहन्तारं परशुरामसंज्ञं भगवतः सकललोकगुरोर्नारायणस्यांशं ज

मदग्निरजीजनत् ॥ विश्वामित्रस्य पुत्रस्तु भार्गव एव शुनःशेफो देवैर्दत्तस्ततश्च देवरातनामाभवत्ततश्चान्ये मधुच्छन्दजयकृतदेवा

ष्टककच्छपहारीतकाख्या विश्वामित्रपुत्रा बभूवुः ॥ तेषां च बहूनि कौशिकगोत्राणि ऋष्यन्तरेषु वैवाह्यानि भवन्तीति ॥ इति श्रीवि

ष्णुपुराणे चतुर्थेंऽशे सप्तमोऽध्यायः ॥ पराशर उवाच ॥ पुरूरवसो ज्येष्ठः पुत्रो यस्त्वायुर्नामा स राहोर्दुहितरमुपयेमे ॥ तस्यां च पञ्च

पुत्रानुत्पादयामास ॥ नहुषक्षत्रवृद्धरम्भरजिसंज्ञास्तथैवानेनाः पञ्चमः पुत्रोऽभवत् ॥ क्षत्रवृद्धात्सुहोत्रः पुत्रोऽभवत् ॥ काश्यलाश्यग

वि॰पु॰
९७

भवंत॥ उशनसश्च दुहितरं देवयानीं वार्षपर्वणीं च शर्मिष्ठामुपयेमे॥ अत्रानुवंशश्लोको भवति॥ यदुं च तुर्वसुं चैव देवयानी व्यजा-
यत॥ द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी॥ काव्यशापाच्च कालेनैव ययातिर्जरामवाप॥ प्रसन्नशुक्रवचनाच्च स्वजरां संक्राम-
यितुं ज्येष्ठं पुत्रं यदुमुवाच॥ वत्स त्वन्मातामहशापादियमकालेनैव जरा ममोपस्थिता॥ तामहं तस्यैवानुग्रहाद्भवतः संचारयाम्येकं वर्ष-
सहस्रमतृप्तोऽस्मि विषयेषु त्वद्वयसा विषयानहं भोक्तुमिच्छामि॥ नात्र भवता प्रत्याख्यानं कर्तव्यमित्युक्तः॥ स यदुर्नैच्छत्॥ जरामादा-
तुं तं च पिता शशाप त्वयं त्वन प्रत्याख्यातस्तात् शशाप॥ अथ शर्मिष्ठातनयमशेषकनीयांसं तथैवाह स चाति प्रणतिः स बहु-
मानं पितरं प्रणम्य प्रसादोऽयमस्माकमित्युदारमभिधाय जरां जग्राह॥ स्वकीयं यौवनं स्वपित्रे ददौ॥ सोऽपि च पौरवं यौवनमासाद्य ध-
र्माविरोधेन यथाकामं यथाकालोपपन्नं यथोत्साहं विषयांश्चचार सम्यक् प्रजापालनमकरोत्॥ विश्वाच्या च सहोपभोगं भुक्त्वा कामा-
नां कामानामन्तमवस्यामीति अनुदिनं तन्मनस्को बभूवानुदिनं चोपभोगतः कामानतीव रम्यान्मेने॥ ततश्चैवमगायत न जातु
कामः कामानामुपभोगेन शाम्यति॥ हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते॥ यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः॥ एकस्यापि
न पर्याप्तं तस्मात्तृष्णां परित्यजेत्॥ यदा न कुरुते भावं सर्वभूतेषु पापकं॥ समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः॥ या दुस्त्यजा दुर्म-
तिभिर्या न जीर्यति जीर्यतः॥ तां तृष्णां संत्यजन्प्राज्ञः सुखेनैवाभिपूर्यते॥ जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः॥ धनाशा जी-
विताशा च जीर्यतोऽपि न जीर्यति॥ पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः॥ तथाप्यनुदिनं तृष्णा ममैतेषु हि जायते॥ तस्मादेना-
महं त्यक्त्वा ब्रह्मण्याधाय मानसं॥ निर्द्वन्द्वो निर्ममो भूत्वा चरिष्यामि मृगैः सह॥ पराशर उवाच॥ पूरोः सकाशादादाय जरां द-

व

राम
९७

यसु घस्र इत्युक्ता गतेषु सुरेषु॥ दैत्यैरप्यसौ चैवं पतिरेवमेवोक्तः तेनापि तथैवोक्ते दैत्यैरिंद्र त्वं भविष्यसीति समनंतरं रजिनापि देवसैन्य
सहायेनानेकैर्महाहवैस्तदशेषमसुरबलं निषूदितं॥ अथ जितारातिपक्षश्च देवेंद्रो रजिचरणयुगलमात्मशिरसा निपीड्याह॥ भय
त्राणदानान्नदानाद्भवानस्मत्पिताशेषलोकानामुत्तमो भवान् यस्याहं पुत्रस्त्रिलोकेंद्रः स चापि राजा प्रहस्याह॥ एवमेवास्तु अनतिक्रमणी
या हि वैरिपक्षादप्यनेकविधचाटुवाक्यगर्भा प्रणतिरित्युक्त्वा स्वपुरमाजगाम॥ शतक्रतुरपींद्रत्वं चकार स्वर्याते च रजौ नारदर्षिचो
दिताश्च रजिसुताः शतक्रतुमात्मपितृपुत्रमेचिराद्राज्यं याचितवंतः॥ अप्रदाने चाप्यवजित्येंद्रमतिबलिनः स्वयमिंद्रत्वं चक्रुः॥ तत
श्च बहुतिथे काले व्यतीते बृहस्पतिमेकांते दृष्ट्वा तमपहृतत्रैलोक्ययज्ञभागः शतक्रतुरुवाच बदरीफलमात्रमप्यर्हसि ममाप्यायना
य पुरोडाशखंडं दातुमित्युक्तो बृहस्पतिरुवाच यद्येवं त्वयाहं पूर्वमेव नोदितः स्यां तन्मया त्वदर्थं किमकर्तव्यमिति अल्पैरहोभिस्त्वां निजं पदं
प्रापयिष्यामीत्यभिधाय तेषामनुदिनमभिचारिकं बुद्धिमोहाय शक्रस्य तेजसोऽभिवृद्धये जुहाव॥ ते चापि तेन बुद्धिमोहेनाभिभूयमा
ना ब्रह्मद्विषो धर्मत्यागिनो वेदवादपराङ्मुखा बभूवुः॥ ततस्तानपेतधर्माचारानिंद्रो जघान॥ पुरोहिताप्यायिततेजसाश्च त्रिदिव
माक्रमत॥ एतदिंद्रस्य स्वयमेव च्यवनारोहणं श्रुत्वा पुरुषः स्वपदभ्रंशं दौर्गत्यं च नाप्नोति॥ रंभस्त्वनपत्योऽभवत्॥ क्षत्रवृद्धसुतः प्रतिक्ष
त्रस्तत्संजयस्तस्यापि जयस्तस्यापि जयस्तस्य च विजयस्तस्माच्च जज्ञे॥ कृतस्तस्यापि हर्यधनस्ततः सहदेवस्तस्मादहीनस्तस्य जयत्सेनः पुत्र
स्तस्य च संकृतिः पुत्रस्तु कृतधर्मा॥ इत्येते क्षत्रवृद्धस्य वंश्याः ततो नहुषवंशं प्रवक्ष्यामः॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे नवमोऽध्यायः॥ पराश
र उवाच॥ यतिर्ययातिः संयातिरायातिर्वियातिः कृतिसंज्ञाः नहुषस्य षट् पुत्रा महाबलपराक्रमा बभूवुः॥ यतिस्तु राज्यं नैच्छत् ययातिस्तु भूभृद

ग

विष्णु० ९८

३४

स्वनैहैकांत्तेस्यापिनः॥ यश्च पंचाशीतिवर्षसहस्रोपलक्षणकालावसाने भगवन्नारायणांशेन परशुरामेणोपसंहृतस्तस्य च पु
त्रशतप्रधानाः पंच पुत्रा बभूवुः॥ शूरशूरसेनवृषणमधुध्वजसंज्ञाः॥ जयध्वजात्तालजंघः पुत्रोभवत्तालजंघस्य तालजंघा
ख्यं पुत्रशतमासीत्॥ येषां ज्येष्ठो वीतिहोत्रः॥ तथान्यो भरतो भरताद्वृषो वृषस्य पुत्रो मधुरभवत्॥ तस्यापि वृष्णिप्रमुखं पुत्रशत
मासीत्॥ यतो वृष्णिसंज्ञामेतद्गोत्रमवाप मधुसंज्ञाहेतुश्च मधुरभवत्॥ यादवाश्च यदुनामोपलक्षणात्॥ इति श्रीविष्णुपुरा
णे चतुर्थेंशे एकादशोध्यायः॥ पराशर उवाच॥ क्रोष्टोश्च यदुपुत्रस्यात्मजो ध्वजिनीवान्॥ ततश्चातिस्ततो रुषंगुः रुषंगोश्चि
त्ररथस्तत्तनयः शशविंदुश्चतुर्दशमहारत्नश्चक्रवर्त्यभवत् तस्य च शतसहस्रं पत्नीनामभवत् दशलक्षसंख्याश्च पुत्रास्तेषां च पृ
थुयशाः पृथुकर्मा पृथुजयः पृथुकीर्तिः पृथुदानः पृथुश्रवाश्च षट्पुत्राः प्रधानाः॥ पृथुश्रवसश्च पुत्रस्तमस्तस्मादुशना यो
वाजिमेधानां शतमाजहार॥ तस्य च सितेषुर्नाम पुत्रोभूत् तस्यापि रुक्मकवचस्ततः परावृत् परावृतो रुक्मेषुपृथुरुक्म
ज्यामघपालितहरितसंज्ञाः पंचात्मजा बभूवुः॥ अत्राद्यापि ज्यामघस्य श्लोको गीयते॥ भार्यावश्यास्तु ये केचिद्भविष्यंत्यथवा मृताः
॥ तेषां तु ज्यामघः श्रेष्ठः शैव्यापतिरभून्नृपः॥ अपुत्रा तस्य सा पत्नी शैव्या नाम तथाप्यसौ॥ अपत्यकामोपि भयान्नान्यां भार्याम
विंदत॥ स त्वेकदा प्रभूततुरगरथसंमर्दातिदारुणे महाहवे युध्यमानः सकलमेवारातिचक्रमजयत् तच्चारातिचक्रमपा
स्तपुत्रकलत्रबंधुबलकोशं स्वमधिष्ठानं परित्यज्य दिशः प्रविद्रुतं तस्मिंश्च विद्रुतेतित्रासलोलायतलोचनयुगलं त्राहि त्राहि त्रा
त ताताम्ब भ्रातरित्याकुलविलापविधुरं राजकन्यारत्नमद्राक्षीत् तद्दर्शनाच्च तस्यामनुरागानुगतांतरात्मा स नृपोचिंतयत्॥ साध्विदं म

राम ९८

पपातेः २

त्वाच्चयौवनं॥ दिशि दक्षिणपूर्वस्यां सुर्वसुसमादिशत्॥ प्रतीच्यांचतथाद्रुह्यं दक्षिणायां ततोयदुं॥ उदीच्यांचतथैवानुं कृत्वामंडलिनोनृप॥ सर्वपृथ्वीपतिंपूरुं सोभिषिच्यययौवनं॥ इति श्री विष्णुपुराणे चतुर्थेंशे दशमोध्यायः॥ पराशर उवाच॥ अतः परं ययातेः प्रथमपुत्रस्य यदोर्वंशमहंकथयिष्यामि॥ तत्राशेषलोकनिवासिमनुष्यसिद्धगंधर्वयक्षराक्षसगुह्यककिंपुरुषाप्सरोरगविहगदैत्यदानवादित्यरुद्रवस्वश्विमरुद्देवर्षिद्विजर्षिभिर्मुमुक्षुभिर्धर्मार्थकाममोक्षार्थिभिस्तत्फललाभायसदाभिष्टुतोपरिच्छेद्यमाहात्म्यांशेनभगवाननादिनिधनोविष्णुरवततार॥ अत्रचश्लोकः यदोर्वंशंनरः श्रुत्वासर्वपापैः प्रमुच्यते॥ यत्रावतीर्णंविष्ण्वाख्यंपरं ब्रह्मनराकृति॥ सहस्रजित्क्रोष्टुनलनहुषसंज्ञाश्चत्वारोयदुपुत्राबभूवुः॥ सहस्रजित्सुतः शतजित्॥ तस्यहैहयवेणुहयास्त्रयःपुत्राबभूवुः॥ हैहयपुत्राधर्मः तस्यापिधर्मनेत्रस्ततःकुंतिः कुंतेः साहंजिस्ततश्चमहिष्मांस्तस्माद्भद्रश्रेण्यस्ततोदुर्दमस्तस्माद्धनकोधनकस्यकृतवीर्यकृताग्निकृतधर्मकृतौजसश्चत्वारः पुत्राः॥ कृतवीर्यात्कार्तवीर्योर्जुनः सप्तद्वीपपतिर्बाहुसहस्रो जज्ञे॥ योसौभगवदंशमत्रिकुलप्रसूतंदत्तात्रेयाख्यमाराध्यबाहुसहस्रमधर्मसेवानिवारणंसद्धर्मरक्षणंपृथिवीजयंधर्मतश्चानुपालनमरातिभ्योपराजयमखिलजगत्प्रख्यातपुरुषाच्चमृत्युमित्येतान्वरानभिलषितवांल्लेभे॥ तेनेयमशेषद्वीपवती पृथ्वी सम्यक्परिपालिता॥ दशयज्ञसहस्राण्यसावयजत्॥ तस्यचश्लोकोद्यापिगीयते॥ ननूनंकार्तवीर्यस्यगतिंयास्यंतिपार्थिवाः॥ यज्ञैर्दानैस्तपोभिर्वाप्रश्रयेणश्रुतेनवा॥ अनष्टद्रव्यतातस्य राज्येभवदेवं पंचाशीतिवर्षसहस्राणि॥ अव्याहतारोग्यश्रीबलपराक्रमोराज्यमकरोत्॥ महिष्मत्यांदिग्विजयाभ्यागतोनर्मदाजललावगाहनक्रीडासनिरतेनमदेनाकुलेनेनायत्नेनैवाशेषदेवदैत्यगंधर्वेशजेताभूत्तमहावलेपोपेतोरावणः पशुरिवबध्वा

वि॰ पु॰

वावृधः समाः॥ पुरुषाः षट्च षष्टिश्च षट्सहस्राणि चाष्ट च। ते मृतत्वमनुप्राप्ता बभ्रोर्देवावृधादपि॥ महाभोजस्त्वतिधर्मात्मा तस्यान्व
ये भोजा मार्त्तिकावता बभूवुः॥ वृष्णेः सुमित्रो युधाजिच्च पुत्रावभवतां ततश्चानमित्रस्तस्मान्निघ्नः निघ्नस्य प्रसेनसत्राजितौ॥ तस्य तु सत्राजितस्य भ
गवानादित्यः सखाभवत् एकदा त्वंभोधितीरसंश्रयः सूर्यं सत्राजित्तुष्टाव॥ तन्मनस्कतया च भास्वानभिष्टूयमानोऽग्रतस्तस्य त
स्थौ॥ ततस्स स्पष्टमूर्त्तिधरं चैनमालोक्य सत्राजितः सूर्यमाह॥ यथैव व्योम्नि वह्निपिंडोपमं त्वामहमपश्यं तथैवाद्याग्रतो गतमप्यत्र न किंचि
द्भगवता प्रसादीकृतं विशेषमुपलक्षयामीत्येवमुक्तो भगवता सूर्येण निजकंठादुन्मुच्य स्यमंतकनामा महामणिरवतार्य्यैकां
ते न्यस्तः ततस्तमाताम्रोज्वलह्रस्ववपुषमीषदापिंगलनयनमादित्यमद्राक्षीत्॥ कृतप्रणिपातस्तवादिकं सत्राजितमाह भगवा
न्वरमस्मत्तोऽभिमतं वृणीष्वेति॥ स च तदेव मणिरत्नमयाचत॥ स चापि तस्मै तं दत्वा वियति स्वधिष्ण्यमारुरोह॥ सत्राजितोप्यमल
मणिरत्नसनाथकंठतया सूर्य इव तेजोभिरशेषदिगंतराण्युद्भासयन् द्वारकां विवेश॥ द्वारकावासिजनस्तु तमायांतमवे
क्ष्य भगवंतमनादिपुरुषं पुरुषोत्तममवनिभारावतारणायांशेन मानुषरूपधारिणं प्रणिपत्याह॥ भगवन्भगवंतमयं नूनं द्रष्टु
मायात्यादित्य एष प्रहस्य च जनानाह॥ भगवान्नायमादित्यः सत्राजितोयमादित्यदत्तं स्यमंतकाख्यं महामणिरत्नं बिभ्रदत्रायाति
तदेनं विस्रब्धाः पश्यंत इत्युक्तास्ते ययुः॥ स च तं स्यमंतकं महामणिमात्मनिवेशने चक्रे॥ प्रतिदिनं च तन्मणिरत्नमेवं वरमष्टौ कनक
भारान्स्रवति॥ तत्प्रभावाच्च सकलस्यैव राष्ट्रस्योपसर्गावृष्टिव्यालाग्निचौरदुर्भिक्षादिभयं न भविष्यति अच्युतोपि दिव्यरत्नमुग्रसेनस्य
भूपतेर्योग्यमेतदिति लिप्सां चक्रे॥ गोत्रभेदभयाच्छक्तोपि न जहार॥ सत्राजितोप्यच्युतो मामयाचयिष्यतीत्यवगत्य रत्नलोभात्स्व

९९

राम

मापत्यविरहितस्य वंध्याभर्त्तुः सांप्रतं विधिनापूर्वसंस्कारां कन्यारत्नमुपपादितं तदेतदुद्वहोत्सवचैनां स्यंदनमारोप्य स्वमधिष्ठानं नयामि ॥ तथै
वेत्याशैव्यमयाहमनुज्ञातः समुद्वहामीमथैनां रथमारोप्य स्वनगरमागच्छत् ॥ विजयिनं च राजानमशेषपौरभृत्यपरिजनामात्यसमवेता
शैव्या द्रष्टुमधिष्ठानद्वारमागता ॥ सा चावलोक्य राज्ञः सव्यपार्श्ववर्त्तिनीं कन्यामीषदुद्भूतामर्षस्फुरदधरपल्लवा राजानमवोचदतिचप
लचित्तात्र स्यंदने केयमारोपितेत्यसावपि अनालोचितोत्तरवचनोतिभयात्तामाह ॥ स्नुषा ममेयमित्यथैनं सैव्योवाच ॥ नाहं प्रसूता
पुत्रेण नान्यापत्न्यभवत्तव ॥ स्नुषासंबंधवणेषा कतमेन सुतेन ते ॥ पराशरउवाच ॥ इत्याकर्ण्येर्ष्याकोपकलुषितविवेकतया
दुरुक्तपरिहारार्थमिदमवनीपतिराह ॥ यस्ते जनिष्यत्यात्मजस्तस्यैषमनागतमेव भार्या निरूपितेत्याकर्ण्योद्भूतमृदुहासा तथेत्या
ह ॥ प्रविवेश च राजा महाधिष्ठानमित्यनंतरं चातिशुद्धलग्नहोरांशकावयवोक्तं कृतजन्म पुत्रालापगुणाद्वयसः परिणाममुपगता
पि सैव्या स्वल्पैरेवाहोभिर्गर्भमवाप ॥ कालेन च कुमारमजीजनत् ॥ कुंतेर्वृष्णिः वृष्णेर्निवृत्तिः दशार्हस्ततश्च व्योमा तस्माज्जी
मूतस्तस्यापि विकृतिस्ततश्च भीमरथस्तस्मान्नवरथस्तस्माद्दशरथस्ततश्च शकुनिस्तत्तनयः करंभिः करंभेर्देवरातोभवत्तस्माद्देव
क्षत्रस्तस्य मधुर्मधोः कुरुवत्सस्ततश्चानुरनुतः पुरुहोत्रो जज्ञे ॥ ततस्तांशुस्तस्माच्च सत्वतः सत्वतादेते सात्वता इत्येतां ज्यामघसंततिं स
म्यक्छ्रद्धान्वितः श्रुत्वा सर्वपापैः प्रमुच्यते ॥ इति श्रीविष्णुपुराणे चतुर्थेंशे द्वादशोध्यायः ॥ पराशरउवाच ॥ भजिनभजमानदिव्यांध
कदेवावृधमहाभोजवृष्णिसंज्ञाः सात्वतस्य पुत्रा बभूवुः ॥ भजमानस्य निमिकृकणवृष्णयः ॥ तथान्ये द्वैमात्राः शतजित्सहस्रजिदयुतजित्
संज्ञाः ॥ देवावृधस्यापि बभ्रुः पुत्रोभवत् तयोश्चायं श्लोको गीयते ॥ यथैव शृणुमो दूरात्संपश्यामस्तथांतिकात् ॥ बभ्रुः श्रेष्ठो मनुष्याणां देवैर्दे

वि॰पु॰
१०
100

तिमुद्दश्यमाणास्तामुरनिक्रमणो न च मधुरिपोरसौ बिलमंतविलेसंजातनाशंप्राप्तोभविष्यतीत्यन्यथा॥ तस्यजीवतःकथमेतावंतिदि-
नानिशत्रुजयेलग्नस्तेपोभवतीतिकृताध्यवसाया द्वारकामागत्यहतःकृष्णइतिकथयामासुः॥ तद्बांधवाश्चतत्कालोचितमखि-
लमुपरतक्रियाकलापंचक्रुः॥ तत्र चास्ययुध्यमानस्यातिश्रद्धदत्तविशिष्टपात्रोपयुक्तान्नतोयादिनाकृष्णस्यबलप्राणपुष्टि-
रभूत॥ इतरस्यानुदिनमतिगुरुपुरुषभेद्यमानस्यातिनिष्ठुरप्रहारपातपीडिताखिलावयवस्यनिराहारतयाचबलहानिरभू-
त॥ निर्द्दितिश्च भगवताजांबवान्प्रणिपत्यव्याजहार॥ असुरासुरयक्षगंधर्वराक्षसादिभिरप्यखिलैर्भगवान्नशक्यः किमुताव-
वनिगोचरैरल्पवीर्यैर्नरैः॥ नरावयवभूतैश्चतिर्यग्योन्यनुसृतिभिः किंपुनरस्मद्विधैरवश्यंभगवतोस्मत्स्वामिनोनारायण-
स्यसकलजगत्परायणस्यांशेनभगवताभवितव्यमित्युक्तस्तस्मैभगवानवनीभारावतारमखिलमाचचक्षे॥ प्रीत्याभिव्यंजि-
तकरतलस्पर्शनेनेनमपगतयुद्धखेदंचकार॥ सचप्रणिपत्यैनंपुनरपिप्रसाद्यजांबवतींनामकन्यांगृहागमनार्घभूतांग्राह-
यामास॥ स्यमंतकमणिमपिप्रणिपत्यतस्मैददौ॥ अच्युतोप्रणिपत्यंतस्मादग्राह्यमपितन्मणिरत्नमात्मसंशोधनायजग्राह॥
सहचजांबवत्याद्वारकामाजगाम॥ भगवदागमनोद्भूतहर्षोत्कर्षस्यचद्वारकावासिजनस्यकृष्णावलोकनात्तत्क्षणमेवाति-
परिणतवयसोपिनवयौवनमिवाभवत॥ दिष्ट्यादिष्ट्येतिसकलयादवाःस्त्रियश्चसभाजयामासुः॥ भगवा-
नपियथानुभूतमशेषंयादवसमाजेयथावदाचचक्षे॥ स्यमंतकंचसत्राजिताय दत्त्वामिथ्याभिशस्तिविशुद्धिमवाप॥ जांब-
वतींचांतःपुरेनिवेशयामास॥ सत्राजितोपिमयास्याभूतमलिनमारोपितमितिजातसंत्रासःस्वसुतांसत्यभामांभगवतेभार्यां

राम
१०

रव

भ्रात्रे प्रसेनाय तद्रत्नमदात्॥ तच्च शुचिना ध्रियमाणमशेषमेव सुवर्णस्रावादिकं गुणमुत्पादयत्यन्यथा धारयंतमेव हंतीत्यप्रसेनो ऽपि
प्रसेनः कंठसक्तेन तेन स्यमंतकेनाश्वमारुह्याटव्यां मृगयामगच्छत्॥ तत्र च सिंहाद्वधमवाप साश्वं तं निहत्य सिंहो ऽप्यमलं मणिर
त्नमास्याग्रेणादाय गंतुमभ्युद्यतः॥ ऋक्षाधिपतिना जांबवता दृष्टो घातितश्च॥ जांबवानप्यमलं तन्मणिरत्नमादाय स्वबिलं प्रविवे
श॥ सुकुमारकसंज्ञाय च बालकाय क्रीडनकमकरोत्॥ अनागच्छति तस्मिन्प्रसेने कृष्णो मणिरत्नमभिलषितवान्न च प्राप्तवान्
नूनमेतदस्य कर्म नान्येन प्रसेनो हत इत्यखिल एव यदुलोकः परस्परं कर्णाकर्णि कथयन्॥ विदितलोकापवादवृत्तांतश्च भगवा
न्यदुसैन्यपरिवारः प्रसेनाश्वपदवीमनुससार॥ ददर्श चाश्वसमवेतं प्रसेनं सिंहेन विहितमशेषजनपरमध्ये च सिंहपददर्शन
कृतशुद्धिः सिंहपदमनुससार॥ ऋक्षपतिविनिहतं च सिंहमप्यल्पे भूमिभागे दृष्ट्वा ततश्च तद्रत्नगौरवादृक्षस्यापि पदान्यनुययौ
॥ गिरितटे च सकलमेव यदुसैन्यमवस्थाप्य तत्पदानुसारी ऋक्षबिलं प्रविवेश॥ अर्द्धप्रविष्टश्च धात्र्याः सुकुमारकमुल्लापय
न्त्या वाणीं शुश्राव॥ सिंहः प्रसेनमवधीत्सिंहो जांबवता हतः॥ सुकुमारक मा रोदीस्तव ह्येष स्यमंतकः॥ इत्याकर्ण्य चोपलब्ध
स्यमंतको ऽन्तः प्रविष्टः सुकुमारक्रीडनकीकृतं च धात्र्या हस्ते तेजोभिर्जाज्वल्यमानं स्यमंतकं ददर्श॥ तं च स्यमंतका
भिलाषिचक्षुषमपूर्वपुरुषमागतं समवेक्ष्य धात्री त्राहि त्राहीति व्याजहार॥ तदार्तनादश्रवणानंतरं चामर्षपूर्णहृदयः स जां
बवानाजगाम॥ तयोश्च परस्परमुद्धतामर्षयोर्युद्धमेकविंशतिदिनान्यभवत्॥ ते च यदुसैनिकास्तत्र सप्ताष्टदिनानि तन्निष्क्रां

वि०पु०
१९२

101

रिकंपितजगत्त्रयेणासुरवनितावैधव्यकारिणा प्रबलारिचक्राप्रतिहतचक्रेण चक्रेणाभरसमुदितनयनावलोकि
ताखिलविलासशातनेनातिगुरुवैरिवारणकर्षणमवष्टितमहिमोरुसीरेण सीरिणा च सहसकलं जगदुद्धानाममरवरा
णामपि योद्धुं समर्थः किमुताहं तदन्यतः शरणमभिलष्यतामित्युक्तः शतधनुराह ॥ यद्यस्मत्परित्राणाय समर्थो भव
तामेनमवगच्छतितदयमस्मत्स्मान्मणिः संहरत्वेगामित्येदमुक्तः सोप्याह ॥ यद्यस्यायामवस्थायां नकस्यचिद्
वान्कथयिष्यतीति तदहमेनं ग्राहयिष्यामि ॥ तथेत्युक्ते चाक्रूरस्तन्मणिरत्नं जग्राह ॥ शतधनुरप्यातुलवेगां शतयोजन
वाहिनीं वडवामारूह्यापक्रान्तः शैब्यसुग्रीवमेघपुष्पवलाहकाश्वचतुष्टयमुक्तस्यन्दनस्थितौ बलदेववासुदेवौ त
मनुप्रयातौ ॥ सा च वडवा योजनशतं मार्गं गता पुनरपि वाह्यमाना मिथिलावनोद्देशे प्राणानुत्ससर्ज ॥ शत
धनुरपि तां परित्यज्य पदातिरेवाद्रवत् ॥ कृष्णोपि बलभद्रमाह ॥ तावदत्रैव स्यन्दने भवता स्थेयमहमेनमधमाचारं पदाति
रेव पदातिस्सन्नुगम्य यावद्घातयामि ॥ अत्र हि भूभागे दृष्टदोषा हया नैते ऽश्वा भवतेमं भूमिभागमुल्लंघनीयाः ॥ तथे
त्युक्त्वा बलभद्रो रथ एव तस्थौ ॥ कृष्णोपि द्विक्रोशमात्रं भूमिभागमनुसृत्य दूरस्थितस्यैव चक्रं क्षिप्त्वा शतधनुषः शिरश्छि
च्छेद ॥ तच्छरीराम्बरादिषु च बहुप्रकारमन्विष्यन्नपि स्यमन्तकमणिं नावाप यदा तदोपगम्य बलभद्रमाह ॥ वृथैवास्माभिः घा
तितः शतधन्वा न प्राप्तमखिलजगत्सारभूतं तन्महारत्नं स्यमन्तकाख्यमित्याकर्ण्योद्भूतकोपो बलदेवो वासुदेवमाह ॥ धि
क् त्वां यस्त्वमेवमर्थलिप्सुरेतच्च ते भ्रातृत्वान्मया क्षान्तं तदयं पन्थाः स्वेच्छया गम्यतां न मे द्वारकया न त्वया न चाशेषबन्धुभिः कार्यं

राम
१९२

दद्दौ॥ तां चाक्रूरकृतवर्म्मशतधनुःप्रमुखा यादवाः प्राग्वरयां बभूवुः॥ ततस्तत्प्रदानादवज्ञातमिवात्मानं मन्यमानाः सत्राजिता वैरानु
बंधं चक्रुः॥ अक्रूरकृतवर्म्मप्रमुखाश्च शतधन्वानमूचुः॥ अयमतिदुरात्मा सत्राजितो योस्माभिर्भवता चार्थितोप्यात्मजामस्मान्
भवंतं चाविगणय्य कृष्णाय दत्तवान्॥ तदलमनेन जीवता घातयित्वैनं तन्महारत्नं त्वया किं न गृह्यते॥ वयमभ्युपपत्स्यामो यद्यच्यु
तस्तवोपरि वैरानुबंधं करिष्यतीत्येवमुक्तस्तथेत्यसावप्याह॥ जतुगृहदग्धानां पांडुतनयानां विदितपरमार्थोपि भगवान्दुर्यो
धनप्रयत्नशैथिल्यार्थं कुल्यकरणाय वारणावतं गतः॥ गते च तस्मिन्सुप्तमेव सत्राजितं शतधन्वा जघान मणिरत्नं चाददे॥
पितृवधामर्षपूर्णा च सत्यभामा शीघ्रं स्यंदनमारुह्य वारणावतं गत्वा भगवते हं प्रतिपादितेत्यक्षांतिमता शतधन्वनास्मत्पिता
व्यापादितस्तच्च स्यमंतकमणिरत्नमपहृतं यदिदमस्माकमवमाननं तदालोच्य यथायुक्तं तत्क्रियतामिति कृष्णमाह॥ तया चैवमु
क्तः परितुष्टांतःकरणोपि कृष्णः सत्यभामाममर्षताम्रलोचनः प्राह॥ सत्ये ममैषावमाननाहमेतां तस्य दुरात्मनः सहिष्ये न ह्यनु
लंघ्य वरपादपं तत्कृतनीडाश्रयिणो विहंगा वध्यंते॥ तदलमस्मत्पुरतः शोकप्रेरितवाक्यपरिकरेणेत्युक्त्वा द्वार
कामभ्येत्यैकांते बलदेवं वासुदेवः प्राह॥ मृगयागतं प्रसेनमटव्यां मृगपतिर्जघान॥ सत्राजितोप्यधुना शतधन्वना निधनं प्रापि
तः तदुभयविनाशात्तन्मणिरत्नमावाभ्यां सामान्यं भविष्यति॥ तदुत्तिष्ठारुह्यतां रथः शतधनुर्निधनायोद्यमं कुर्वित्यभिहितस्त
थेति समन्विच्छितवान्॥ कृतोद्योगौ च तावुभावुपलभ्य शतधन्वा कृतवर्म्माणमुपेत्य पार्ष्णिपूरणकर्म्मनिमित्तमचोदयदाह चै
नं कृतवर्म्मा नाहं बलदेववासुदेवाभ्यां सह विरोधायालमित्युक्तश्चाक्रूरमचोदयत्सोप्याह॥ नहि कश्चिद्भगवता पादप्रहारप

विष्णु०
१०२

यावज्जीवं ब्राह्मणाय गां दत्तवती॥ तस्यामयमक्रूरः श्वफल्काज्जज्ञे तस्यैवं गुणमिथुनादुत्पत्तिः॥ कथमस्मिन्नपक्रान्ते दुर्भिक्षमारका
द्युपद्रवान्न भविष्यन्तीति॥ तदयमानीयतामलमतिगुणवत्यपराधान्वेषणेनेति॥ यदुवृद्धस्यान्धकस्यैतद्वचनमाकर्ण्य केशवोग्रसेन
बलभद्रपुरोगमैर्यदुभिः कृतापराधतितिक्षुभिरभयं दत्वा श्वाफल्किः स्वपुरमानीतस्तत्र चागतमात्र एव तस्य स्यमन्तकस्यानुभावाद
नावृष्टिमारकदुर्भिक्षव्याद्युपद्रवोपशमा बभूवुः॥ कृष्णश्चिन्तयामास स्वल्पमेतत्कारणं यदयं गान्दिन्यां श्वफल्केनाक्रूरो जनितः सुमहांश्च
चायमनावृष्टिमारकदुर्भिक्षव्याद्युपद्रवप्रतिषेधकारी प्रभावः॥ तन्नूनमस्य सकाशे स महामणिः स्यमन्तकाख्यस्तिष्ठति तस्य ह्येवंविधाः
भाः प्रभावाः श्रूयन्ते॥ अयमपि च यज्ञादनन्तरमन्यत्क्रतुं तस्मादनन्तरमन्यद्यज्ञान्तरं यजतीत्यल्पोपादानं चास्य असंशयमत्रा
सौ वरमणिस्तिष्ठतीति कृताध्यवसायोऽन्यत्प्रयोजनमुद्दिश्य सकलयादवसमाजमात्मगृह एवाचीकरत्॥ तत्रोपविष्टेष्वखिलेषु
यदुषु पूर्वं प्रयोजनमुपन्यस्य पर्यवसिते च तस्मिन्॥ प्रसङ्गान्तरपरिहासकथामक्रूरेण सह कृत्वा जनार्दनस्तमक्रूरमाह॥ दानप
ते जानीम एव वयं यथा शतधन्वना तदिदमखिलजगत्सारभूतं स्यमन्तकमणिरत्नं भवतः समर्पितं तदशेषराष्ट्रोपकारकं भवतः सका
शे तिष्ठति॥ तिष्ठतु सर्व एव वयं तत्प्रभावफलभुजः किन्त्वेष बलभद्रोऽस्मानाशङ्कितवांस्तदस्मत्प्रीतये दर्शयस्वेत्यभिहितः॥
स्वरत्नः सोऽचिन्तयत्किमत्रानुष्ठेयमन्यथा चेद्ब्रवीम्यहं तत्केवलाम्बरतिरोधानमन्विष्यन्तो रत्नमेते द्रक्ष्यन्तीति विरोधो न क्षम इ
ति संचिन्त्य तमखिलजगत्कारणभूतं नारायणमाहाक्रूरः॥ भगवन्ममैतत्स्यमन्तकरत्नं शतधनुषा समर्पितमपगते च तस्मि
न्नद्य श्वः परश्वो वा भगवान्याचयिष्यतीत्येतावन्तं कालमतिकृच्छ्रेणाधारयाम्॥ अस्य च धारणक्लेशेनाहमशेषोपभोगेष्वसङ्गि-
मनाः

एम
१०२

मलमलमेतिममभाग्यतोलोकशपथैरितिविपन्नथानेनसप्रसाद्यमानोपिन्नतस्थौविदेहपुरीप्रविवेश॥जनकराजश्चार्घपूर्वकमेनं
गृहंप्रवेशयामास॥सतत्रैवतस्थौवासुदेवोपिद्वारकामाजगाम॥यावच्चजनकराजगृहेबलभद्रोवतस्थेतावद्धार्तराष्ट्रोदुर्योधन
स्तत्सकाशाद्गदाशिक्षामशिक्षत॥अथवर्षत्रयेणबभ्रूग्रसेनप्रभृतिभिर्यादवैर्नतद्रत्नंकृष्णेनापहृतमितिकृतावगतिभिर्वैदे
हपुरंगत्वाबलदेवःसंप्रत्याय्यद्वारकामानीतः॥अक्रूरोप्युत्तममणिसमुद्भवसुवर्णध्यानपरःसततंयज्वानीजे॥सवनगतौहि
क्षत्रियवैश्यौनिघ्नन्ब्रह्महाभवतीत्येवंप्रकारंदीक्षाकवचंप्रविष्टएवतस्थौद्विषष्टिवर्षाण्येवंतन्मणिप्रभावान्नोपसर्गमालाना-
राष्ट्रेतत्रोपसर्गव्यालानावृष्टिमरकाद्युपद्रवाबभूवुः॥अथयदैवंबलभद्रोग्रसेनसमवेतोमंत्रयद्भूगमानुरगमरिकेतनः॥
कियदिदमेकदैवप्रचुरोपद्रवागमनमेतदालोच्यतामित्युक्तेऽन्धकनामायदुवृद्धःप्राह॥यएषाक्रूरस्यपिताश्वफल्कोयत्रयत्रा
भूत्तत्रतत्रदुर्भिक्षमकालमरणानावृष्ट्यादिकंचनाभूत्॥काशिराजस्यविषयेत्वनावृष्ट्याश्वफल्कोनीयततस्तत्क्षणाद्देवोववर्ष॥का
शिराजपत्न्याश्चगर्भेकन्यारत्नंपूर्वमासीत्साचपूर्णेपिप्रसूतिकालेनैवनिश्चक्राम॥एवंचतस्यगर्भस्यद्वादशवर्षाणिनिष्क्रामतोययुः
काशिराजस्यभार्यात्मजांगर्भस्थामाह॥पुत्रिकस्मान्नजायसेनिष्क्रम्यतामास्यंतेद्रष्टुमिच्छाम्येनांचमातरंकिमितिचिरंक्लेशयसीत्युक्ता
गर्भस्थैवंव्याजहार॥यद्येकैकांगांदिनेदिनेब्राह्मणेभ्यःप्रयच्छसितदाहमन्यैस्त्रिभिर्वर्षैरस्माद्गर्भान्निष्क्रमिष्यामीत्येतद्वच
नमाकर्ण्यराजादिनेदिनेब्राह्मणायगांददौसापितावताकालेनजाताततस्तांपितागांदिनीतिनामचकार॥तांचगांदिनींक
न्यांश्वफल्कायोपकारिणेगृहागतायार्घभूतामदात्॥साचगांदिनीप्रतिदिनं

न्नामभवन्नद्योपमंगुयन्नपम्रद्युविसारिमेजयधपरि ह्वत्रोपहन्त्र शत्रुघ्नारिमर्द्दन धर्म्मधृग दृष्टधर्म्मगंधमोजवाहप्रतिजवाख्याः पु
त्राः सुताराख्या च कन्या॥ देववानुपदेवश्चाक्रूरपुत्रौ॥ पृथुविपृथु प्रमुखाश्चित्रकस्य पुत्रा वहवोभवन्॥ कुकुरभाजमा
नशुचिकंवलवर्हिषाख्यास्तथांधकस्यापि चत्वारः पुत्राः कुकुराद्धृष्टस्तस्मात्कपोतरोमा ततश्च विलोमा तस्मादपि तुंवुरु
सखोभवत्सप्तकश्चंद्नोदकदुंदुभिस्ततश्चाभिजित्ततः पुनर्वसुस्तस्याप्याहुकः पुत्रश्चाहुकी च कन्या॥ आहुकस्य देवकोग्र
सेनौ द्वौ पुत्रौ॥ देववानुपदेववसुदेवदेवरक्षिताः देवकस्यापि चत्वारः पुत्रास्तेषां वृकदेवोपदेवा देवरक्षिता॥ श्रीदेवाशांतिदे
वा सहदेवकी च सप्त भगिन्यस्ताश्च सर्वा एव वसुदेव उपयेमे॥ उग्रसेनस्यापि कंसन्यग्रोधसुनामकं कशंकुशंकुसुभूमिराष्ट्र
पालयुद्धतुष्टिसुभिमत्संज्ञाः पुत्राः॥ कंसा कंसवती सुतनू राष्ट्रपाली कंका चोग्रसेनस्य तनूजाः॥ भजमानाच्च विदूरथः पुत्रोभवद्वि
दूरथाच्छूरः शूराच्छमी शमिनः प्रतिक्षत्रस्तस्मात्स्वयंभोजस्ततश्च हृदिकस्तस्यापि कृतवर्म्मा शतधनुर्देवमीढाख्याः पुत्रा व
भूवुः॥ देवमीढस्य शूरः शूरस्यापि शूरस्य मारिषा नाम पत्न्यभवत्तस्यां चासौ दशपुत्रानजनयत्॥ वसुदेवपूर्वान्वसुदेवस्य जात
मात्रस्यैव गेहे भगवदंशावतारमव्याहतदृष्ट्या पश्यद्भिर्द्देवैर्द्दिव्यानकादुंदुभयश्च वादितास्ततस्तदैवानकदुंदुभिसंज्ञा
मवाप॥ तस्यापि देवभाग देवश्रवाष्टकककुच्चक्रवत्सधारकसृंजयश्यामशमीकगंडूषसंज्ञा नव भ्रातरोभवन्॥ पृथा श्रुतदे
वा श्रुतकीर्त्तिः श्रुतश्रवा राजाधिदेवी च वसुदेवादीनां पंच भगिन्योभवन्॥ शूरस्य च कुंतिर्नाम सखाजस्तस्मै चापुत्राय पृथामा
त्मजां विधिना शूरो दत्तवान्॥ तां च पांडुरुवाह तस्यां च धर्म्मानिलेंद्रैर्युधिष्ठिरभीमसेनार्जुनाख्यास्त्रयः पुत्राः समुत्पा

मानसोनवेधिनातत्सुवर्णकालमप्येतावन्तमप्यशेषराष्ट्रोपकारिधारयितुंनशक्तोसीतिमांभवान्संसत्सुइत्यात्मनानचोदितं॥तदिदंस्य
मंतकमणिंतस्मिन्यदुसमाजेमुमोच॥मुक्तमात्रेणतेनातिकांत्यातदखिलमास्थानमुद्योतितमपाह॥अक्रूरःसएषमणिर्यःशत
धन्वास्माकंसमर्पितः॥यस्यायंसएवगृह्णात्वितितमालोक्यसर्वयादवानांसाधुसाध्वितिविस्मयमनसांवाचोश्रूयंत॥तमालोक्यातीव
बलभद्रोममायमच्युतेनैवसामान्यःसमन्विच्छितइतिकृतस्पृहोभूत्॥ममेदंपितृधनमितीवसत्यभामास्पृहांचकार॥बलसत्यभा
मावलोकनात्कृष्णोप्यात्मानंगोचक्रांतरावस्थितमिवमेने॥सकलयादवसमक्षंचाक्रूरमाह॥एतन्मणिरत्नमात्मशोधनायैतेषांयदूनां
मयादर्शितमेतच्चममबलभद्रस्यचसामान्यंपितृधनंचैतत्सत्यभामायाश्चैतदेतत्तुसर्वकालशुचिनाब्रह्मचर्यगुणवताध्रियमाणमशे
षराष्ट्रोपकारकमशुचिनाध्रियमाणमाधारमेवहंत्यतोहमस्यषोडशस्त्रीसहस्रपरिग्रहादसमर्थोधारणे कथंचैतत्सत्यभामा
स्वीकरोत्वार्य्यबलभद्रेणापिमदिरापानाद्यशेषोपभोगपरित्यागःकथंकार्य्यस्तदयंयदुलोकोयंबलभद्रःससत्याचैवं
त्वांदानपतेप्रार्थयामः॥एतद्भवानेवधारयितुंसमर्थः॥त्वद्गृहस्थितंचास्यराष्ट्रस्योपकारकंभवानशेषराष्ट्रनिमित्तमेतत्पूर्ववद्धारयत्व
न्यथावक्तव्यमित्युक्तोदानपतिस्तथेत्याह॥जग्राहचतन्महारत्नं॥ततःप्रभृत्यक्रूरःप्रकटेनैवतेनातिजाज्वल्यमानेनात्मकंठासक्तेना
दित्यइवांशुमालीचचार॥इत्येतद्भगवतोमिथ्याभिशस्तिक्षालनंयःस्मरतिनतस्यकदाचिदल्पापिमिथ्याभिशस्तिर्भवति॥अव्याह
तेंद्रियश्चाखिलपापमोक्षमवाप्नोति॥इतिश्रीविष्णुपुराणेचतुर्थेंशेत्रयोदशोध्यायः॥पराशरउवाच॥अनमित्रस्यपुत्रःशिनि
र्नामाभवत्॥तस्यापिसत्यकःसत्यकात्सात्यकिर्युयुधानापरनामा॥ततोपिसंजयस्तत्पुत्रश्चकुणिःकुणेर्युगंधरइत्येतेशैनेयाः॥अनमित्रस्य
वान्वयेवृष्णिस्तस्माच्छ्वफल्कस्तत्प्रभावःकथितः॥श्वफल्कस्यान्यःकनीयांश्चित्रकोनामभ्राता॥श्वफल्कादक्रूरोगांदि
त

वि॰पु॰
१०४
104

णीदशाननत्वेभोगसंपदमवाप॥नचास्तासिन्नादिनिधनेपरमब्रह्मभूतेभगवत्यनालंबनीकृतेमनसस्तल्लयं॥दशाननत्वेप्यनं
गपराधीनतयाजानकीसमासक्तचेतसोदाशरथिरूपधारिणस्तद्रूपदर्शनमेवासीन्नायमच्युत॥इत्यासक्तिर्विपद्यतोंतःकरणस्य
मानुषबुद्धिरेवकेवलमस्याभूत्पुनरागतोच्युतविनिपातनमात्रफलमखिलभूमंडलश्लाघ्यचेदिराजकुलजन्माव्याहतबलैश्वर्य्यं
शिशुपालत्वेचावाप॥तत्राखिलानामेवभगवन्नाम्नांकारणान्यभवंस्ततस्तत्कालकृतानांतेषामशेषाणामेवाच्युतनाम्ना
मनवरतमनेकजन्मसंवर्द्धितविद्वेषानुबंधिचित्तोविनिंदनसंतर्जनादिषूच्चारणमकरोत्॥तच्चरूपमुत्फुल्लपद्मदलामला
क्षमत्युज्ज्वलपीतवस्त्रधार्य्यमलकिरीटकेयूरकटकोपशोभितमुदारपीवरचतुर्बाहुशंखचक्रगदाधरमतिप्ररूढवैरानुभावा
दटनभोजनस्नानासनशयनादिष्वशेषावस्थांतरेष्वनैवापययावस्यात्मचेतसस्ततस्तमेवाक्रोशेषूच्चारयंस्तमेवहृदयेधा
रयन्नात्मवधायभगवद्धस्तचक्रांशुमालोज्ज्वलमक्षयतेजस्वरूपंपरमब्रह्मभूतमपगतद्वेषादिदोषंभगवंतमद्राक्षीत्॥तावच्च
भगवच्चक्रेणाशुव्यापादितःतत्स्मरणदग्धाखिलाघसंचयोभगवतांतेनैवांतमुपनीतस्तस्मिन्नेवलयमुपययौ॥एतत्तवाभिहित
मयंहिभगवान्कीर्त्तितःसंस्मृतश्चद्वेषानुबंधेनाप्यखिलसुरासुरादिदुर्लभफलंप्रयच्छतीतिकिमुतसम्यग्भक्तिमतां॥वसुदेवस्यान
कदुंदुभेःपौरवीरोहिणीमदिराभद्रादेवकीप्रमुखाबह्व्यःपत्न्योभवन्॥बलभद्रसारणदुर्मदादीन्पुत्रान्रोहिण्यामानकदुंदुभिरुत्पाद
यामास॥बलभद्रोपिरेवत्यांनिशठोल्मुकौपुत्रावजनयत्॥मार्ष्टिमार्ष्टिमच्छिशिशुसत्यधृतिप्रमुखाःसारणात्मजाः॥भद्राश्वभद्रबा
हुदुर्दमभूताद्याद्यारोहिण्याःकुलजाः॥नंदोपनंदकृतकाद्यामदिरायास्तनयाभद्रायाश्चोपनिधिगदाद्याः॥पौरव्यांकौशिकमेकमजन

टू:

राम
१०४

रिता॥ पूर्वमरूढायाश्च भगवता भास्वता कानीनः कर्णो नाम पुत्रो जनयत॥ तस्याश्च सपत्नी माद्री नामाभवत्॥ नासत्यदस्राभ्यां तस्यामपि न
कुलसहदेवौ पाण्डोः पुत्रौ जनितौ॥ श्रुतदेवां तु वृद्धशर्म्मा नाम कारूष उपयेमे॥ तस्यां च दन्तवक्रो नाम महासुरो जज्ञे॥ श्रुतकीर्त्तिमपि कैकेय
राज उपयेमे॥ तस्यां सन्तर्द्दनादयः कैकेयाः पंच पुत्रा बभूवुः॥ राजाधिदेव्यामावन्त्यौ विन्दानुविन्दौ जज्ञाते॥ श्रुतश्रवामपि चेदिराजो दमघोषना
मोपयेमे॥ तस्यां शिशुपालमुत्पादयामास॥ स हि पूर्वमप्युदारविक्रमसंपन्नो दैत्यानामादिपुरुषो हिरण्यकशिपुरभवत्॥ यश्च भगवतास
कललोकगुरुणा घातितः॥ ततः पुनरप्यक्षतवीर्यशौर्यसंपत्पराक्रमगुणः समाक्रान्तसकलत्रैलोक्येश्वर्यप्रभावो दशाननोऽभवत्॥ बहु
लोकोपभुक्तविविधभोग्यो भगवत्सकाशाद्वाप्तशरीरपातोद्भवपुण्यफलो भगवता राघवरूपिणा सोपि निधनमुपपादितः॥ पश्चाच्चेदिरा
जदमघोषस्यात्मजः शिशुपालनामाभवत्॥ शिशुपालत्वेपि भगवतोपि भूभारावतारणायावतीर्णांशस्य पुंडरीकनयनाख्यस्योपरि द्वेषानु
बंधमतितरां चकार॥ भगवता च निधनमुपनीतः॥ तत्रैव परमात्मभूते मनस एकाग्रतया सायुज्यमवाप॥ भगवान् हि प्रसन्नो हि यथाभिल
षितं ददाति अप्रसन्नोपि विनिघ्नन् दिव्यमनुपमं स्थानं प्रयच्छति॥ इति श्रीविष्णुपुराणे चतुर्थेंशे चतुर्दशोध्यायः॥ मैत्रेय उवाच॥ हिरण्य
कशिपुत्वे च रावणत्वे च विष्णुना॥ अवाप निहतो भोगानप्राप्यानमरैरपि॥ न लयं तत्र चैवेह संप्राप्तः स कथं पुनः॥ निहतः शिशुपालत्वे सायुज्यं
शाश्वते हरौ॥ एतदिच्छाम्यहं श्रोतुं सर्वधर्मभृतां वर॥ कौतूहलपरेणैतत्पृष्टो मे वक्तुमर्हसि॥ पराशर उवाच॥ दैत्येश्वरस्य वधायाखिल
लोकोत्पत्तिस्थितिविनाशकारिणा पूर्वं तनुग्रहणं कुर्वता नृसिंहरूपमाविष्कृतं॥ तत्र हिरण्यकशिपोर्विष्णुरयमित्येतन्न मनस्यभून्निरतिशय
पुण्यजातसंभूतमेतत्सत्वमिति रजोद्रेकप्रेरितैकाग्रमतिस्तद्भावनायोगात्ततोवाप्तवधहेतुकीं निरतिशयामेवाखिलत्रैलोक्याधिक्यधारि

वि०पु०
१०५

व्यवस्थितः ॥ निर्दग्धस्याखिलस्तस्य बंधुस्सर्वयादवाः ॥ प्रसूतिं सर्ववीराणां च शृणोति नरः सदा ॥ स सर्वपातकैर्मुक्तो विष्णुलोकं प्रपद्य
ते ॥ इति श्री विष्णुपुराणे चतुर्थेंशे पंचदशोध्यायः ॥ पराशर उवाच ॥ इत्येष समासेन मे कथितो यदुवंशस्तुर्वसोर्वंशमथ शृणु
वंशो वह्निस्तस्यात्मजो वह्नेर्गोभानुस्ततस्त्रैभानुस्तस्माच्च करंधमः ॥ तस्यापि मरुत्तः सोनपत्योभवत्तश्च पौरवं दुष्कंतं पुत्रमकल्पयदेवं
ययातिशापात्तुर्वसुवंशो वंशः पौरवमेव वंशमाश्रितवान् ॥ इति श्री विष्णुपुराणे चतुर्थेंशे षोडशोध्यायः ॥ पराशर उवाच ॥ द्रुह्योस्तु तन
यो बभ्रुः सेतुः सेतुपुत्र आरद्धो नामा तस्यात्मजो गंधारस्तस्य च धर्मो धर्माच्च घृतो घृताद्दुर्दमः ततः प्रचेताः ॥ प्रचेतसः पुत्रशतमधर्मबहुला
नां म्लेच्छानमुदीच्यानामाधिपत्यमकरोत् ॥ इति श्री विष्णुपुराणे चतुर्थेंशे सप्तदशोध्यायः ॥ पराशर उवाच ॥ ययातेश्चतुर्थस्य
पुत्रस्यानोः सभानर ॥ चक्षुः परमेषुसंज्ञास्त्रयः पुत्रा बभूवुः ॥ सभानरपुत्रः कालानरः कालानरात्संजयः संजयात्पुरंजयस्तस्माज्जनमेज
यस्तस्मान्महाशालस्तस्माच्च महामनाः ॥ तस्मादुशीनरतितिक्षू द्वौ पुत्रावुत्पन्नौ ॥ उशीनरस्यापि शिविनृगनवकृमिदर्वाख्याः पंच पुत्रा ब
भूवुः ॥ वृषदर्भसुवीरकैकयमद्रकाश्चत्वारः शिविपुत्राः ॥ तितिक्षोरप्युशद्रथः पुत्रोभूत्तस्यापि हेमो हेमस्य सुतपाः सुतपसो बलिर्यस्य क्षे
त्रे दीर्घतमसा अंगवंगकलिंगसुह्मपौंड्राख्यं बालेयं क्षत्रमजन्यत ॥ तन्नामसंततिसंज्ञाश्च पंचविषया बभूवुः ॥ अंगादनपानस्तस्मात्
दिविरथनामा तस्यापि धर्मरथस्ततश्चित्ररथो रोमपादसंज्ञो यस्य दशरथः सखा ॥ अजपुत्रो दशरथः शांतां नाम कन्यामनपत्याय
दुहितृत्वे युयोज ॥ रोमपादाच्चतुरंगस्तस्माच्च पृथुलाक्षस्ततश्चंपो यश्चंपां निवेशयामास ॥ चंपस्य हर्यंगो नामात्मजो भूत् हर्यंगाद्भद्र
रथस्ततो बृहद्रथो बृहत्कर्मा बृहद्भानुर्बृहद्भानोर्बृहन्मनास्तस्यापि जयद्रथो जयद्रथाद्ब्रह्मक्षत्रांतरा

१०५

यदानकदुंदुभेर्देवक्यामपि कीर्त्तिमत्सुषेणोदायिभद्रसेनऋजुदासभद्रदेवाख्याः षट् पुत्रा जज्ञिरे ॥ तांश्च सर्वानेव कंसो घातितवान् ॥ अ
नंतरं च सप्तमं गर्भमर्द्धरात्रे भगवत्प्रहिता योगनिद्रा रोहिण्या जठरमाकृष्य नीतवती कर्षणाच्चासावपि संकर्षणाख्यामगमत् ॥ ततश्च
सकलजगन्महातरुमूलभूतो भूतातीतभविष्यादिसकलसुरासुरमुनिजनमनसामप्यगोचरोऽब्जभवप्रमुखैः प्रणम्यावनिभारहरणा
य प्रसादितो भगवाननादिमध्यो देवकीगर्भे समवततार वासुदेवः ॥ तत्प्रसादविवर्द्धमानाभिमाना च योगनिद्रा नंदगोपपत्न्या य
शोदाया गर्भमधिष्ठितवती ॥ सुप्रसन्नादित्यचंद्रादिग्रहा व्यालादिभयं स्वस्थमानसमखिलमेवैतज्जगदपास्ताधर्म्ममभवत् ॥ तस्मिं
श्च पुंडरीकनयने जाते च तेनाखिलमेवैतत्सन्मार्गवर्त्ति जगदक्रियत ॥ भगवतोप्यत्र मनुष्यलोकेवतीर्णस्य षोडशसहस्राण्ये
कोत्तरशताधिकानि भार्याणामभवन् ॥ तासां च रुक्मिणीसत्यभामाजांबवतीजालहासिनीप्रमुखा ह्यष्टौ पत्न्यः प्रधाना ॥ तासु तासां च
युतानि लक्षं च पुत्राणां भगवानखिलमूर्त्तिरनादिमानजनयत् ॥ तेषां प्रद्युम्नचारुदेष्णसांबादयस्त्रयोदश प्रधानाः ॥ प्रद्युम्नोपि रुक्मिणो
स्तनयां रुक्मवतीं नामोपयेमे ॥ तस्यामस्यानिरुद्धो जज्ञे ॥ अनिरुद्धोपि रुक्मिण एव पौत्रीं सुभद्रां नामोपयेमे ॥ तस्यामस्य वज्रः पुत्रोभवत्
वज्रस्य प्रतिबाहुस्तस्यापि सुचारुः ॥ एवमनेकशतसहस्रपुरुषसंख्यस्य यदुकुलस्य पुरुषसंख्या वर्षशतैरपि वक्तुं न शक्यते ॥ यतो हि श्लो
काविमावत्र चरितार्थौ ॥ तिस्रः कोट्यः सहस्राणामष्टाशीतिशतानि च ॥ कुमाराणां गृहाचार्याश्चापयोगेषु ये रताः ॥ संख्यानं यादवानां
कः करिष्यति महात्मनां ॥ यत्रायुतानामयुतलक्षेणास्ते सदाहुकः ॥ देवासुरहता ये तु दैतेयाः सुमहाबलाः ॥ ते चोत्पन्ना मनुष्येषु जनोप
द्रवकारिणः ॥ तेषामुत्सादनार्थाय भुवि देवा यदोः कुले ॥ अवतीर्णाः कुलशतं यत्रैकाभ्यधिकं द्विजाः ॥ विष्णुस्तेषां प्रमाणं च प्रभुत्वे च

ए२

ततश्च बृहत्कर्म्मा ततश्च जयद्रथस्तस्मादपि विश्वजित्ततश्च सेनजित् रुचिराश्वकाश्यपदृढहनुवत्सहनुसंज्ञाः सेनजितः पुत्राः ॥ रुचिरात्तु पृ-
थुषेणः पृथोः सुकृतिः सुकृतेर्विभ्राजस्ततश्चाणुहोऽयं शुकदुहितरं कृत्वीनामोपयेमे ॥ अणुहाद्ब्रह्मदत्तस्ततश्च विष्वक्सेनो विष्वक्सेनादु-
दक्सेनस्ततो भल्लाटस्तस्यात्मजो द्विमीढो द्विमीढस्य तु यवीनरः तस्यापि धृतिमांस्तस्मात्सत्यधृतिस्ततश्च दृढनेमिस्तस्माच्च
सुपार्श्वस्ततः सुमतिस्ततश्च सन्नतिमान् सन्नतिमतः कृतः पुत्रोऽभूद्यं हिरण्यनाभो योगमध्यापयामास ॥ यश्च चतुर्विंशतिं प्रा-
च्यसामगानां संहिताश्चकार ॥ कृताच्चोग्रायुधो येन प्राचुर्येण नीपक्षयः कृतः ॥ उग्रायुधात्क्षेम्यः क्षेम्यात्सुवीरस्तस्माच्च नृपुंजयस्त-
स्माच्च बहुरथः ॥ इत्येते पौरवाः ॥ अजमीढस्य नीलिनी नाम पत्नी तस्यां नीलसंज्ञः पुत्रोऽभवत् ॥ तस्मादपि शान्तिः शान्तेः सुशान्तिः सुशान्तेः
पुरुजानुस्तस्माच्चक्षुस्ततश्च हर्यश्वो हर्यश्वान्मुद्गलसृंजयबृहदिषुयवीनरकांपिल्याः ॥ पंचानामेषां विषयाणां रक्षणायालमेते म-
त्पुत्रा इति पित्राभिहिताः पांचालाः ॥ मुद्गलाच्च मौद्गल्याः क्षत्रोपेता द्विजातयो बभूवुः ॥ मुद्गलाद्बध्र्यश्वो बध्र्यश्वाद्दिवोदासोऽहल्या च
मिथुनमभूत् ॥ गौतमादहल्यायां शतानन्दोऽभूत् ॥ शतानन्दात्सत्यधृतिर्धनुर्वेदान्तगो जज्ञे ॥ सत्यधृतेस्तु वराप्सरसमुर्वशीं दृष्ट्वा रेत-
स्कन्नं शरस्तम्बे पपात ॥ तच्च द्विधागतमपत्यद्वयं कुमारः कन्या चाभूत् ॥ मृगयामुपयातः शन्तनुर्दृष्ट्वा कृपया जग्राह ॥ ततः स कुमारः कृ-
पः कन्यका कृपी चाश्वत्थाम्नो जननी द्रोणपत्न्यभवत् ॥ दिवोदासस्यापि मित्रयोश्च्यवनो नाम राजा च्यवनात्सुदासस्तस्यापि सौदासः
ततः सहदेवस्तस्यापि सोमकः सोमकाज्जन्तुः पुत्रशतज्येष्ठोऽभवत् ॥ तेषां यवीयान्पृषतः पृषताद्द्रुपदस्तस्माद्धृष्टद्युम्नस्ततो धृष्टकेतु
अजमीढस्यान्य ऋक्षो नाम पुत्रोऽभवत् ॥ ऋक्षात्संवरणः सुतोऽभवत् ॥ संवरणाच्च कुरुः य इदं धर्मक्षेत्रं कुरुक्षेत्रं चकार ॥ सुधनुर्जह्नुप-

106

रा

श्च

तसंभूत्यांपत्न्यां विजयन्नामपुत्रमजीजनत्॥ विजयश्च धृतिपुत्रमवाप तस्यापि धृतव्रतः पुत्रोभूत्॥ धृतव्रतात्सत्यकर्म्मा सत्यकर्म्मणस्त्वधि
रथायोसौगंगांगतोमंजूषागतं पृथापविद्धं कर्णं पुत्रमवाप॥ कर्णाद्वृषसेनइत्येते आङ्गा अतश्चपूरुवंशं श्रोतुमर्हसि॥ इति श्रीविष्णुपुरा
णे चतुर्थेंशे अष्टादशोध्यायः॥ पराशरउवाच॥ पुरोर्जनमेजयः पुत्रस्तस्यापिप्रचिन्वान्प्रचिन्वतः प्रवीरस्तस्मान्मनस्युर्मनस्योरभयंदोस्ता
स्युधुम्नस्ततोवरुक्षवस्ततः संयातिः संयातेरहंयातिस्ततोरौद्राश्वः॥ ततश्चऋतेयुकक्षेयुस्थंडिलेयुघृतेयुजलेयुस्थलेयुधर्म्मेयुः सन्नतेयुवनेयु
नामानोरौद्राश्वस्यदशात्मजाबभूवुः॥ ऋतेयोरंतिनारः पुत्रोभूत् तंसुमप्रतिरथं ध्रुवंचाप्यमतिमान्पुत्रानवाप॥ अप्रतिरथस्यापिकण्वः
पुत्रोभूत्तस्यापिमेधातिथिर्यतः काण्वायनाद्विजाबभूवुः॥ अंसोरंतिनः पुत्रोभूत्ततोदुष्यन्ताद्याश्चत्वारः पुत्राबभूवुः॥ यन्नामहेतुर्द्देवैःश्लोकोगी
यते॥ माताभस्त्रापितुः पुत्रोयेनजातः सएवसः॥ भरस्वपुत्रंदुष्यन्तमावमंस्थाः शकुन्तलां॥ रेतोधाः पुत्रउन्नयतिनरदेवयमक्षयात्॥ त्वंचा
स्याधातागर्भस्यसत्यमाहशकुंतलेति॥ भरतस्यपत्नीत्रयेनवपुत्राबभूवुः॥ नैतेममानुरूपाइत्यभिहितास्तन्मातरोजघ्नुः॥ परित्यागभया
त्तन्नोस्यवितथेपुत्रजन्मनिपुत्रार्थिनोमरुत्सोमयाजिनोदीर्घतमसःपार्ष्ण्यपास्ताद्बृहस्पतिवीर्य्याद्उतथ्यपत्न्यांममतायांसमुत्पन्नोभरद्वाजा
ख्योनामपुत्रोमरुद्भिर्द्दत्तः॥ अस्यापिनामनिर्वचनः श्लोकः पठ्यते॥ मूढेभरद्वाजमिमंभरद्वाजंबृहस्पते॥ यातौयदुक्त्वापितरौभरद्वाजस्त
तस्त्वयमिति॥ भरद्वाजश्चतस्यवितथेपुत्रजन्मनिमरुद्भिर्द्दत्तस्ततोवितथसंज्ञामवाप॥ वितथस्यापिमन्युः पुत्रोभूद्बृहत्क्षत्रमहावीर्य्यनर
गर्गाश्चाभवन्मन्युपुत्राः॥ नरस्यसंकृतिः संकृतेर्गुरुप्रीतिरंतिदेवौ॥ गर्गाच्चशिनिस्ततश्चगार्ग्याः शैन्याः क्षत्रोपेताद्विजातयोबभूवुः॥ महा
वीर्य्याद्दुरुक्षयोनामपुत्रोभवत्॥ तस्यत्र्यारुणिः पुष्करिणोकपिलश्चपुत्रत्रयमभूत्॥ तच्चत्रितयमपिपश्चाद्विप्रतामुपजगाम॥ बृहत्क्ष
त्रस्यसुहोत्रः॥ सुहोत्राद्धस्तीयइदंहस्तिनपुरमावासयामास॥ अजमीढद्विमीढपुरुमीढस्यान्यः पुत्रोबृहदिषुः॥ बृहदिषोर्बृहद्धनुः

विष्णु०
१०७

107

एयंपुजगाम॥ तदाश्रममुपगतश्चतमवनिपतिपुत्रं देवापिमुपतस्थुस्ते ब्राह्मणा वेदवादानुबद्धानि वचांसि राज्यमग्रजेन कर्त्तव्यमि
त्यर्थवंति तमूचुरसावपि देवापिर्वेदवादविरोधयुक्तिदूषितमनेकप्रकारं तानाह॥ ततस्ते ब्राह्मणाः शंतनुमूचुरागच्छ भो राजन्न
लमत्रातिनिर्बंधेन प्रशांत एवासावनावृष्टिदोषः॥ पतितोयमनादिकालमभिहितवेदवचनदूषणोच्चारणात्पतिते चाग्रजे
नैव परिवेत्ता भवतीत्युक्तः शंतनुः स्वपुरमागम्य राज्यमकरोत्॥ वेदवादविरोधवचनोच्चारणदूषिते च तस्मिन् देवापौ तिष्ठति ज्ये
ष्ठभ्रातरि खिलसस्यनिष्पत्तये ववर्ष भगवान्पर्जन्यः॥ बाह्लीकस्य सोमदत्तः पुत्रोभवत्॥ सोमदत्तस्यापि भूरिभूरिश्रवशलसंज्ञा
स्त्रयः पुत्रा बभूवुः॥ शंतनोरमरनद्यां जाह्नव्यामुदारकीर्त्तिरशेषशास्त्रार्थविद्भीष्मः पुत्रोभूत्॥ सत्यवत्यां च चित्रांगदविचित्रवी
र्यौ पुत्रावुत्पादयामास शंतनुः॥ चित्रांगदस्तु बाल एव चित्रांगदेनैव गंधर्वेणाहवे निहतः॥ विचित्रवीर्योपि काशिराजतनये अं
बालिकांबिके उपयेमे॥ तदुपभोगातिखेदाच्च यक्ष्मणा गृहीतः पंचत्वमगमत्॥ सत्यवतीनियोगाच्च मत्पुत्रः कृष्णद्वैपायनो
मातुर्वचनमनतिक्रमणीयमिति॥ विचित्रवीर्यक्षेत्रे धृतराष्ट्रं पांडुं तत्प्रहितभुजिष्यायां च विदुरमुत्पादयामास॥ धृतराष्ट्रोपि
दुर्योधनदुःशासनादिप्रधानं पुत्रशतं गांधार्यामुत्पादयामास॥ पांडोरप्यरण्ये मृगयायामृषिशापोपहतप्रजननसामर्थ्यस्य धर्मवायुशक्रै
र्युधिष्ठिरभीमसेनाश्चुतसोमः श्रुतकीर्त्तिरर्जुनाच्छ्रुतानीकोनकुलाच्छ्रुतकर्म्मा सहदेवार्जुनाः कुंत्यां नकुलसहदेवौ चाश्विभ्यां
माद्र्यां च पुत्राः समुत्पादिताः॥ तेषां च द्रौपद्यां पंच पुत्रा बभूवुः॥ युधिष्ठिरात्प्रतिविंध्यो भीमसेनात्॥ अपरे च पांडवानामात्मजास्तद्यथा॥

राम
१०७

रीत्तितप्रमुखाः कुरोः पुत्रा बभूवुः ॥ सुधनुषः सुहोत्रस्तस्माच्च्यवनाः कृतकस्ततश्चोपरीचरो वसुस्ततो बृहद्रथप्रत्यग्रसत्यककुपस्तं
वमावेलमत्स्यप्रमुखाः वसोः पुत्राः सप्त जायंत ॥ बृहद्रथात्कुशाग्रः कुशाग्राद्वृषभो वृषभात्पुष्पवांस्तस्मात्सत्यहितस्तस्मात्सुम
नास्तस्य च जंतुः ॥ बृहद्रथाच्चान्योपि खंडद्वयजन्मा जरया संधितो जरासंधनाम ॥ तस्मात्सहदेवः सहदेवात्सोमापिस्ततश्च श्रुत
श्रवा इत्येते मागधा भूपालाः ॥ इति श्री विष्णुपुराणे चतुर्थेंऽशे ऊनविंशोऽध्यायः ॥ पराशर उवाच ॥ परीक्षितस्तु जनमेजयश्रुतसेनोग्रसे
नभीमसेनाश्चत्वारः पुत्राः ॥ जह्नुस्तु सुरथो नामात्मजो बभूव ॥ तस्य विदूरथः विदूरथस्य सार्वभौमः सार्वभौमाज्जयसेनः ॥ तस्मादा
राधीतस्ततश्चायुतायुरयुतायोरक्रोधनस्तस्माद्देवातिथिस्ततश्च ऋक्षः ऋक्षाद्भीमसेनस्ततश्च दिलीपो दिलीपात्प्रतीपः ॥ तस्यापि देवा
पिशांतनुबाह्लीकसंज्ञास्त्रयः पुत्रा बभूवुः ॥ देवापिर्बाल एवारण्यं विवेश ॥ शांतनुस्तु महीपालोऽभवत् ॥ अयं च तस्य श्लोकः ॥ य
यं यं कराभ्यां स्पृशति जीर्णं यौवनमेति सः ॥ शांतिं चाप्नोति येनाग्र्यां कर्मणा तेन शांतनुः ॥ तस्य शांतनो राष्ट्रे द्वाद
शवर्षाणि देवो न ववर्ष ततश्चाशेषराष्ट्रविनाशमवेक्ष्यासौ राजा ब्राह्मणान्पृच्छत् ॥ कस्मादस्मद्राष्ट्रे देवो न वर्षति को ममापरा
धः ॥ ततस्तेनमूचुरग्रजस्य ते हेयमवनिस्त्वया भुज्यते परिवेत्ता लमित्युक्तः ॥ स राजा पुनस्तानपृच्छत् किं मयात्र विधेयमिति ॥ तत
स्ते पुनरप्यूचुः यावद्देवापिर्न पतनादिभिर्दोषैरभिभूयते ॥ तावदेतत्तस्यार्हं राज्यं तदलमनेन तस्मै दीयतामित्युक्ते मंत्रिप्रवरेण
अश्मसारिणा तत्र तपस्विनो देवापिर्विरोधवक्तारः प्रयुक्ताः तैरस्यास्ति ऋजुमतेर्महीपतिपुत्रस्य बुद्धिर्वेदमार्ग
प्रसारिणः क्रियंते ॥ राजा च शांतनुर्द्विजगणैः सह वने गत्वा ब्राह्मणाननयत्ततः कृत्वा पूर्वजराज्यप्रदानाय

वि०पु०
१०८

म॥ क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यते कलौ॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे एकविंशोऽध्यायः॥ पराशर उवाच॥ अ-
तश्चैक्ष्वाकवो भविष्याः पार्थिवाः कथ्यन्ते॥ वृहद्बलस्य पुत्रोभूद्बृहत्क्षत्रस्तस्मादुरुक्षयो वत्सव्यूहस्ततश्च प्रतिव्योम॥ तस्यापि
दिवाकरस्तस्मात्सहदेवः॥ सहदेवाद्बृहदश्वस्ततः स्वर्भानुस्तस्य च प्रतीताश्वस्तस्यापि सुप्रतीकस्ततश्च मरुद्देवो मरुद्देवात्
सुनक्षत्रस्तस्मात् किन्नरस्ततोऽन्तरिक्षस्तस्मात्सुवर्णस्ततश्चामित्रजित्ततश्च बृहद्राजस्तस्यापि धर्मी॥ धर्मिणः कृतंजयः कृ-
तंजयात्संजयस्तस्माच्छाक्यः॥ शाक्याच्छुद्धोदनस्तस्माद्राहुलस्ततस्सुशेनजित्ततश्च कुंडलस्तस्मादपि सुरथः तत्पुत्रश्च

३

सुमित्रो पश्चिमस्त्वेवो बृहद्बलान्वया नृपाः॥ अत्रानुवंशश्लोकः॥ इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति॥ यतस्तं प्राप्य राजा-
नं संस्थां प्राप्स्यति वै कलौ॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे द्वाविंशतितमोऽध्यायः॥ पराशर उवाच॥ मागधानां बार्हद्रथानां भा-

108

विनामनुक्रमं कथयामि॥ अत्र हि वंशे महाबला जरासंधप्रधाना बभूवुः॥ जरासंधस्य सहदेवः सहदेवात्सोमापिस्तस्याच्छ्रुतश्रवास्त- ता
स्यापि अयुतायुस्ततश्च निरमित्रः॥ ततस्तत्तनयः सुनक्षत्रस्तस्मादपि बृहत्कर्मा ततश्च सेनजित्तस्मात् श्रुतंजयः श्रुतंजयाद्विप्रजय-
नस्य च पुत्रः शुचिर्नाम भविष्यति॥ तस्यापि क्षेम्यः ततश्च सुव्रतः सुव्रताद्धर्मस्ततश्च सुश्रमस्ततो दृढसेनः॥ ततः सुमतिस्तस्मात्सु-
बलः सुबलात्सुनीथो भविता॥ ततः सत्यजित्ततो विश्वजित्तस्यापि रिपुंजयः॥ इत्येते बार्हद्रथा भूपतयो वर्षसहस्रमेकं भविष्यन्ति॥ इति
श्रीविष्णुपुराणे चतुर्थेंऽशे त्रयोविंशतितमोऽध्यायः॥ पराशर उवाच॥ योऽयं रिपुंजयो नाम बार्हद्रथोऽन्त्यस्तस्य सुनिको नामामात्यो भ-
विष्यति॥ स चैनं स्वामिनं हत्वा स्वपुत्रं प्रद्योतनामानमभिषेक्ष्यति॥ तस्यापि पालकनामा पुत्रो भविता ततश्च विशाखयूपस्तत्पुत्रो

एम
१०८

यौधेयी युधिष्ठिरा देवकं नाम पुत्रमवाप हिडंबा घटोत्कचं भीमसेनात्पुत्रं प्राप्तवती काशी च भीमसेनादेव सर्वगं पुत्रमवाप ॥ सह

देवाच्च विजया सुहोत्रं नाम पुत्रं प्राप्तवती करेणुमत्यां च नकुले ॥ निरामित्रं पुत्रमजीजनत ॥ अर्जुनस्यापि उलूप्यां नागकन्यायामिरा

वान्नाम पुत्रो भवत ॥ मणिपूरपतिपुत्र्यां च पुत्रिकाधर्म्मेण बभ्रुवाहनं नाम पुत्रमर्जुनो जनयत ॥ सुभद्रायां चार्भकत्वेपि योसावति

बलपराक्रमः ॥ समस्तारातिरथविजेता सोभिमन्युरजायत ॥ अभिमन्योरुत्तरायां परिक्षीणेषु कुरुषु अश्वत्थामप्रमुक्तब्र

ह्मास्त्रेण गर्भ एव भस्मीकृतो भगवतः सकलसुरासुरवंदितचरणयुगलस्यात्मेच्छया कारणमानुषरूपधारिणो नुभावात्पुनर्जी

वितमवाप्य परीक्षितोजज्ञे ॥ योयं सांप्रतं भूमंडलमखंडितपतिधर्म्मेण पालयतीति ॥ इति श्रीविष्णुपुराणे चतुर्थेंशे विंशति

मोध्यायः ॥ पराशर उवाच ॥ अतः परं भविष्यानहं भूमिपालान्कीर्त्तयिष्यामि योयं सांप्रतमवनीपतिः परीक्षित्तस्यापि च परीक्षि

तो जनमेजयश्रुतसेनाग्रसेनभीमसेनाश्चत्वारः पुत्रा भविष्यंति ॥ जनमेजयस्यापि शतानीको भविष्यति योसौ याज्ञवल्क्याद्वेदमधी

त्य कृपादस्त्राण्यवाप्य विषयविरक्तचित्तवृत्तिश्च शौनकोपदेशादात्मविज्ञानप्रवीणः परं निर्वाणमवाप्स्यति ॥ शतानीकादश्व

मेधदत्तो भविता तस्मादप्यधिसीमकृष्णो धिसीमकृष्णान्निचक्षुर्यो गंगयापहृते हास्तिनपुरे कौशाम्ब्यां निवत्स्यति ॥ तस्याप्युष्णः पुत्रो

भविता उष्णाद्विचित्ररथस्ततश्शुचिरथस्तस्माद्वृष्णिमांस्ततः सुषेणस्तस्यापि सुनीथः सुनीथान्नृचक्षुस्तस्मात्सुखीबलस्ततः परिप्लवः

॥ तस्माच्च सुनयस्तस्यापि मेधावी मेधाविनो नृपंजयस्ततो मृदुस्तस्माच्च तिग्मस्तिग्माद्बृहद्रथो बृहद्रथाद्वसुदानस्ततोपरः शतानीकः

॥ तस्माच्चोदयन उदयनादहीनरस्ततो दंडपाणिस्ततो निरमित्रस्तस्माच्च क्षेमकः ॥ तत्रायं श्लोकः ॥ ब्रह्मक्षत्रस्य यो योनिर्वंशो राजर्षिस

स्यापि पूर्णास्तस्मात्संगतस्तस्य त्रश्च शातकर्णिस्तस्माच्च लंबोदरस्तस्मादिविलंबस्ततो मेघस्वातिः — — पटुमांस्ततश्चानिस्तकर्म्मा ततो ह ५
लाहलोहलाहलात्सुब्रकस्ततः उत्तमि मेनस्ततः सुंदरस्ततः शीतकर्णिस्तस्माच्च कारस्ततः श्रीतिकर्णिस्ततः शिवस्वाति ॥ ततश्च गोमती
पुत्रस्तस्य त्रः श्रतिमांस्तस्मापि याकर्णिस्ततश्च शिवस्कंदस्तस्माद्पियज्ञश्री ॥ ततोजयस्ततश्चंद्रश्रीस्तस्मात्पुलोमावि: ॥ एवमेते
त्रिंशाच्चत्वारिंशद्वर्षशतानि पंचाशदधिकानि पृथ्वीं भोक्ष्यंति ॥ सप्त घभृत्याः सप्ताभीराः शतगर्द्दभिजाश्च भूभुजो भविष्यंति ॥ ततः श
काः षोडशभूपतयो भविष्यंति ॥ अथ शतानि त्रीणि पृथिवीं भोक्ष्यंति ॥ तेषूत्सन्नेषु कैंकिला यवना भूपतयो भविष्यंति ॥ त
तस्तत्पुत्रात्रयोदश वाह्लीकाश्च ततस्तत्पुत्राः मित्रपटुमित्रपरामित्रस्वयोदशमकलास्मात्रा ॥ ततश्च समकोलासयां तथैव भूप
तयो भविष्यंति ॥ नैषधास्तत एव मागधायांतु विश्वस्फाटिकसंज्ञानन्यान्वर्णान्करिष्यंति ॥ कैवर्त्तयदुपुलिंदब्राह्मणान्राष्ट्रे स्था
पयिष्यत्युत्साद्य खिलक्षत्रजातिं नवनागाः पद्मावत्यां पुर्य्यां कांत्यां मथुरायामनुगंगं प्रयागं मगधा गुप्ताश्च मागधांश्च भो
क्ष्यंति ॥ कोशलोड्रपुंड्रताम्रलिप्तसमुद्रपर्य्यंते देवरक्षितारो भोक्ष्यंति ॥ नरश्च कलिंगमाहिषमाहेंद्रभौमान्गुहाभोक्ष्यंति ॥
नैषधिकनैमिषककालकातोयान्जनपदान्मणिजामीतिराक्षसयाः भोक्ष्यंति ॥ सिंधुनदार्विकोर्वीचंद्रभागाकाश्मीरविषयांश्च व्रात्या म्ले
च्छाः शूद्राद्याभोक्ष्यंतीति ॥ एते तुल्यकालाः सर्वे पृथिव्यां भूपतयो भविष्यंतीति ॥ सिंधुनटदाश्चलप्रसादाव हेयाः सर्वकालम त्को
धर्मोनृतरुचयः स्त्रीबालगोवधकर्त्तारः ॥ परस्वादानरुचयोल्पसाराः ॥ उदितास्तमितप्रायाः स्वल्पायुषो महेच्छा स्वल्पधर्म्माश्च भ राम
विष्यंति ॥ तैश्च विमिश्रा जनपदाः तच्छीलानुवर्त्तिनः म्लेच्छाचाराश्च विपर्य्ययेण वर्त्तमानाः प्रजाः क्षपयिष्यं १०९

जनकस्तस्य च नंदिवर्द्धनः ॥ इत्येते पंचत्रिंशदुत्तरमब्दशतं पंच प्रद्योताः पृथिवीं भोक्ष्यंति ॥ ततश्च शिशुनागस्तत्पुत्रश्च काकवर्णो भवि-
ता तस्य च पुत्रः क्षेमधर्मा तस्यापि क्षत्रौजास्तत्पुत्रो विंदुसारः ॥ ततश्चाजातशत्रुस्तस्माद्दर्भको दर्भकाच्चोदयाश्वस्तस्मादपि नंदिवर्द्धन-
स्ततो महानंदी ॥ इत्येते शैशुनागा दश भूमिपालास्त्रीणि वर्षशतानि द्विषष्ट्यधिकानि भविष्यंति ॥ महानंदिसुतश्च शूद्रागर्भोद्भवोति-
लुब्धो महापद्मः परशुराम इवापरोऽखिलक्षत्रांतकारी भविष्यति ॥ ततः प्रभृति च शूद्रा भूमिपाला भविष्यंति ॥ स चैकच्छत्रामनुल्लंघितशा-
सनो महापद्मः पृथिवीं भोक्ष्यते ॥ तस्याप्यष्टौ सुताः सुमाल्याद्या भवितारस्तस्य च महापद्मस्यानु पृथ्वीं भोक्ष्यंति ॥ महापद्मस्तत्पुत्रा-
श्चैकं वर्षशतमवनीपतयो भविष्यंति ॥ नवैवैतान्नंदान्कौटिल्यो ब्राह्मणः समुद्धरिष्यति ॥ तस्यापि पुत्रो विंदुसारो भविष्यति तस्या-
प्यशोकवर्द्धनस्ततश्च सुयशास्ततश्च दशरथस्ततश्च संगतस्ततश्च शालिशूकस्तस्मात्सोमशर्मा सोमशर्मणः शतधन्वा ॥ तस्यानु
वृहद्रथनामा भविता एवमेते मौर्या दश भूपतयो भविष्यंति ॥ अब्दशतं सप्तत्रिंशदुत्तरं तेषामंते दश शुंगाः पृथिवीं भोक्ष्यंति ॥ पुष्यमि-
त्रः सेनापतिः स्वामिनं हत्वा राज्यं करिष्यति ॥ अग्निमित्रस्तत्पुत्रस्तस्माज्ज्येष्ठस्ततो वसुमित्रस्तस्मादार्द्रकस्तस्मात्पुलिंदकस्ततो घोष-
वसुस्ततोपि वज्रमित्रस्ततो भागवतस्तस्माद्देवभूमिः ॥ इत्येते दश शुंगा द्वादशोत्तरं वर्षशतं पृथ्वीं भोक्ष्यंति ॥ ततः कण्वानेषा भूर्या-
स्यति ॥ देवभूतिं तु शुंगराजानं व्यसनिनं तस्यैवामात्यः कण्वो वासुदेवनामा निपात्य स्वयमवनीं भोक्ष्यति ॥ तस्य पुत्रो भूमिमित्रस्तस्यापि
नारायणो नारायणात्मजः सुशर्मा ॥ एते काण्वायनाश्चत्वारः पंचचत्वारिंशद्वर्षाणि भूपतयो भविष्यंति ॥ सुशर्माणं तु काण्वं तद्भृत्यो
वच्छिद्रकनामा हत्वांध्रजातीयो वसुधां भोक्ष्यति ॥ ततः कृष्णनामा तद्भ्राता पृथिवीपतिर्भविता तस्यापि पुत्रः श्रीशातकर्णिः ॥ त

ए

वि॰पु॰
१९०

115

राम्प्रवृत्तश्च कलिर्द्वादशाब्दशतात्मकः॥ यदैव भगवद्विष्णोरंशो जातो दिवं द्विज॥ वसुदेवकुलोद्भूतस्तदैव कलिरागत यावत्स पादप
भ्यांय स्पर्शेमां वसुंधरां॥ तावत्पृथ्वीपरिष्वंगसमर्थो नाभवत्कलिः॥ गते सनातनस्यांशे विष्णोस्तत्र भुवो दिवं॥ तत्याज सानुजो राज्यं
धर्म्मपुत्रो युधिष्ठिरः॥ विपरीतानि दृष्ट्वा च निमित्तानि स पांडवः॥ जाते कृष्णे चकाराथ सोभिषेकं परीक्षितः॥ प्रयास्यंति यदा चैते पूर्वा
षाढां महर्षयः॥ तदा नंदात्प्रभृत्येष कलिर्वृद्धिं गमिष्यति॥ यस्मिन्कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि॥ प्रतिपन्नं कलियुगं तस्य
संख्यां निबोध मे॥ त्रीणि लक्षाणि वर्षाणां द्विज मानुषसंख्यया॥ षष्टिश्चैव सहस्राणि भविष्यत्येष वै कलिः॥ शतानि तानि
दिव्यानां सप्त पंच च संख्यया॥ निःशेषेण गते तस्मिन्भविष्यति पुनः कृतं॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च द्विजस
त्तम॥ युगे युगे महात्मानः समतीताः सहस्रशः॥ महायोगबलोपेतौ कलापग्राम संस्थितौ॥ कृते युग इहागत्य क्षत्र
प्रावर्त्तकौ हि तौ॥ भविष्यते मनोर्वंशबीजभूतौ व्यवस्थितौ ———— मनोर्वंशबीजभूतौ व्यवस्थितौ॥ एतेन क्रमयोगेन
मनुपुत्रैर्वसुंधरा॥ कृतत्रेतादिसंज्ञानि युगानि त्रीणि —— भुज्यते॥ कलौ तु बीजभूतास्तु केचित्तिष्ठंति वै मुने॥ यथैव देवापि
पुरू सांप्रतं समवस्थित ———— वंशस्तवोक्तो भूभुजां मया॥ निखिलो गदितुं नैव शक्यो जन्मशतैरपि॥ एते चान्ये
च भूपाला यैरत्र क्षितिमंडले॥ कृतं ममत्वं मोहांधैर्नित्यं नित्यकलेवरे॥ कथं ममेयं सकला मत्सुतस्य कथं मही॥ मद्वंशस्येति
चिंतार्ता जग्मुरस्तमिमे नृपाः॥ तेभ्यः पूर्वतरा ये च तेभ्यस्तेभ्यस्तथापरे॥ भविष्याश्चैव यास्यंति तेषामन्ये च ये प्यनु॥ विलोक्यात्मज
योद्योगयात्राव्यग्रान्नराधिपान्॥ पुष्पप्रहासैः शरदि हसंतीव वसुंधरा॥ मैत्रेय पृथिवीगीताञ्श्लोकांश्चात्र निबोध मे॥ यानाह
धर्मध्वजिने जनकायासितो मुनिः॥ पृथिव्युवाच॥ कथमेव नरेंद्राणां मोहो बुद्धिमतामपि॥ येन फेनसधर्माणोप्यतिविश्वस्त

राम
१९०

जि॥ ततश्चानुदिनमल्पाल्पह्रासव्यवच्छेदाद्धर्मार्थयोर्जगतः संक्षयो भविष्यति॥ ततश्चार्थ एवाभिजनहेतुर्बलमेवाशेषधर्महेतुरभि
रुचिरेवदांपत्यसंबंधहेतुरनृतमेव व्यवहारजयहेतुः स्त्रीत्वमेवोपभोगहेतुर्बलमेव तत्र [illegible] पृथिवीहेतुः॥ ब्रह्मसूत्रमेव वि
प्रत्वहेतुः॥ लिंगधारणमेवाश्रमहेतुरन्याय एव वृत्तिहेतुर्दौर्बल्यमेवावृत्तिहेतुः॥ धार्ष्ट्यगर्वोच्चारणमेव पांडित्यहेतुर्दानमेव धर्महेतुः
रनाढ्यतैवा ------ [illegible]मेव साधुत्वहेतुः॥ स्नानमेव प्रसाधनहेतुः दूरायतनोदकमेव तीर्थमित्येव स्त्रीकरणमेव
[illegible]सर्ववर्णेषु च यो यो बलवान्सर्वभूतानां संभूपतिर्भविष्यति॥ एवं चातिलु[illegible]ब्धा राजकरभारासहा नामंतरद्रोणीः
श्रयाः संश्रयिष्यंति॥ मधुशाकफलमूलपुष्पपत्राहाराश्च भविष्यंति तरुपर्णवल्कलपरीधानाश्चीरप्रावरणाश्चातिबहुप्रजाः॥ शीतवा
तातपवर्षसहा भविष्यंति॥ न कश्चित्त्रयोविंश ------- भविष्यंति॥ अनंतरं चात्र कलियुगे ह यमायात्यखिलएवैषजनेय
मुपैष्यति॥ श्रौतस्मार्ते तु धर्मे विप्लवमत्यंतमुपगते क्षीणप्राये च कलावशेषजगत्स्रष्टुश्चराचरगुरोरनादिमध्यस्यान्तस्वरूपे
भगवतो वासुदेवांशः शंभलग्राम ब्राह्मणप्रधानविष्णुयशसो गृहे स्वष्टगुणर्द्धिसमन्वितः॥ कल्किरूपी जगत्यत्रावतीर्य सकल
म्लेच्छदस्युदुष्टाचरणचेतसामशेषाणामवच्छिन्नशक्तिमाहात्म्य ---- [illegible] -- [illegible] जम्बूनामशेषमनुष्याणां परित्राणा
नाम पुनत्का लहृता नामपत्यप्रसूति [illegible] तानि तद्रूपाणि कृतयुगधर्मानुसारीणि च भविष्यंति॥ सर्वान्मते॥ यदा चंद्र
श्च सूर्यश्च यदा पुष्ये बृहस्पती राशौ समेष्यंति भविष्यति तदा कृतं॥ अतीता वर्तमानाश्च तथैवानागताश्च ये एते वंशेषु भूपालाः कथि
ता मुनिसत्तमाः॥ यावत्परीक्षितो जन्म यावन्नंदाभिषेचनं॥ एतद्वर्षसहस्रं तु ज्ञेयं पंचदशोत्तरं॥ सप्तर्षीणां तु यौ पूर्वौ दृश्यते उदितौ दि
वि॥ तयोस्तु मध्ये नक्षत्रं दृश्यते यत्समं निशि तेन सप्तर्षयो युक्तास्तिष्ठंत्यब्दशतं नृणां॥ ते तु पारीक्षिते काले मघास्वासन्द्विजोत्तम॥ त

वि॰पु॰
१११

कार्त्तवीर्योत्तु भुंजे समस्तान्द्वीपान्समाक्रम्य हतारिचक्रः॥ कथाप्रसंगेष्वभिधीयमानः स एव संकल्पविकल्पहेतुः॥ दशाननाविक्षि
तराघवाणामैश्वर्यमुद्भासितदिङ्मुखानां॥ भस्मापि जातं न कथं क्षणेन भ्रूभंगपातेन धिगंतकस्य॥ कथाशरीरत्वमवाप यद्वै
मांधातृनामा भुवि चक्रवर्ती॥ श्रुत्वापि तत्को हि करोति साधु ःॐः ःॐः तथा सुग्रीवबाणश्चापि बलेः सुतः॥ तथान्ये च महावीर्या नृ
पाणां भवनेषु ते॥ समुत्पन्ना दुरात्मानस्तान्न संख्यातुमुत्सहे॥ अक्षौहिण्योत्र बहुला दिव्यमूर्त्तिधरासुराः॥ महाबला नां दृप्तमानां दैत्ये
द्राणां ममोपरि॥ तद्भूरिभारपीडार्त्ता न शक्नोम्यमरेश्वराः॥ विभर्त्तुमात्मानमहमिति विज्ञापयामि वः॥ क्रियतां तन्महाभागाः मम
भारावतारणं॥ यथा रसातलं नाहं गच्छेयमिति विह्वला॥ पराशर उवाच॥ इत्याकर्ण्य धरावाक्यमशेषैस्त्रिदशैस्ततः॥ भुवो
भारावतारार्थे ब्रह्मा प्राह प्रचोदितः॥ ब्रह्मोवाच॥ यथाह वसुधा सर्वं सत्यमेतद्दिवौकसः॥ अहं भवो भवंतश्च सर्वे नारायणा
त्मकं॥ विभूतयस्तु यास्तस्य तासामेव परस्परं॥ आधिक्यन्यूनता बाध्यबाधकत्वेन वर्त्तते॥ तदागच्छत गच्छामः क्षीराब्धे
मुत्तरात्तटं॥ तत्राराध्य हरिं तस्मै सर्वं विज्ञापयाम वै॥ सर्वदैव जगत्यर्थे सर्वात्मा स जगन्मयः॥ स्वल्पांशेनावतीर्योर्व्यां धर्म
स्य कुरुते स्थितिम्॥ पराशर उवाच॥ इत्युक्त्वा प्रययौ विप्र सह देवैः पितामहः॥ समाहितमतिश्चैवं तुष्टाव गरुडध्वजं॥ ब्रह्मो
वाच॥ द्वे विद्ये त्वमनाम्नाय परा चैवापरा तथा॥ ते एव भवतो रूपे मूर्त्तामूर्त्तात्मिके प्रभो॥ द्वे ब्रह्मणी त्वमणीयोभिः स्थूला
त्मन्सर्व सर्ववित्॥ शब्दब्रह्म परं चैव ब्रह्म ब्रह्ममयस्य यत्॥ ऋग्वेदस्त्वं यजुर्वेदः सामवेदस्तथाथर्वणः॥ शिक्षा कल्पो निरु
क्तं च छंदो ज्योतिषमेव च॥ इतिहासपुराणं च तथा व्याकरणं प्रभो॥ मीमांसा न्यायकं तद्धर्मशास्त्राण्यधोक्षज॥ आत्मा

रम
१११

वि

चेतसः॥ पूर्वमात्मजयं कृत्वा जेतुमिच्छंति मंत्रिणः॥ ततो भृत्यांश्च पौरांश्च जिगीषंते तथा रिपून्॥ क्रमेणानेन जेष्यामो वयं पृथ्वीं स-
सागरां॥ इत्यासक्तधियो मृत्युं न पश्यंत्यविदूरगं॥ समुद्रावरणं याति मंडलं च वशं ततः॥ कियदात्मजयादेतन्मुक्तिरात्मजये फ-
लं॥ उत्सृज्य पूर्वजा याता यां नादाय गतः पिता॥ तां ममेति विमूढत्वाज्जेतुमिच्छंति पार्थिवाः॥ मत्कृते पितृपुत्राणां भ्रातॄणां चा-
पि विग्रहाः॥ जायंतेत्यंतमोहेन ममत्वादृतचेतसां॥ पृथ्वी ममेयं सकला ममैव मद्वंश्यस्यापि च शाश्वतेयं॥ यो यो मृतो ह्यत्र बभूव
राजा कुबुद्धिरासीदिति तस्य तस्य॥ दृष्ट्वा ममत्वादृतचित्तमेकं विहाय मां मृत्युपथं व्रजंतं॥ तस्यानुजस्तस्य कथं ममत्वं हृदास्प-
दं मत्प्रभवं करोति॥ पृथ्वी ममैषाशु परित्यजैनं वदंति ये दूतमुखैश्च शत्रून्॥ नराधिपास्तेषु ममातिहासः पुनश्च मूढेषु दयाभ्यु-
पैति॥ पराशर उवाच॥ इत्येते धरणीगीताः श्लोका मैत्रेय यैः श्रुताः॥ ममत्वं विलयं याति तापन्यस्तं यथा हिमं॥ इत्येष कथितः
सम्यग्मनोर्वंशो मया तव॥ यत्र स्थितिप्रवृत्तस्य विष्णोरंशांशका नृपाः॥ शृणोति य इमं भक्त्या मनोर्वंशमनुक्रमात्॥ तस्य पा-
पमशेषं वै प्रणश्यत्यमलात्मनः॥ धनधान्यर्द्धिमतुलां प्राप्नोत्यव्याहतेंद्रियः॥ श्रुत्वैवमखिलं वंशं प्रशस्तं शशिसूर्ययोः॥ इ-
क्ष्वाकुजह्नुमांधातृसगराविक्षितान् रघून्॥ ययातिनहुषाद्यांश्च ज्ञात्वा निष्ठामुपागतान्॥ महाबलान्महावीर्याननंतधन-
संचयान्॥ कृतान्कालेन बलिना कथाशेषान्नराधिपान्॥ श्रुत्वा न पुत्रदारादौ गृहक्षेत्रादिके तथा॥ द्रव्यादौ वा कृतममत्वं मम-
त्वं कुरुते नरः॥ तप्तं तपो यैः पुरुषप्रवीरैरुद्बाहुभिर्वर्षगणाननेकान्॥ इष्ट्वा च यज्ञैर्बलिनोतिवीर्याः कृतास्तु कालेन कथावशेषाः॥
पृथुः समस्तान्विचचार लोकानव्याहतो योरिविदारिचक्रः॥ स कालवाताभिहतः प्रनष्टः क्षिप्तं यथा शाल्मलितूलमग्नौ॥ यः

वृत्तिविनाशसंस्थानकराऽप्रमेय ॥ सूक्ष्मातिसूक्ष्मातिबृहत्प्रमाण गरीयसामप्यतिगौरवात्मन् ॥ प्रधानबुद्धीन्द्रियवत्प्रधानमू-
लात्परात्मन्भगवन्प्रसीद ॥ एषा मही देव महीप्रसूतैर्महासुरैः पीडितशैलबन्धा ॥ परायणं त्वां जगतामुपैति भारावतारार्थमपारसारं ॥
एते वयं वृत्ररिपुस्तथायं नासत्यदस्रौ वरुणोयमेष ॥ इमे च रुद्रा वसवः ससूर्याः समीरणाग्निप्रमुखास्तथान्ये ॥ सुराः समस्ताः
सुरनाथ कार्यमेभिर्मया यच्च तदीश सर्वं ॥ आज्ञापयाज्ञां प्रतिपालयन्तस्तवैव तिष्ठाम सदास्तदोषाः ॥ पराशर उवाच ॥ एवं सं-
स्तूयमानस्तु भगवान्परमेश्वरः ॥ उज्जहारात्मनः केशौ सितकृष्णौ महामुने ॥ उवाच च सुरानेतौ मत्केशौ वसुधातले ॥ अवतीर्य भुवो
भारक्लेशहानिं करिष्यतः ॥ सुराश्च सकलाः स्वांशैरवतीर्य महीतले ॥ कुर्वन्तु युद्धमुन्मत्तैः पूर्वोत्पन्नैर्महासुरैः ॥ ततः क्षयमशेषा-
स्ते दैतेया धरणीतले ॥ प्रयास्यन्ति न संदेहो मद्दृक्पातविचूर्णिताः ॥ वसुदेवस्य या पत्नी देवकी देवतोपमा ॥ तस्यायमष्टमो गर्भो म-
त्केशो भविता सुराः ॥ अवतीर्य च तत्रायं कंसं घातयिता भुवि ॥ कालनेमिसमुद्भूतमित्युक्त्वान्तर्दधे हरिः ॥ अदृश्याय ततस्तेपि प्र-
णिपत्य महात्मने ॥ मेरुपृष्ठं सुरा जग्मुरवतेरुश्च भूतले ॥ कंसाय चाष्टमो गर्भो देवक्या धरणीधरः ॥ भविष्यतीत्याचचक्षे भगवान्ना-
रदो मुनिः ॥ कंसोपि तदुपश्रुत्य नारदात्कुपितस्ततः ॥ देवकीं वसुदेवं च गृहे गुप्तावधारयत् ॥ जातं जातं च कंसाय तेनैवोक्तं यथा
पुरा ॥ तथैव वसुदेवोपि पुत्रमर्पितवान्द्विज ॥ हिरण्यकशिपोः पुत्राः षड्गर्भा इति विश्रुताः ॥ विष्णुप्रयुक्तास्तान्निद्रा क्रमाद्गर्भा-
न्नियोजयत् ॥ योगनिद्रा महामाया वैष्णवी मोहितं यया ॥ अविद्यया जगत्सर्वं तामाह भगवान्हरिः ॥ श्रीभगवानुवाच ॥ निद्रे
गच्छ ममादेशात्पातालतलसंश्रयान् ॥ एकैकत्वेन षड्गर्भान्देवकीजठरं नय ॥ हतेषु तेषु कंसेन शेषाख्योंशस्ततो मम ॥ अं-

वि०पु० ११२ 112

त्वमेह गुणवृद्धिर्याश्चारिषट्‌च॥ तद्यथा रिपूर्तेर्नाम्यदृश्यात्मात्मस्वरूपवत्॥ त्वमव्यक्तमनिर्देश्यमचिंत्यानामवर्णवत्॥ त्वमपाणिपा
दरूपं च शुद्धं नित्यं परात्परं॥ अशोत्रकर्णः परिपश्यसि त्वमचक्षुरेको बहुरूपरूपः॥ अपादहस्तो जवनो ग्रहीता त्वं वेत्सि सर्वं न च
सर्ववेद्यः॥ अणोरणीयांसमसत्स्वरूपं त्वां पश्यतो ज्ञाननिवृत्तिरग्र्या॥ धीरस्य धीर्यस्य बिभर्ति नान्यद्वरेण्यरूपात्परतः परात्मन्॥ त्वं
विश्वनाभिर्भुवनस्य गोप्ता सर्वाणि भूतानि तवांतराणि॥ यद्भूतभव्यं तदणोरणीयः पुमांस्त्वमेकः प्रकृतेः परस्तात्॥ एकश्चतुर्धा
भगवान् हुताशो वर्चो विभूतिं जगतो ददाति॥ त्वं विश्वतश्चक्षुरनंतमूर्ते त्रेधा पदं त्वं किल संनिधात्से॥ यथाग्निरेको बहुधा
समिध्यते विकारभेदैरविकाररूपः॥ तथा भवान् सर्वगतैकरूपी रूपाण्यनेकान्यनुपुष्यतीश॥ एकं त्वमग्र्यं परमं पदं य
त्पश्यंति त्वां सूरयो ज्ञानदृश्यं॥ त्वत्तो नान्यत्किंचिदस्ति स्वरूपं यद्वा भूतं यच्च भाव्यं परात्मन्॥ व्यक्ताव्यक्तस्वरूपस्त्वं समष्टिव्यष्टि
रूपवान्॥ सर्वज्ञः सर्वदृक् सर्वशक्तिर्ज्ञानबलर्द्धिमान्॥ अन्यूनश्चाप्यवृद्धिश्च स्वाधीनोनादिमान्वशी॥ क्लमतंद्रीभयक्रोधकामा
दिभिरसंयुतः॥ निरवद्यः परः प्राप्तेर्निरधिष्ठोऽक्षरः क्रमः॥ सर्वेश्वरः पराधारो धाम्नां धामात्मकोऽक्षयः॥ सकलावरणातीत निरालंब
नभाव॥ महाविभूतिसंस्थान नमस्ते पुरुषोत्तम॥ नकारणात्कारणाद्वा कारणाकारणान्न च॥ शरीरग्रहणं वापि धर्मत्राणाय ते प
रं॥ पराशर उवाच॥ इत्येवं संस्तुतिं श्रुत्वा मनसा भगवानजः॥ ब्रह्माणमाह प्रीतात्मा विश्वरूपधरो हरिः॥ श्रीभगवानुवाच॥ भोभो
ब्रह्मंस्त्वया मत्तः सह देवैर्यदिष्यते॥ तदुच्यतामशेषं वः सिद्धमेवावधार्यतां॥ पराशर उवाच॥ ततो ब्रह्मा हरेर्दिव्यं विश्वरूपमवेक्ष्य
तत्॥ तुष्टाव भूयो देवेषु साध्वसावनतात्मसु॥ ब्रह्मोवाच॥ नमो नमस्तेस्तु सहस्रकृत्वः सहस्रबाहो बहुवक्त्रपाद॥ नमो नमस्ते जगतः प्र

वि०पु०
११२

गनिद्रा यशोदायास्तस्मिन्नेव ततो दिने॥ संभूता जठरे तद्वद्यथोक्तं परमेष्ठिना॥ ततो ग्रहगणः सम्यक्प्रचचार दिवि द्विज॥ विष्णो
रंशे भुवं याते ऋतवश्चाभवन् शुभाः॥ न सेहे देवकीं द्रष्टुं कश्चिदप्यतितेजसा॥ जाज्वल्यमानां तां दृष्ट्वा मनांसि क्षोभमाय
युः॥ अदृष्टाः पुरुषस्त्रीभिर्देवकीं देवतागणाः॥ बिभ्राणां वपुषा विष्णुं तुष्टुवुस्तामहर्निशं॥ प्रकृतिस्त्वं परा सूक्ष्मा ब्रह्मगर्भा
भवः पुरा॥ ततो वाणी जगद्धातुर्वेदगर्भासि शोभने॥ सृज्यस्वरूपगर्भा च सृष्टिभूता सनातने॥ बीजभूता तु सर्वस्य यज्ञभूता
भवस्त्रयी॥ फलगर्भा त्वमेवेज्या वह्निगर्भा तथारणिः॥ अदितिर्देवगर्भा त्वं दैत्यगर्भा तथा दितिः॥ ज्योत्स्ना वासरगर्भा त्वं ज्ञा
नगर्भासि सन्नतिः॥ नयगर्भा परा नीतिर्लज्जा त्वं प्रश्रयोद्वहा॥ कामगर्भा तथेच्छा त्वं तुष्टिः संतोषगर्भिणी॥ मेधा च बोधगर्भा
सि धैर्यगर्भोद्वहा धृतिः॥ ग्रहर्क्षतारकागर्भा द्यौरस्याखिलहेतुकी॥ एता विभूतयो देवि तथान्याश्च सहस्रशः॥ तथा संख्या

113

जगन्मातः सांप्रतं जठरे तव॥ समुद्राद्रिनदीद्वीपवनपत्तनभूषणा॥ ग्रामखर्वटखेटाढ्या समस्ता पृथिवी शुभे॥ समस्त ग्रा
वह्नयोंभांसि सकलाश्च समीरणाः॥ ग्रहर्क्षतारकाचित्रं विमानशतसंकुलं॥ अवकाशमशेषस्य यद्ददाति नभस्थलं॥ भू
र्लोकश्च भुवर्लोकः स्वर्लोकोथ महर्जनः॥ तपश्च ब्रह्मलोकश्च ब्रह्माण्डमखिलं शुभे॥ तदंतर्ये स्थिता देवा दैत्यगंधर्वचा रम
रणाः॥ महोरगास्तथा यक्षा राक्षसाः प्रेतगुह्यकाः॥ मनुष्याः पशवश्चान्ये ये च जीवा यशस्विनि॥ तैरंतस्थैरनंतोसौ सर्वगः स
र्वभावनः॥ रूपकर्मस्वरूपाणि न परिच्छेदगोचरे॥ यस्याखिलप्रमाणानि स विष्णुर्गर्भगस्तव॥ त्वं स्वाहा त्वं स्वधा विद्या सु ११२

यांशेनोदरे तस्याः सप्तमः संभविष्यति ॥ गोकुले च सुदेवस्य भार्यान्या रोहिणी स्थिता ॥ तस्याः स संभूतिसमये देवि नेयस्त्वयोदरं ॥ स
प्तमो भोजराजस्य भयाद्रोधोपरोधतः ॥ देवक्याः पतितो गर्भ इति लोको वदिष्यति ॥ गर्भसंकर्षणात्सोथ लोके संकर्षणेति वै ॥ संज्ञा
मवाप्स्यते वीरः श्वेताद्रिशिखरोपमः ॥ ततोहं संभविष्यामि देवकीजठरे शुभे ॥ गर्भे त्वया यशोदाया गंतव्यमविलंबितं ॥ प्रावृट्
काले च नभसि कृष्णाष्टम्यामहं निशि ॥ उत्पत्स्यामि नवम्यां च प्रसूतिं त्वमवाप्स्यति ॥ यशोदाशयने मां तु देवक्यास्त्वामनिंदि
ते ॥ मच्छक्तिप्रेरितमतिर्वसुदेवो नयिष्यति ॥ कंसश्च त्वामुपादाय देवि शैलशिलातले ॥ प्रक्षेप्स्यत्यंतरिक्षे च संस्थानं समवा
प्स्यसि ॥ ततस्त्वां शतधा शक्रः प्रणम्य मम गौरवात् ॥ प्रणिपातानतशिरा भगिनीत्वे ग्रहीष्यति ॥ ततः शुंभनिशुंभादीन् ह
त्वा दैत्यान् सहस्रशः ॥ स्थानैरनेकैः पृथिवीमशेषां मंडयिष्यसि ॥ त्वं भूतिः सन्नतिः कीर्तिः कांतिर्द्यौः पृथिवी धृतिः ॥ लज्जा पु
ष्टिरुषा या च काचिदन्या त्वमेव सा ॥ ये त्वामार्येति दुर्गेति वेदगर्भांबिकेति च ॥ भद्रेति भद्रकालीति क्षेम्या क्षेमंकरीति च ॥ प्रातश्चै
वापराह्णे च स्तोष्यंत्यानम्रमूर्तयः ॥ तेषां हि प्रार्थितं सर्वं मत्प्रसादाद्भविष्यति ॥ सुरामांसोपहारैश्च भक्ष्यभोज्यैश्च पूजिता ॥ नृ
णामशेषकामांस्त्वं प्रसन्ना संप्रदास्यसि ॥ ते सर्वे सर्वदा भद्रे मत्प्रसादादसंशयं ॥ असंदिग्धा भविष्यंति गच्छ देवि यथोदि
तमिति ॥ इति श्रीविष्णुपुराणे पंचमांशे प्रथमोध्यायः ॥ पराशर उवाच ॥ यथोक्तं सा जगद्धात्री देवदेवेन वै पुरा ॥ षड्गर्भगर्भ
विन्यासं चक्रे चान्यस्य कर्षणं ॥ सप्तमे रोहिणीं प्राप्ते गर्भे गर्भं ततो हरिः ॥ लोकत्रयोपकाराय देवक्याः प्रविवेश वै ॥ योगनिद्रा

विष्णु० ११४

114

र्षतां जलदानां च तोयमत्युल्बणं निशि ॥ संछाद्यानुययौ शेषः फणैरानकदुंदुभिं ॥ यमुनां चातिगंभीरां नानावर्तसमाकु
लां ॥ वसुदेवो वहन् विष्णुं जानुमात्रवहां ययौ ॥ कंसस्य करदानाय तत्रैवाभ्यागतांस्तटे ॥ नंदादीन्गोपवृद्धांश्च यमुनायां ददर्श
सः ॥ तस्मिन्काले यशोदापि मोहिता योगनिद्रया ॥ तामेव कन्यां मैत्रेय प्रसूता मोहिते जने ॥ वसुदेवोपि विन्यस्य बालमादाय दा
रिकां ॥ यशोदाशयने तूर्णमाजगामामितद्युतिः ॥ ददृशे च प्रबुद्धासौ यशोदा जातमात्मजं ॥ नीलोत्पलदलश्यामं ततो त्यर्थं मुदं
ययौ ॥ आदाय वसुदेवोपि दारिकां निजमंदिरं ॥ देवकीशयने न्यस्य यथापूर्वमतिष्ठत ॥ ततो बालध्वनिं श्रुत्वा रक्षिणः सहसो
त्थिताः ॥ कंसायावेदयामासुर्देवकीप्रसवं द्विज ॥ कंसस्तूर्णमुपेत्यैनां ततो जग्राह बालिकां ॥ मुंच मुंचेति देवक्या सन्नकंठ्या नि
वारितः ॥ चिक्षेप च शिलापृष्ठे सा क्षिप्ता वियति स्थितिं ॥ अवाप रूपं च महत्सायुधाष्टमहाभुजा ॥ प्रजहास तथैवोच्चैः कंसं च रु
षिताब्रवीत् ॥ किं मया क्षिप्तया कंस जातो यस्त्वां वधिष्यति ॥ सर्वस्वभूतो देवानामासीन्मृत्युः पुरा स ते ॥ तदेतत्संप्रधार्या
शु क्रियतां हितमात्मनः ॥ इत्युक्त्वा प्रययौ देवी दिव्यस्रग्गंधभूषणा ॥ पश्यतो भोजराजस्य स्तुता सिद्धैर्विहायसि ॥ इति श्री
विष्णुपुराणे पंचमेंशे तृतीयोध्यायः ॥ ३ ॥ कंसस्तूद्विग्नमनाः प्राह सर्वान्महासुरान् ॥ प्रलंबकेशिप्रमुखानाहू
यासुरपुंगवान् ॥ कंस उवाच ॥ हे प्रलंब महाबाहो केशिन् धेनुक पूतने ॥ अरिष्टाद्यैस्तथा चान्यैः श्रूयतां वचनं मम ॥ मां हंतु
ममरैर्यत्नः कृतः किल दुरात्मभिः ॥ मद्वीर्यतापितान्वीरान्न त्वेतान्गणयाम्यहं ॥ किमिंद्रेणाल्पवीर्येण किं हरेणैकचारिणा एम
॥ हरिणा वापि किं साध्यं छिद्रेष्वसुरघातिना ॥ किमादित्यैः किं वसुभिरल्पवीर्यैः किमग्निभिः ॥ किं चान्यैरमरैः सर्वैर्मद्बा ११८

भास्त्वंज्योतिरंवरं॥ त्वंसर्वलोकरक्षार्थमवतीर्णामहीतले॥ प्रसीददेविसर्वस्यजगतः शंशुभेकुरु॥ प्रीत्यात्वंधारयेशानंधृतंये
नाखिलंजगत्॥ इतिश्रीविस्नुपुराणेपंचमेंशेद्वितीयोध्यायः॥ पराशरउवाच॥ एवंसंस्तूयमानासादेवैर्देवमधारयत॥ गर्भेण
पुण्डरीकाक्षंजगतस्त्राणकारणं॥ ततोखिलजगत्पद्मबोधायाच्युतभानुना॥ देवकीपूर्वसंध्यायामाविर्भूतंमहात्मना॥ तज्जन्मदि
नमत्यर्थमाह्लाद्यमलदिङ्मुखं॥ बभूवसर्वलोकस्यकौमुदीशशिनोयथा॥ संतःसंतोषमधिकंप्रशमंचंडमारुताः॥ प्रसादंनिम्नगा
जातज्जायमानेजनार्दने॥ सिंधवोनिजशब्देनवाद्यंचक्रुर्मनोहरं॥ जगुर्गंधर्वपतयोननृतुश्चाप्सरोगणाः॥ ससृजुःपुष्पव
र्षाणिदेवाभुव्यंतरिक्षगाः॥ जज्वलुश्चाग्नयःशांताःजायमानेजनार्दने॥ मंदंजगर्जुर्जलदाःपुष्पवृष्टिमुचोद्विज॥ अर्धरात्रेखिलाधारेजायमानेजनार्दने॥ फुल्लेंदीवरपत्राभंचतुर्बाहुमुदीक्ष्यतं॥ श्रीवत्सवक्षसंजातंतुष्टावानकदुंदुभिः॥ अभिष्टू
यचतंवाग्भिःप्रसन्नाभिर्महामतिः॥ विज्ञापयामासतदाकंसाद्भीतोद्विजोत्तम॥ वसुदेवउवाच॥ जातोसिदेवदेवेशशंखचक्र
गदाधर॥ दिव्यंरूपमिदंदेवप्रसादेनोपसंहर॥ अद्यैवदेवकंसोयंकुरुतेममयातनं॥ अवतीर्णमितिज्ञात्वात्वांकंसोममम(?)मंदि
रे॥ देवक्युवाच॥ योनंतरूपोखिलविश्वरूपोगर्भेपिलोकान्वपुषाबिभर्ति॥ प्रसीदतामेषसदेवदेवः स्वमाययाविष्कृतबाल
रूपः॥ उपसंहरसर्वात्मन्रूपमेतच्चतुर्भुजं॥ जानातुमावतारंतेकंसोयंदितिजाधमः॥ श्रीभगवानुवाच॥ स्तुतोहंयत्त्वया
पूर्वंपुत्रार्थिन्यातदद्यते॥ सफलंदेविसंजातंजातोहंयत्तवोदरात्॥ पराशरउवाच॥ इत्युक्त्वाभगवांस्तूष्णींबभूवमुनिसत्तम॥
वसुदेवोपितंरात्रावादायप्रययौवहिः॥ मोहिताश्चाभवंस्तत्ररक्षिणोयोगनिद्रया॥ मथुराद्वारपालाश्चव्रजत्यानकदुंदुभौ॥ वर्ष

११५

115

कुवलनिर्जितैः॥ किंन दृष्टोमरपतिर्मयासंयुगमेत्यसौ॥ पृष्ठेनैववहन्वाणान्पलायनपरायणः॥ यदाहष्टिर्निवारितावृष्टिर्यदाशक्रेण
किंतदा॥ मद्वाणाभिन्नैर्जलदैरापोमुक्तायथेप्सिता॥ किमुर्व्यामवनीपालामद्वाहुवलभीरवः॥ नसर्वेसन्नतिंयातास्जरासंधमृतेगु
रुं॥ अमरेषुचमेवज्ञाजायतेदैत्यपुंगवा॥ हास्यंमेजायतेवीराःतेषुयत्नपरेष्वपि॥ तथापिखलुदुष्टानांतेषामप्यधिकंमया॥ अपका
रायदैत्येंद्रायतनीयंदुरात्मनां॥ तद्येयशस्विनःकेचित्पृथिव्यांयेचयज्विनः॥ कार्योदेवापकारायतेषांसर्वात्मनावधः॥ उत्पन्न
श्चापिमत्तमुर्म्मेभूतपूर्वःसवैकिल॥ इत्येतद्वालिकाप्राहदेवकीगर्भसंभवा॥ तस्माद्वालेषुपरमोयत्नःकार्योमहीतले॥ यत्रोद्रिक्तंव
लंवालेसहंतव्यःप्रयत्नतः॥ पराशरउवाच॥ इत्याज्ञाप्यासुरान्कंसःप्रविश्यात्मगृहंततः॥ मुमोचवसुदेवंचदेवकींचनिरोध
तः॥ कंसउवाच॥ युवयोर्घातितागर्भावृथैवैतेमयाधुना॥ कोप्यन्यएवनाशायवालोममसमुद्गतः॥ तदलंपरितापेननूनंत
द्भाविनोहिते॥ अर्भकायुवयोकोवानायुर्यातेविहन्यते॥ इत्याश्वास्यविमुक्त्वाचकंसस्तौपरिशंकितः॥ अंतर्गृहंद्विजश्रेष्ठप्रविवे
शपुनःस्वकं॥ इतिश्रीविष्णुपुराणेपंचमेंशेचतुर्थोध्यायः॥ पराशरउवाच॥ विमुक्तोवसुदेवोपिनंदस्यशकटंगतः॥ प्रहृ
ष्टंदृष्टवान्नंदंपुत्रोजातोममेतिवै॥ वसुदेवोपितंप्राहदिष्ट्यादिष्ट्येतिसादरं॥ वार्द्धकेपिसमुत्पन्नस्तनयोयंतवाधुना॥ दत्तो
हिवार्षिकःसर्वोभवद्भिर्नृपतेःकरः॥ यदर्थमागतास्तस्मान्नात्रस्थेयंमहाधनाः॥ यदर्थमागताःकार्यंतन्निःपन्नंकिमास्य

राम

ते॥ भवद्भिर्गम्यतांनंदतच्छीघ्रंनिजगोकुलं॥ ममापिवालकस्तत्ररोहिणीप्रसवोहियः॥ संरक्षणीयोभवतायथायंतनयो

११५

निजः॥ पराशरउवाच॥ इत्युक्ताःप्रययुर्गोपानंदगोपपुरोगमाः॥ शकटारोपितैर्भांडैःकरंदत्वामहावलाः॥ वसतांगोकुले

वि०पु०
११६

116

केनेति केनेदं शकटं परिवर्त्तितं ॥ तत्रैव बालकाः प्रोचुर्बालेनानेन पातितं ॥ रुदता दृष्टमस्माभिः पादविक्षेपताडितं ॥ शक
टं परिवृत्तं वै नैतदन्यस्य चेष्टितं ॥ ततः पुनरतीवासन् गोपा विस्मितचेतसः ॥ नंदगोपोपि जग्राह बालमत्यंतविस्मितः ॥ यशो
दा शकटारूढभग्नभांडकपालिका ॥ शकटं चार्च्चयामास दधिपुष्पफलाक्षतैः ॥ गर्गश्च गोकुले तत्र वसुदेवप्रणोदि
तः ॥ प्रछन्न एव गोपानां संस्कारानकरोत्तयोः ॥ ज्येष्ठं च राममित्याह कृष्णं चैव तथा परं ॥ गर्गो मतिमतां श्रेष्ठो नाम कुर्वन्महा
मतिः ॥ स्वल्पेनैव हि कालेन रिंगिणौ तौ तदा व्रजे ॥ घृष्टजानुकरौ तौ हि बभूवतुरुभावपि ॥ करीषभस्मदिग्धांगौ भ्रममा
णावितस्ततः ॥ न निवारयितुं सेहे यशोदा तौ न रोहिणी ॥ गोवाटमध्ये क्रीडंतौ वत्सवाटगतौ पुनः ॥ तदहर्जातगोवत्सपुच्छाक
र्षणतत्परौ ॥ यदा यशोदा तौ बालावेकस्थानचरावुभौ ॥ शशाक नो वारयितुं क्रीडंतावतिचंचलौ ॥ यशोदाप्यथ रुष्टा सा सकोपे
नानुगता वनं ॥ कृष्णं कमलपत्राक्षं तं ततो यंत्री रुष्टा तदा ॥ दाम्ना बद्ध्वा तदा मध्ये निबध्याथ उलूखले ॥ यमलार्जुनयोर्मध्ये
जगाम कमलेक्षणः ॥ कर्षता वृक्षयोर्मध्ये तिर्यग्गतमुलूखलं ॥ भग्नावुत्तुंगशाखाग्रौ तेन तौ यमलार्जुनौ ॥ ततः कटकटा
शब्दं समाकर्ण्य तु कातरः ॥ आजगाम व्रजजनो ददृशे च महाद्रुमौ ॥ भग्नस्कंधौ निपतितौ भग्नशाखौ महीतले ॥ तयोरुद्धस्म ल्पदं
तांशुसितहासं च बालकं ॥ तयोर्मध्यगतं बद्धं दाम्ना गाढं तथोदरे ॥ ततश्च दामोदरतां स ययौ दामबंधनात् ॥ गोपवृद्धास्ततः सर्वे नं
दगोपपुरोगमाः ॥ मंत्रयामासुरुद्विग्ना महोत्पातातिभीरवः ॥ स्थानेनेह न नः कार्यं व्रजामोन्यन्महावनं ॥ उत्पाता बहवो ह्यत्र दृश्यं
ते नाशहेतवः ॥ पूतनाया विनाशश्च शकटस्य विपर्ययः ॥ विना वातादिदोषेण द्रुमयोः पतनं तथा ॥ वृंदावनमितः स्थानात्त

राम
११६

तेषां पूतना बालघातिनी ॥ सुप्तं कृष्णमुपादाय रात्रौ तस्मै ददौ स्तनं ॥ यस्मै यस्मै स्तनं रात्रौ पूतना संप्रयच्छति ॥ तस्य तस्य क्षणेनांगं बालकस्योप
हन्यते ॥ कृष्णस्तु तत्स्तनं गाढं कराभ्यामतिपीडितं ॥ गृहीत्वा प्राणसहितं पपौ क्रोधसमन्वितः ॥ सा विमुक्तमहारावा विछिन्नस्नायुबंध
ना ॥ पपात पूतना भूमौ म्रियमाणातिभीषणा ॥ तन्नादश्रुतिसंत्रासाद्विबुद्धास्ते व्रजौकसः ॥ ददृशुः पूतनोत्संगे कृष्णं तां च निपातितां ॥ आदाय
कृष्णं संत्रस्ता यशोदापि द्विजोत्तम ॥ गोपुछभ्रामणेनाथ बालदोषमपाकरोत् ॥ गोपुरीषमुपादाय नंदगोपोपि मस्तके ॥ कृष्णस्य प्रद
दौ रक्षां कुर्वन्नेतदुदीरयन् ॥ नंदगोप उवाच ॥ रक्षतु त्वामशेषाणां भूतानां प्रभवो हरिः ॥ यस्य नाभिसमुद्भूतपंकजादभवज्जगत् ॥ व
राहरूपधृग्देवः स त्वां रक्षतु केशवः ॥ नखांकुरविनिर्भिन्नवैरिवक्षस्थलो विभुः ॥ नृसिंहरूपी सर्वत्र स त्वां रक्षतु केशवः ॥ वामनो रक्षतु
सदा भवंतं यः क्षणादभूत् ॥ त्रिविक्रमः क्रमाक्रान्तत्रैलोक्यः स्फुरदायुधः ॥ शिरस्ते पातु गोविंदः कंठं रक्षतु केशवः ॥ गुह्यं सजठरं
विष्णुर्जंघे पादौ जनार्दनः ॥ मुखं बाहू प्रबाहू च मनः सर्वेंद्रियाणि च ॥ रक्षत्वव्याहतैश्वर्यस्तव नारायणोऽव्ययः ॥ शार्ङ्गचक्रगदापाणेः
शंखनादहताः क्षयं ॥ गच्छंतु प्रेतकूष्मांडराक्षसा ये तवाहिताः ॥ त्वां पातु दिक्षु वैकुंठो विदिक्षु मधुसूदनः ॥ हृषीकेशोंबरे भूमौ रक्षतु
त्वां महीधरः ॥ एवं कृतस्वस्त्ययनो नंदगोपेन बालकः ॥ शायितः शकटस्याधो बालपर्यंकिकातले ॥ ते च गोपा महद्दृष्ट्वा पूत
नायाः कलेवरं ॥ मृतायाः परमं त्रासं विस्मयं परमं ययुः ॥ इति श्रीविष्णुपुराणे पंचमेंशे पंचमोऽध्यायः ॥ पराशर उवाच ॥ कदा
चिच्छकटस्याधः शयानो मधुसूदनः ॥ चिक्षेप चरणावूर्ध्वं स्तन्यार्थी प्ररुरोद ह ॥ तस्य पादप्रहारेण शकटं परिवर्तितं ॥ विध्व
स्तकुंभभांडं वै विपरीतं पपात च ॥ ततो हाहाकृतः सर्वो गोपगोपीजनो द्विज ॥ आजगामाथ ददृशे बालमुत्तानशायिनं ॥ गोपाः

विष्णु
११७

117

वृषाश्च यथा वृत्ताः॥ अथ तौ रमतु यातामज्जडानामिवोक्तय॥ उन्मत्तशिखिसारंगे तस्मिन्काले महावने॥ कृष्णरामौ मुदा यु-
क्तौ गोपालैश्चेरतुः सह॥ क्वचिद्गोभिः समं रम्यं गेयतानरतावुभौ॥ चेरतुः क्वचिदत्यर्थं शीतवृक्षतलाश्रयौ॥ क्वचित्कदंबस्र-
क्चित्रौ मयूरस्रग्धरौ क्वचित्॥ विचित्रौ क्वचिदासेतां विविधैर्गिरिधातुभिः॥ पर्णशय्यासु संसुप्तौ क्वचिन्निद्रान्तरैषिणौ॥
क्वचिद्गर्जति जीमूते हाहाकाररवाकुलौ॥ गायतामन्यगोपानां प्रशंसापरमौ क्वचित्॥ मयूरकेकानुगतौ गोपवेणुप्रवा-
दकौ॥ इति नानाविधैर्भावैरुत्तमप्रीतिसंयुतौ॥ क्रीडंतौ तौ वने तस्मिन् चेरतुस्तुष्टमानसौ॥ विकाले तु समं गोभिर्गोप-
वृंदसमन्वितौ॥ आक्रम्य बलौ गोपौ गोपवेषधरावुभौ॥ विकाले च यथाजोषं व्रजमेत्य महाबलौ॥ गोपैः समानैः सहि-
तौ। विक्रीडतेऽपराविव॥ इति श्रीविष्णुपुराणे पंचमेंऽशे षष्ठोऽध्यायः॥ पराशर उवाच॥ एकदा तु विना रामं कृष्णो वृंदा-
वनं ययौ॥ विचचार वृतो गोपैर्वन्यपुष्पस्रगुज्वलः॥ स जगामाथ कालिंदीं लोलकल्लोलशालिनीं॥ तीरसंलग्नफेनौघैर्ह-
संतीमिव सर्वतः॥ तस्यां चातिमहाभीमं विषाग्निसृतवारिणं॥ ह्रदं कालियनागस्य ददर्शातीव भीषणं॥ विषाग्निना विसर-
ता दग्धतीरमहातरुः॥ वाताहतांबुविक्षेपस्पर्शदग्धविहंगमं॥ तमतीव महारौद्रं मृत्युवक्त्रमिवापरं॥ विलोक्य चिंतया-
मास भगवान्मधुसूदनः॥ अस्मिन्वसति दुष्टात्मा कालियोसौ विषायुधः॥ यो मया निर्जितस्त्यक्त्वा दुष्टो नष्टः पयोनिधिं॥ तेने-
यं भूषिता सर्वा यमुना सागरंगमा॥ न गोपैर्गोधनैर्वापि तृषार्तैरुपयुज्यते॥ तदस्य नागराजस्य कर्तव्यो निग्रहो मया॥ वि॥

राम
११७

स्वादु क्रमभाचिरं ॥ यावद्वृद्धौ महोत्पातदोषेणाभिभवेद्द्रुतं ॥ इति कृत्वा मतिं सर्वे गमने ते व्रजौकसः ॥ ऊचुः स्वं स्वं कुलं शीघ्रं गम्य
तां मा विलंब्यतां ॥ ततः क्षणेन प्रययुः शकटैर्गोधनैस्तथा ॥ यूथशो वत्सपालांश्च कालयन्तो व्रजौकसः ॥ द्रव्यावयवनिर्धूतं क्ष
णमात्रेण तत्तथा ॥ काककोकीशमाकीर्णं व्रजस्थानमभूत् द्विज ॥ वृंदावनं भगवता कृष्णेनाक्लिष्टकर्मणा ॥ शुभेन मनसा ध्या
तं गवां वृद्धिमभीप्सता ॥ ततस्तत्राति रूक्षेपि धर्मकाले द्विजोत्तम ॥ प्रावृट्काल इवोद्भूतं नवशष्पं समंततः ॥ स समावा
सितः सर्वो व्रजो वृंदावने ततः ॥ शकटीवाटपर्यंतः चंद्रार्द्धाकारसंस्थितिः ॥ वत्सपालौ च संवृत्तौ रामदामोदरौ ततः ॥ एक
स्थाने स्थितौ गोष्ठे चेरतुर्बाललीलया ॥ बर्हिपत्रकृतापीडौ वन्यपुष्पावतंसकौ ॥ गोपवेणुकृतातोद्यपत्रवाद्यकृतस्वनौ ॥ काक
पक्षधरौ बालौ कुमाराविव पावकी ॥ हसंतौ च रमंतौ च चेरतुः स्म महावने ॥ क्वचिद्धसंतावन्योन्यं क्रीडमानौ तथापरैः
गोपपुत्रैः समं वत्सांश्चारयंतौ विचेरतुः ॥ कालेन गच्छता तौ तु सप्तवर्षौ महाव्रजे ॥ सर्वस्य जगतः पालौ वत्सपालौ बभू
वतुः ॥ प्रावृट्कालस्ततोतीव मेघौघस्थगितांबरः ॥ बभूव वारिधाराभिरैक्यं कुर्वन्दिशामिव ॥ प्ररूढनवशष्पाढ्या शक्रगो
पावृता मही ॥ यथा मारकतेवासीत्पद्मरागविभूषिता ॥ ऊहुरुन्मार्गवाहीनि निम्नगांभांसि सर्वतः ॥ मनांसि दुर्विनीतानां
प्राप्य लक्ष्मीं नवामिव ॥ न रेजेंतरितश्चंद्रो निर्मलो मलिनैर्घनैः ॥ सद्वादिवादो मूर्खाणां प्रगल्भाभिरिवोक्तिभिः ॥ निर्गुणेनापि
चापेन शक्रस्य गगने पदं ॥ अवाप्यताविवेकस्य नृपस्येव परिग्रहे ॥ मेघपृष्ठे बलाकानां रराज विमलाततिः ॥ दुर्वृत्ते वृत्तचेष्टेव
कुलीनस्यातिशोभना ॥ न बबंधांबरे स्थैर्यं विद्युदत्यंतचंचला ॥ मैत्रीव प्रवरे पुंसि दुर्जनेन प्रयोजिता ॥ मार्गा बभूवुरस्पष्टा

घ

प्रोचुश्च केशवः श्रीमान्भयकातर्यगद्गदं ॥ सर्वो यशोदया सार्द्धं विशामोत्र महाह्रदे ॥ नागराजस्य नो गंतुमस्माकं युज्यते व्रजे
॥ दिवसः को विना सूर्यं विना चंद्रेण का निशा ॥ विना वृषेण का गावो विना कृष्णेन को व्रजः ॥ विनाकृता न यास्यामो कृष्णेनानेन
न गोकुलं ॥ अरम्यं नातिसेव्यं च वारिहीनं यथा सरः ॥ यत्र नेंदीवरदलप्रख्यकांतिरयं हरिः ॥ तेनापि मातुर्वासेन रतिरस्तीति
विस्मयः ॥ उत्फुल्लपंकजदलस्पष्टकांतिविलोचनं ॥ अपश्यंतो हरिं दीनाः कथं गोष्ठे भविष्यथ ॥ अत्यंतमधुरालापहृताशे
शेषमनोवृत्तिः ॥ न विना पुंडरीकाक्षं यास्यामो नंदगोकुलं ॥ भोगेनावेष्टितस्यापि सर्पराजेन पश्यत ॥ स्मितशोभिमुखं गो
प्यः कृष्णस्यास्य दृष्टिलोकने ॥ पराशर उवाच ॥ इति गोपीवचः श्रुत्वा रौहिणेयो महाबलः ॥ गोपांश्च त्रासविधुरान्विलोक्य
स्तिमितेक्षणान् ॥ नंदं च दीनमत्यर्थं न्यस्तदृष्टिं सुतानने ॥ मूर्छाकुलां यशोदां च कृष्णमाहात्म्यसंज्ञया ॥ किमर्थं देवदेवेश भा
वोयं मानुषस्त्वया ॥ व्यज्यतेत्यंतमात्मानं किमनंतं न वेत्सि यत् ॥ त्वमस्य जगतो नाभिरराणामिव संश्रयः ॥ कर्तापह
र्ता पाता च त्रैलोक्यं त्वं त्रयीमयः ॥ सेंद्ररुद्राश्विवसुभिरादित्यैर्मरुदग्निभिः ॥ चिंत्यसे त्वमचिंत्यात्मन्समस्तैश्चैव यो
गिभिः ॥ जगत्यर्थे जगन्नाथ भारावतरणेच्छया ॥ अवतीर्णोसि मर्त्येषु तवांशश्चाहमग्रजः ॥ मनुष्यलीलां भगवन्भजतो
भजंतु सुराः ॥ विडंबयंतस्त्वल्लीलां सर्व एव सहासते ॥ अवतार्य भवान्पूर्वं गोकुले तु सुरांगनाः ॥ क्रीडार्थमात्मनः पश्चाद
वतीर्णोसि शाश्वतः ॥ अत्रावतीर्णयोः कृष्ण गोपा एव हि बांधवाः ॥ गोप्यश्च सीदतः कस्मात्त्वं बंधून्समुपेक्षसे ॥ दर्शितो मा

स्वासास्तु सुखं येन चरेयुर्व्रजवासिनः॥ एतदर्थं न लोकेस्मिन्नवतारो मयाकृतः॥ यदेषामुत्पथस्थानां कार्या शास्तिर्दुरात्मनां
॥ तदेतन्नातिदूरस्थं कदंबमुरुशाखिनं॥ अधिरुह्य पतिष्यामि ह्रदेस्मिन्ननिलाशिनः॥ पराशर उवाच॥ इत्थं विचिंत्य बध्वा च
गाढं परिकरं ततः॥ निपपात ह्रदे तत्र सर्पराजस्य वेगतः॥ तेनापि पतता तत्र क्षोभितः स महाह्रदः॥ अत्यर्थं दूरजातांस्तु सम
सिंचन्महीरुहान्॥ तेहि दुष्टविषज्वालातप्तांबुपवनोक्षिताः॥ जज्वलुः पादपाः सद्यो ज्वालाव्याप्तदिगंतराः॥ आस्फोटयामास
तदा कृष्णो नागह्रदे भुजं॥ तच्छब्दश्रवणाच्चाशु नागराजोभ्युपागमत्॥ आताम्रनयनः कोपाद्विषज्वालाकुलैः फणैः॥ वृतो
महाविषैश्चान्यैरुरगैरनिलाशिभिः॥ नागपत्न्यश्च शतशो हारिहारोपशोभिताः॥ प्रकंपिततनुक्षेपचलत्कुंडलकांतयः
॥ ततः प्रवेष्टितः सर्वैः स कृष्णो भोगबंधनैः॥ ददंशुश्चापि ते कृष्णं विषज्वालाविलैर्मुखैः॥ तं तत्र पतितं दृष्ट्वा सर्पभोगनि
पीडितं॥ गोपा व्रजमुपागम्य चुक्रुशुः शोकलालसाः॥ एष मोहं गतः कृष्णो मग्नो वै कालियह्रदे॥ भक्ष्यते सर्पराजेन तदाग
च्छत पश्यत॥ तच्छ्रुत्वा ते तदा गोपा वज्रपातोपमं वचः॥ गोप्यश्च त्वरिता जग्मुः यशोदाप्रमुखा ह्रदं॥ हा हा क्वासाविति ज
नो गोपीनामति विह्वलाः॥ यशोदया समं भ्रांतो द्रुतं प्रस्खलितं ययौ॥ नंदगोपश्च गोपाश्च रामश्चाद्भुतविक्रमः॥ त्वरितं
यमुनां जग्मुः कृष्णदर्शनलालसाः॥ ददृशुश्चापि तेतत्र सर्पराजवशंगतं॥ निःप्रयत्नं कृतं कृष्णं सर्पभोगेन वेष्टितं॥ नंद
गोपश्च निश्चेष्टो न्यस्य पुत्रमुखे दृशं॥ यशोदा च महाभागा बभूव मुनिसत्तम॥ गोप्यस्त्वन्या रुदंत्यश्च ददृशुः शोककातराः॥

मरुतोश्विनौ ॥ वसवश्च सहादित्यैस्तस्य स्तोष्यामि किं न्वहं ॥ एकावयवसूक्ष्मांशो यस्यैतदखिलं जगत् ॥ कल्पनावयवस्तस्य स्तोष्या
मि किं न्वहं ॥ सदसद्रूपिणो यस्य ब्रह्माद्यास्त्रिदशोत्तमाः ॥ परमार्थं न जानंति तत्र स्तोष्यामि किं न्वहं ॥ ब्रह्माद्यैरर्च्यते दिव्यैर्यश्च पुष्पा
नुलेपनैः ॥ नंदनादिसमुद्भूतैः सोर्च्यते वा कथं मया ॥ यस्यावताररूपाणि देवराजः सदार्चति ॥ न वेत्ति परमं रूपं सोर्च्यते वा क
थं मया ॥ विषयेभ्यः समाहृत्य सर्वाक्षाणि च योगिनः ॥ समर्चयंति ध्यानेन सोर्च्यते वा कथं मया ॥ हृदि संकल्प्य यद्रूपं ध्यानेनार्चं
ति योगिनः ॥ भावपुष्पादिभिर्नाथः सोर्च्यते वा कथं मया ॥ सोहं ते देवदेवेश नार्चनादौ स्तुतौ न च ॥ सामर्थ्यवान्कृपामात्रमनो
वृत्तिः प्रसीद मे ॥ सर्पजातिरियं क्रूरा यस्यां जातोस्मि केशव ॥ तत्स्वभावोयमत्रास्ति नापराधो ममाच्युत ॥ सृज्यते भवता सर्वं त
था संह्रियते जगत् ॥ जातिरूपस्वभावाश्च सृज्यंते जगता त्वया ॥ यथाहं भवता सृष्टो जात्या रूपेण चेश्वर ॥ स्वभावेन च संयुक्त
स्तथेदं चेष्टितं मम ॥ यद्यन्यथा प्रवर्त्तेयं देव दंडो मयि ॥ न्याय्यो दंडनिपातो वै तवैव वचनं यथा ॥ तथापि यज्जगत्स्वामी दंडं
पातितवान्मयि ॥ स सोढोयं वरं दंडस्त्वत्तो नान्यस्त्वमे वरः ॥ हतवीर्यो हतविषो दमितोहं त्वयाच्युत ॥ जीवितं दीयतामे
कमाज्ञापय करोमि किं ॥ श्रीभगवानुवाच ॥ नात्र स्थेयं त्वया सर्प कदाचिद्यमुनाजले ॥ सपुत्रपरिवारस्त्वं समुद्र
सलिलं व्रज ॥ मत्पदानि च ते सर्प दृष्ट्वा मूर्द्धनि सागरे ॥ गरुडः पन्नगरिपुस्त्वयि न प्रहरिष्यति ॥ पराशर उवाच ॥ इत्युक्त्वा
सर्पराजानं मुमोच भगवान्हरिः ॥ प्रणम्य सोपि सर्वेशं जगाम पयसां निधिम् ॥ पश्यतां सर्वभूतानां सभृत्यापत्य
बांधवः ॥ समस्तभार्यासहितः परित्यज्य स्वकं ह्रदं ॥ ततः सर्वे परिष्वज्य मृतं पुनरिवागतं ॥ गोपा मूर्द्धनि गोविंदं सिषि

तुल्यो भवो हरिः शितिवालचापलं ॥ तदयं हन्यतां कृष्ण दुरात्मा दशनायुधं ॥ पराशर उवाच ॥ इति संस्मारितः कृष्णः स्मितभिन्नौष्ठसंपु
टः ॥ आस्फोट्य मोचयामास स्वदेहं भोगबंधनात् ॥ आनम्य चापि हस्ताभ्यामुभाभ्यां मध्यमं फणं ॥ आरुह्याभुग्नशिरसः प्रननर्त्तोरुविक्र
मः ॥ व्रणाः फणेभवंस्तस्य कृष्णस्यांघ्रिनिकुट्टनैः ॥ यत्रोन्नतिं च कुरुते आनमास्य ततः शिरः ॥ मूर्छामुपाययौ भ्रांत्या नागः कृष्णस्य रेचकैः ॥ दंड
पात निपातेन ववाम रुधिरं बहु ॥ तन्निर्भग्नशिरोग्रीवमास्यात्प्रस्रुतशोणितं ॥ विलोक्य शरणं जग्मुस्तत्पत्न्यो मधुसूदनं ॥ नागपत्न्य
ऊचुः ॥ ज्ञातोसि देवदेवेश सर्वेशस्त्वमनुत्तम ॥ परं ज्योतिरचिंत्यं यत्तदंशः परमेश्वर ॥ न समर्था सुरा स्तोतुं यमनन्यभवं प्रभुं ॥ स्वरू
पवर्णनं तस्य कथं योषित्करिष्यति ॥ यस्याखिलं महीव्योमजलाग्निपवनात्मकं ॥ ब्रह्मांडमल्पकांशांशः स्तोष्यामस्तं कथं वयं
॥ यतंतो न विदुर्नित्यं यत्स्वरूपं हि योगिनः ॥ परमार्थमणोरल्पं स्थूलात्स्थूलं नताः स्म तं ॥ न यस्य जन्मने धाता यस्य चांताय चांतकः
॥ स्थितिकर्त्ता न चान्योस्ति यस्य तस्मै नमः सदा ॥ कोपः स्वल्पोपि ते नास्ति स्थितिपालनमेव ते ॥ कारणं कालियस्यास्य दमने श्रूयतां
मतः ॥ स्त्रियोनुकंप्याः साधूनां मूढा दीनाश्च जंतवः ॥ यतस्ततोस्य दीनस्य क्षम्यतां क्षम्यतां वर ॥ समस्तजगदाधारो भवानल्पबलः
फणी ॥ त्वत्पादपीडितो जह्यान्मुहूर्त्तार्द्धेन जीवितं ॥ क्व पन्नगोल्पवीर्योयं क्व भवान्भुवनाश्रय ॥ प्रीतिद्वेषौ समोत्कृष्टगोचरौ च यतो
व्ययः ॥ ततः कुरु जगत्स्वामिन्प्रसादमवसीदतः ॥ प्राणांस्त्यजति नागोयं भर्त्तृभिक्षा प्रदीयतां ॥ पराशर उवाच ॥ इत्युक्ते ताभिराश्वा
स क्लांतदेहोपि पन्नगः ॥ प्रसीद देवदेवेति प्राह वाक्यं शनैः शनैः ॥ तवाष्टगुणमैश्वर्यं नाथ स्वाभाविकं बलं ॥ निरस्तातिशयं यस्य त
स्य स्तोष्यामि किं न्वहं ॥ त्वं परस्त्वं परस्याद्यः परं त्वं तत्परात्मकं ॥ परस्मात्परमो यस्त्वं तस्य स्तोष्यामि किं न्वहं ॥ यस्माद्ब्रह्मा च रुद्रश्च चंद्रेंद्र

वि॰पु॰
१९

१२८

पामंचक्रतुस्तौ तत्र क्षेपणीयैस्तथाश्मभिः॥ तन्निप्सुरसुरस्तत्र उभयो रममाणयोः॥ आजगाम प्रलंबाख्यो गोपवेषतिरोहितः॥ सोवगा
हन्निःशंकस्तेषांमध्यममानुषः॥ मानुषंवपुरास्थाय प्रलंबो दानवोत्तमः॥ तयोश्छिद्रांतरप्रेप्सुरविषह्यममन्यत॥ कृष्णंत
तोरौहिणेयंहंतुंचक्रेमनोरथं॥ हरिणाक्रीडनंनामबालक्रीडनकंततः॥ प्रकुर्वंतस्तुतेसर्वे द्वौद्वौयुगपदुत्पतन्॥ श्रीदाम्नासहगो
विंदः प्रलंबेनतथाबलः॥ गोपालैरपरैश्चान्ये गोपालाःपुप्लुवुस्ततः॥ श्रीदामानंततःकृष्णःप्रलंबंरोहिणीसुतः॥ जितवान्कृष्णपक्षी
यैर्गोपैरन्येपराजिताः॥ तेवाहयंतस्त्वन्योन्यंभांडीरस्कंधमेत्यवै॥ पुनर्ववृधिरेसर्वेयेयेयत्रपराजिताः॥ संकर्षणंतुस्कंधेनशीघ्रमु
त्क्षिप्यदानवः॥ नतःस्थलंजगामैवसचंद्रइववारिदः॥ असहन्रौहिणेयस्यसभारंदानवोत्तमः ववृधेसुमहाकायःप्रावृषीवबलाह
कः॥ संकर्षणस्तुतंदृष्ट्वादग्धशैलोपमाकृतिम्॥ स्रग्दामलंबाभरणंमुकुटाटोपमस्तकं॥ रौद्रंशकटचक्राक्षंपादन्यासचलत्क्षितिं
ह्रियमाणस्ततःकृष्णमिदंवचनमब्रवीत्॥ कृष्णकृष्णह्रियाम्येषपर्वतोदग्रमूर्तिना केनापिपश्यदैत्येनगोपालछद्मरूपिणा॥ य
दत्रसांप्रतंकार्यंमयामधुनिसूदन॥ तत्कथ्यतांप्रयात्येषदुरात्मादानवाधमः॥ पराशरउवाच॥ तमाहरामंगोविंदःस्मितभिन्नौष्ठ
संपुटः॥ महात्मारौहिणेयस्यबलवीर्यप्रमाणवित्॥ किमयंमानुषोभावोव्यक्तमेवावलंब्यते सर्वात्मन्सर्वगुह्यानांगुह्यगुह्यात्म
नात्वया॥ स्मराशेषजगद्बीजकारणंकारणाग्रज॥ आत्मानमेकंतद्वच्चजगत्येकार्णवेचयत्॥ किंनवेत्सियथाहंचत्वंचैकंकारणंभुवः॥ भा
रावतरणार्थायमर्त्यलोकमुपागतौ॥ नभःशिरस्तेंबुमयीचमूर्तिःपादौक्षितिर्वक्त्रमनंतवह्निः॥ सोमोमनस्तेश्वसितंसमीरोदिशश्चत
स्रोव्ययबाहवस्ते॥ सहस्रवक्त्रोभगवान्महात्मासहस्रहस्तांघ्रिशरीरभेदः॥ सहस्रपद्मोद्भवयोनिराद्यःसहस्रशस्त्वांमुनयोगृणंति॥ दि
व्यंहिरूपंतववेत्तिनान्योदेवैरशेषैरवताररूपं॥ तदर्च्यतेवेत्सिनकिंयदंतेत्वय्येवविश्वंलयमभ्युपैति॥ त्वयाधृतेयंधरणीबिभर्तिचराच

हि
गत

राम
२९

चुर्नेत्रैर्जगृहे लेः॥ कृष्णमक्लिष्टकर्माणमन्ये विस्मितचेतसः॥ तुष्टुवुर्मुदितागोपाः दृष्ट्वा शिवजलां नदीं॥ प्रीयमानः सगोपीभिर्गीयमानश्चानुचे
ष्टितः॥ संस्तूयमानो गोपैश्च कृष्णो व्रजमुपागमत्॥ इति श्री विष्णुपुराणे पंचमेंऽशे सप्तमोध्यायः॥ पराशर उवाच॥ गाः पालयंतौ च पुनः स
हितौ बलकेशवौ॥ भ्रममाणौ वने तस्मिन्रम्यं तालवनं गतौ॥ तत्तु तालवनं दिव्यं धेनुको नाम दानवः॥ मृगमांसकृताहारः सदाध्यास्ते खराकृतिः॥
तत्तु तालवनं पक्वफलसंपत्समन्वितं॥ दृष्ट्वा स्पृहान्विता गोपाः फलादाने ब्रुवन्वचः॥ हे राम हे कृष्ण सदा धेनुकेन वै रक्ष्यते॥ भूप्रदेशो यतस्त
स्मात्पक्वानीमानि संति वै॥ फलानि पश्य तालानां गंधामोदितदिंशि वै॥ वयमेतान्यभीप्सामः पात्यंतां यदि रोचते॥ इति गोपकुमाराणां
श्रुत्वा संकर्षणो वचः॥ कृष्णश्च पातयामास भुवि तालफलानि वै॥ फलानां पततां शब्दमाकर्ण्य सुदुरासदः॥ आजगाम स दुष्टात्मा कोपाद्दै
तेयगर्दभः॥ पद्भ्यामुभाभ्यां स तदा पश्चिमाभ्यां बली बलं॥ जघानोरसि ताभ्यां च स च तेनाप्यगृह्यत॥ गृहीत्वा भ्रामणेनैव सोंबरे गतजी
वितं॥ तस्मिन्नेव स चिक्षेप वेगेन तृणराजनि॥ ततः फलान्यनेकानि तालाग्रान्निपतन्खरः॥ पृथिव्यां पातयामास महावातोंबुदानिव॥ अन्या
नप्यस्य वै ज्ञातीनागतान्दैत्यगर्दभान्॥ कृष्णश्चिक्षेप तालाग्रे बलभद्रश्च लीलया॥ क्षणेनालंकृता पृथ्वी पक्वैस्तालफलैस्तथा॥ दैत्यगर्द
भदेहैश्च मैत्रेय शुशुभेधिकं॥ ततो गावो निराबाधास्तस्मिंस्तालवने द्विज॥ नवशष्पं सुखं चेरुर्यन्न भुक्तमभूत्पुरा॥ इति श्री विष्णुपुराणे पंच
मेंऽशेऽष्टमोध्यायः॥ पराशर उवाच॥ तस्मिन्रासभदैतेये सानुगे विनिपातिते॥ सौम्यं गोगोपगोपीनां रम्यं तालवनं बभौ॥ ततस्तौ जातहर्षौ
तु वसुदेवसुतावुभौ॥ हत्वा धेनुकदैतेयं भांडीरवनमागतौ॥ क्ष्वेडमानौ प्रगायंतौ विचिन्वंतौ च पादपान्॥ चारयंतौ च गा दूरे व्याहरंतौ च नामभिः॥
निर्योगपाशस्कंधौ तौ वनमालाविभूषितौ॥ शुशुभाते महात्मानौ बालशृंगाविवर्षभौ॥ सुवर्णांजनचूर्णाभ्यां तौ तदा रूषितांबरौ॥
मनुष्यधर्माभिरतौ मानयंतौ मनुष्यतां॥ तज्जातिगुणयुक्ताभिः क्रीडाभिश्चेरतुर्वनं॥ ततस्त्वांदोलिकाभिश्च नियुद्धैश्च महाबलौ॥ व्या

पदं ॥ योगाग्निदग्धक्लेशौघं योगिनामिव मानसं ॥ सूर्यांशुजनितं तापं निन्ये तारापतिः शमं ॥ अहंकारोद्भवं दुःखं विवेकः सुमहानिव ॥ नभसोब्दा
न्भुवः पंकान्कालुष्यं चांभसः शरत् ॥ इंद्रियाणींद्रियार्थेभ्यः प्रत्याहार इवाहरत् ॥ प्राणायाम इवांभोभिः सरसां कृतपूरकैः ॥ अभ्यस्यतानुदिवसं रे
चककुंभकादिभिः ॥ विमलांबरनक्षत्रे काले चाभ्यागते व्रजे ॥ ददर्श नंदमहारंभायोद्यतांस्तान्व्रजौकसः ॥ कृष्णस्तानुत्सुकान्दृष्ट्वा गोपानुत्सव
लालकान् ॥ कौतूहलादिदं वाक्यं प्राह वृद्धान्महामतिः ॥ कोयं शक्रमहो नाम येन वो हर्ष आगतः ॥ प्राह तं नंदगोपश्च पृच्छंतमतिसादरं ॥ मे
घानां पयसां चेशो देवराजः शतक्रतुः ॥ तेन संचोदिता मेघा वर्षंत्यंबुमयं रसं ॥ तद्वृष्टिजनितं सस्यं वयमन्ये च देहिनः ॥ वर्त्तयामोपयुंजानास्त
र्पयामश्च देवताः ॥ क्षीरवत्य इमा गावो वत्सवत्यश्च निर्वृताः ॥ तेन संवर्द्धितैः शस्यैः पुष्टास्तुष्टा भवंति वै ॥ नाशस्यानातृणा भूमिर्न बुभुक्षा
र्दिता जनाः ॥ दृश्यंते यत्र दृश्यंते वृष्टिमंतो बलाहकाः ॥ भौममेतत्पयो दुग्धं गोभिः सूर्यस्य वारिदः ॥ पर्जन्यः सर्वलोकस्य भवाय भुवि वर्ष
ति ॥ तस्मात्प्रावृषि राजानः सर्वे शक्रं मुदा युताः ॥ महैः सुरेशमर्चंति वयमन्ये च मानवाः ॥ पराशर उवाच ॥ नंदगोपस्य वचनं श्रुत्वेत्थं शक्रपू
जने ॥ कोपाय त्रिदशेंद्रस्य प्राह दामोदरस्तदा ॥ न वयं कृषिकर्त्तारो वाणिज्याजीविनो न च ॥ गावोस्मद्दैवतं तात वयं वनचरा यतः ॥ आन्वीक्षिकी
वार्त्ता दंडनीतिस्तथापरा ॥ विद्याचतुष्टयं त्वेतद्वार्त्तामत्र श्रृणुष्व मे ॥ कृषिर्वणिज्या तद्वत्तु तृतीयं पशुपालनं ॥ विद्या ह्येता महाभाग वार्त्ता
वृत्तित्रयाश्रया ॥ कर्षकाणां कृषिर्वृत्तिः पण्यं विपणिजीविनां ॥ अस्माकं गौः परा वृत्तिर्वार्त्ताभेदैरियं त्रिभिः ॥ विद्यया यो यया युक्तस्तस्य सा दै
वतं महत् ॥ सैव पूज्यार्चनीया च सैव तस्योपकारिका ॥ यो यस्य फलमश्नन्वै पूजयत्यपरं नरः ॥ इह च प्रेत्य चैवासौ तान्नाप्नोति शोभनं ॥ कृष्यं
ताः प्रथिताः सीमाः सीमांतं च पुनर्वनम् ॥ वनांता गिरयः सर्वे ते चास्माकं परायतिः ॥ न द्वारबंधावरणा न गृहक्षेत्रिणस्तथा ॥ सुखिनः सक
ले लोके यथा वै चक्रचारिणः ॥ श्रूयंते गिरयः स्वामीयेनस्मिन्कामरूपिणः ॥ तत्तद्रूपं समास्थाय रमंते स्वेषु सानुषु ॥ यदा चैते प्रबाध्यंते ते

१२१

राम २१

र्विश्वस्यानंतमूर्त्ते ॥ छत्तारिभेदैरजकालरूपो निमेषरूपो जगदेतदत्सि ॥ अत्तं यथा वाडववह्निनांबु हिमस्वरूपं परिगृह्य कास्तं ॥ हिमाचले भानुम
तोंशुसंगाज्जलत्वमभ्येति पुनस्तदेव ॥ एवं त्वया संहरणेत्तमेतज्जगत्समस्तं पुनरप्यवश्यं ॥ तवैव सर्गाय समुद्यतस्य जगत्त्वमभ्येत्यनुकल्पमी
श ॥ भवानहं च विश्वात्मन्नेकमेव हि कारणं ॥ जगतोस्य जगत्यर्थे भेदेनावां व्यवस्थितौ ॥ तत्स्मर्यताममेयात्मंस्त्वयात्मा जहि दानवं ॥ मानुष्य
मेवावलंब्य बंधूनां क्रियतां हितं ॥ पराशर उवाच ॥ इति संस्मारितो विप्र कृष्णेन सुमहात्मना ॥ विहस्य पीडयामास प्रलंबं बलवान्बलः ॥ मु
ष्टिनाहन्मूर्द्ध्नि कोपसंरक्तलोचनः ॥ तेन चास्य प्रहारेण बहिर्याते विलोचने ॥ स निष्क्रामितमस्तिष्को मुखाच्छोणितमुद्वमन् ॥ निपपात
महीपृष्ठे दैत्यवर्यो ममार च ॥ प्रलंबं निहतं दृष्ट्वा बलेनाद्भुतकर्मणा ॥ प्रहृष्टास्तुष्टुवुर्गोपाः साधु साध्विति चाब्रुवन् ॥ संस्तूयमानो गोपैस्तु
रामो दैत्ये निपातिते ॥ प्रलंबे सह कृष्णेन पुनर्गोकुलमाययौ ॥ इति श्री विष्णुपुराणे पंचमेंशे नवमोध्यायः ॥ पराशर उवाच ॥ तयोर्विह
रतोस्तत्र रामकेशवयोर्व्रजे ॥ प्रावृड्व्यतीता विकसत्सरोजा चाभवच्छरत् ॥ अवापुस्तापमत्यर्थं शफर्यः पल्वलोदके ॥ पुत्रक्षेत्रादिसक्ते
न ममत्वेन यथा गृही ॥ मयूरा मौनिनस्तस्थुः परित्यक्तमदा वने ॥ असारतां परिज्ञाय संसारस्येव योगिनः ॥ उत्सृज्य जलसर्वस्वं निर्मला
नितमूर्त्तयः ॥ तत्यजुश्चांबरं मेघा गृहं विज्ञानिनो यथा ॥ शरत्सूर्यांशुतप्तानि ययुः शोषं सरांसि च ॥ बह्वालंबममत्वेन हृदयानीव देहिनां ॥
कुमुदैः शरदंभांसि योग्यतालक्षणं ययुः ॥ अवबोधैर्मनांसीव समत्वममलात्मनां ॥ तारकाविमले व्योम्नि रराजाखंडमंडलः ॥ चंद्रश्चरमदेहा
त्मा योगी साधुकुले यथा ॥ शनकैः शनकैस्तीरं तत्यजुश्च जलाशयाः ॥ ममत्वं क्षेत्रपुत्रादिरूढमुच्चैर्यथा बुधाः ॥ पूर्वत्यक्तैः सरोंभोभिर्हंसा
योगं पुनर्ययुः ॥ क्लेशैः कुयोगिनोशेषैरंतरायहता इव ॥ निभृतोभवदत्यर्थं समुद्रः स्तिमितोदकः ॥ क्रमावाप्तमहायोगो निश्चलात्मा यथा
यतिः ॥ सर्वत्रातिप्रसन्नानि सलिलानि तथाभवन् ॥ ज्ञाते सर्वगते विष्णौ मनांसीव सुमेधसां ॥ बभूव निर्मलं व्योम शरदा ध्वस्ततो

वि॰पु॰ १२२

सारमपास्यतः॥ अंधकारीकृते लोके वर्षद्भिर्भृशमंबुदैः॥ अधश्चोर्द्धं च तिर्यक् च जगदाप्यमिवाभवत्॥ गावस्तु तेन पतता वर्षवातेन वे
गिना॥ धूताः प्राणान् जहुः सन्नत्रिकसक्थिशिरोधराः॥ क्रोडेन वत्सानाक्रम्य तस्थुरन्या महामुने॥ गावो विवत्साश्च कृता वारिपूरेण चा
पराः॥ वत्साश्च दीनवदनाः पवनाकंपिकंधराः॥ त्राहि त्राहीत्यल्पशब्दाः कृष्णमूचुरिवार्त्तकाः॥ ततस्तद्गोकुलं सर्वं गोगोपीगोपसंकुलं
॥ अतीवार्त्तं हरिर्दृष्ट्वा मैत्रेयाचिंतयत्तदा॥ एतत्कृतं महेंद्रेण मखभंगविरोधिना॥ तदेतदखिलं गोष्ठं त्रातव्यमधुना मया॥ इममद्रिमहं धैर्या
दुत्पाट्योरुशिलाघनं॥ धारयिष्यामि गोष्ठस्य पृथुच्छत्रमिवोपरि॥ पराशर उवाच॥ इति कृत्वा मतिं कृष्णो गोवर्द्धनमहीधरं॥ उत्पाट्यैक
करेणैव धारयामास लीलया॥ गोपांश्चाह जगन्नाथः समुत्पाटितभूधरः॥ विशध्वमत्र त्वरिताः कृतं वर्षनिवारणं॥ सुनिर्वातेषु देशेषु यथा
योग्यमिहास्यतां॥ प्रविश्यतां न भेतव्यं गिरिपातस्य निर्भयैः॥ इत्युक्तास्तेन ते गोपा विविशुर्गोधनैः सह॥ शकटारोपितैर्भांडैर्गोप्यश्चासार
पीडिताः॥ कृष्णोपि तं दधारैव शैलमत्यंतनिश्चलं॥ व्रजैकवासिभिर्हर्षविस्मिताक्षैर्निरीक्षितः॥ गोपगोपीजनैर्हृष्टैः प्रीतिविस्तारितेक्षणैः॥ सं
स्तूयमानचरितः कृष्णः शैलमधारयत्॥ सप्तरात्रं महामेघा ववर्षुर्नंदगोकुले॥ इंद्रेण चोदिता विप्र गोपानां नाशकारिणा॥ ततो धृते म
हाशैले परित्राते च गोकुले॥ मिथ्याप्रतिज्ञो बलभिद्वारयामास तान् घनान्॥ व्यभ्रे नभसि देवेंद्रे वितथात्मवचस्यथ॥ निष्क्रम्य गोकुलं ह
ष्टं स्वस्थाने पुनरागमत्॥ मुमोच कृष्णोपि तदा गोवर्द्धनमहाचलं॥ स्वस्थाने विस्मितमुखैर्दृष्टस्तैस्तु व्रजौकसैः॥ इति श्रीविष्णुपुराणे पं
चमेंऽशे गोवर्द्धनोद्धरणं नामैकादशोऽध्यायः॥ पराशर उवाच॥ धृते गोवर्द्धने शैले परित्राते च गोकुले॥ रोचयामास कृष्णस्य दर्शनं
पाकशासनः॥ सोऽधिरुह्य महानागमैरावतममित्रजित्॥ गोवर्द्धनगिरौ कृष्णं ददर्श त्रिदशेश्वरः॥ चारयंतं महावीर्यं गावो गोपवपुर्द्ध
रं॥ कृत्स्नस्य जगतो गोपं वृतं गोपकुमारकैः॥ गरुडं च ददर्शोच्चैरंतर्द्धानगतं द्विज॥ कृतच्छायं हरेर्मूर्ध्नि पक्षाभ्यां पक्षिपुंगवं॥ अवरुह्य स

गो

१२२

रा

वि

एम
१२२

वांये काननौकसः ॥ तद्वत्सिंहादिरूपैस्तान्घातयंति महीधराः ॥ गिरियज्ञस्त्वयं तस्माद्गोयज्ञश्च प्रवर्त्ततां ॥ किमस्माकं महेंद्रेण गावः शैलाश्च दे
वताः ॥ मंत्रयज्ञपरा विप्राः सीरयज्ञाश्च कर्षकाः ॥ गिरिगोयज्ञशीलाश्च वयमद्रिवनाश्रयाः ॥ तस्माद्गोवर्द्धनः शैलो भवद्भिर्विविधार्हणैः ॥ अर्च्य
तां पूज्यतां मेध्यं पशुं हत्वा विधानतः ॥ सर्वघोषस्य संदोहैर्गृह्यतां मा विचार्य्यतां ॥ भोज्यंतां तेन वै विप्रास्तथा ये चाभिवांछकाः ॥ समर्चिते कृते होमे
भोजितेषु द्विजातिषु ॥ शरत्पुष्पकृतापीडाः परिगच्छंतु गोगणाः ॥ एतं मम मतं गोपाः संप्रीत्या क्रियते यदि ॥ ततः कृता भवेत्प्रीतिर्गवामद्रेस्त
था मम ॥ इति तस्य वचः श्रुत्वा नंदाद्यास्ते व्रजौकसः ॥ प्रीत्युत्फुल्लमुखा विप्र साधु साध्वित्यथाब्रुवन् ॥ शोभनं तव मतं वत्स यदेतद्भवतोदितं ॥ तत्
करिष्यामहे सर्वं गिरियज्ञः प्रवर्त्त्यतां ॥ पराशर उवाच ॥ तथा च कृतवंतस्ते गिरियज्ञं व्रजौकसः ॥ दधिपायसमांसाद्यैर्ददुः शैलबलिं ततः ॥
द्विजांश्च भोजयामासुः शतशोथ सहस्रशः ॥ गावः शैलं ततश्चक्रुरर्चितास्ताः प्रदक्षिणं ॥ वृषभाश्चाभिनर्दंतः सतोया जलदा इव ॥ गिरिमू
र्द्धनि कृष्णोपि शैलोहमिति मूर्त्तिमान् ॥ बुभुजेन्नं बहु तदा गोपवर्य्याहृतं द्विज ॥ तेनैव कृष्णरूपेण गोपैः सह गिरेः शिरः ॥ अधिरुह्यार्चयामास
द्वितीयामात्मनस्तनुं ॥ अंतर्द्धानं गते तस्मिन्गोपा लब्ध्वा ततो वरान् ॥ कृत्वा गिरिमखं गोष्ठं निजमभ्याययुः पुनः ॥ इति श्रीविष्णुपुराणे पंचमें
शे दशमोध्यायः ॥ पराशर उवाच ॥ मखे प्रतिहते शक्रो भृशं कोपसमन्वितः ॥ संवर्त्तकं नाम गणं तोयदानामथाब्रवीत् ॥ भो भो मेघा निशम्यै
तद्वचनं वदतो मम ॥ आज्ञानंतरमेवाशु क्रियतामविचारितं ॥ नंदगोपः सुदुर्बुद्धिर्गोपैरन्यैः सहायवान् ॥ कृष्णाश्रयबलाध्मातो मखभंगमची
करत् ॥ आजीवो यः परस्तेषां गोपत्वकारणं ॥ ता गावो वृष्टिवातेन पीड्यंतां वचनान्मम ॥ अहमप्यद्रिशृंगाभं तुंगमारुह्य वारणं ॥ साहा
य्यं वः करिष्यामि वाय्वंबूत्सर्गयोजितं ॥ पराशर उवाच ॥ इत्याज्ञप्ताः सुरेंद्रेण मुमुचुस्ते बलाहकाः ॥ वातवर्षं महाभीममभावाय गवां द्विज ॥ त
तः क्षणेन धरणी ककुभोंबरमेव च ॥ एकं धारामहासारपूरेणाभून्महामुने ॥ विद्युल्लताकशाघातत्रस्तैरिव घनैर्घनं ॥ नादापूरितदिक्चक्रैरी

तरा

वि॰पु॰
१२३

123

मनुष्यागोपाल त्वंजुगुप्सितं॥ स्वयं च कर्म्मभवतः किमेतत्तवकथ्यतां॥ कालियो दमितस्तोये प्रलंबो विनिपातितः॥ धृतो गोवर्द्धनश्चा
यं शंकितानि मनांसि नः॥ सत्यं सत्यं हरेः पादौ शपामोमितविक्रमः॥ यथावद्वीर्य्यमालोक्य नत्वां मन्यामहे नरं॥ प्रीतिस्सस्त्रीकुमारस्य
व्रजस्यतवकेशव॥ कर्म्मचेदमशक्यं यत्समस्तैस्त्रिदशैरपि॥ बालत्वं चातिवीर्य्यं च जन्म चास्मास्वशोभनं॥ चिंत्यमानममेयात्मन्श
ङ्कां कृष्णप्रयच्छति॥ देवो वा दानवो वा त्वं यक्षो गंधर्व एव च॥ किं वास्माकं विचारेण बांधवोसि नमोस्तुते॥ पराशर उवाच॥ क्षणं भू
त्वा त्वसौ तूष्णीं किंचित्प्रणयकोपवान्॥ इत्येवमुक्तस्तैर्गोपैः कृष्णोप्याह महामुने॥ श्रीभगवानुवाच॥ मत्संबंधेन भो गोपायदि
लज्जा न जायते॥ श्लाघ्यो वाहं ततः किं वो विचारेण प्रयोजनं॥ यदि वोस्ति मयि प्रीतिः श्लाघ्योहं भवतां यदि॥ तदात्मबंधुसदृशी बुद्धिः
र्वः क्रियतां मयि॥ नाहं देवो न गंधर्वो न यक्षो न च दानवः॥ अहं वो बांधवो जातो नास्ति चिंत्यमतोन्यथा॥ पराशर उवाच॥ इति श्रुत्वा
हरेर्वाक्यं बद्धमौनास्ततो वनं॥ ययुर्गोपा महाभागास्तस्मिन्प्रणयकोपिनि॥ कृष्णस्तु विमलं व्योम शरच्चंद्रस्य चंद्रिकां॥ तथा कुमुदिनीं
फुल्लामामोदितदिगंतरं॥ वनराजीं तथा कूजद्भृंगमालामनोरमां॥ विलोक्य सह गोपीभिर्मनश्चक्रे रतिं प्रति॥ सह रामेण मधुरम
तीव वनिताप्रियं॥ जगौ कलपदं शौरिर्नानातंत्रीकृतव्रतं॥ रम्यं गीतध्वनिं श्रुत्वा संत्यज्यावसथांस्तदा॥ आजग्मुस्त्वरिता गोप्यो
यत्रास्ते मधुसूदनः॥ शनैः शनैर्जगौ गोपी काचित्तस्य लयानुगा॥ दत्तावधाना काचिच्च तमेव मनसास्मरत्॥ काचित्कृष्णेति कृष्णेति
कालज्जामुपागता॥ ययौ च काचित्प्रेमांधा तत्पार्श्वमविलज्जिता॥ काचिदावसथस्यांतः स्थित्वा दृष्ट्वा बहिर्गुरुं॥ तन्मयत्वेन गोविंदं
दध्यौ मीलितलोचना॥ तच्चिंताविपुलाह्लादक्षीणपुण्यचया तथा॥ तदप्राप्तिमहादुःखविलीनाशेषपातका॥ चिंतयंती जगत्सूतिं
परब्रह्मस्वरूपिणं॥ निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका॥ गोपीपरिवृतो रात्रिं शरच्चंद्रमनोरमां॥ मानयामास गोविंदो रास
रंभरसोत्सुकः॥ गोप्यश्च वृंदशः कृष्णचेष्टास्वायत्तमूर्तयः॥ अन्यदेशं गते कृष्णे चेरुर्वृंदावनांतरं॥ कृष्णेहमेतल्ललितं व्रजा

राम

१२३

नागेऽद्य दमिते कांते मधुसूदन ॥ शक्रः सस्मितमाहेदं यदर्थमहमागतः ॥ तव समीपं महाभाग नैतच्चिंत्यं त्वयान्यथा ॥ भारावतारणार्थाय पृथिव्याः
पृथिवीतलं ॥ अवतीर्णोऽखिलाधार त्वमेव परमेश्वर ॥ महत्तंगविरुद्धेन मया गोकुलनाशकाः ॥ समादिष्टा महामेघास्तैश्चेदं कदनं कृतं ॥
त्रातास्तास्तु त्वया गावः समुत्पाट्य महागिरिं ॥ तेनाहं तोषितो वीर कर्मणात्यद्भुतेन ते ॥ साधितं कृष्ण देवानामहं मन्ये प्रयोजनं ॥ त्वयायमद्रिप्रव
रः करेणैकेन यद्धृतः ॥ गोभिश्च चोदितः कृष्ण त्वत्सकाशमिहागतः ॥ त्वया त्राताभिरत्यर्थं युष्मत्कारणकारणात् ॥ स त्वां कृष्णाभिषेक्ष्यामि गवां
वाक्यप्रचोदितः ॥ उपेंद्रत्वे गवामिंद्रो गोविंदस्त्वं भविष्यसि ॥ अथोपवाह्यादादाय घंटामैरावताद्गजात् ॥ अभिषेकं तया चक्रे पवित्रजलपू
र्णया ॥ क्रियमाणेऽभिषेके तु गावः कृष्णस्य तत्क्षणात् ॥ प्रस्नवोद्भूतदुग्धार्द्रां सद्यश्चक्रुर्वसुंधरां ॥ अभिषिच्य गवां वाक्यैर्देवेंद्रो जनार्दनं ॥ प्रीत्या
सप्रश्रयं कृष्णं पुनराह शचीपतिः ॥ गवामेतत्कृतं वाक्यं तथान्यदपि मे शृणु ॥ यद्ब्रवीमि महाभाग भारावतरणेच्छया ॥ ममांशः पुरुषव्याघ्र पृथ्व्या
यां पृथिवीतले ॥ अवतीर्णोऽर्जुनो नाम्ना स रक्ष्यो भवता सदा ॥ भारावतरणे साहाय्यं स ते वीरः करिष्यति ॥ स रक्षणीयो भवता यथात्मा मधुसूदन
॥ श्रीभगवानुवाच ॥ जानामि भारते वंशे जातं पार्थं तवात्मजं ॥ तमहं पालयिष्यामि यावदस्मि महीतले ॥ यावन्महीतले शक्र स्थास्याम्यहमरि
रिंदम ॥ न तावदर्जुनं कश्चिद्देवेंद्र युधि जेष्यति ॥ कंसो नाम महाबाहुर्दैत्योऽरिष्टस्तथापरः ॥ केशी कुवलयापीडो नरकाद्यास्तथापरे ॥ हतेषु तेषु
देवेंद्र भविष्यति महाहवः ॥ तत्र विद्धि सहस्राक्ष भारावतरणं कृतं ॥ स त्वं गच्छ न पुत्रार्थे संतापं कर्तुमर्हसि ॥ नार्जुनस्य रिपुः कश्चिन्ममाग्रे प्र
भविष्यति ॥ अर्जुनार्थे त्वहं सर्वान्युधिष्ठिरपुरोगमान् ॥ निवृत्ते भारते युद्धे कुंत्यै दास्याम्यविक्षतान् ॥ पराशर उवाच ॥ इत्युक्तः संपरिष्व
ज्य देवराजो जनार्दनं ॥ आरुह्यैरावतं नागं पुनरेव दिवं ययौ ॥ कृष्णोऽपि सहितो गोभिर्गोपालैश्च पुनर्व्रजं ॥ आजगामाथ गोपीनां दृष्टिपूतेन व
र्त्मना ॥ इति श्रीविष्णुपुराणे पंचमेंऽशे कृष्णाभिषेको नाम द्वादशोऽध्यायः ॥ पराशर उवाच ॥ गते शक्रे तु गोपालाः कृष्णमक्लिष्टकर्मणं ॥
ऊचुः प्रीत्या धृतं दृष्ट्वा तेन गोवर्द्धनाचलं ॥ वयमस्मान्महाभाग भवता महतो भयात् ॥ गावश्च भवता त्राता गिरिधारणकर्मणा ॥ बालक्रीडेयं

यात शरत्काव्यगेयगीतिरनुक्रमात् ॥ कृष्णः शरच्चंद्रमसं कौमुदीं कुमुदाकरं । जगौ गोपीजनस्त्वेकं कृष्णनाम पुनः पुनः ॥ परिवर्त्तश्रमेणैका च
लद्वलयलापिनी ॥ ददौ बाहुलतां स्कंधे गोपी मधुनिघातिनः ॥ काचित्प्रविलसद्बाहुः परिरभ्य चुचुंब तं ॥ गोपी गीतस्तुतिव्याजनिपुणा मधुसू
दनं ॥ गोपीकपोलसंश्लेषमभिपत्य हरेर्भुजौ ॥ पुलकोद्गमसस्याय स्वेदांबुघनतां गतौ ॥ रासगेयं जगौ कृष्णो यावत्तारतरध्वनिः ॥ साधु कृ
ष्णेति कृष्णेति तावत्ता द्विगुणं जगुः ॥ गतेनुगमनं चक्रुः चलने संमुखं ययुः ॥ प्रतिलोमानुलोमेन भेजुर्गोपांगना हरिं ॥ स तथा सह गोपीभिर्र
राम मधुसूदनः ॥ यथाब्दकोटिप्रतिमः क्षणस्तेन विनाभवत् ॥ ता वार्य्यमाणाः पतिभिः पितृभिर्भ्रातृभिस्तथा ॥ कृष्णं गोपांगना रात्रौ रमयंति रति
प्रियाः ॥ सोपि कैशोरकवयो मानयन्मधुसूदनः ॥ रेमे ताभिरमेयात्मा क्षपासु क्षपिताहितः ॥ तद्भर्तृषु तथा तासु सर्वभूतेषु चेश्वरः ॥ आत्मस्व
रूपरूपो सौ व्याप्य वायुरिव स्थितः ॥ यथा समस्तभूतेषु नभोग्निः पृथिवी जलं वायुश्चात्मा तथैवासौ व्याप्य सर्वमवस्थितः ॥ इति श्रीविष्णु
पुराणे पंचमेंशे कृष्णचरिते गोक्रीडनं नाम त्रयोदशोध्यायः ॥ पराशर उवाच ॥ प्रदोषार्द्धे कदाचित्तु रासासक्ते जनार्द्दने ॥ त्रासयन्सम
दां गोष्ठमरिष्टः समुपागतः ॥ सतोयतोयदच्छायस्तीक्ष्णशृंगोर्कलोचनः ॥ खुराग्रपातैरत्यर्थं दारयन्वसुधातलं ॥ लिलिहानः सनिष्पेषं
जिह्वयोष्ठं पुनः पुनः ॥ संरंभाविद्धलांगूलः कठिनस्कंधबंधनः ॥ उदग्रककुदाभोगः प्रमाणादुरतिक्रमः ॥ विण्मूत्रलिप्तपृष्ठांगो गवामुद्वेग
कारकः ॥ प्रलंबकंठोतिमुखस्तरुघाताङ्किताननः ॥ पातयन्स गवां गर्भान्दैत्यो वृषभरूपधृक् ॥ सूदयंस्तापसानुग्रो वनान्यटति यः सदा ॥ तत
स्तमतिघोराक्षमवेक्ष्यातिभयातुराः ॥ गोपा गोपस्त्रियश्चैव कृष्ण कृष्णेति चुक्रुशुः ॥ सिंहनादं ततश्चक्रे तलशब्दं च केशवः ॥ तच्छब्दश्रवणाच्चा
सौ गोविंदाभिमुखं ययौ ॥ अग्रन्यस्तविषाणाग्रः कृष्णकुक्षिकृतेक्षणः ॥ अभ्यधावत दुष्टात्मा कृष्णं वृषभदानवः ॥ आयांतं दैत्यवृषभं दृष्ट्वा कृ
ष्णो महाबलः ॥ न चचाल ततः स्थानादवज्ञास्मितलीलया ॥ आसन्नं चैव जग्राह ग्राहवन्मधुसूदनः ॥ जघान जानुना कुक्षौ विषाणग्रहणाचलं
॥ तस्य दर्पबलं भंक्त्वा गृहीतस्य विषाणयोः ॥ आपीडयदरिष्टस्य कंठं क्लिन्नमिवांबरं ॥ उत्पाट्य शृंगमेकं तु तेनैवाताडयत्ततः ॥ ममार स

स्यालोक्यतां गतिः॥ अन्या ब्रवीति कृष्णस्य मम गतीर्निरीक्ष्यतां॥ दुष्टकालिय तिष्ठात्र कृष्णोऽहमिति चापरा॥ बाहुमास्फोट्य कृष्णस्य लीलासर्वस्वमा
ददे॥ अन्या ब्रवीति भो गोपा निःशंकैः स्थीयतामिह॥ अलं वृष्टिभयेनात्र धृतो गोवर्द्धनो मया॥ धेनुकोऽयं मया क्षिप्तो विचरंतु यथेच्छया॥ गोपी ब्रवीति
चैवान्या कृष्णलीलानुकारिणी॥ एवं नानाप्रकारासु कृष्णचेष्टासु तास्तदा॥ गोप्यो व्यग्राः समं चेरू रम्यं वृंदावनं वनं॥ विलोक्यैका भुवं प्राह गोपीगो
पवरांगना॥ पुलकांचितसर्वांगी विकासिनयनोत्पला॥ ध्वजवज्रांकुशाब्जांकरेखावंत्यालि पश्यत॥ पदान्येतानि कृष्णस्य लीलालंकृतगामिनः॥
कापि तेन समं याता कृतपुण्या मदालसा॥ पदानि तस्याश्चैतानि घनान्यल्पतनूनि च॥ पुष्पापचयमत्रोच्चैश्चक्रे दामोदरो ध्रुवं॥ येनाग्राक्रांतिमा
त्राणि पदान्यत्र महात्मनः॥ अत्रोपविश्य सा तेन कापि पुष्पैरलंकृता॥ अन्यजन्मनि सर्वात्मा विष्णुरभ्यर्चितो यया॥ पुष्पबंधनसन्मानकृतमा
नामपास्य तां॥ नंदगोपसुतो यातो मार्गेणानेन पश्यत॥ अनुयातैनमन्यान्या नितंबभरमंथरा॥ या गंतव्ये द्रुतं याति निम्नपादाग्रसंस्थिति॥ हस्तन्य
स्ताग्रहस्तेयं तेन याति तथा सखि॥ अनायत्तपदन्यासा लक्ष्यते पदपद्धतिः॥ हस्तसंस्पर्शमात्रेण धूर्त्तेनैषा विमानिता॥ नैराश्यमंदगामिन्या निवृ
त्तं लक्ष्यते पदं॥ नूनमुक्ता त्वरामीति पुनरेष्यामि तेंतिकं॥ तेन कृष्णेन येनैषा त्वरिता पदपद्धतिः॥ प्रविष्टो गहनं कृष्णः पदमत्र न लक्ष्यते॥ निवर्त्त
ध्वं शशांकस्यैतद्दीधितिगोचरे॥ निवृत्तास्तास्ततो गोप्यो निराशाः कृष्णदर्शने॥ यमुनातीरमागम्य जगुस्तच्चरितं तदा॥ ततो ददृशुरायांतं वि
काशिमुखपंकजं॥ गोप्यस्त्रैलोक्यगोप्तारं कृष्णमक्लिष्टचेष्टितं॥ काचिदालोक्य गोविंदमायांतमतिहर्षिता॥ कृष्ण कृष्णेति कृष्णेति प्राह नान्यदु
दीरयत्॥ काचिद्भ्रूभंगुरं कृत्वा ललाटफलकं हरिम्॥ विलोक्य नेत्रभृंगाभ्यां पपौ तन्मुखपंकजं॥ काचिदालोक्य गोविंदं निमीलितविलोचनं॥
तस्यैव रूपं ध्यायंती योगारूढेव ताबभौ॥ ततः काश्चित्प्रियालापैः काश्चिद्भ्रूभंगवीक्षितैः॥ निन्येनुनयमन्याश्च करस्पर्शेन माधवः॥ ताभिः प्रस
न्नचित्ताभिर्गोपीभिः सह सादरं॥ रराम रासगोष्ठीभिरुदारचरितो हरिः॥ रासमंडलबंधोपि कृष्णपार्श्वमनुज्झता॥ गोपीजनेन नैवाभूदेकस्थान
स्थिरात्मना॥ हस्ते प्रगृह्य चैकैकां गोपिकां रासमंडलं॥ चकार तत्करस्पर्शनिमीलितदृशं हरिः॥ ततः प्रववृते रासश्चलद्वलयनिस्वनैः॥ अनु

विष्णु॰
१२५

वधा हिंसं सर्पि दधि तान्युपहार्य्यं वै । गोपाः समानयन्त्वाशु त्वया गत्वा तथा तथा ॥ पराशर उवाच ॥ इत्याज्ञप्तस्तदाक्रूरो महाभागवतो
द्विज । प्रीतिमानभवत्कृष्णं श्वो द्रक्ष्यामीति सत्वरः ॥ तथेत्युक्त्वा च राजानं रथमारुह्य शोभनं । निश्चक्राम ततः पुर्य्या मथुराया मधुप्रियः ॥
इति श्री विष्णुपुराणे पंचमेंऽशे अक्रूरप्रेषणं नाम पंचदशोऽध्यायः ॥ पराशर उवाच ॥ केशी चापि बलोदग्रः कंसदूतप्रणोदितः । कृष्णस्य
निधनाकांक्षी वृंदावनमुपागमत् ॥ स खुरक्षतभूपृष्ठः सटाक्षेपधुताम्बुदः । द्रुतविक्रान्तचन्द्रार्कमार्गो गोपानुपाद्रवत् ॥ तस्य हेषितशब्देन
गोपाला दैत्यवाजिनः । गोप्यश्च भयसंविग्ना गोविन्दं शरणं ययुः ॥ त्राहि त्राहीति गोविंदः श्रुत्वा तेषां तदा वचः । सतोयजलदध्वानगंभी
रमिदमुक्तवान् ॥ श्री भगवानुवाच ॥ अलं त्रासेन गोपालाः केशिनः किं भयातुरैः । भवद्भिर्गोपजातीयैर्वीरवीर्य्यं विलोप्यते ॥ किमनेना
ल्पसारेण हेषितारोपकारिणा । दैतेयबलवाह्येन वल्गता दुष्टवाजिना ॥ एह्येहि दुष्ट कृष्णोऽहं पूष्णस्त्विव पिनाकधृक् । पातयिष्यामि द
शनान्वदनादखिलांस्तव ॥ इत्युक्त्वास्फोट्य गोविंदः केशिनः सन्मुखं ययौ । विवृतास्यश्च सोऽप्येनं दैतेयश्चाप्युपाद्रवत् ॥ बाहुमाभोगि
नं कृत्वा मुखे तस्य जनार्द्दनः । प्रवेशयामास तदा केशिनो दुष्टवाजिनः ॥ केशिनो वदनं तेन विशता कृष्णबाहुना । शातिता दशनाः पे
तुः सिताभ्रावयवा इव ॥ कृष्णस्य ववृधे बाहुः केशिदेहगतो द्विज । विनाशाय यथा व्याधिरासंभूतेरुपेक्षितः ॥ विपाटितोष्ठवकुलं सफे
नं रुधिरं वमन् । सोऽक्षिणी विवृते चक्रे विवृते मुक्तबंधने ॥ जघान धरणीं पादैः शकृन्मूत्रं समुत्सृजन् । स्वेदार्द्रगात्रः श्रान्तश्च निर्यत्नः
सोऽभवत्ततः ॥ व्यादितास्यो महारौद्रः सोऽसुरः कृष्णबाहुना । निपपात द्विधाभूतो वैद्युतेन द्रुमो यथा ॥ द्विपादपृष्ठपुच्छार्द्ध श्रवणैकाक्षि
नासिके । केशिनस्ते द्विधाभूते शकले द्वे विरेजतुः ॥ हत्वा तु केशिनं कृष्णो गोपालैर्मुदितैर्वृतः ॥ अनायस्ततनुः स्वस्थो

185

राम
१२५

ह्रदे मोऽसुरः कृष्णेनाक्लिष्टकर्मणा॥ तुष्टुवुर्निहते तस्मिन्दैत्ये गोपा जनार्द्दनं॥ जंभे हते सहस्राक्षं पुरा देवगणा यथा॥ इति श्रीविष्णुपुराणे पंचमें
ऽशे चतुर्दशोऽध्यायः॥ पराशर उवाच॥ ककुद्मिनि हतेऽरिष्टे धेनुके विनिपातिते॥ प्रलंबे निहते वीरे धृते गोवर्द्धनाचले॥ दमिते का
लिये नागे भग्ने तुंगद्रुमद्वये॥ हतायां पूतनायां च शकटे परिवर्त्तिते॥ कंसाय नारदः प्राह यथावृत्तमनुक्रमात्॥ यशोदादेवकीगर्भपरिवर्त्ता
द्यशेषतः॥ श्रुत्वा तत्सकलं कंसो नारदाद्देवदर्शनात्॥ वसुदेवं प्रति तदा कोपं चक्रे सुदुर्मतिः॥ सोऽतिकोपादुपालभ्य सर्वयादवसंसदि॥ जग
र्हे यादवांश्चैव कार्यं चैतदचिंतयत्॥ यावन्न बलमारूढौ रामकृष्णौ सुबालकौ॥ तावदेव मया वध्यावसाध्यौ रूढयौवनौ॥ चाणूरोऽत्र म
हावीर्यो मुष्टिकश्च महाबलः॥ एताभ्यां मल्लयुद्धेन घातयिष्यामि दुर्म्मदौ॥ धनुर्म्महमहायागव्याजेनानीय तौ व्रजात्॥ तथा तथा यतिष्यामि
यास्येते संक्षयं यथा॥ श्वफल्कतनयं सोऽहमक्रूरं यदुपुंगवं॥ तयोरानयनार्थाय प्रेषयिष्यामि गोकुलं॥ वृंदावनचरं घोरमादेक्ष्यामि च केशि
नं॥ तत्रैवासावतिबलस्तावुभौ घातयिष्यति॥ गजः कुवलयापीडो मत्समीपमुपागतौ॥ घातयिष्यति वा गोपौ वसुदेवसुतावुभौ॥ पराशर उवा
च॥ इत्यालोच्य स दुष्टात्मा कंसो रामजनार्द्दनौ॥ हंतुं कृतमतिर्वीरमक्रूरं वाक्यमब्रवीत्॥ कंस उवाच॥ भो भो दानपते वाक्यं क्रियतां प्रीतये मम॥ इतः
स्यंदनमारुह्य गम्यतां नंदगोकुलं॥ वसुदेवसुतौ तत्र विष्णोरंशसमुद्भवौ॥ नाशाय किल संभूतौ मम दुष्टौ प्रवर्द्धतः॥ धनुर्म्महो ममाप्यत्र चतुर्द्दश्यां
भविष्यति॥ आनेयौ भवता गत्वा मल्लयुद्धाय तावुभौ॥ चाणूरमुष्टिकौ मल्लौ नियुद्धकुशलौ मम॥ ताभ्यां सहानयोर्युद्धं सर्वलोकोऽत्र पश्यतु॥ ना
गः कुवलयापीडो महामात्रप्रचोदितः॥ स वा निहंस्यते पापौ वसुदेवात्मजौ शिशू॥ तौ हत्वा वसुदेवं च नंदगोपं च दुर्म्मतिं॥ हनिष्ये पितरं चैनमुग्र
सेनं सुदुर्म्मतिम्॥ ततः समस्तगोपानां गोधनान्यखिलान्यहं॥ वित्तं चापहरिष्यामि दुष्टानां मद्वधैषिणां॥ त्वामृते यादवाश्चैते दुष्टा दानपते
मयि॥ एतेषां च वधायाहं प्रयतिष्याम्यनुक्रमात्॥ ततो निष्कंटकं सर्वं राज्यमेतदयादवं॥ प्रशासिष्ये त्वया तस्मान्मत्प्रीत्या वीर गम्यतां॥ यथा

वि०पु० २९६

नंतादिमहद्भूतमिकेशवं ॥ न ब्रह्मा नेंद्ररुद्राश्विवस्वादित्यमरुद्गणाः ॥ यस्य स्वरूपं जानंति स्पृशत्यंगं स मे हरिः ॥ सर्वात्मा सर्ववित्सर्वः
सर्वभूतेष्ववस्थितः ॥ यो वित्यव्ययो व्यापी स वक्ष्यति मया सह ॥ मत्स्यकूर्म्मवराहस्य सिंहरूपादिभिः स्थितिं ॥ चकार जगतो योजः
सोद्य मामाभिवक्ष्यति ॥ सांप्रतं च जगत्स्वामी कार्य्ये मा लहरिः स्थितिं ॥ कर्त्तुं मनुष्यतां प्राप्तः स्वेच्छया देहधृगव्ययः ॥ योनंतः पृथिवीं
धत्ते शेखरस्थितिसंस्थितां ॥ सोवतीर्णो जगत्यर्थे मामक्रूरेति वक्ष्यति ॥ पितृभ्रातृसुहृद्भ्रातृमातृबंधुमयीमिमां ॥ यन्मायां नाल
मुत्तर्तुं जगत्तस्मै नमो नमः ॥ तरंत्यविद्यां विततां हृदि यस्मिन्निवेशिते ॥ योगीमायाममेयाय तस्मै विद्यात्मने नमः ॥ यज्विभिर्यज्ञपुरुषो
वासुदेवश्च सात्वतैः ॥ वेदांतवेदिभिर्विष्णुः प्रोच्यते यो नतोस्मि तं ॥ यथा यत्र जगद्धाम्नि धातर्य्येतत्प्रतिष्ठितं ॥ सदसत्तेन सत्येन मय्यसौ
यातु सौम्यतां ॥ स्मृते सकलकल्याणभाजनं यत्र जायते ॥ पुरुषस्तमजं नित्यं व्रजामि शरणं हरिं ॥ पराशर उवाच ॥ इत्थं संचिंतय
यन् विष्णुं भक्तिनम्रात्ममानसः ॥ अक्रूरो गोकुलं प्राप्तः किंचित्सूर्ये विराजति ॥ स ददर्श तदा तत्र कृष्णमादोहने गवां ॥ वत्समध्य
गतं फुल्लनीलोत्पलदलच्छविं ॥ प्रस्फुटपद्मपत्राक्षं श्रीवत्सांकितवक्षसं ॥ प्रलंबबाहुमायाततुंगोरस्थलमुन्नसं ॥ सविलासस्मिताधा
रं बिभ्राणं मुखपंकजं ॥ तुंगरक्तनखं पद्भ्यां धरण्यां सुप्रतिष्ठितं ॥ बिभ्राणं वाससी पीते वन्यपुष्पविभूषितं ॥ सार्द्रनीललताहस्तं
सितांभोजावतंसकं ॥ हंसकुंदेंदुधवलं नीलांबरधरं द्विज ॥ तस्यानु बलभद्रं च ददर्श यदुनंदनं ॥ प्रांशुमुत्तुंगबाहुं संविकासिमु
खपंकजं ॥ मेघमालापरिवृतं कैलासाद्रिमिवापरं ॥ तौ दृष्ट्वा विकसद्वक्त्रसरोजः स महामतिः ॥ पुलकांचितसर्वांगस्तदाक्रूरो
भवन्मुने ॥ एतत्तत्परमं धाम तदेतत्परमं पदं ॥ भगवद्वासुदेवांशो द्विधा योगमवस्थितः ॥ साफल्यमक्ष्णोर्युगमेतदत्र दृष्टे जगद्धा

राम २९६

हसंस्तत्रैव तस्थिवान् ॥ ततो गोप्यश्च गोपाश्च हते केशिनि विस्मिताः ॥ तुष्टुवुः पुंडरीकाक्षमनुरागमनोरमं ॥ अथाहांतरितो विप्रो ना
रदो जलदे स्थितः ॥ केशिनं निहतं दृष्ट्वा हर्षनिर्भरमानसः ॥ साधु साधु जगन्नाथ लीलयैव यदच्युत ॥ निहतोयं त्वया केशी क्लेशदस्त्रि
दिवौकसां ॥ युद्धोत्सुकोहमत्यर्थं नरवाजिमहाहवं ॥ अभूतपूर्वमन्यत्र द्रष्टुं स्वर्गादुपागतः ॥ सुकर्माण्यवतारे ते कृतानि मधुसूदन
यानि तैर्विस्मितं चेतस्तोषमेतेन मे गतं ॥ तुरंगस्यास्य शक्रोपि कृष्ण देवाश्च बिभ्यति ॥ धुतकेशरजालस्य हेषतोभ्रावलोकिनः ॥ य
स्मात्त्वयैव दुष्टात्मा हतः केशी जनार्दन ॥ तस्मात्केशवनाम्ना त्वं लोके ज्ञेयो भविष्यसि ॥ स्वस्त्यस्तु ते गमिष्यामि कंसयुद्धेधुना पुनः ॥ प
रश्वोहं समेष्यामि त्वया केशिनिसूदन ॥ उग्रसेनसुते कंसे सानुगे विनिपातिते ॥ भारावतारकर्त्ता त्वं पृथिव्याः पृथिवीधर ॥ तत्रानेकप्र
कारेषु युद्धेषु पृथिवीक्षितां ॥ द्रष्टव्यानि मयायुष्मत्प्रणीतानि जनार्दन ॥ सोहं यास्यामि गोविंद देवकार्यं महत्कृतं ॥ त्वयास
भाजितश्चाहं स्वस्ति तेस्तु व्रजाम्यहं ॥ पराशर उवाच ॥ नारदे तु गते कृष्णः सह गोपैरविस्मितः ॥ विवेश गोकुलं गोपीनेत्रपानैकभा
जनं ॥ इति श्रीविष्णुपुराणे पंचमेंशे षोडशोध्यायः ॥ पराशर उवाच ॥ अक्रूरोपि विनिष्क्रम्य स्यंदनेनाशुगामिना ॥ कृष्णसंदर्शनायै
कः प्रययौ नंदगोकुलं ॥ चिंतयामास चाक्रूरो नास्ति धन्यतरो मया ॥ योहं अंशावतीर्णस्य मुखं द्रक्ष्यामि चक्रिणः ॥ अद्य मे सफलं
जन्म सुप्रभाता च मे निशा ॥ चिंतयामास अक्रूरो ॥ यदुन्निद्राब्जपत्राक्षं विष्णोर्द्रक्ष्याम्यहं मुखं ॥ विनिर्जग्मुर्यतो वेदा वेदांगान्यखि
लानि च ॥ द्रक्ष्यामि तत्परं धाम देवानां भगवन्मुखं ॥ पापं हरति यत्पुंसां स्मृतं संकल्पनामयं ॥ तत्पुंडरीकनयनं विष्णोर्द्रक्ष्याम्यहं मुखं ॥ य
ज्ञेषु यज्ञपुरुषः पुरुषैः पुरुषोत्तमः ॥ इज्यते सोखिलाधारस्तं द्रक्ष्यामि जगत्पतिं ॥ इष्ट्वा यमिंद्रो यज्ञानां शतेनामरराजतां ॥ अवाप्तवान

वि॰पु॰
१२

127

गोविंदः कथं गोकुलमेष्यति ॥ नागरस्त्रीकलालापमधु श्रोत्रेण पास्यति ॥ विलासिवाक्यपानेषु नागरीणां कृतास्पदं ॥ चित्तमस्य कथं भूयो-
ग्राम्यगोपीषु यास्यति ॥ सारं समस्तगोष्ठस्य विधिना हरता हरिं ॥ प्रहृतं गोपयोषित्सु निर्घृणेन दुरात्मना ॥ भावगर्भस्मितं वाक्यं विलासललि-
ता गतिः ॥ नागरीणामतीवैतत्कटाक्षेक्षितमेव च ॥ ग्राम्यो हरिरयं तासां विलासनिगडैर्युतः ॥ भवतीनां पुनः पार्श्वं कया युक्त्या समेष्यति ॥ एषै-
ष रथमारुह्य मथुरां याति केशवः ॥ क्रूरेणाक्रूरकेणात्र निःशंसेन प्रतारितः ॥ किं न वेत्ति नृशंसोयमनुरागपरं जनं ॥ येनेममक्ष्णोराह्लादं
नयत्यन्यत्र नो हरिं ॥ एष रामेण सहितः प्रयात्यत्यंतनिर्घृणः ॥ रथमारुह्य गोविंदस्त्वर्यतामस्य वारणे ॥ गुरूणामग्रतो वक्तुं किं ब्रवीभि-
ति नः क्षमं ॥ गुरवः किं करिष्यंति दग्धानां विरहाग्निना ॥ नंदगोपमुखा गोपा गंतुमेते समुद्यताः ॥ नोद्यमं कुरुते कश्चिद्गोविंदविनिवर्तने ॥ सुप्र-
भाताद्य रजनी मथुरावासियोषितां ॥ पास्यंत्यच्युतवक्त्राब्जं यासां नेत्रालिपंक्तयः ॥ धन्यास्ते पथि ये कृष्णमितो यांत्यनिवारिताः ॥ उद्वहिष्यं-
ति पश्यंतः स्वदेहं पुलकांचितं ॥ मथुरानगरीपौरनयनानां महोत्सवः ॥ गोविंदावयवैर्दृष्टैरतीवाद्य भविष्यति ॥ को नु स्वप्नः सुभाग्याभिर्दृष्ट-
स्ताभिरधोक्षजः ॥ विस्तारिकांतनयना या द्रक्ष्यंत्यनिवारितं ॥ अहो गोपीजनस्यास्य दर्शयित्वा महानिधिं ॥ उद्धृतान्यद्य नेत्राणि विधा-
त्राकरुणात्मना ॥ अनुरागेण शैथिल्यमस्मासु व्रजतो हरेः ॥ शैथिल्यमुपयांत्याशु करेषु वलयान्यपि ॥ अक्रूरः क्रूरहृदयः शीघ्रं प्रेरयते
हयान् ॥ एवमार्त्तासु योषित्सु घृणा कस्य न जायते ॥ हे हे कृष्णरथस्योच्चैश्चक्ररेणुर्निरीक्ष्यतां ॥ दूरीकृतो हरिर्येन सोपि रेणुर्न लक्ष्यते ॥ इ-
त्येवमतिहार्देन गोपीजननिरीक्षितः ॥ तत्याज व्रजभूभागं सह रामेण केशवः ॥ गच्छंतो जविताश्वेन रथेन यमुनातटं ॥ प्राप्ता मध्याह्नसमये
रामाक्रूरजनार्दनाः ॥ अथाह कृष्णमक्रूरो भवद्भ्यां तावदास्यतां ॥ यावत्करोमि कालिंद्यामाह्निकार्हणमंभसि ॥ तथेत्युक्ते ततः स्नातः स्वाचांतः
स महामतिः ॥ दध्यौ ब्रह्मपरं विप्रः प्रविश्य यमुनाजले ॥ फणासहस्रमालाढ्यं बलभद्रं ददर्श सः ॥ कुंदमालांगमुन्निद्रपद्मपत्रारुणेक्षणं ॥ व-

राम
१२

रिपातितुच्चैः ॥ अप्यंगमेतद्भगवत्प्रसादाद्दत्तांगसंगे फलवन्ममस्यात् ॥ अप्येषपृष्ठेममहस्तपद्मंकरिष्यतिश्रीमदनंतमूर्त्तिः ॥ यस्यांगुलिस्पर्श
हताखिलाघैरवाप्यतेसिद्धिरपास्तदोषा ॥ येनाग्निविद्युद्रविरश्मिमालाकरालमत्युग्रमपास्यचक्रं ॥ चक्रं घ्नता दैत्यपतेर्हृतानि दैत्यांगनानां
नयनांजनानि ॥ यत्रांबुविन्यस्यबलिर्मनोज्ञानवापभोगान्वसुधातलस्थः ॥ तथामरत्वंत्रिदशाधिपत्यंमन्वंतरंपूर्णमपेतशत्रुः ॥ अप्येष
मांकंसपरिग्रहेण दोषास्पदीभूतमदोषदुष्टं ॥ कर्त्तावमानोपहतंधिगस्तुतज्जन्मयत्साधुबहिःकृतस्य ॥ ज्ञानात्मकस्यामलसत्वराशेरपे
तदोषस्यसदास्फुटस्य ॥ किंवाजगत्यत्रसमस्तपुंसामज्ञातमस्यास्तिहृदिस्थितस्य ॥ तस्मादहंभक्तिविनम्रचेताव्रजामिसर्वेश्वरमीश्वराणां
॥ अंशावतारंपुरुषोत्तमस्यह्यनादिमध्यांतमजस्यविष्णोः ॥ इति श्रीविष्णुपुराणे पंचमेंशे अक्रूरगमनोनामसप्तदशोध्यायः ॥ पराशर उवाच ॥
चिंतयन्नितिगोविंदमुपागम्यसयादवः ॥ अक्रूरोस्मीतिचरणौननाम शिरसाहरेः ॥ सोप्येनं ध्वजवज्राब्जकृतचिह्नेनपाणिना ॥ संस्पृश्या
कृष्यचप्रीत्यासुगाढंपरिषस्वजे ॥ कृतसंवादनौतेनयथावद्बलकेशवौ ॥ ततःप्रविष्टौसंहृष्टौतमादायात्ममंदिरं ॥ सहताभ्यांतदाक्रूरः कृतसं
वादादिको ॥ भुक्तभोज्योयथान्यायमाचचक्षेततस्तयोः ॥ यथानिर्भर्त्सितस्तेनकंसेनानकदुंदुभिः ॥ यथाचदेवकीदेवीदानवेनदुरात्मना ॥ उ
ग्रसेनेयथाकंसःसदुरात्माचवर्त्तते ॥ यंचैवार्थंसमुद्दिश्यसकंसेनविसर्जितः ॥ तत्सर्वंविस्तराच्छ्रुत्वाभगवान्केशिसूदनः ॥ उवाचाखिलमप्येत
ज्ज्ञातंदानपतेमया ॥ करिष्येचमहाभागयदत्रौपयिकंमतं ॥ विचिंत्यंनान्यथैतत्तेविद्धिकंसंहतंमया ॥ अहंरामश्चमथुरांश्वोयास्यावःसमं
त्वया ॥ गोपवृद्धाश्चयास्यंति आदायोपायनंबहु ॥ निःशेयंनियतांवीरनचिंतांकर्तुमर्हसि ॥ त्रिरात्राभ्यंतरे कंसंहनिष्यामिसहानुगं ॥ पराश
र उवाच ॥ समादिश्यततोगोपानक्रूरोपिसकेशवः ॥ सुष्वापबलभद्रश्चनंदगोपगृहेगतः ॥ ततःप्रभातेविमलेकृष्णरामौमहामती ॥ अक्रू
रेणसमंगंतुमुद्यतौमथुरांप्रति ॥ दृष्ट्वागोपीजनःसास्रःश्लथद्वलयबाहुकः ॥ निश्वस्यचातिदुःखार्त्तःप्राहचेदंपरस्परं ॥ मथुरांप्राप्य

२

वि॰पु॰ ५८

चमेंशे ष्टादशोध्यायः॥ पराशर उवाच॥ एवमंतर्जले विष्णुमभिष्टूय स यादवः॥ अर्चयामास सर्वेशं पुष्पधूपैर्मनोमयैः॥ परित्यक्तान्यवि
षयं मनस्तत्र निवेश्य सः॥ ब्रह्मभूते चिरं स्थित्वा विरराम समाधितः॥ कृतकृत्यमिवात्मानं मन्यमानो महामतिः॥ आजगाम रथं भूयो निर्गम्य
यमुनांभसः॥ रामकृष्णौ च ददृशे यथापूर्वं रथे स्थितौ॥ विस्मिताक्षस्तदाक्रूरं तं च कृष्णोभ्यभाषत॥ नूनं ते दृष्टमाश्चर्यमक्रूर यमुनाजले॥
विस्मयोत्फुल्लनयनो भवान्संलक्ष्यते यतः॥ अक्रूर उवाच॥ अंतर्जले यदाश्चर्यं दृष्टं तत्र मयाच्युत॥ तदत्रापि हि पश्यामि मूर्तिमत्पुरतः
स्थितं॥ जगदेतन्महाश्चर्यं रूपं यस्य महात्मनः॥ तेनाश्चर्यवरेणाहं भवता कृष्ण संगतः॥ तत्किमेतेन मथुरां व्रजामो मधुसूदन॥ बिभेमि
कंसाद्धिग्जन्म परपिंडोपजीविनां॥ इत्युक्त्वा चोदयामास तान्हयान्वातरंहसः॥ संप्राप्तश्चातिसायाह्ने सोक्रूरो मथुरां पुरीं॥ विलोक्य
मथुरां कृष्णं रामं चाह स यादवः॥ पद्भ्यां यातं महावीर्यौ रथेनैको विशाम्यहं॥ गंतव्यं वसुदेवस्य भवद्भ्यां न तथा गृहं॥ युवयोर्हि कृते वृद्धः
स कंसेन निरस्यते॥ पराशर उवाच॥ इत्युक्त्वा प्रविवेशाथ सोक्रूरो मथुरां पुरीं॥ प्रविष्टौ रामकृष्णौ च राजमार्गमुपागतौ॥ स्त्रीभिर्नरैश्च
सानंदलोचनैरभिवीक्षितौ॥ जग्मतुर्लीलया वीरौ प्राप्तौ बालगजाविव॥ भ्रममाणौ तु तौ दृष्ट्वा रजकं रंगकारकं॥ अयाचेतां सुरूपाणि
वासांसि रुचिराननौ॥ कंसस्य रजकः सोथ प्रसादारूढविस्मयः॥ बहून्याक्षेपवाक्यानि प्राहोच्चै रामकेशवौ॥ ततस्तलप्रहारेण कृष्णस्त
स्य दुरात्मनः॥ पातयामास कोपेन रजकस्य शिरो भुवि॥ हत्वादाय च वस्त्राणि पीतनीलांबरौ ततः॥ कृष्णरामौ मुदा युक्तौ मालाकारग
हं गतौ॥ विकासिनेत्रयुगलो मालाकारोतिविस्मितः॥ कोयं कस्य कुतो वेति मनसा चिंतयत्तदा॥ पीतनीलांबरधरौ दृष्ट्वातिमनोहरौ॥
स तर्कयामास तदा भुवं देवावुपागतौ॥ विकाशिमुखपद्माभ्यां ताभ्यां पुष्पाणि याचितः॥ भुवं विष्टभ्य हस्ताभ्यां पस्पर्श शिरसा महीं॥
प्रसादपरमौ नाथौ मम गेहमुपागतौ॥ धन्योहमर्चयिष्यामीत्याह तौ माल्यजीवकः॥ ततः प्रहृष्टवदनस्तयोः पुष्पाणि कामतः॥ चारूण्ये

तं वासुकिरंभाद्यैर्महद्भिः पवनाशिभिः ॥ संस्तूयमानगंधर्वैर्वनमालाविभूषितं ॥ दधानमसिते वस्त्रे चारुपद्मावतंसके ॥ चारुकुंडलिनं मत्तमत
ङ्गौलतले स्थितं ॥ तस्योत्संगे घनश्याममाताम्रायतलोचनं ॥ चतुर्बाहुमुदारांगं चक्राद्यायुधभूषणं ॥ पीतेव सानं वसिने चित्रमाल्यविभूष
णं ॥ शक्रचापतडिन्मालाविचित्रमिवतोयदं ॥ श्रीवत्सवक्षसं चारुकेयूरमुकुटोज्वलं ॥ ददर्श कुसुममल्लिकापुंडरीकावतंसकं ॥ सनंदनाद्यै
र्मुनिभिः सिद्धयोगैरकल्मषैः ॥ विचिंत्यमानं तत्रस्थैर्नासाग्रन्यस्तलोचनैः ॥ बलक्षसौ ततश्चाक्रूरः प्रसभिज्ञाय विस्मितः ॥ सोचिंतयद्वृष्णा
कौ धं कथमत्रागतौ विति ॥ विवक्षोस्तंभयामास वाचं तस्य जनार्दनः ॥ ततो निष्क्रम्य सलिलाद्रथमभ्यागतः पुनः ॥ ददर्श तत्रचैवोभौ रथ
स्योपर्य्युपरिस्थितौ ॥ रामकृष्णौ यथापूर्वं मनुष्यवपुषान्वितौ ॥ निमग्नश्च पुनस्तोये स ददर्श यथैव तौ ॥ संस्तूयमानौ गंधर्वैर्मुनिसिद्धमहोरगैः
॥ ततो विज्ञातसद्भावः स तु दानपतिस्तदा ॥ तुष्टाव सर्वविज्ञानमयमच्युतमीश्वरं ॥ सन्मात्ररूपिणेऽचिंत्यमहिम्ने परमात्मने ॥ व्यापिने नैकरू
पैकरूपाय नमो नमः ॥ सर्वरूपाय तेऽचिंत्य हविर्भूताय ते नमः ॥ नमो विज्ञानरूपाय पराय प्रकृतेः प्रभो ॥ भूतात्मा चेंद्रियात्मा च प्रधानात्मा त
था भवान् ॥ आत्मा च परमात्मा च प्रधानात्मा तथा भवान् ॥ आत्मा च परमात्मा च त्वमेकः पंचधा स्थितः ॥ प्रसीद सर्व सर्वात्मन् क्षराक्षरमयेश्वर
॥ ब्रह्मविष्णुशिवात्माभिः कल्पनाभिरुदीरितः ॥ अनाख्येय स्वरूपात्मन्ननाख्येय प्रयोजन ॥ अनाख्येयाभिधानं त्वां ततो स्मि परमो यतः ततः कृ
ष्णाच्युतानंत विष्णुसंज्ञाभिरीड्यते ॥ सर्वार्थास्त्वमज कल्पनाभिरेतैर्देवाद्यं जगदखिलं त्वमेव विश्वं ॥ विश्वात्मन् परिणतिविकारभावहीनं स
र्वस्मिन्न हि भवतोस्ति किंचिदन्यत् ॥ त्वं ब्रह्मा पशुपतिरर्यमा विधाता त्वं त्रिदशपतिः समीरणोग्निः ॥ तोयेशो धनपतिरंतकस्त्वमेको भिन्ना
र्थैर्जगदपि पासि शक्तिभेदैः ॥ विश्वं भवान् सृजति यच्च जगद्रूपो विश्वं च ते गुणमयोयमज प्रपंचः ॥ रूपं परं सदितिवाचकमक्षरं यत्तज्ज्ञानात्म
ने सदसते प्रणतोस्मि तस्मै ॥ ॐ नमो भगवते वासुदेवाय नमः संकर्षणाय ते ॥ प्रद्युम्नाय नमस्तुभ्यं अनिरुद्धाय ते नमः ॥ इति श्री विष्णुपुराणे

वि॰ पु॰

ऋजुतां प्राप्ता योषितामभवद्यदा॥ विलासललितं प्राह प्रेमगर्भभरालसं॥ वस्त्रे प्रगृह्य गोविंदं व्रजगेहं ममेति वै॥ आयास्ये भवतीगेहमिति
तां प्रहसन्हरिः॥ विससर्ज जहासोच्चै रामस्यालोक्य चाननं॥ भक्तिछेदानुलिप्तांगौ नीलपीतांबरौ च तौ॥ धनुःशालां ततो यातौ
चित्रमाल्योपशोभितौ॥ आयोगं च धनूरत्नं ताभ्यां पृष्टैश्च रक्षिभिः॥ आख्याते सहसा कृष्णो गृहीत्वापूरयद्धनुः॥ ततः पूरयता तेन भज्य ता
मानं बलाद्धनुः॥ चकार सुमहाशब्दं मथुरा येन पूरिता॥ अनुयुक्तौ ततस्तौ तु भग्ने धनुषि रक्षिभिः॥ रक्षिसैन्यं निकृत्योभौ निःक्रां
तौ कार्मुकालयात्॥ अक्रूरागमवृत्तांतमुपलभ्य तथा धनुः॥ भग्नं श्रुत्वाथ कंसोपि प्राह चाणूरमुष्टिकौ॥ कंस उवाच॥ गोपाल
दारकौ प्राप्तौ भवद्भ्यां तौ ममाग्रतः॥ मल्लयुद्धेन हंतव्यौ मम प्राणहरौ हि तौ॥ नियुद्धे तद्विनाशेन भवद्भ्यां तोषितो ह्यहं॥ दास्याम्यभि
हितान्कामान्नान्यथैतन्महाबलौ॥ न्यायतो न्यायतो वापि भवद्भ्यां तौ ममाहितौ॥ हंतव्यौ तद्वधाद्राज्यं सामान्यं नो भविष्यति॥ इत्या
दिश्य स तौ मल्लौ ततश्चाहूय हस्तिपं॥ प्रोवाचोच्चैस्त्वया मल्लसमाजद्वारि कुंजरः॥ स्थाप्यः कुवलयापीडस्तेन तौ गोपदारकौ॥ घातनीयौ
नियुद्धाय रंगद्वारमुपागतौ॥ तमप्याज्ञाप्य दृष्ट्वा च मंचान्सर्वानुपाकृतान्॥ आसन्नमरणः कंसः सूर्योदयमुदैक्षत॥ ततः समस्तमंचेषु
नागरः स तदा जनः॥ राजमंचेषु चारूढाः सह भृत्यैर्महीभृतः॥ मल्लप्राश्निकवर्गश्च रंगमध्यसमीपतः॥ कृतः कंसेन कंसोपि तुंगमंचे व्यव
स्थितः॥ अंतःपुराणां मंचाश्च तथान्ये परिकल्पिताः॥ अन्ये च वारमुख्यानामन्ये नागरयोषितां॥ नंदगोपादयो गोपा मंचेष्वन्येष्वव राम
स्थिताः॥ अक्रूरवसुदेवौ च मंचप्रांते व्यवस्थितौ॥ नागरीयोषितां मध्ये देवकी पुत्रगर्द्धिनी॥ अंतकालेपि पुत्रस्य द्रक्ष्यामि रुचिरं मुखं वा
द्यमानेषु तूर्येषु चाणूरे चातिवल्गति॥ हाहाकारपरे लोके आस्फोटयति मुष्टिके॥ हत्वा कुवलयापीडं हस्त्यारोहप्रचोदितं

१२१

लो

तान्प्रनेमतुस्तौ सविस्मयम्॥ पुनःपुनःप्रणम्यासौ मालाकारो नरोत्तमौ॥ ददौपुष्पाणिचारूणिगंधवन्तिमनांसिच॥ मालाकाराय
कृष्णोपिप्रसन्नो मह्यंदौवरान्॥ श्रीस्त्वांमत्संश्रयाभद्रनकदाचित्तजिष्पति॥ बलहानिर्नतेसौम्यधनहानिस्तथैवच॥ यावद्दिनानितावत्ता
वच्चननशिष्यतिसंततिः॥ भुक्त्वाचविपुलान्भोगांस्त्वमंतेमत्प्रसादजं॥ ममानुस्मरणंप्राप्यदिव्यंलोकमवाप्स्यसि॥ धर्मेमनश्चतेभ
द्रसर्वकालंभविष्यति॥ युष्मत्संततिजातानांदीर्घमायुर्भविष्यति॥ नोपसर्गादिकंदोषंयुष्मत्संततिसंभवः॥ संप्राप्स्यतिमहाभाग
यावत्सूर्योभविष्यति॥ पराशरउवाच॥ इत्युक्त्वातद्गृहात्कृष्णोबलदेवसहायवान्॥ निर्जगाममुनिश्रेष्ठमालाकारेणपूजितः॥ इति
श्रीविष्णुपुराणेपंचमेंशेएकोनविंशोध्यायः॥ पराशरउवाच॥ राजमार्गेततःकृष्णःसानुलेपनभाजनां॥ ददर्शकु
ब्जामायांतींनवयौवनगोचरां॥ तामाहललितंकृष्णःकस्येदमनुलेपनं॥ भवत्यानीयतेसत्यंवदेंदीवरलोचने॥ सकामेनवताप्रोक्तासानु
रागाहरिंप्रति॥ प्राहसाललितंकुब्जातद्दर्शनबलात्कृता॥ कांतकस्मान्नजानासिकंसेनाभिनियोजितां॥ नैकवक्रेतिविख्यातामनु
लेपनकर्मणि॥ नान्यपिष्टंहिकंसस्यप्रीतयेह्यनुलेपनं॥ भवत्यहमतीवास्यप्रसादधनभाजनं॥ श्रीकृष्णउवाच॥ सुगंधमेतद्राजा
र्हंरुचिरंरुचिराननेः॥ आवयोर्गात्रसदृशंदीयतामनुलेपनं॥ पराशरउवाच॥ श्रुत्वैतदाहसाकृष्णंगृह्यतामितिसादरं॥ अनुलेप
नंचददौगात्रयोग्यमथोभयोः॥ भक्तिच्छेदानुलिप्तांगौततस्तौपुरुषर्षभौ॥ सेंद्रचापौविराजेतांसितकृष्णाविवांबुदौ॥ ततस्तांचिबु
केशौरिरुल्लापनविधानवित्॥ उत्पाट्यतोलयामासद्व्यंगुलेनाग्रपाणिना॥ चकर्षपद्भ्यांचतदाऋजुत्वंकेशवोनयत्॥ ततःसा

य

लो

वि॰पु॰
१३०

मुष्टिभिश्चैव कीलैश्च वज्रनिपातनैः ॥ पादोद्धूतैः प्रहृष्टैश्च तयोर्युद्धमभून्महत् ॥ अशस्त्रमतिघोरं तु तयोर्युद्धं सुदारुणं ॥ बलप्राणविनिष्पाद्यं
समाजोत्सवसंनिधौ ॥ यावद्यावच्च चाणूरो युयुधे हरिणा सह ॥ प्राणहानिमवापाग्र्यां तावत्तावल्लवाल्लवम् ॥ कृष्णोपि युयुधे तेन लीलयै
व जगन्मयः ॥ खेदाच्चालयता कोपान्निजशेखरकेसरं ॥ बलक्षयं विवृद्धिं च दृष्ट्वा चाणूरकृष्णयोः ॥ वारयामास तूर्याणि कंसः कोपपरायणः
मृदंगादिषु तूर्येषु प्रतिषिद्धेषु तत्क्षणात् ॥ खे संगतान्यवाद्यंत देवतूर्याण्यनेकशः ॥ जय गोविंद चाणूरं जहि केशव दानवं ॥ अंतर्द्धान
गा देवास्तमूचुरतिहर्षिताः ॥ चाणूरेण चिरं कालं क्रीडित्वा मधुसूदनः ॥ उत्पाट्य भ्रामयामास तद्वधाय कृतोद्यमः ॥ भ्रामयित्वा शतगुणं
दैत्यमल्लममित्रजित् ॥ भूमौ चास्फोटयामास गगने गतजीवितं ॥ भूमावास्फोटितस्तेन चाणूरः शतधा भवन् ॥ रक्तस्रावमहापंकां चकार स
तदा भुवं ॥ बलदेवोपि तत्कालं मुष्टिकेन महाबलः ॥ युयुधे दैत्यमल्लेन चाणूरेण यथा हरिः ॥ सोप्येनं मुष्टिना मूर्द्ध्नि वक्षस्याहत्य जानुना ॥ पातयि
त्वा धरापृष्ठे निष्पिपेष गतायुषं ॥ कृष्णस्तोशलकं भूयो मल्लराजं महाबलं ॥ वाममुष्टिप्रहारेण पातयामास भूतले ॥ चाणूरे निहते मल्ले मुष्टिके
विनिपातिते ॥ नीते क्षयं तोशलके सर्वे मल्लाः प्रदुद्रुवुः ॥ वल्गंतौ च ततस्तौ तु रंगे कृष्णसंकर्षणावुभौ ॥ समानवयसो गोपान्बलादाकृष्य हर्षितौ ॥
कंसोपि कोपरक्ताक्षः प्राहोच्चैर्व्यायतान्नरान् ॥ गोपावेतौ समाजौघान्निःक्राम्येतां बलादितः ॥ नंदोपि गृह्यतां पापो निगडैरायसैरिह ॥ अवृद्धा
र्हेण दंडेन वसुदेवोपि वध्यतां ॥ वल्गंति गोपाः कृष्णेन ये चेमे सहिताः पुरः ॥ गावो ह्रियंतामेषां यच्चास्ति वसु किंचन ॥ एवमाज्ञापयानं च
प्रहस्य मधुसूदनः ॥ उत्पत्यारुह्य तं मंचं कंसं जग्राह वेगितः ॥ केशेष्वाकृष्य विगलत्किरीटमवनीतले ॥ कंसं संपातयामास तस्योपरि प
पात च ॥ निरस्तजगदाधारगुरुणा पतितोपरि ॥ कृष्णेन त्याजितः प्राणानुग्रसेनात्मजो नृपः ॥ मृतस्य केशेषु तदा गृहीत्वा मधुसूदनः ॥ च
कर्ष देहं कंसस्य रंगमध्ये महाबलः ॥ गौरवेणातिमहता परिखा तेन कृष्यता ॥ कृता कंसस्य देहेन वेगेनेव महांभसः ॥ कंसे गृहीते कृ

राम
१३०

130

मदासृगनुलिप्तांगौ गजदंतवरायुधौ ॥ मृगमध्ये यथा सिंहौ गर्वलीलावलोकितौ ॥ प्रविष्टौ सुमहारंगं वलभद्रजनार्दनौ ॥ हाहाकारो महान्जज्ञे
सर्वमंचेषु नंमरं ॥ कृष्णोयं वलभद्रोयमिति लोकस्य विस्मयात् ॥ सोयं येन हता घोरा पूतना सा निशाचरी ॥ क्षिप्तं च शकटं येन भग्नौ च यमलार्जुनौ
सोयं यः कालियं नागं ननर्तारुह्य वालकः ॥ धृतो गोवर्द्धनो येन सप्तरात्रं महागिरिः ॥ अरिष्टो धेनुकः केशी लीलयैव महात्मना ॥ निहता येन दुर्वृत्ता दृश्य-
तां सोयमच्युतः ॥ अयं चास्य महावाहुर्वलभद्रोग्रजोग्रतः ॥ प्रयाति लीलया योषिन्मनोनयननंदनः ॥ अयं स कथ्यते प्राज्ञैः पुराणार्थावलोकि-
भिः ॥ गोपालो यादवं वंशं मग्नमभ्युद्धरिष्यति ॥ अयं स सर्वभूतस्य विष्णोरखिलजन्मनः ॥ अवतीर्णो महीमंशो नूनं भारहरो भुवः ॥ इत्येवं वर्णिते पौरै रा-
मे कृष्णे च तत्क्षणात् ॥ उरस्तताप देवक्याः स्नेहस्नुतपयोधरं ॥ महोत्सवमिहासाद्य पुत्राननविलोकनं ॥ युवेवसुदेवोभूद्विजहाभ्यागतां जरां ॥ विस्ता-
रिताक्षियुगलो राजांतःपुरयोषितां ॥ नागरस्त्रीसमूहश्च द्रष्टुं न विरराम तं ॥ सख्यः पश्यत कृष्णस्य मुखमत्यरुणेक्षणं ॥ गजयुद्धकृतायासस्वे-
दांवुकणिकाचितं ॥ विकाशिशरदंभोजमवश्यायजलोक्षितं ॥ परिभूय स्थितं जन्म सफलं क्रियतां दृशः ॥ श्रीवत्सांकं महद्धाम वालस्यैतद्विलोक्य-
तां ॥ विपक्षक्षपणं वक्षो भुजयुग्मं च भामिनि ॥ किं न पश्यसि कुंदेंदुमृणालधवलाननं ॥ वलभद्रमिमं नीलपरिधानमुपागतं ॥ वल्गता मुष्टिकेनै-
व चाणूरेण तथा सखि ॥ क्रीडते वलभद्रस्य हासमीषद्विलोक्यतां ॥ सख्यः पश्यत चाणूरं नियुद्धार्थमयं हरिः ॥ समुपैति न संत्यत्र किं वृद्धा युक्तका-
रिणः ॥ क्व यौवनोन्मुखीभूतसुकुमारतनुर्हरिः ॥ क्व वज्रकठिनाभोगशरीरोयं महासुरः ॥ इमौ सुललितैरंगैर्वर्तेते नवयौवनौ ॥ दैतेयमल्लाश्चाणू-
रप्रमुखास्त्वतिदारुणाः ॥ नियुद्धप्राश्निकानां तु महानेष व्यतिक्रमः ॥ यद्वालवलिनोर्युद्धं मध्यस्थैः समुपेक्ष्यते ॥ पराशर उवाच ॥ इत्थं पुरस्त्रीलोक-
स्य वदतश्चालयन्भुवं ॥ ववल्ग वद्धकक्षोंतर्जनस्य भगवान्हरिः ॥ वलभद्रोपि चास्फोट्य ववल्ग ललितं यदा ॥ पदे पदे तदा भूमिर्यन्न शीर्णं तद-
द्भुतं ॥ चाणूरेण ततः कृष्णो युयुधेमितविक्रमः ॥ नियुद्धकुशलो दैत्यो वलभद्रेण मुष्टिकः ॥ संनिपातावधूतैस्तु चाणूरेण समं हरिः ॥ क्षेपणैः

विष्णु० १३१

यो भ्यां मातापित्रोः पदवंदनयोः॥ पराशर उवाच॥ इत्युक्त्वाथ प्रणम्योभौ यदुवृद्धाननुक्रमात्॥ यथावदभिपूज्याथ
पौरमाननं॥ कंसपत्न्यस्ततः कंसं परिवार्य हतं भुवि॥ विलेपुर्मातरश्चास्य दुःखशोकपरिप्लुताः॥ बहुप्रकारमत्यर्थं प
श्चात्तापातुरो हरिः॥ ताश्चाश्वासयामास स्वयमश्रुविलोचनः॥ उग्रसेनं ततो बंधान्मुमोच मधुसूदनः॥ अभ्यषिंचत्तथैवैं
निजराज्ये हतात्मजं॥ राज्येभिषिक्तः कृष्णेन यदुसिंहः सुतस्य सः॥ चकार प्रेतकार्याणि ये चान्ये तत्र घातिताः॥ कृतोर्ध्वदे
नं सिंहासनगतं हरिः॥ उवाचाज्ञापय विभो यत्कार्यमविशंकितः॥ ययातिशापाद्वंशोयमराज्यार्होपि सांप्रतं॥ मयि भृत्ये स्थिते
देवानाज्ञापयतु किं नृपैः॥ इत्युक्त्वा सोऽस्मरद्वायुमाजगाम स तत्क्षणात्॥ उवाच चैनं भगवान्केशवः कार्यमानुषः॥ गच्छे
द्ब्रूहि वायो त्वमलं गर्वेण वासव॥ दीयतामुग्रसेनाय सुधर्मा भवता सभा॥ कृष्णो ब्रवीति राजार्हमेतद्रत्नमनुत्तमं॥ सुधर्माख्यास
भा युक्तमस्यां यदुभिरासितुं॥ पराशर उवाच॥ इत्युक्तः पवनो गत्वा सर्वमाह शचीपतिं॥ ददौ सोपि सुधर्माख्यां सभां वायोः पुरंद
रः॥ वायुनोपहृतां दिव्यां सभां ते यदुपुंगवाः॥ बुभुजुः सर्वरत्नाढ्यां गोविंदभुजसंश्रयात्॥ विदिताखिलविज्ञानौ सर्वज्ञानमयावपि
॥ शिष्याचार्यक्रमं वीरौ ख्यापयंतौ यदूत्तमौ॥ ततः सांदीपनिं काश्यमवंतिपुरवासिनं॥ अस्त्रार्थं जग्मतुर्वीरौ बलदेवजना
र्दनौ॥ तस्य शिष्यत्वमभ्येत्य गुरुवृत्तिपरौ हि तौ॥ दर्शयांचक्रतुर्वीरावाचारमखिले जने॥ सरहस्यं धनुर्वेदं ससंग्रहमधीयतां
अहोरात्रैश्चतुःषष्ट्या तदद्भुतमभूद्द्विज॥ सांदीपनिरसंभाव्यं तयोः कर्मातिमानुषं॥ विचिंत्य तौ तदा मेने प्राप्तौ चंद्रदिवाक
रौ॥ अस्त्रग्राममशेषं च प्रोक्तमात्रमवाप्य तौ॥ ऊचतुर्व्रियतां या ते दातव्या गुरुदक्षिणा॥ सोप्यतींद्रियमालोक्य तयोः क

राम १३१

स्रेन तद्गर्भगतास्य ॥ सुनाम्ना बलभद्रेण लीलयैव निपातितः ॥ ततो हाहाकृतं सर्वमासीत्तद्रंगमंडले ॥ अवज्ञया हतं दृष्ट्वा कृष्णेन मथुरे
श्वरं ॥ कृष्णोपि वसुदेवस्य पादौ जग्राह सत्वरः ॥ देवक्याश्च महाबाहुर्बलभद्रसहायवान् ॥ उत्थाप्य वसुदेवस्तं देवकी च जनार्दनं ॥ स्मृत
जन्मोक्तवचनौ तावेव प्रणतौ स्थितौ ॥ वसुदेव उवाच ॥ प्रसीद सीदतां दत्तो देवानां यो वरः प्रभो ॥ तथावयोः प्रसादेन कृतोद्धारः स केशव ॥ आराधि
तो यद्भगवानवतीर्णो गृहे मम ॥ दुर्वृत्तनिधनार्थाय तेन नः पावितं कुलं ॥ त्वमंतः सर्वभूतानां सर्वभूतेष्ववस्थितः ॥ प्रवर्तते समस्ता
त्मंस्त्वत्तो भूतभविष्यती ॥ यज्ञैस्त्वमिज्यसेऽचिंत्य सर्वदेवमयाच्युत ॥ त्वमेव यज्ञो यष्टा च यज्ञानां परमेश्वर ॥ सापह्नवं मम मनो यदेतत्त्वयि
जायते ॥ देवक्याश्चात्मजप्रीत्या तदत्यंतविडंबनं ॥ क्व कर्ता सर्वभूतानामनादिनिधनो भवान् ॥ क्व मनुष्यस्य चैषा जिह्वा पुत्रेति वक्ष्यति
जगदेतज्जगन्नाथ संभूतमखिलं यतः ॥ कया युक्त्या विना मायां सोस्मत्तः संभविष्यति ॥ यस्मिन्प्रतिष्ठितं सर्वं जगत्स्थावरजंगमं ॥ स कोष्ठोत्सं
गशयनो मानुषाज्जायते कथं ॥ स त्वं प्रसीद परमेश्वर पाहि विश्वमंशावतारकरणैर्न ममासि पुत्रः ॥ आब्रह्मपादपमयं जगदेतदीश त्वत्तो विमो
हयसि किं परमेश्वरात्मन् ॥ मायाविमोहितदृशा तनयो ममेति कंसाद्भयं कृतमपास्तभयातितेन ॥ नीतोसि गोकुलमरातिभयाकुलस्य वृद्धिं
गतोसि मम नास्ति ममत्वमीश ॥ कर्माणि रुद्रमरुदश्विशतक्रतूनां साध्यानि यानि न भवंति निरीक्षितानि ॥ त्वं विष्णुरीश जगतामुपकारहेतोः
प्राप्तोसि नः परिगतो विगतो हि मोहः ॥ इति श्रीविष्णुपुराणे पंचमेंशके [illegible] विंशतितमोध्यायः ॥ पराशर उवाच ॥ तौ समुत्पन्नविज्ञानौ
भगवत्कर्मदर्शनात् ॥ देवकीवसुदेवौ तु दृष्ट्वा मायां पुनर्हरिः ॥ मोहाय यदुचक्रस्य विततान स वैष्णवीं ॥ उवाच चाम्ब भो तात चिरादुत्कंठितेन
मे ॥ भवंतौ कंसभीतेन दृष्टौ संकर्षणेन च ॥ कुर्वतां याति यः कालो मातापित्रोरपूजनं ॥ तत्खंडमायुषो व्यर्थमसाधूनां हि जायते ॥ गुरुदे
व द्विजातीनां मातापित्रोश्च पूजनं ॥ कुर्वतां सफलः कालो देहिनां तात जायते ॥ तत्क्षंतुमर्हथ सर्वमतिक्रमकृतं पितः ॥ कंसप्रतापवी

श्च

वि०पु०
१३२

स्पर्द्धं दस्युः संप्रवर्त्तते ॥ इति श्रीविष्णुपुराणे पंचमेंऽशे जरासंधनिग्रहो नाम द्वाविंशोऽध्यायः ॥ पराशर उवाच ॥ गार्ग्यं गोष्ठे द्विजं श्यालः षंढ
इत्युक्तवान् द्विज ॥ यदूनां संनिधौ सर्वैर्जहसुः सर्वयादवाः ॥ ततः कोपसमाविष्टो दक्षिणापथमेत्य सः ॥ सुतमिच्छंस्तपस्तेपे यदुचक्रभयावहं ॥ आरा
धयन्महादेवं सोऽयश्चूर्णमभक्षयत् ॥ ददौ वरं च तुष्टोऽस्मै वर्षे द्वादशमे हरः ॥ संभावयामास च तं यवनेशो ह्यनात्मजः ॥ तद्योषित्संगमाच्चास्य पुत्रोऽभू
दलिसन्निभः ॥ तं कालयवनं नाम राज्ये स्वे यवनेश्वरः ॥ अभिषिच्य वनं यातो वज्राग्रकठिनोरसं ॥ स तु वीर्यमदोन्मत्तः पृथिव्यां बलिनो नृपान् ॥ पप्रच्छ
नारदस्तस्मै कथयामास यादवान् ॥ म्लेच्छकोटीसहस्राणां सहस्रैः सोऽभिसंवृतः ॥ गजाश्वरथसंपत्त्या चकार परमोद्यमं ॥ प्रययौ चाव्यवच्छिन्नं छिन्नया
नो दिने दिने ॥ यादवान्प्रति सामर्षो मैत्रेय मथुरां पुरीं ॥ कृष्णोऽपि चिंतयामास क्षपितं यादवं बलं ॥ यवनेन रणे गम्यं मागधस्य भविष्यति ॥ मागधस्य बलं
क्षीणं स कालयवनो बली ॥ हंता तदिदमायातं यदूनां व्यसनं द्विधा ॥ तस्माद्दुर्गं करिष्यामि यदूनामतिदुर्जयं ॥ स्त्रियोऽपि यत्र युध्येयुः किं पुनर्वृष्णिपुं
गवाः ॥ मयि मत्ते प्रमत्ते वा सुप्ते प्रवसितेऽथवा ॥ यादवाभिभवं दुष्टा मा कुर्वन्वैरिणोऽधिकाः ॥ इति संचिंत्य गोविंदो योजनानि महोदधिं ॥ ययाचे द्वादश पुरीं
द्वारकां तत्र निर्ममे ॥ महोद्यानां महावप्रां तडागशतशोभितां ॥ प्राकारगृहसंबाधामिंद्रस्येवामरावतीं ॥ मथुरावासिनो लोकांस्तत्रानीय जनार्
दनः ॥ आसन्ने कालयवने मथुरां च स्वयं ययौ ॥ बहिरावासिते सैन्ये मथुराया निरायुधः ॥ निर्जगाम स गोविंदो ददर्श यवनेश्वरं ॥ स ज्ञात्वा वासुदे
वं तं बाहुप्रहरणो नृपः ॥ अनुयातो महायोगिचेतोभिः प्राप्यते न यः ॥ तेनानुयातः कृष्णोऽपि प्रविवेश महागुहां ॥ यत्र शेते महावीर्यो मुचुकुंदो नरे
श्वरः ॥ सोऽपि प्रविश्य यवनो दृष्ट्वा शय्यागतं नरं ॥ पादेन ताडयामास मत्वा कृष्णं सुदुर्मतिः ॥ दृष्टमात्रश्च तेनासौ जज्वाल यवनोऽग्निना ॥ तत्क्रोधजे
न मैत्रेय भस्मीभूतश्च तत्क्षणात् ॥ स हि देवासुरे युद्धे गतो जित्वा महासुरान् ॥ निद्रार्त्तः सुमहाकालं निद्रां वव्रे वरं सुरान् ॥ प्रोक्तश्च देवैः संसुप्तं यस्त्वा
मुत्थापयिष्यति ॥ देहजेनाग्निना सद्यः स तु भस्मीभविष्यति ॥ एवं दग्ध्वा स तं पापं दृष्ट्वा च मधुसूदनं ॥ कस्त्वमित्याह सोऽप्याह जातोऽहं शशिनः कु
ले ॥ वसुदेवस्य तनयो यदोर्वंशसमुद्भवः ॥ मुचुकुंदोऽपि तत्रासौ वृद्धगार्ग्यवचोऽस्मरत् ॥ संस्मृत्य प्रणिपत्यैनं सर्वं सर्वेश्वरं हरिं ॥ प्राह ज्ञातो भवान्वि

राम
१३२

132

नि महामतिः ॥ अयाचत मृतं पुत्रं प्रभासे लवणार्णवे ॥ गृहीतास्त्रौ ततस्तौ तु सांदिपात्रो महोदधिः ॥ उवाच न मया पुत्रो हृतः सांदीपनेरिति
॥ दैत्यः पंचजनो नाम शंखरूपः स बालकं ॥ जग्राह सोस्ति सलिले ममैवासुरसूदन ॥ इत्युक्तोंतर्जलं गत्वा पंचजनं खलं ॥ कृष्णो जघान तस्यास्थि
प्रभवं शंखमुत्तमं ॥ यस्य नादेन दैत्यानां वलहानिरजायत ॥ देवानां ववृधे तेजो यात्यधर्म्मश्च संक्षयं ॥ तं पांचजन्यमापूर्य्य गत्वा यमपुरीं हरिः ॥ व
लदेवश्च वलवान् जित्वा वैवस्वतं यमं ॥ तं वालं यातनासंस्थं यथापूर्वशरीरिणं ॥ पित्रे प्रदत्तवान् कृष्णो वलश्च वलिनां वरः ॥ मथुरां च पुनः प्राप्ताउ
ग्रसेनेन पालितां ॥ प्रहृष्टपुरुषस्त्रीकाउभौ रामजनार्द्दनौ ॥ इति श्री विष्णुपुराणे पंचमेंशे एकविंशोध्यायः ॥ पराशर उवाच ॥ जरासं
धसुते कंस उपयेमे महावलः ॥ अस्तिं प्राप्तिं च मैत्रेय तयोर्भर्तृहणं हरिः ॥ महावलपरीवारो मगधाधिपतिर्वली ॥ हंतुमभ्याययौ कोपाज्जरासंधः सयाद
वान् ॥ उपेत्य मथुरां सोथ रुरोध मगधेश्वरः ॥ अक्षौहिणीभिः सैन्यस्य त्रयोविंशतिभिर्वृतः ॥ निष्क्रम्याल्पपरीवाराउभौ रामजनार्द्दनौ ॥ युयुधाते समं त
स्य वलिनौ वलिसैनिकैः ॥ ततो वलश्च कृष्णश्च चक्राते मतिमुत्तमं ॥ आयुधानां पुराणानामादाने मुनिसत्तम ॥ अनंतरं हरेः शार्ङ्गं तूणौ चाक्षयसा
यकौ ॥ आकाशादागतौ वीर तथा कौमोदकी गदा ॥ हलं च वलभद्रस्य गगनादागतं करे ॥ मनसाभिमतं विप्र सौनंदं मुसलं तथा ॥ ततो युद्धे पराजित्य
ससैन्यं मगधाधिपं ॥ पुरीं विविशतुर्वीराउभौ रामजनार्द्दनौ ॥ जितेस्मिन् सुदुर्वृत्ते जरासंधे महामुने ॥ जीवमाने गते कृष्णस्तं नामन्यत निर्जितं ॥ पुनरप्याज
गामाथ जरासंधो वलान्वितः ॥ जितश्च रामकृष्णाभ्यामपक्रांतो द्विजोत्तम ॥ दशचाष्टौ च संग्रामानेवमत्यंतदुर्म्मदः ॥ यदुभिर्म्मागधो राजा चक्रे कृष्ण
पुरोगमैः ॥ सर्वेष्वेतेषु युद्धेषु यादवैः स पराजितः ॥ अपक्रांतो जरासंधः स्वल्पसैन्यैर्वलाधिकः ॥ तद्वलं यादवानां तैर्जितं यदनेकशः ॥ तत्तु सन्नि
धिमाहात्म्यं विष्णोरंशस्य चक्रिणः ॥ मनुष्यधर्म्मशीलस्य लीला सा जगतः पतेः ॥ अस्त्राण्यनेकरूपाणि यदरातिषु मुंचति ॥ मनसैव जगत्सृष्टिं सं
हारं च करोति यः ॥ तस्यारिपक्षक्षपणे कियानुद्यमविस्तरः ॥ तथापि यो मनुष्याणां धर्म्मास्तदनुवर्त्तते ॥ कुर्वन् वलवता संधिं हीनैर्युद्धं करोत्यसौ
॥ साम चोपप्रदानं च तथा भेदं च दर्शयन् ॥ करोति दंडपातं च क्वचिदेव पलायनं ॥ मनुष्यदेहिनां चेष्टामित्येवमनुवर्त्ततः ॥ लीला जगत्पतेस्त

हत्वा

त

शोऽध्यायः ॥ इति श्रीविष्णुपुराणे पंचमेंऽशे कालयवननाशनं नाम त्रयोविंशतितमोऽध्यायः ॥ पराशर उवाच ॥ इत्थं स्तुतस्तदा तेन मचुकुंदेन धी
मता ॥ प्राहेशः सर्वभूतानामनादिनिधनो हरिः ॥ यथाभिवांछितान्दिव्यान्गच्छ लोकान्नरेश्वर ॥ अव्याहतपरैश्वर्यो मत्प्रसादोपबृंहितः ॥
भुक्त्वा भोगान्महादिव्यान्भविष्यसि महाकुले ॥ जातिस्मरो मत्प्रसादात्ततो मोक्षमवाप्स्यसि ॥ पराशर उवाच ॥ इत्युक्तः प्रणिपत्येशं जगता
मच्युतं नृपः ॥ गुहामुखाद्विनिःक्रांतो ददृशे सोऽल्पकान्नरान् ॥ ततः कलियुगं मत्वा प्राप्तं तप्तुं नृपस्तपः ॥ नरनारायणस्थानं प्रययौ गंध
मादनं ॥ कृष्णोऽपि घातयित्वारिमुपायेन हि तद्बलं ॥ आनीय चोग्रसेनाय द्वारवत्यां न्यवेदयत् ॥ पराभिभवनिःशंकं बभूव च यदोः कुलं ॥ बल
देवोऽपि मैत्रेय प्रशांताखिलविग्रहः ॥ ज्ञातिदर्शनसोत्कंठः प्रययौ नंदगोकुलं ॥ ततो गोपीश्च गोपांश्च पूर्ववन्नममित्रजित् ॥ तथैवाभ्यवद
त्प्रेम्णा बहुमानपुरःसरं ॥ कैश्चापि संपरिष्वक्तः कांश्चित्संपरिषस्वजे ॥ हासं चक्रे समं कैश्चिद्गोपैर्गोपीजनैस्तथा ॥ प्रियाण्यनेकान्यवदन्गोपा
स्तत्र हलायुधं ॥ गोप्यश्च प्रेमकुपिताः प्रोचुः सेर्ष्यमथापराः ॥ गोप्यः पप्रच्छुरपरा नागरीजनवल्लभः ॥ कच्चिदास्ते सुखं कृष्णश्चलप्रेमलवा
त्मकः ॥ अस्मच्चेष्टामुपहसन्न कच्चित्पुरयोषितां ॥ सौभाग्यमानमधिकं करोति क्षणसौहृदः ॥ कच्चित्स्मरति नः कृष्णो गीतानुगमनं कलं ॥
अप्यसौ मातरं द्रष्टुं सकृदप्यागमिष्यति ॥ अथवा किं तदालापैः क्रियंतामपराः कथाः ॥ यस्यास्माभिर्विना तेन विनास्माकं भविष्यति ॥ पि
ता माता तथा भ्राता भर्ता बंधुजनश्च किम् ॥ संत्यक्तस्तत्कृतेऽस्माभिरकृतज्ञध्वजो हि सः ॥ तथापि कच्चिदालापमिहागमनसंश्रयं
॥ करोति कृष्णो वक्तव्यं भवता राम नानृतं ॥ दामोदरोऽसौ गोविंदः पुरस्त्रीन्यस्तमानसः ॥ संदेशैः साममधुरैः प्रेमगर्भैरगर्वितैः ॥
रामेणाश्वासिता गोप्यः कृष्णस्यातिमनोहरैः ॥ गोपैश्च पूर्ववद्रामः परिहासमनोरमाः ॥ कथाश्चकार रेमे च सह तैर्व्रजभूमिषु ॥ इति

सोरेश त्वं परमेश्वर ॥ पुरा गर्भेण कश्चित्त अष्टाविंशतिमे युगे ॥ द्वापरांते हरे जन्म यदोर्वंशे भविष्यति ॥ सतं श श्वातेन संदेहो मर्त्यानामुपकारक
व ॥ तथाहि सुमहत्तेजो नालं सोढुमहं तव ॥ तथाहि सजलांभोदस्वाद धीरस्वरं तव ॥ वाक्यं समति चैवार्वा युष्मत्वात् अपीडित ॥ देवासुरे महायुद्धे दैत्य
सैन्ये महाभटः ॥ नपो कुम्भमतत्तेजस्त्वत्तेजो न सहाम्यहं ॥ संसारपतितं सैकोजंतो त्वं शरणं परं ॥ सप्रसीद प्रपन्नार्तिहर त्वोहरमभासुभं ॥ त्वं पयोनिध
यः शैलाः सरितस्त्वं वनानि च ॥ मेदिनी गगनं वायुरापोग्निस्त्वं तथा मनः ॥ बुद्धिरव्याकृतं प्राणाः प्राणेश त्वं तथा पुमान् ॥ हंसः परतरं यस्य व्याप्य जन्म
विकारि यत् ॥ शब्दादिहीनमजरममेयं क्षयवर्जितं ॥ अवृद्धिनाशं तद्ब्रह्म त्वमाद्यंतविवर्जितं ॥ त्वत्तोमराः सपितरो यक्षगंधर्वकिन्नराः ॥ सिद्धाश्चा
प्सरसस्त्वत्तो मनुष्याः पशवः खगाः ॥ सरीसृपाश्च गाः सर्वे तरवः सर्वे महीरुहा ॥ पंच भूतं भविष्यं च किंचिद्यच्च चराचरं ॥ अमूर्तं मूर्तमथवा
स्थूलं सूक्ष्मं चराचरं स्थिरं ॥ तत्सर्वं त्वं जगत्कर्ता नास्ति किंचित्त्वया विना ॥ मया संसारचक्रेस्मिन् भ्राम्यता भगवत्सदा ॥ तापत्रयाभिभूतेन न ना
मा निर्वृतिः क्वचित् ॥ दुःखान्येव सुखानीति मृगतृष्णाजलाशया ॥ मया नाथ गृहीतानि तानि तापाय मेभवन् ॥ राज्यमुर्वी बलं कोशो मित्रपुत्र
स्तथात्मजाः ॥ भार्याभृत्यजनाश्चैव शब्दाद्या विषयाः प्रभो ॥ सुखबुध्या मया सर्वं गृहीतमिदमव्यय ॥ परिणामे तदेव तापात्मकमभून्मम ॥ दे
वलोकगतिं प्राप्तो नाप्य देवगणो व्ययम् ॥ मत्तः स्वाहा स्वकोनाभूत्कांक्ष्यतो कुत्र निर्वृतिः ॥ वामनाराध्य जगतां सर्वेषां प्रभवास्पदं ॥ एतच्च
तीप्राप्यते केन परमेश्वर निर्वृतिः ॥ त्वन्मायामूढमनसो जन्ममृत्युजरादिकान् ॥ अवाप्य तापान् पश्यंति प्रेतराजाननं नराः ॥ ततो निज
किंपासूत्रि नरकेष्वतिदारुणं ॥ प्राप्नुवंति नरा दुःखमस्वरूपविदस्तव ॥ अहमत्यंत विषयी मोहितः तव मायया ॥ ममत्वगर्वगर्तांतर्भ्रमा
मि परमेश्वर ॥ सोहं त्वां शरणमपारमीश मासुतं प्राप्तः परमपदं यतो न किंचित् ॥ संसारभ्रमपरितापतप्तचेता निर्वाणे परिणत धाम्नि सा

वि०पु०
१३४

134

पालाय जरासंधप्रेरितः॥ भीष्मकोरुक्मिणा सार्द्धं रुक्मिणीमुरुविक्रम॥ विवाहार्थं ततः सर्वे जरासंधमुखा नृपाः॥ भीष्मकस्य पुरीं जग्मुः शि
शुपालप्रियैषिणः॥ कृष्णोपि बलभद्राद्यैर्यदुभिर्वृतः॥ प्रययौ कुंडिनं द्रष्टुं विवाहं चैद्यभूभृतः॥ श्वोभाविनि विवाहे तु तां कन्यां हृतवा
न्हरिः॥ विपक्षभारमासज्य रामाद्येष्वथ बंधुषु॥ ततश्च पौंड्रकः श्रीमान्दंतवक्रो विदूरथः॥ शिशुपालजरासंधशाल्वाद्याश्च महीभृतः॥ कु
पितास्ते हरिं हंतुं चक्रुरुद्योगमुत्तमं॥ निर्जिताश्च समागम्य रामाद्यैर्यदुपुंगवैः॥ कुंडिनं न प्रवेक्ष्यामि अहत्वा युधि केशवं॥ कृत्वा प्रतिज्ञां रुक्मी
च हंतुं कृष्णमभिद्रुतः॥ हत्वा बलं सनागाश्वपत्तिस्यंदनसंकुलं॥ निर्जितः पातितश्चोर्व्यां लीलयैव स चक्रिणा॥ निर्जित्य रुक्मिणं सम्य
गुपयेमे स रुक्मिणीं॥ राक्षसेन विवाहेन संप्राप्तां मधुसूदनः॥ तस्यां जज्ञे च प्रद्युम्नो मदनांशः सवीर्यवान्॥ जहार शंबरो यं वै यो जघान
च शंबरं॥ इति श्रीविष्णुपुराणे पंचमेंशे रुक्मिणीपरिणयो नाम षड्विंशोध्यायः॥ मैत्रेय उवाच॥ शंबरेण हृतो वीरः प्रद्युम्नः स कथं मुने॥ शं
बरश्च महावीर्यः प्रद्युम्नेन कथं हतः॥ पराशर उवाच॥ षष्ठेह्नि जातमात्रं तु प्रद्युम्नं सूतिकागृहात्॥ ममैष हंतेति मुने हृतवान्कालशंबरः॥
हृत्वा चिक्षेप चैवैनं ग्राहोग्रे लवणार्णवे॥ कल्लोलजनितावर्त्ते सुघोरे मकरालये॥ पतितं तत्र चैवैको मत्स्यो जग्राह बालकं॥ न ममार च
तस्यापि जठरे न च जीर्य्यते॥ मत्स्यबंधैश्च मत्स्योसौ मत्स्यैरन्यैः सह द्विज॥ घातितो सुरवर्याय शंबराय निवेदितः॥ तस्य मायावती नाम
पत्नी सर्वगृहेश्वरी॥ कारयामास सूदानामाधिपत्यमनिंदिता॥ दारिते मत्स्यजठरे सा ददर्शातिशोभनं॥ कुमारं मन्मथतरोर्दग्धस्य
प्रथमांकुरं॥ कोयं कथमयं मत्स्यजठरं समुपागतः॥ इत्येवं कौतुकाविष्टां तां तन्वीं प्राह नारदः॥ अयं समस्तजगतः सृष्टिसंहारकर्मणा
शंबरेण हृतः कृष्णतनयः सूतिकागृहात्॥ क्षिप्तः समुद्रे मत्स्येन निगीर्णस्ते वशं गतः॥ नररत्नमिदं सुभ्रु विस्रब्धा परिपालय॥ परा
शर उवाच॥ नारदेनैवमुक्ता सा पालयामास तं शिशुं॥ बाल्यादेवातिरागेण रूपातिशयमोहिता॥ स यदा यौवनाभोगभूषितोभ

न
त्म
१३४

श्रीविष्णुपुराणे पंचमेंऽशे रामव्रजागमनं नाम चतुर्विंशोऽध्यायः ॥ पराशर उवाच ॥ वने विचरतस्तस्य सह गोपैर्महात्मनः ॥ मानुषछद्मरूपस्य शे-
षस्य धरणीभृतः ॥ निःपादितोरुकार्यस्य कार्येणोर्वीप्रचारिणः ॥ उपभोगार्थमत्यर्थं वरुणः प्राह वारुणीं ॥ अभीष्टा सर्वदा यस्य मदिरे त्वं म-
हौजसः ॥ अनंतस्योपभोगाय तस्य गच्छ मुदे शुभे ॥ इत्युक्ता वारुणी तेन सन्निधानमथाकरोत् ॥ वृंदावनसमुत्पन्नकदंबतरुकोटरे ॥ विचरन्बलदे-
वोपि मदिरागंधमुत्तमं ॥ आघ्राय मदिरातर्षमवापाग्र्यं पुरातनं ॥ ततः कदंबात्सहसा मद्यधारां स लांगली ॥ पतंतीं वीक्ष्य मैत्रेय प्रययौ परमां
मुदं ॥ पपौ च गोपगोपीभिः समवेतो मुदान्वितः ॥ उपगीयमानो ललितं गीतवाद्यविशारदैः ॥ समत्तोत्यंतघर्मांभःकणिकामौक्तिकोज्वलः ॥ आ-
गच्छ यमुने स्नातुमिच्छामीत्याह विह्वलः ॥ तस्य वाचं नदी सा च मत्तोक्तामवमन्य वै ॥ नाजगाम ततः क्रुद्धो हलं जग्राह लांगली ॥ गृहीत्वा तां तटे
तेन चकर्ष मदविह्वलः ॥ पापे नायासि नायासि गम्यतामिच्छयान्यतः ॥ साकृष्टा तेन सहसा मार्गं संत्यज्य निम्नगा ॥ यत्रास्ते बलभद्रोसौ प्लाव-
यामास तद्वनं ॥ शरीरिणी तथोपेत्य त्रासविह्वललोचना ॥ प्रसीदेत्यब्रवीद्रामं मुंच मां मुशलायुध ॥ सोब्रवीदवजानासि मम शौर्यबलं न-
दि ॥ सोहं त्वां हलपातेन विनेष्यामि सहस्रधा ॥ पराशर उवाच ॥ इत्युक्तयातिसंत्रासात्तया नद्या प्रसादितः ॥ भूभागे प्लाविते तस्मिन्मुमोच य-
मुनां बलः ॥ ततः स्नातस्य वै कांतिराजगाम महात्मनः ॥ अवतंसोत्पलं चारु गृहीत्वैकं च कुंडलं ॥ वरुणप्रहितां चास्मै मालामम्लानपंकजां ॥ समु-
द्रार्हे तथा वस्त्रे नीले लक्ष्मीरयच्छत ॥ कृतावतंसः स तदा चारुकुंडलभूषितः ॥ नीलांबरधरः स्रग्वी शुशुभे कांतिसंयुतः ॥ इत्थं विभूषितो रे-
मे तत्र रामस्तथा व्रजे ॥ मासद्वयेन यातश्च पुनः स द्वारकां पुरीं ॥ रेवतीं नाम तनयां रैवतस्य महीपतेः ॥ उपयेमे बलस्तस्यां जज्ञाते निशठोल्मुकौ ॥
इति श्रीविष्णुपुराणे पंचमेंऽशे बलविलासो नाम पंचविंशतितमोऽध्यायः ॥ पराशर उवाच ॥ भीष्मकः कुंडिने राजा विदर्भविषयेऽभवत् ॥ रुक्मी
तस्याभवत्पुत्रो रुक्मिणी च वरांगना ॥ रुक्मिणीं चकमे कृष्णः सा च तं चारुहासिनी ॥ न ददौ याचते चैनां रुक्मी द्वेषेण चक्रिणे ॥ ददौ च शिशु-

वि०पु०
१३५

135

चारुदेहंच वीर्यवान् ॥ सुषेणं चारुगुप्तं च भद्रचारुं तथा परं ॥ चारुविंदं सुचारुं च चारुं च बलिनां वरं ॥ रुक्मिण्यजनयत्पुत्रान्कन्यां चारुमतीं ति
तथा ॥ अन्याश्च भार्याः कृष्णस्य बभूवुः सप्त शोभनाः ॥ कालिंदी मित्रविंदा च सत्या नाग्नजिती तथा ॥ देवी जांबवती चापि रोहिणी कामरूपिणी
॥ मद्रराजसुता चान्या सुशीला शीलमंडना ॥ सत्राजिती सत्यभामा लक्ष्मणा चारुहासिनी ॥ षोडशात्र सहस्राणि स्त्रीणामन्यानि चक्रि
णः ॥ प्रद्युम्नोपि महावीर्यो रुक्मिणस्तनयां शुभां ॥ स्वयंवरस्थां जग्राह सा च तं तनयं हरेः ॥ तस्यामस्याभवत्पुत्रो महाबलपराक्रमः ॥ अ
निरुद्धो रणे रुद्धो वीर्योदधिररिंदमः ॥ तस्यापि रुक्मिणः पौत्रीं वरयामास केशवः ॥ दौहित्राय ददौ रुक्मी स्पर्द्धन्नपि सौरिणः ॥ त
स्या विवाहे रामाद्या यादवा हरिणा सह ॥ रुक्मिणो नगरं जग्मुर्नाम्ना भोजकटं द्विज ॥ विवाहे तत्र निर्वृत्ते प्राद्युम्नेः सुमहात्मनः ॥ कलिंग
राजप्रमुखा रुक्मिणं वाक्यमब्रुवन् ॥ अनक्षज्ञो हली द्यूते तथास्य व्यसनं महत् ॥ न जयामो बलं कस्मात् द्यूतेनैनं महाद्युते ॥ पराश
र उवाच ॥ तथेति तानाह नृपान् रुक्मी बलमदान्वितः ॥ सभायां सह रामेण चक्रे द्यूतं च वै तदा ॥ सहस्रमेकं निष्काणां रुक्मिणा विजितो ब
लः ॥ द्वितीयेपि पणे चान्यत्सहस्रं रुक्मिणा जितः ॥ ततो दशसहस्राणि निष्काणां पणमाददे ॥ अविद्योयं मया द्यूते बलदेवः पराजितः
॥ मृषैवाक्षावलेपांधो योवमेनेक्षकोविदं ॥ दृष्ट्वा कलिंगराजानं प्रकाशदशनाननं ॥ रुक्मिणं चापि दुर्वाक्यं कोपं चक्रे हलायुधः
॥ ततः कोपपरीतात्मा निष्ककोटिं हलायुधः ॥ ग्लहं जग्राह रुक्मी च तदर्थेक्षानपातयत् ॥ अजयद्बलदेवस्तं प्राहोच्चैस्तं जितं मया
॥ मयेति रुक्मी प्राहोच्चैरलीकोक्तैरलं बल ॥ त्वयोक्तोयं ग्लहः सत्यं न मयैषोनुमोदितः ॥ एवं त्वया चेद्विजितं कथं ॥ अथांतरिक्षे वागुच्चैः
प्राह गंभीरनादिनी ॥ बलदेवस्य तत्कोपं वर्द्धयंती महात्मनः ॥ जितं बलेन धर्मेण रुक्मिणा भाषितं मृषा ॥ अनुक्त्वापि वचः किंचित्कृतं भव
तिकर्मणा ॥ ततो बलः समुत्थाय कोपसंरक्तलोचनः ॥ जघानाष्टापदेनैव रुक्मिणं सुमहाबलः ॥ कलिंगराजं चादाय विस्फुरंतं ब

राम
१३५

न्महामुने॥ साभिलाषा तदासाति विभ्रमगजगामिनी॥ मायावती ददौ चास्मै मायाः सर्वा महात्मने॥ प्रद्युम्नायातिरागांधा तन्न्य
स्तहृदयेक्षणा॥ प्रसजंतीं तु तामाह स कार्ष्णिः कमलेक्षणः॥ मातृभावमपाहाय किमेवं वर्त्तसे मयि॥ सा चास्मै कथयामास न पुत्रस्त्वं
ममेति वै॥ तनयं त्वामयं विष्णोर्हृतवान्कालशंबरः॥ क्षिप्तः समुद्रे मत्स्यस्य संप्राप्तो जठरान्मया॥ सा हि रोदिति ते माता कांताद्याप्यतिव
त्सला॥ पराशर उवाच॥ इत्युक्तः शंबरं युद्धे प्रद्युम्नः स समाह्वयत्॥ क्रोधाकुलीकृतमनाः युयुधे च महाबलः॥ हत्वा सैन्यमशेषं तु तस्य दै
त्यस्य माधविः॥ सप्त माया व्यतिक्रम्य मायां संयुयुजेऽष्टमीं॥ तया जघान तं दैत्यं मायया कालशंबरं॥ उत्पत्य च तया सार्द्धमाजगाम पितुर्गृहं
॥ चांतःपुरे निपतितं मायावत्या समन्वितं॥ तं दृष्ट्वा कृष्णसंकल्पा बभूवुः कृष्णयोषितः॥ रुक्मिणी चावदत्स्नेहात्साश्रुदृष्टिरनिंदिता॥ ध
न्यायाः खल्वयं पुत्रो वर्त्तते नवयौवने॥ अस्मिन्वयसि पुत्रो मे प्रद्युम्नो यदि तु जीवति॥ सभाग्या जननी वत्स त्वया कापि विभूषिता॥ अथवा
या यादृशः स्नेहो मम यादृग्वपुस्तव॥ हरेरपत्यं सुव्यक्तं भवान्वत्स भविष्यति॥ सभाग्या जननी वत्स त्वया कांति विभूषिता॥ अथवा यादृशः स्नेहो म
म यादृग्वपुस्तव॥ हरेरपत्यं सुव्यक्तं भवान्वत्स भविष्यति॥ पराशर उवाच॥ एतस्मिन्नंतरे प्राप्तः सह कृष्णेन नारदः॥ अंतःपुरवरां देवीं रुक्मिणीं
प्राह हर्षयन्॥ एष ते तनयः सुभ्रु हत्वा शंबरमागतः॥ हतो येनाभवद्बालो भवत्याः सूतिकागृहात्॥ इयं मायावती भार्या तनयस्यास्य ते स
ती॥ शंबरस्य न भार्येयं श्रूयतामत्र कारणं॥ मन्मथे तु गते नाशं तदुद्भवपरायणा॥ शंबरं मोहयामास मायारूपेण रूपिणी॥ विवाहाद्युप
भोगेषु रूपं मायामयं शुभं॥ दर्शयामास दैत्यस्य तस्येयं मदिरेक्षणा॥ कामोऽवतीर्णः पुत्रत्वे तस्येयं रतिरंगना॥ विशंका नात्र कर्त्तव्या स्नुषेयं
तव शोभने॥ ततो हर्षसमाविष्टौ रुक्मिणीकेशवौ तदा॥ नगरी च समस्ता सा साधु साध्वित्यभाषत॥ चिरं नष्टेन पुत्रेण संगतां प्रेक्ष्य रुक्मि
णीं॥ अवाप विस्मयं सर्वो द्वारवत्यां जनस्तदा॥ इति श्रीविष्णुपुराणे पंचमेंऽशे सप्तविंशोऽध्यायः॥ पराशर उवाच॥ चारुदेष्णं सुदेष्णं च

विष्णु॰
१३६

134

त्तमः ॥ तांश्छित्त्वा हरिः पाशान्क्षिप्त्वा चक्रं सुदर्शनं ॥ ततो मुरः समुत्तस्थौ तं जघान च केशवः ॥ मुरोस्तु तनयान्सप्त सहस्रांस्तांस्ततो हरिः ॥ चक्र-
धाराग्निनिर्दग्धांश्चकार शलभानिव ॥ हत्वा मुरं हयग्रीवं तथा पंचजनं द्विज ॥ प्राग्ज्योतिषपुरं धीमांस्त्वरावान्समुपागतः ॥ नरकेणास्य
तत्राभून्महासैन्येन संयुगः ॥ कृष्णस्य यत्र गोविंदो जघ्ने दैत्यान्सहस्रशः ॥ शस्त्रास्त्रवर्षं मुंचंतं भौमं तं नरकं बली ॥ क्षिप्त्वा चक्रं द्विधा
चक्रे चक्री दैतेयचक्रहा ॥ हते तु नरके भूमिर्गृहीत्वादितिकुंडले ॥ उपतस्थे जगन्नाथं वाक्यं चेदमथाब्रवीत् ॥ यदाहमुद्धृता नाथ
त्वया सूकरमूर्तिना ॥ त्वत्संस्पर्शभवः पुत्रस्तदायं मय्यजायत ॥ सोयं त्वयैव दत्तो मे त्वयैव विनिपातितः ॥ गृहाण कुंडले चेमे पालया-
स्य च संततिं ॥ भारावतरणार्थाय ममैव भगवानिमम् ॥ अंशेन लोकमायातः प्रसादसुमुख प्रभो ॥ त्वं कर्ता च विकर्ता च संहर्ता प्रभवो
प्ययः ॥ जगतां त्वं जगद्रूपः स्तूयसेऽच्युत किं तव ॥ व्यापी व्याप्यः क्रिया कर्ता कार्यं च भगवान्यदा ॥ सर्वभूतात्मभूतस्य स्तूयते तव किं तदा
॥ परमात्मा त्वमात्मा च भूतात्मा चाव्ययो भवान् ॥ यदा तदा स्तुतिर्नाथ किमर्थं ते प्रवर्तते ॥ प्रसीद सर्वभूतात्मन्नरकेण तु यत्कृतं ॥
तत्क्षम्यतामदोषाय त्वत्सुतः सन्निपातितः ॥ पराशर उवाच ॥ तथेति चोक्त्वा धरणीं भगवान्भूतभावनः ॥ रत्नानि नरकावासाज्जग्राह
मुनिसत्तम ॥ कन्यापुरे स कन्यानां षोडशातुलविक्रमः ॥ शताधिकानि ददृशे सहस्राणि महामुने ॥ चतुर्दंष्ट्रान्गजांश्चोग्रान्षट्स-
हस्रांश्च दृष्टवान् ॥ कांबोजानां तथाश्वानां नियुतान्येकविंशतिं ॥ कन्यास्ताश्च तथा नागांस्तानश्वान्द्वारकां पुरीम् ॥ प्रेष-
यामास गोविंदः सद्यो नरककिंकरैः ॥ ददृशे वारुणं छत्रं तथैव मणिपर्वतं ॥ आरोपयामास हरिर्गरुडे पतगेश्वरे ॥ आरु-
ह्य च स्वयं कृष्णः सत्यभामासहायवान् ॥ अदितेः कुंडले दातुं जगाम त्रिदिवालयं ॥ इति श्रीविष्णुपुराणे पंचमेंऽशे नरक-
वधो नामैकोनत्रिंशोऽध्यायः ॥ पराशर उवाच ॥ गरुडो वारुणं छत्रं तथैव मणिपर्वतं ॥ सभार्यं च हृषीकेशं लीलयैव वहन्य-

व

क

राम
१३६

लाङ्गलः ॥ वभंजदंतान्कुपितोपै भुकायदंजहारसः ॥ आकृष्य च महास्तंभं जातरूपमयं वलः ॥ जघान येऽन्येतत्पक्षाभूभृतः कुपितो वलः ॥
ततो हाहाकृतं सर्वं पलायनपरं द्विज ॥ तद्राजमंडलं सर्वं वभूव कुपिते वले ॥ वलेन निहतं श्रुत्वा रुक्मिणं मधुसूदनः ॥ नोवाच किं
चिन्मैत्रेय रुक्मिणीवलयोर्भयात् ॥ ततोऽनिरुद्धमादाय कृतोद्वाहं द्विजोत्तम ॥ द्वारकामाजगामाथ यदुचक्रं च केशवः ॥ इति श्रीवि
विष्णुपुराणे पंचमेंऽशे अनिरुद्धविवाहो नामाष्टाविंशोऽध्यायः ॥ पराशर उवाच ॥ द्वारवत्यां ततः शौरिं शक्रस्त्रिभुवनेश्वरः ॥ आजगामाथ
मैत्रेय मत्तैरावतपृष्ठगः ॥ प्रविश्य द्वारकां सोथ समेत्य हरिणा ततः ॥ कथयामास दैत्यस्य नरकस्य विचेष्टितं ॥ त्वयानाथेन देवानां मनुष्य
त्वेपि तिष्ठता ॥ प्रशमं सर्वदुःखानि नीतानि मधुसूदन ॥ तपस्विजननाशाय सोरिष्टो धेनुकस्तथा ॥ प्रलंवाद्यास्तथा केशी ते सर्वे निह
तास्त्वया ॥ कंसः कुवलयापीडः पूतना वालघातिनी ॥ नाशं नीतास्त्वया सर्वे येन्ये जगदुपद्रवाः ॥ युष्मद्दोर्दंडसंभूतिपरित्राते जगत्त्रये ॥
यज्ञभागान्समासाद्य तृप्तिं यांति दिवौकसः ॥ सोहं सांप्रतमायातो यन्निमित्तं जनार्दन ॥ तच्छ्रुत्वा तत्प्रतीकारप्रयत्नं कर्तुमर्हसि ॥ भौमो
यं नरको नाम प्राग्ज्योतिषपुरेश्वरः ॥ करोति सर्वभूतानामुपघातमरिंदम ॥ देवसिद्धसुरादीनां नृपाणां च जनार्दन ॥ हत्वा हि सोसुरः
कन्या रुरोध निजमंदिरे ॥ छत्रं यत्सलिलस्रावि तज्जहार प्रचेतसः ॥ मंदरस्य तथा शृंगं हृतवान्मणिपर्वतं ॥ अमृतस्राविणी दिव्ये मन्माते
मृतकुंडले ॥ जहार सोसुरोऽदित्या वांछत्यैरावतं गजं ॥ दुर्नीतमेतद्गोविंद मया तस्य निवेदितं ॥ यदत्र प्रतिकर्तव्यं तत्स्वयं परिमृश्यतां ॥
पराशर उवाच ॥ इति श्रुत्वा स्मितं कृत्वा भगवान्देवकीसुतः ॥ गृहीत्वा वासवं हस्ते समुत्तस्थौ वरासनात् ॥ संचिंत्यागतमारुह्य ...
नगगामिनः ॥ सारिंचिंतितं सुपारूढ़ गरुडं गगनेचरं ॥ सत्यभामां समारोप्य ययौ प्राग्ज्योतिषं पुरं ॥ आरुह्यैरावतं नागं शक्रोपि त्रिदिवा
लयं ॥ ततो जगाम मैत्रेय पश्यतां द्वारकौकसां ॥ प्राग्ज्योतिषपुरस्यासीत्समंताच्छतयोजनं ॥ आचिता मौरवैः पाशैः क्षुरांतैर्भूर्द्विजो

नामिपरंयत्ते प्रसीद परमेश्वर ॥ पराशर उवाच ॥ अदित्यैवं स्तुतो विष्णुः प्रहस्याह सुरारणिम् ॥ माता देवि त्वमस्माकं प्रसीद वरदा भव ॥ अ
दितिरुवाच ॥ एवमस्तु यथेच्छा ते त्वमशेषैः सुरासुरैः ॥ अजेयः पुरुषव्याघ्र मर्त्यलोके भविष्यसि ॥ ततोनंतरमेवास्य शक्राणीसहिता दितिं
सत्यभामा प्रणम्याह प्रसीदेति पुनः पुनः ॥ अदितिरुवाच ॥ मत्प्रसादान्न ते सुभ्रू जरा वैरूप्यमेव च ॥ भविष्यत्यनवद्यांगी सर्वं धामो भविष्य
सि ॥ श्रीपराशर उवाच ॥ अदित्या तु कृतानुज्ञो देवराजो जनार्दनं ॥ यथावत्पूजयामास बहुमानपुरःसरं ॥ ततो ददर्श कृष्णोपि सत्यभामा
सहाय्यवान् ॥ देवोद्यानानि हृद्यानि नंदनादीनि सत्तमः ॥ ददर्श च सुगंधाढ्यं मंजरीपुंजधारिणं ॥ शैत्याह्लादकरं ताम्रबालपल्लवशोभितं ॥ म
थ्यमाने मृते जातं जातरूपसमत्वचं ॥ पारिजातं जगन्नाथः केशवः केशिसूदन ॥ तं दृष्ट्वा प्राह गोविंदं सत्यभामा द्विजोत्तम ॥ कस्मान्न द्वा
रकामेव नीयते देवपादपः ॥ यदि ते तद्वचः सत्यं सत्यात्यर्थं प्रियेति मे ॥ मद्गेहनिष्कुटार्थाय तदयं नीयतां तरुः ॥ न मे जांबवती तादृगभी
ष्टा न च रुक्मिणी ॥ सत्ये यथा त्वमित्युक्तं त्वया कृष्णासकृत्प्रियं ॥ सत्यं तद्यदि गोविंदं नोपचारकृतं तव ॥ तदस्तु पारिजातोयं
मम गेहविभूषणं ॥ बिभ्रती पारिजातस्य केशपक्षेण मंजरीं ॥ सपत्नीनामहं मध्ये शोभेयमिति कामये ॥ श्रीपराशर उवाच ॥ इत्युक्तः
स प्रहस्यैनां पारिजातं गरुत्मति ॥ आरोपयामास हरिस्तमूचुर्वनरक्षिणः ॥ भोः शची देवराजस्य महिषी तस्याः परिग्रहं ॥ पारिजातं न गो
विंद हर्तुमर्हसि पादपं ॥ शची विभूषणार्थाय देवैरमृतमंथने ॥ उत्पादितोयं न क्षेमी गृहीत्वैनं गमिष्यसि ॥ देवराजो मुखप्रेक्षो
यस्यास्तस्याः परिग्रहं मोहात्प्रार्थयसे क्षेमी गृहीत्वैनं गमिष्यसि ॥ वज्रोद्यतकरं शक्रमनुयास्यंति चामराः ॥ तदलं सकलैर्देवै
र्विग्रहेण तवाच्युत ॥ विपाककटु यत्कर्म तन्न शंसंति पंडिताः ॥ इत्युक्ते तैरुवाचैतान्सत्यभामातिकोपिनी ॥ का शची पारिजातस्य
को वा शक्रः सुराधिप ॥ सामान्यः सर्वलोकानां यद्येषोमृतमंथने ॥ समुत्पन्नः सुराः कस्मादेको गृह्णाति वासवः ॥ यथा सुधा यथा चंद्रो

यौ॥ ततः शंखसुपाण्याक्षी स्वर्गद्वारं गतो हरिः॥ उपतस्थुस्ततो देवाः सर्वपापाज्जनार्दनं॥ स देवैरर्चितः कश्यपोर्दैवमाजनु निवेशनं॥ शि-
ताश्च शिखराकारं प्रविश्य ददृशे दितिं॥ स्नातां प्रणम्य शक्रेण सहितं पुरुषोत्तमे॥ ददर्श नरकेनाशं चशसंसास्यै जनार्दनं॥ ततः प्रीता
जगन्माता धातारं जगतां हरिं॥ तुष्टाव दितिरव्यग्रा कृतांजलिपुटा मनः॥ अदितिरुवाच॥ नमस्ते पुंडरीकाक्ष भक्तानामभयंकर॥ सना-
तनात्मन् सर्वात्मन् भूतात्मन् भूतभावन॥ प्रणेतर्मनसो बुद्धेरिंद्रियाणां गुणात्मकाः॥ त्रिगुणातीत निर्द्वंद्व शुद्ध सर्वहृदिस्थित॥ सित
दीर्घादि निःशेषकल्पनापरिवर्जितः॥ जन्मादिभिरसंस्पृष्ट स्वप्नादिपरिवर्जित॥ संध्यारा विरहमूर्ति गगनं वा परं विभुः॥ कृतानां नो मनो-
वृत्तिर्भूर्नो दिशस्त्वं तथाच्युत॥ सृष्टिस्थितिविनाशानां कर्ता कर्तृपतिर्भवान्॥ ब्रह्मविष्णुशिवाख्याभिरात्ममूर्तिभिरीश्वर॥ देवा यक्षासुरा-
दैत्या राक्षसाः सिद्धपन्नगाः॥ कूष्मांडाश्च पिशाचाश्च गंधर्वा मनुजास्तथा॥ पशवो मृगाः पतंगाश्च तथैव च सरीसृपाः॥ वृक्षगुल्मल-
तावल्ली समस्तास्तृणजातयः॥ स्थूलामध्यास्तथा सूक्ष्मा सूक्ष्मा स्थूलतरास्तथा ये॥ देहभेदा भवान् सर्वे ये केचित्पिंडसंश्रयाः॥ मा-
यातवेयमज्ञात परमार्थाति मोहिनी॥ अनात्मन्यात्मविज्ञानं यया मूढो निरुध्यते॥ अहं ममेति भावोत्र यत्तु सामभिजायते॥ संसारमातु-
मायायास्तवैतन्नाथ चेष्टितं॥ यैः स्वधर्मपरैर्नाथ नरैराराधितो भवान्॥ ते नरंतं खिलामेतां मायामात्मविमुक्तये॥ ब्रह्माद्याः सकलादेवाम-
नुष्याः पशवस्तथा॥ विष्णुमायामहावर्ते मोहांधतमसावृताः॥ आराध्य त्वामभीप्संते कामानात्मभवक्षयं॥ यदेते पुरुषा माया सैव भग-
वं स्तव॥ मया त्वं पुत्रकामिन्या वैरिपक्षजयाय च॥ आराधितो न मोक्षाय मायाविलसितं हि तत्॥ कौपीनाच्छादनप्राया वांछा कल्पद्रु-
मादपि॥ जायते यदपुण्यानां सोपराधः स्वदोषजः॥ तत्प्रसीदाखिलजगन्मायामोहकराव्यय॥ अज्ञानं ज्ञानसद्भाव भूतं भूतेश नाशय॥
नमस्ते चक्रहस्ताय शार्ङ्गहस्ताय ते नमः॥ गदाहस्ताय ते विष्णो शंखहस्ताय ते नमः॥ एतत्पश्यामि ते रूपं स्थूलचिह्नोपलक्षितं॥ न जा-

ते

जः८

ब

वज्रचक्रधरौ दृष्ट्वा देवराजजनार्द्दनौ ॥ क्षिप्तं वज्रमथेंद्रेण जग्राह भगवान्हरिः ॥ न मुमोच च चक्रं स तिष्ठ तिष्ठेति चाब्रवीत् ॥ प्रनष्टव-
ज्रं देवेंद्रं गरुडक्षतवाहनं ॥ सत्यभामाब्रवीद्वीरं पलायनपरायणं ॥ त्रैलोक्येश्वर नो युक्तं शचीभर्त्तुः पलायनं ॥ पारिजातस्रगाभो-
गाढ्यामुपस्थास्यति ते शची ॥ कीदृशं देवराजं ते पारिजातस्रगुज्वलं ॥ अपश्यंत्या यथापूर्वं प्रणयाभ्यागतं शची ॥ अलं शक्र प्रयासेन
न व्रीडां गंतुमर्हसि ॥ नीयतां पारिजातोऽयं देवाः संतु गतव्यथाः ॥ पतिगर्वावलेपेन बहुमानपुरःसरं ॥ न ददर्श गृहायातामुपचारेण
मां शची ॥ स्त्रीत्वादगुरुचित्ताहं स्वभर्तृश्लाघनापरा ॥ ततः कृतवती शक्र भवता सह विग्रहं ॥ तदलं पारिजातेन परस्वेन हृतेन च ॥ रू-
पेण गर्विता सा तु भर्त्रा स्त्री का न गर्विता ॥ श्रीपराशर उवाच ॥ इत्युक्ते विनिवृत्ते देवराजस्तया द्विज ॥ प्राह चैनामलं चंडि सख्युः
खेदोक्तिविस्तरैः ॥ न चापि सर्गसंहारस्थितिकर्त्ताखिलस्य यः ॥ जितस्य तेन मे व्रीडा जायते विश्वरूपिणा ॥ यस्मिन्जगत्सकलमे-
तदनादिमध्ये यस्माद्यतश्च न भविष्यति सर्वभूतात् ॥ तेनोद्भवप्रलयपालनकारणेन व्रीडा कथं भवति देवि निराकृतस्य ॥
सकलभुवनसूतेर्मूर्त्तिरल्पाल्पसूक्ष्मा विदितसकलवेद्यैर्ज्ञायते यस्य नान्यैः ॥ तमजमकृतमीशं शाश्वतं स्वेच्छयैनं जगदुपकृ-
तमर्त्यं को विजेतुं समर्थः ॥ इति श्रीविष्णुपुराणे पंचमेंऽशे पारिजातहरणो नाम त्रिंशत्तमोऽध्यायः ॥ पराशर उवाच ॥ संस्तुतो भग-
वानित्थं देवराजेन केशवः ॥ प्रहस्य भावगंभीरमुवाचेदं द्विजोत्तम ॥ देवराजो भवानिंद्रो वयं मर्त्या जगत्पते ॥ क्षंतव्यं भवता चेदमपराधं कृ-
तं मम ॥ पारिजाततरुश्चायं शक्र वैरिविदारण ॥ शक्र उवाच ॥ विमोहयसि मामीश मर्त्योऽहमिति किं वदन् ॥ जानीम त्वां भगवतो
कृत्स्नं द्वारवतीं पुरीं ॥ मर्त्यलोके त्वया मुक्ते नायं संस्थास्यते भुवि ॥ श्रीपराशर उवाच ॥ तथेत्युक्त्वा च देवेंद्रमाजगाम भुवं हरिः ॥ प्र-
सक्तैः सिद्धगंधर्वैस्तूयमानः सुरर्षिभिः ॥ ततः शंखमुपाध्माय द्वारकोपरि संस्थितः ॥ हर्षमुत्पादयामास द्वारकावासिनां

मे

एम
१३८

वंद्ध्येयथाश्रीर्वनरक्षिणः॥सामान्यःसर्वलोकस्यपारिजातस्तथाद्रुमः॥भर्तृबाहुमहागर्वाद्रुणद्ध्येनंयथाशची॥तत्कथ्यतामलं

क्षांत्यासत्याहारयतिद्रुमं॥कथ्यतांचद्रुतंगत्वापौलोम्यावचनंमम॥सत्यभामावदत्येतदितिगर्वोद्धताक्षरं॥यदित्वंदयिताभर्तु

र्यदिवश्यःपतिस्तव॥मद्भर्तुर्हरतोवृक्षंतत्कारयनिवारणं॥जानामितेपतिंशक्रंजानामित्रिदिवेश्वरं॥पारिजातंतथाप्येतंमा

नुषीहारयामिते॥श्रीपराशरउवाच॥इत्युक्तारक्षिणोगत्वाशच्याःप्रोचुर्यथोदितं॥शचीचोत्साहयामासत्रिदशाधिपतिंपतिं

॥ततःसमस्तदेवानांसैन्यैःपरिवृतोहरिम॥प्रययौपारिजातार्थमिंद्रोयोद्धुंद्विज॥ततःपरिघनिस्त्रिंशगदाशूलवरायुधाः

बभूवुस्त्रिदशाःसर्वेशक्रेवज्रकरेस्थिते॥ततोनिरीक्ष्यगोविंदोनागराजोपरिस्थितं॥शक्रंदेवपरीवारंयुद्धायसमुपस्थितं॥

चकारशंखनिर्घोषंदिशःशब्देनपूरयन्॥ततोदिशोनभश्चैववृष्ट्वाशरशताचितं॥मुमुचुस्त्रिदशाःसर्वेअस्त्रशस्त्राण्यनेकशः

॥एकैकमस्त्रंशस्त्रंचदेवैर्मुक्तंसहस्रधा॥चिच्छेदलीलयैवेशोजगतांमधुसूदनः॥पाशंसलिलराजस्यसमाकृष्योरगाशनः॥

चकारखंडशश्चंच्वाबालपन्नगदेहवत्॥यमेनप्रहितंदंडंगदाविक्षेपखंडितं॥पृथिव्यांपातयामासभगवान्देवकीसुतः॥४

शिबिकांचधनेशस्यचक्रेणतिलशोविभुः॥चकारशौरिरर्कंचदृष्टिदृष्टहतौजसम॥नीतोग्निःशतशोबाणैर्द्रावितावसवोदिशः

॥चक्रविच्छिन्नशूलाग्रारुद्राभुविनिपातिताः॥साध्याविश्वेचमरुतोगंधर्वाश्चैवसायकैः॥शार्ङ्गिणाप्रेरितैरस्ताव्योम्निशाल्मलि

तूलवत्॥गरुत्मानपिवक्त्रेणपक्षाभ्यांनखरांकुरैः॥भक्षयंस्ताडयन्देवान्दारयंश्चचरायुधैः॥ततःशरसहस्रेणदेवेंद्रमधुसू

दनौ॥परस्परंववर्षातेधाराभिरिवतोयदैः॥ऐरावतेनगरुडोयुयुधेतत्रसंकुले॥देवैःसमस्तैर्युयुधेशक्रेणचजनार्दनः॥

छिन्नेष्वशेषबाणेषुशस्त्रेष्वस्त्रेषुचत्वरं॥जग्राहवासवोवज्रंकृष्णश्चक्रंसुदर्शनं॥ततोहाहाकृतंसर्वंत्रैलोक्यंद्विजसत्तम

वि०पु०
१३९

ततः सकलचित्तज्ञा गौरी तामाह भामिनी॥ अलमत्यर्थतापेन भर्त्ता त्वमपि रंस्यसे॥ इत्युक्ते सा तदा चक्रे कदेति मतिमात्मनः॥ को वा भर्त्ता ममे
त्येतां पुनरप्याह पार्वती॥ वैशाखशुक्लद्वादश्यां स्वप्ने योभिभवं तव॥ करिष्यति स ते भर्त्ता राजपुत्रि भविष्यति॥ श्रीपराशर उवाच॥
तस्यां तिथौ पुमान्स्वप्ने यथा देव्या उदीरितं॥ तथैवाभिभवं चक्रे रागं चक्रे तथैव सा॥ ततः प्रबुद्धा पुरुषमपश्यंती समुत्सुका॥ क्व गतो
सीति निर्लज्जा मैत्रेयोक्तवती सखीं॥ तदा विश्वासमानीय सर्वमेवाभ्यवेदयत्॥ विदितार्था तु तामाह पुनरूषां यथोदितं॥ देव्यास्तथै
व तत्प्राप्तौ यो ह्युपायः कुरुष्व तं॥ श्रीपराशर उवाच॥ ततः पटे सुरान्दैत्यान्गंधर्वांश्च प्रधानतः॥ मनुष्यांश्चाभिलिख्यासौ चित्रले
खा व्यदर्शयत्॥ अपास्य सा तु गंधर्वांस्तथोरगसुरासुरान्॥ मनुष्येषु ददौ दृष्टिं तेष्वप्यंधकवृष्णिषु॥ कृष्णरामौ विलोक्यासीत्सुभ्रू
र्लज्जाजडेव सा॥ प्रद्युम्नदर्शने व्रीडादृष्टिं निन्येन्यतो द्विज॥ दृष्टमात्रे ततः कांते प्रद्युम्नतनये द्विज॥ दृष्ट्वात्यर्थविकाशिन्या लज्जानि
राकृता॥ सोयं सोयमितीत्युक्ते तया सा योगगामिनी॥ ययौ द्वारवतीमूषां समाश्वास्य ततः सखीं॥ इति श्रीविष्णुपुराणे पंचमेंशे
उषोत्कंठालिख्यदर्शनं नाम द्वात्रिंशोध्यायः॥ श्रीपराशर उवाच॥ बाणोपि प्रणिपत्याग्रे मैत्रेयाह त्रिलोचनं॥ देव बाहुसहस्रे
ण निर्विण्णोहं विनाहवं॥ कच्चिन्ममैषां बाहूनां साफल्यं करणो रणः॥ भविष्यति विना युद्धं भाराय मम किं भुजैः॥ श्रीशंक
र उवाच॥ मयूरध्वजभंगस्ते यदा बाण भविष्यति॥ पिशिताशिजनानंदं प्राप्स्यसे त्वं तदा रणं॥ ततः प्रणम्य मुदितः शंभुम
भ्यागतो गृहं॥ भग्नं च ध्वजमालोक्य हृष्टो हर्षात्परं ययौ॥ एतस्मिन्नेव काले तु योगविद्याबलेन च॥ अनिरुद्धमथानिन्ये चित्र
लेखा वराप्सराः॥ कन्यांतःपुरमध्ये तं रममाणं सहोषया॥ विज्ञाय रक्षिणो गत्वा शशंसुर्दैत्यभूपतेः॥ आदिष्टं किंकराणां तु
सैन्यं तेन महात्मना॥ जघान परिघं लोहमादाय परवीरहा॥ हतेषु तेषु बाणोपि रथस्थस्तद्वधोद्यतः॥ युध्यमानो यथा

क

क्वापि

राम
१३९

द्विज॥ त्रवतीर्य्योचगरुडात्सत्यभामा सहायवान्॥ निष्कुटेस्थापयामास पारिजातं महातरुं॥ यमभ्येत्यजनः सर्वो जातिं स्मरतिपौर्विकों॥
वास्यते यस्यपुष्पोत्थगंधेनोर्वी त्रियोजनम्॥ ततस्ते यादवाः सर्वे देहबंधानमानुषान्॥ ददृशुः पादपे तस्मिन्कुर्वंतो मुखदर्शनं॥ किंक
रैः समुपानीतं हस्त्यश्वादितो धनं॥ स्त्रियश्च कृष्णो जग्राह नरकस्य परिग्रहात्॥ ततः काले शुभे प्राप्तउपयेमे जनार्द्दनः॥ ताः कन्यानर
केणासन्सर्वतो याः समाहृताः॥ एकस्मिन्नेव गोविंदः काले तासां महामुने॥ जग्राह विधिवत्पाणी न्पृथग्गेहेषु धर्मतः॥ षोडशस्त्रीस
हस्राणि शतमेकंतथाधिकं॥ तावंति चक्रे रूपाणि भगवान्मधुसूदनः॥ एकैकश्येनताः कन्या मेनिरे मधुसूदनं॥ ममैव पाणिग्रहणं
भगवान्कृतवानिति॥ निशासु च जगत्स्रष्टा तासां गेहेषु केशवः॥ उवास विप्र सर्वासां विश्वरूप धरो हरिः॥ इति श्रीविष्णुपुराणे पंचमेंऽशे
कन्यापरिग्रहो नामैकत्रिंशोऽध्यायः॥ श्रीपराशर उवाच॥ प्रद्युम्नाद्या हरेः पुत्रा रुक्मिण्याः कथितास्तव॥ भानुं भौमरिकं चैव सत्यभामाव्य
जायत॥ दीप्तिमंत प्रवक्षाद्या रोहिण्यां तनयाः हरेः॥ बभूवुर्जांबवत्याश्च सांबाद्या बाहुशालिनः॥ तनया भद्रविंदाद्या नग्नजित्यां महाब
लाः॥ संग्रामजित्प्रधानास्तु शैब्यायां त्वभवन्सुताः॥ वृकाद्यास्तु सुता माद्र्यां गात्रवत्प्रमुखान्सुतान्॥ अवाप लक्ष्मणा पुत्रान्कालिंद्यां
च श्रुतादयः॥ अन्यासां चैव भार्य्याणां समुत्पन्नानि चक्रिणः॥ अष्टायुतानि पुत्राणां सहस्राणां शतं तथा॥ प्रद्युम्नः प्रथमस्तेषां सर्वेषां
रुक्मिणीसुतः॥ प्रद्युम्नादनिरुद्धोऽभूद्वज्रस्तस्मादजायत॥ अनिरुद्धो रणे रुद्धो बलेः पौत्रीं महाबलः॥ बाणस्य तनयामूषामुपयेमे द्वि
जोत्तम॥ यत्र युद्धमभूद्घोरं हरिशंकरयोर्महत्॥ छिन्नं सहस्रं बाहूनां यत्र बाणस्य चक्रिणा॥ मैत्रेय उवाच॥ कथं युद्धमभूद्ब्रह्मन्नुमा
र्थे हरकृष्णयोः॥ कथं क्षयं च बाणस्य बाहूनां कृतवान्हरिः॥ एतत्सर्वं महाभाग ममाख्यातुं त्वमर्हसि॥ महत्कौतूहलं जातं कथां श्रो
तुमिच्छामि यत्ततः॥ श्रीपराशर उवाच॥ उषा बाणसुता विप्र पार्वतीं सह शंभुना॥ क्रीडंतीमुपलक्ष्योच्चैः स्पृहां चक्रे तदाश्रयाम्॥

म

वि०पु० १४०

140

बाणोप्यबाणं विभाध्य चक्रभृत्॥ मुमुचाते तथास्त्राणि बाणः कृष्णो जिगीषया॥ परस्परं क्षतिपरौ परमक्रोधिनौ द्विज॥ छिद्यमानेषु शरो
षु शरेषु शस्त्रे च सीदति॥ प्राचुर्येण हरिर्बाणं हन्तुं चक्रे ततो मनः॥ ततोर्कशतसंभूततेजसा सदृशद्युतिः॥ जग्राह दैत्यचक्रारिर्हरिश्चक्रं
सुदर्शनं॥ मुंचतो बाणनाशाय तत्रैव चक्रं मधुद्विषः॥ नग्ना दैतेयविद्याभूत् कोटवी पुरतो हरेः॥ तामग्रतो हरिर्दृष्ट्वा मीलिताक्षः सुदर्शनं
मुमोच बाणमुद्दिश्य छेत्तुं बाहुवनं रिपोः॥ क्रमेण तस्य बाहूनां बाणस्याच्युतनोदितं॥ छेदं चक्रेऽसुरापास्तशस्त्रौघक्षपणादृतं॥ छिन्ने बा
हुवने तत्तु करस्थं मधुसूदन॥ मुमुक्षुर्बाणनाशाय विज्ञातस्त्रिपुरद्विषा॥ उपेत्याह गोविंदं सामपूर्वमुमापतिः॥ विलोक्य बाणं दोर्दंड
छेदासृक्स्राववर्षिणं॥ श्रीरुद्र उवाच॥ कृष्ण कृष्ण जगन्नाथ जाने त्वां पुरुषोत्तमं॥ परेशं परमात्मानमनादिनिधनं हरिं॥ देवतिर्यङ्मनुष्ये
षु शरीरग्रहणात्मिका॥ लीलेयं सर्वभूतस्य तव चेष्टोपलक्षणा॥ तत्प्रसीदाभयं दत्तं बाणस्यास्य मया प्रभो॥ तत्त्वया नानृतं कार्यं यन्म
या व्याहृतं वचः॥ अस्मत्संश्रयवृद्धोयं नापराधस्तवाव्यय॥ मया दत्तवरो दैत्यस्ततस्त्वां क्षामयाम्यहम्॥ श्रीपराशर उवाच॥ इत्यु
क्तः प्राह गोविंदः शूलपाणिमुमापतिं॥ प्रसन्नवदनो भूत्वा गतामर्षोसुरं प्रति॥ श्रीभगवानुवाच॥ युष्मद्दत्तवरो बाणो जीवतामेष शं
कर॥ त्वद्वाक्यगौरवादेतन्मया चक्रं निवर्तितं॥ त्वया यदभयं दत्तं तद्दत्तमखिलं मया॥ मत्तोऽविभिन्नमात्मानं द्रष्टुमर्हसि शंकर॥ योहं स
त्वं जगच्चेदं सदेवासुरमानुषं॥ अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः॥ इत्युक्त्वा प्रययौ कृष्णः प्राद्युम्निर्यत्र तिष्ठति॥ तद्बंधफणि
नो नेशुर्गरुडानिलशोषिताः॥ ततोनिरुद्धमारोप्य सपत्नीकं गरुत्मति॥ आजग्मुर्द्वारकां रामकार्ष्णिदामोदराः पुरीं॥ इति श्रीविष्णु
पुराणे पंचमेंशे बाणहरणं नाम त्रयस्त्रिंशोध्यायः॥ मैत्रेय उवाच॥ चक्रे कर्म महच्छौरिर्बिभ्राणो मानुषं वपुः॥ जित्वा शक्रं शर्वं च स
र्वदेवांश्च लीलया॥ यच्चान्यदकरोत्कर्म दिव्यचेष्टाविघातकृत्॥ तत्कथ्यतां महाभाग परं कौतूहलं हि मे॥ श्रीपराशर उवाच॥

परं

राम १५०

शक्तिपराधीरेणनिर्जितः॥ मायश्चप्रद्युम्नेनसततरामंत्रितोरिजः॥ ततस्तंपृच्छमानेषुसर्वेषुयदुनंदनं॥ द्वारवत्यांक्वयातोसावनिरुद्धेतिजल्प
तां॥ यदूनामाचचक्षेतंबद्धंबाणेननारदः॥ तंशोणितपुरेश्रुत्वानीतंविद्याविदग्धया योषितांप्रत्ययंजग्मुर्यादवानामरैरिति॥ ततोगरुडमा
रुह्यस्मृतमात्रागतंहरिः॥ ततस्त्रिपादस्त्रिशिराज्वरोमाहेश्वरोमहान्॥ बाणरक्षार्थमत्यर्थंयुयुधेशार्ङ्गधन्वना॥ तद्भस्मस्पर्शसंभूततापकृष्णां
गसंगमात्॥ अवापबलदेवोपिश्रममामीलितेक्षणः॥ ततःसयुध्यमानस्तुसहदेवेनशार्ङ्गिणा॥ वैष्णवेनज्वरेणाशुकृष्णदेहान्निराकृतः॥
नारायणभुजाघातपरिपीडनविह्वलं॥ तंवीक्ष्यक्षम्यतामस्येत्याहदेवःपितामहः॥ ततश्चक्षांतमेवेतिप्रोक्तातंवैष्णवंज्वरं॥ आत्मन्येव
लयंनिन्येभगवान्मधुसूदनः॥ ममत्वयासमंयुद्धंयेस्मरिष्यंतिमानवाः॥ विज्वरास्तेभविष्यंतीत्युक्त्वाचैनंययौज्वरः॥ ततोग्नीन्भगवा
न्पंचजित्वानीत्वातथाक्षयं॥ दानवानांबलंविष्णुश्चूर्णयामासलीलया॥ ततःसमस्तसैन्येनदैतेयानांबलेःसुतः॥ युयुधेशंकरश्चैव
कार्त्तिकेयश्चशौरिणा॥ हरिशंकरयोर्युद्धमतीवासीत्सुदारुणं॥ चुक्षुभुःसकलालोकाःशस्त्रास्त्रांशुप्रतापिताः॥ प्रलयोयमशेषस
जगतोनूनमागतः॥ मेनिरेत्रिदशास्तत्रवर्त्तमानेमहाहवे॥ जृंभकास्त्रेणगोविंदोजृंभयामासशंकरं॥ ततःप्रणेशुर्दैतेयाःप्रमथाश्च
समंततः॥ जृंभाभिभूतश्चहरोरथोपस्थउपाविशत्॥ नशशाकततोयोद्धुंकृष्णेनाक्लिष्टकर्मणा॥ गरुडक्षतवाहश्चप्रद्युम्नास्त्रनिपी
डितः॥ कृष्णहुंकारनिर्धूतशक्तिश्चापिययौगुहः॥ जृंभितेशंकरेनष्टेदैत्यसैन्येगुहेजिते॥ नीतेप्रमथसैन्येचसंक्षयंशार्ङ्गधन्वना॥ नंदी
शसंगृहीताश्वमधिरूढोमहारथं॥ बाणस्तत्राययौयोद्धुंकृष्णकार्ष्णिबलैःसह॥ बलभद्रोमहावीर्योबाणसैन्यमनेकधा॥ विव्याधबाणैः
प्रभ्रश्यधर्मतश्चापलायत॥ आकृष्यलांगलाग्रेणमुशलेनावपोथितं॥ बलंबलेनददृशेबाणोबाणैश्चचक्रिणः॥ ततःकृष्णस्यबाणेन
युद्धमासीत्समासतः॥ परस्परमिषून्दीप्तान्कायत्राणविभेदकान्॥ कृष्णश्छिच्छेदबाणैस्तान्बाणेनप्रहितान्शरान्॥ विभेदकेशवं

वि०पु०
१४१

युद्धे वासुदेवेन मित्रस्यापचितौ स्थितः ॥ ततः शार्ङ्गधनुर्मुक्तैश्छित्वा तस्य शरैः शिरः ॥ काशिपुर्यां स चिक्षेप कुर्वंल्लोकस्य विस्मयं
॥ हत्वा च पौंड्रकं शौरिः काशिराजं च सानुगम ॥ पुनर्द्वारवतीं प्राप्तो रेमे स्वर्गगतो यथा ॥ तच्छिरः पतितं दृष्ट्वा तत्र काशिपतेः पुरे
॥ जनः किमेतदित्याह केनेत्यत्यंतविस्मितः ॥ ज्ञात्वा तं वासुदेवेन हतं तस्य सुतस्ततः ॥ पुरोहितेन सहितस्तोषयामास शंकरं ॥ अ
विमुक्ते महाक्षेत्रे तोषितस्तेन शंकरः ॥ वरं वृणीष्वेति तदा तं प्रोवाच नृपात्मजं ॥ स वव्रे भगवन्कृत्या पितृहंतुर्वधाय मे ॥ समुत्ति
ष्ठतु कृष्णस्य तु त्वत्प्रसादान्महेश्वर ॥ श्रीपराशर उवाच ॥ एवं भविष्यतीत्युक्ते दक्षिणाग्नेरनंतरं ॥ महाकृत्या समुत्तस्थौ तस्यैवाग्ने
र्विनाशिनी ॥ ततो ज्वालाकरालास्या ज्वलत्केशकलापिका ॥ कृष्ण कृष्णेति कुपिता कृत्वा द्वारवतीं ययौ ॥ तामवेक्ष्य जनस्त्रासाद्विचल
ल्लोचनो मुने ॥ ययौ शरण्यं जगतां शरणं मधुसूदनं ॥ काशिराजसुतेनेयमाराध्य वृषभध्वजं ॥ उत्पादिता महाकृत्येत्यवगम्याथ
चक्रिणा ॥ जहि कृत्यामिमामुग्रां वह्निज्वालाजटालकां ॥ चक्रमुत्सृष्टमक्षेषु क्रीडासक्तेन लीलया ॥ तदग्निमालाजटिलज्वालोद्गा
रातिभीषणां ॥ कृत्यामनुजगामाशु विष्णुचक्रं सुदर्शनं ॥ चक्रप्रतापविध्वस्ता कृत्या माहेश्वरी तथा ॥ ननाश वेगिनी वेगात्तदप्यनुजगा
मताम् ॥ कृत्या वाराणसीमेव प्रविवेश त्वरान्विता ॥ विष्णुचक्रप्रतिहतप्रभावा मुनिसत्तम ॥ ततः काशिबलं भूरि प्रमथानां महाबलं ॥ स
मस्तशस्त्रास्त्रयुतं चक्रस्याभिमुखं ययौ ॥ शस्त्रास्त्रमोक्षचतुरं दग्ध्वा तद्बलमोजसा ॥ कृत्यागर्भामशेषां तां तदा वाराणसीं पुरीं ॥ प्रभू
तभृत्यपौरां तु साश्वमातंगमानवां ॥ अशेषकोशकोष्ठां तां दुर्निरीक्ष्यां सुरैरपि ॥ ज्वालापरिष्कृताशेषगृहप्राकारचत्वरां ॥ ददाह तद्
धरेश्चक्रं सकलामेव तां पुरीं ॥ अक्षीणामर्षमत्यल्पसाध्यसाधनसस्पृहं ॥ तच्चक्रं प्रस्फुरद्दीप्ति विष्णोरभ्याययौ करं ॥ इति श्रीविष्णुपुरा
णे पंचमेंऽशे वाराणसीदाहो नाम चतुस्त्रिंशोऽध्यायः ॥ [illegible] ॥ भूय एवाहमिच्छामि बलभद्रस्य धीमतः ॥ श्रोतुं पराक्रमं ब्रह्मन्तन्मे

राम
१४२

गृहीतो मम विप्रर्षे यत्नमिदं मा ददात॥ भारावतारे कृष्णेन स्थावरीणां दाक्षायणीयथा॥ पौंड्रको वासुदेवस्तु वासुदेवोभवद्भुवि॥ अवतीर्णस्त्वमित्यु
क्तो जनैरज्ञानमोहितैः॥ स मेने वासुदेवोहमवतीर्णो महीतले॥ नष्टस्मृतिस्ततः सर्वं विष्णुचिह्नमचीकरत्॥ दूतं च प्रेषयामास कृष्णाय सुम
हात्मने॥ मुक्त्वा चक्रादिकं चिह्नं मदीयं नाम चात्मनः॥ वासुदेवात्मकं मूढ मुक्ता सर्वं विशेषतः॥ आत्मनो जीवितार्थं च ततो मे प्रणतिं व्रज॥ पु
कः संप्रहस्यैनं दूतं प्राह जनार्दनः॥ निजचिह्नमहं चक्रं समुत्स्रक्ष्यामि ते ध्रुवं॥ वाच्यः स पौंड्रको गत्वा त्वया दूत वचो मम॥ ज्ञातस्त्वद्वाक्यस
द्भावो यत्कार्यं तद्विधीयतां॥ गृहीतचिह्न एवाहमागमिष्यामि ते पुरं॥ समुत्स्रक्ष्यामि ते चक्रं निजचिह्नमसंशयं॥ आज्ञापूर्वं च यदिदं त्वमा
गच्छेति त्वयोदितं॥ संपादयिष्ये श्वस्तत्तु तवैषोविलंबितं॥ शरणं ते समभ्येत्य कर्त्तास्मि नृपते तथा॥ यथा त्वत्तो भयं भूयो न मे किंचिद्भविष्य
ति॥ इत्युक्ते पगते दूते संस्मृत्याभ्यागतं हरिः॥ गरुत्मंतं ततस्तथारुह्य त्वरितं तत्पुरं ययौ॥ स चापि केशवोद्योगं श्रुत्वा काशिपतिस्तदा॥ सर्वसै
न्यपरीवारः पार्ष्णिग्राह उपाययौ॥ ततो बलेन महता काशिराजबलेन च॥ पौंड्रको वासुदेवोसौ केशवाभिमुखं ययौ॥ तं ददर्श हरिर्दूरादुदा
रस्यंदने स्थितं॥ चक्रहस्तं गदाखड्गबाहुं पाणिगतांबुजं॥ स्रग्धरं धृतशार्ङ्गं च सुपर्णरचितध्वजं॥ वक्षस्यस्य कृतं चास्य श्रीवत्सं ददृ
शे हरिः॥ किरीटकुंडलधरं पीतवासः समन्वितं॥ दृष्ट्वा तं भावगंभीरं जहास गरुडध्वजः॥ युयुधे च बलेनास्य हस्त्यश्वबलिनां द्विज॥ निस्त्रिं
शर्ष्टिगदाशूलशक्तिकार्मुकशालिना॥ क्षणेन शार्ङ्गनिर्मुक्तैः शरैररिविदारणैः॥ गदाचक्रनिपातैश्च सूदयामास तद्बलं॥ काशिराजबलं चै
व क्षयं नीत्वा जनार्दनः॥ उवाच पौंड्रकं मूढमात्मचिह्नोपलक्षणं॥ श्रीभगवानुवाच॥ पौंड्रकोक्तं त्वया यत्तु दूतवक्त्रेण मां प्रति॥ समुत्सृजेति
चिह्नानि तत्ते संपादयाम्यहं॥ चक्रमेतत्समुत्सृष्टं गदेयं च विसर्जिता॥ गरुत्मानेष निर्दिष्टः समारोहतु ते ध्वजे॥ श्रीपराशर उवाच॥
इत्युच्चार्य विमुक्तेन चक्रेणासौ विदारितः॥ पोथितो गदया भग्नो गरुत्मता च गरुत्मता॥ ततो हाहाकृते लोके काशीनामधिपो बली॥ यु

विष्णु०
१४२

142

श्राज्ञां प्रतीच्छत्युग्रसेनात् सह देवैः सुराधिपतिः॥ सुधर्माख्या सुधर्माख्यां मुग्रसेनः शचीपतेः॥ धिगहो पुरुषशतैरुच्छिष्टं नृपतेरासनं पार्थिवासने॥ पारिजा
ततरोः पुष्पमंजरीर्वनिताजनाः॥ बिभर्ति यस्य भृत्यानां सोप्येषां न महीपतिः॥ समस्तभूभुजां नाथ उग्रसेनः स तिष्ठतु॥ अद्य निष्कौरवामु १
र्वीं कृत्वा यास्यामि तत्पुरीम्॥ कर्णं दुर्योधनं द्रोणमद्य भीष्मं सबाह्लिकं॥ दुःशासनादीन्भूरिं च भूरिश्रवसमेव च॥ सोमदत्तं शलं भीममर्जु
नं सयुधिष्ठिरं॥ यमजौ कौरवांश्चान्यान्हत्वा साश्वरथद्विपान्॥ वीरमादाय तं साम्बं सपत्नीकं ततः पुरीम्॥ द्वारकामुग्रसेनादीन्गत्वा द्रक्ष्या
मि बांधवान्॥ अथवा कौरवावासं समस्तैः कुरुभिः सह॥ भागीरथ्यां क्षिपाम्याशु नगरं नाग
साह्वयं॥ श्रीपराशर उवाच॥ इत्युक्त्वा मदरक्ताक्षः कर्षणाधोमुखं हलम्॥ प्राकारवप्रे विन्यस्य चकर्ष मुसलायुधः॥ आघूर्णितं तत्
सहसा ततो वै हस्तिनापुरं॥ दृष्ट्वा संक्षुब्धहृदयाश्चुक्रुशुः सर्वकौरवाः॥ राम राम महाबाहो क्षम्यतां क्षम्यतां त्वया॥ उपसंह्रियतां ४
कोपः प्रसीद मुसलायुध॥ एष साम्बः सपत्नीकस्तव निर्यातितो बल॥ अविज्ञातप्रभावाणां क्षम्यतामपराधिनां॥ श्रीपराशर उवाच॥ ततो नि
र्यातयामासुः साम्बं पत्नीसमन्वितं॥ निष्क्रम्य नगरात्तूर्णं कौरवा मुनिपुंगव॥ भीष्मद्रोणकृपादीनां प्रणम्य वदतां प्रियं॥ क्षान्तमेतन्मयेत्या
ह बलो बलवतां वरः॥ अद्याप्याघूर्णिताकारं लक्ष्यते तत्पुरं द्विज॥ एष प्रभावो रामस्य बलशौर्योपलक्षणः॥ ततस्तु कौरवाः साम्बं संपूज्य हलिना
सह॥ प्रेषयामासुरुद्वाहधनभार्यासमन्वितं॥ इति श्रीविष्णुपुराणे पंचमेंशे बलप्रभावो नाम पंचत्रिंशोऽध्यायः॥ श्रीपराशर उवाच॥ मैत्रे
य श्रूयतां चैतद्यत्कृतं बलशालिना॥ कृतं यदन्यत्तेनाभूत्तदपि श्रूयतां द्विज॥ नरकस्यासुरेन्द्रस्य देवपक्षविरोधिनः॥ सखाभवन्महावी
र्यो द्विविदो नाम वानरः॥ वैरानुबंधं बलवान्स चकार सुरान्प्रति॥ नरकं हतवान्कृष्णो बलदर्पसमन्वितं॥ करिष्ये सर्वदेवानां तस्मा
द्वैरप्रतिक्रियां॥ यज्ञविध्वंसनं कुर्वन्सर्वलोकक्षयं तथा॥ ततो विध्वंसयामास यज्ञानज्ञानमोहितः॥ बिभेद साधुमर्यादां क्षयं च
क्रे च देहिनां॥ ददाह च वनान्देशान्पुरग्रामान्तराणि च॥ क्वचिच्च पर्वताक्षेपैर्ग्रामादीन्समचूर्णयत्॥ शैलानुत्पाट्य तोयेषु मु

राम
१४२

मारयां तु मर्हसि ॥ यस्तु नाकर्षणं हीनि श्रुत्वानि भगवन्मया ॥ तत्कथ्यतां महाभाग यदन्यत्कृतवान्बलः ॥ श्रीपराशरउवाच ॥ मैत्रेय श्रूयतां

कर्म यद्रामेण भवत्कृतं ॥ अनंतेनाप्रमेयेण शेषेण धरणीभृता ॥ दुर्योधनस्य तनयां स्वयंवरकृतक्षणां ॥ बलादादत्तवान्वीरः सांबो जांबव

तीसुतः ॥ ततः क्रुद्धा महावीर्याः कर्णदुर्योधनादयः ॥ भीष्मद्रोणादयश्चैनं बबंधुर्युधि निर्जितं ॥ तच्छ्रुत्वा यादवाः सर्वे क्रोधं दुर्योधनादिषु ॥ मै

त्रेय चक्रुश्चैतान्निहंतुं ले महोद्यमं ॥ तन्निवार्य बलः प्राह मदलोलाकुलाक्षरं ॥ बलमागतमाज्ञाय भूपा दुर्योधनादयः ॥ मार्गवंधुरकं चै

व रामाय प्रत्यवेदयन् ॥ गृहीत्वा विधिवत्सर्वं ततस्तानाह कौरवान् ॥ आज्ञापयत्युग्रसेनः सांबमाशु विमुंचत ॥ ततस्तद्वचनं श्रुत्वा भीष्मद्रोणाद

यो द्विज ॥ कर्णदुर्योधनाद्याश्च चुक्रुधुर्द्विजसत्तम ॥ ऊचुश्च कुपिताः सर्वे बाह्लीकाद्याश्च कौरवाः ॥ अराज्यार्हं यदोर्वंशमवेक्ष्य मुसलायुधं ॥ भो

भोः किमेतद्भवता बलभद्रेरितं वचः ॥ आज्ञां कुरुकुलोत्थानां यादवः कः प्रदास्यति ॥ उग्रसेनोपि यद्याज्ञां कौरवाणां प्रदास्यति ॥ तदलं पांडुरैश्छ

त्रैर्नृपयोग्यैर्विडंबितैः ॥ तद्गच्छ बल मा वा त्वं सांबमन्यायचेष्टितं ॥ विमोक्ष्यामो न भवतो नोग्रसेनस्य शासनात् ॥ प्रणतिर्या कृतास्माकं मान्यानां १

एवं कुकुरांधकैः ॥ न नाम सा कृता केयमाज्ञा स्वामिनि भृत्यतः ॥ गर्वमारोपिता यूयं समानासनभोजनैः ॥ को दोषो भवतां नीतिर्यत्प्रीत्या नाव

लोकिता ॥ अस्माभिरर्घो भवतो योयं बल निवेदितः ॥ प्रेम्णैतन्नैतदस्माकं कुलाद्युष्मत्कुलोचितं ॥ श्रीपराशरउवाच ॥ इत्युक्त्वा कुरवः सर्वे

नमुंचाम हरेः सुतं ॥ कृतैकनिश्चयास्तूर्णं विविशुर्गजसाह्वयं ॥ मत्तः कोपेन चाघूर्णस्ततोधिक्षेपजन्मना ॥ उत्थाय पार्ष्ण्या वसुधां जघान स हला

युधः ॥ ततो विदारिता पृथ्वी विविशुर्गजसाह्वयं ॥ मत्तः कोपेन चाघूर्णस्ततोधिक्षेपजन्मना ॥ उत्थाय पार्ष्ण्या वसुधां जघान स हलायुधः ॥ ततो वि

दारिता पृथ्वी पार्ष्णिघातान्महात्मनः ॥ आस्फोटयामास तदा दिशः शब्देन पूरयन् ॥ श्रीपराशरउवाच ॥ उवाच चातिताम्राक्षो भ्रुकुटीकुटि

लाननः ॥ अहो मदावलेपोयमसाराणां दुरात्मनां ॥ कौरवाणां महीपत्वमस्माकं किल कालजं ॥ उग्रसेनस्य येनाज्ञां मन्यतेद्यापि लंघनं ॥

रपु

वि०पु०
१४३

143

हृष्टोऽभ्यकुमारकैः॥ ततस्ते यौवनोन्मत्ता भाविकार्य्यप्रचोदिताः॥ सांवंजांववतीपुत्रंभूषयित्वास्त्रियंयथा॥ प्रसृतास्तान्मुनीन्दृष्ट्वुः प्रणि
पातपुरःसरं॥ इयंस्त्रीपुत्रकामस्य बभ्रोः किंजनयिष्यति॥ येनाखिलकुलोत्सादो यादवानांभविष्यति॥ इत्युक्तास्तैः कुमारास्ते आचच
ख्युर्यथातथं॥ उग्रसेनायमुशलंजज्ञे सांवस्यचोदरात्॥ तदुग्रसेनो मुशलमयश्चूर्णमकारयत्॥ जज्ञे सचैरका चूर्णैः प्रक्षिप्तैस्ते
र्महोदधौ॥ मुशलस्याथ लोहस्य चूर्णितस्यांधकैर्द्विज॥ खंडंचूर्णयितुंशेकुर्नैकांते तोमराकृतिः॥ तदप्यंबुनिधौ क्षिप्तंमत्स्योजग्रा
हजालिभिः॥ घातितस्योदरात्तस्य लुब्धोजग्राहतंजरा॥ विज्ञातपरमार्थोऽपि भगवान्मधुसूदनः॥ नैच्छत्तदन्यथाकर्त्तुं विधिनायत्समीहितं
॥ देवैश्चप्रहितोदूतः प्रणिपत्याहकेशवं॥ रहस्येकमहंदूतः प्रहितोभगवन्सुरैः॥ वस्वश्विमरुदादित्यरुद्रसाध्यादिभिः सह॥ विज्ञापयति
पः शक्रस्तदिदंश्रूयतांप्रभो॥ भारावतरणार्थाय वर्षाणामधिकंशतं॥ भगवानवतीर्णोत्र त्रिदशैः संप्रसादितः॥ दुर्वृत्ता निहता दैत्या भु
वोभारोवतारितः॥ त्वयासनाथास्त्रिदशाभवंतु त्रिदिवेसदा॥ तदतीतंजगन्नाथ वर्षाणामधिकंशतं॥ इदानींगम्यतांस्वर्गोभवता
यदिरोचते॥ देवैर्विज्ञाप्यतेदेवमथात्रैवरतिस्तव॥ तत्स्थीयतांयथाकालमाख्येयमनुजीविभिः॥ श्रीभगवानुवाच॥ यत्त्वमा
हाखिलंदूतवेद्मिचैतदहंपुनः॥ प्रारब्ध एव हि मयायादवानामपिक्षयः॥ भुवोनाद्यापिभारोयंयादवैरनिवर्हितैः॥ अवतार्य्यकरोम्येतत्
सप्तरात्रेणसत्वरः॥ यथागृहीतामंभोधेर्दत्वाहंद्वारकाभुवं॥ यादवानुपसंहृत्य यास्यामित्रिदिवालयम्॥ मानुष्यदेहमुत्सृज्य संकर्ष
णसहायवान्॥ प्राप्त एवास्मिमंतव्यो देवेंद्रेणतथामरैः॥ जरासंधाद्यो येन्ये निहताभारहेतवः॥ क्षितेस्तेभ्यः कुमारोपियदूनांना
पचीयते॥ तदेनं सुमहाभारमवतार्य्यक्षितेरहम्॥ यास्याम्यमरलोकस्यपालनायब्रवीहितान्॥ श्रीपराशरउवाच॥ इत्युक्तोवासु
देवेनदेवदूतःप्रणम्यतं॥ मैत्रेयदिव्ययागत्यादेवराजांतिकंययौ॥ भगवानप्यथोत्पातान्दिव्यभौमांतरिक्षजान्॥ ददर्शद्वारकापुर्यां

राम
१४३

मोचं तु निर्धौतपया ॥ पुनश्चार्णवमध्यस्थः क्षोभयामास सागरं ॥ तेन विक्षोभिताश्चाब्धिरुद्वेलो ज्ञापनि हि द्विज ॥ स चायं सोरजा नाम्ना सुरादेवति
वेगवान् ॥ कामरूपी महारूपं कृत्वा सस्यान्यशेषतः ॥ क्षुद्भ्रमणसंमर्दैः संचूर्णयति वानरः ॥ तेन विप्रकृतं सर्वं जगदेतदुपद्रवात् ॥ निःस्वाध्या
यवषट्कारं मैत्रेयासीत्सुदुःखितं ॥ एकदा रैवतोद्याने पपौ पानं हलायुधः ॥ रेवती च महाभागा तथैवान्या वरस्त्रियः ॥ उपगीयमानो विलस
ल्ललनामौलिमध्यगः ॥ रेमे यदुवरश्रेष्ठः कुबेर इव मंदरे ॥ ततः स वानरोभ्येत्य गृहीत्वा सीरिणो हलं ॥ मुशलं च चकारास्य संमुखं च विड
वनं ॥ तथैव योषितां तासां जहासाभिमुखं कपिः ॥ पानपूर्णांश्च करकान्क्षिप्त्वाहनद्वै तदा ॥ ततः कोपपरीतात्मा भर्त्सयामास तं बलः ॥ त
थापि तमवज्ञाय चक्रे किलकिलाध्वनिं ॥ ततः समुत्थाय बलो जग्राह मुशलं रुषा ॥ सोपि शैलशिलां भीमां जग्राह प्लवगोत्तमः ॥ क्षिप्तां च
क्षिप्तां स मुशलेनैव सहस्रधा ॥ बिभेद यादवश्रेष्ठः सापपात महीतले ॥ आपतन्मुशलं चासौ समुल्लंघ्य प्लवंगमः ॥ वेगेनागम्य रोषेण तत
डोरस्यताडयत् ॥ ततो बलेन कोपेन मुष्टिना मूर्ध्नि ताडितः ॥ पपात रुधिरोद्गारी द्विविदः क्षीणजीवितः ॥ पतता तच्छरीरेण गिरेः शृंगमशी
र्यत ॥ मैत्रेय शतधा वज्रिवज्रेणेव हि ताडितः ॥ पुष्पवृष्टिं ततो देवा रामस्योपरि चिक्षिपुः ॥ प्रशशंसुस्तथाभ्येत्य साध्वेतत्ते महत्कृतं
॥ अनेन दुष्टकपिना दैत्यपक्षोपकारिणा ॥ जगन्निराकृतं वीर दिष्ट्या स क्षयमागतः ॥ श्रीपराशर उवाच ॥ एवंविधान्यनेकानि बलदेवस्य धीम
तः ॥ कर्माण्यपरिमेयानि शेषस्य धरणीभृतः ॥ इति श्रीविष्णुपुराणे पंचमेंऽशे बलदेवमाहात्म्ये द्विविदवधो नाम षट्त्रिंशोऽध्यायः ॥ पराशर
उवाच ॥ एवं दैत्यवधं कृष्णो बलदेवसहायवान् ॥ चक्रे दुष्टक्षितीशानां तथैव जगतः कृते ॥ क्षितेश्च भारं भगवान्फाल्गुनेन समं विभुः ॥ अवतार
यामास हरिः समस्ताक्षौहिणीवधात् ॥ कृत्वा भारावतरणं भुवो हत्वाखिलान्नृपान् ॥ शापव्याजेन विप्राणामुपसंहृतवान्कुलं ॥ उत्सृ
ज्य द्वारकां कृष्णस्त्यक्त्वा मानुष्यमात्मभूः ॥ सांशो विष्णुमयं स्थानं प्रविवेश पुनर्निजं ॥ मैत्रेय उवाच ॥ स विप्रशापव्याजेन संजहार स्वकं कुलं
कथं ॥ कथं च मानुषं देहमुत्ससर्ज जनार्दनः ॥ श्रीपराशर उवाच ॥ विश्वामित्रस्तथा कण्वो नारदश्च महामुनिः ॥ पिंडारके महातीर्थे

वि॰पु॰
१५५

144

तस्य निःक्राम्यंतं महोरगं ॥ निःक्रान्तस्समुद्रस्य महाभोगो भुजंगम ॥ प्रययावर्णवं सिद्धैः पूज्यमानस्तथोरगैः ॥ ततोऽर्घ्यमादाय तदा ज
लधिः संमुखं ययौ ॥ प्रविवेश च तत्तोयं पूजितः पन्नगोत्तमैः ॥ दृष्ट्वा बलस्य निर्याणं दारुकं प्राह केशवः ॥ इदं सर्वं त्वमाचक्ष्व वसुदेवोग्र
सेनयोः ॥ निर्याणं बलभद्रस्य यादवानां तथा क्षयं ॥ योगे स्थित्वाहमप्येतत्परित्यक्ष्ये कलेवरं ॥ वाच्यश्च द्वारकावासिजनः सर्वस्तथा
हुकः ॥ यथेमां नगरीं सर्वां समुद्रः प्लावयिष्यति ॥ तस्माद्भवद्भिः सज्जैस्तु प्रतीक्ष्यो ह्यर्जुनागमः ॥ न स्थेयं द्वारकामध्ये निःक्रान्ते तत्र
पांडवे ॥ तेनैव सह गंतव्यं यत्र याति स कौरवः ॥ गत्वा च ब्रूहि कौंतेयमर्जुनं वचनं मम ॥ पालनीयस्त्वया शक्त्या जनोऽयं मत्परिग्र
ह ॥ इत्यर्जुनेन सहितो द्वारवत्या भवान्जनं ॥ गृहीत्वा यातु वज्रश्च यदुराजो भविष्यति ॥ श्रीपराशर उवाच ॥ इत्युक्तो दारुकः कृष्णं प्र
णिपत्य पुनः पुनः ॥ प्रदक्षिणं च बहुशः कृत्वा प्रायाद्यथोदितं ॥ स च गत्वा तदा चक्रे द्वारकायां तथार्जुनं ॥ आनिनाय महाबुद्धिर्व
ज्रं चक्रे तथा नृपं ॥ भगवानपि गोविंदो वासुदेवात्मकं परं ॥ ब्रह्मात्मनि समारोप्य सर्वभूतेष्वधारयन् ॥ सन्मानयन्द्विजवचो दुर्वा
सायदुवाच ह ॥ योगयुक्तोऽभवत्पादं कृत्वा जानुनि सत्तम ॥ आययौ च जरा नाम स तदा तत्र लुब्धकः ॥ मुसलावशेषलोहैकसायकन्य
स्ततोमर ॥ स तत्पादं मृगाकारमवेक्ष्यारादवस्थितः ॥ तले विव्याध तेनैव तोमरेण द्विजोत्तम ॥ गतश्च ददृशे तत्र चतुर्बाहुधरं नरं ॥ प्रणि
पत्याह चैवैनं प्रसीदेति पुनः पुनः ॥ अजानता कृतमिदं मया हरिणशंकया ॥ क्षम्यतां मम पापेन दग्धं मां त्रातुमर्हसि ॥ श्रीपराशर
उवाच ॥ ततस्तं भगवानाह न तेऽस्ति भयमण्वपि ॥ गच्छ त्वं मत्प्रसादेन लुब्ध स्वर्गं सुरालयं ॥ विमानमागतं तत्र तद्वाक्यसमनंतरं ॥ आ
रुह्य प्रययौ स्वर्गं लुब्धकस्तत्प्रसादतः ॥ गते तस्मिन्स भगवान्संयोज्यात्मानमात्मनि ॥ ब्रह्मभूतेऽव्यये चिंत्ये वासुदेवमयेऽमले ॥ अजन्म
न्यजरे नाशिन्यप्रमेयेऽखिलात्मनि ॥ तत्याज मानुषं देहमतीत्य त्रिविधां गतिं ॥ इति श्रीविष्णुपुराणे पंचमेंऽशे भगवत्स्वर्गारोहणं ना

राम
१५५

विनाशाय दिवानिशं ॥ तान्दृष्ट्वा यादवानाह पश्यध्वमतिदारुणान् ॥ महोत्पाता शमायैषां प्रभासं याम मा चिरं ॥ श्रीपराशर उवाच ॥
महाभागवतः प्राह प्रणिपत्योद्धवो हरिम् ॥ भगवन्यन्मया कार्यं तदाज्ञापय सांप्रतं ॥ मन्ये कुलमिदं सर्वं भगवान्संहरिष्यति ॥ ना
शायास्य निमित्तानि कुलस्याच्युत लक्षये ॥ श्रीभगवानुवाच ॥ गच्छ त्वं दिव्यया गत्या मत्प्रसादसमुत्थया ॥ बदरीकाश्रमं पुण्यं
गंधमादनपर्वते ॥ नरनारायणस्थाने तत्पावितमहीतले ॥ मन्मना मत्प्रसादेन तत्र सिद्धिमवाप्स्यसि ॥ अहं स्वर्गं गमिष्यामि उपसंहृत्य
वै कुलं ॥ द्वारकां च मया त्यक्तां समुद्रः प्लावयिष्यति ॥ श्रीपराशर उवाच ॥ इत्युक्तः प्रणिपत्यैनं जगामाथ तदोद्धवः ॥ नरनारायण
स्थानं केशवेनानुमोदितः ॥ ततस्ते यादवाः सर्वे रथानारुह्य शीघ्रगान् ॥ प्रभासं प्रययुः सार्द्धं कृष्णरामादिभिर्द्विज ॥ प्राप्य प्रभासं प्रय
ताः प्रीतास्ते कुकुरांधकाः ॥ चक्रुस्तत्र सुरापानं वासुदेवानुमोदिताः ॥ पिबतां तत्र वै तेषां संघर्षेण परस्परं ॥ अतिवादेंधनो जज्ञे
कलहाग्निः क्षयावहः ॥ जघ्नुः परस्परं ते तु शस्त्रैर्दैवबलात्कृताः ॥ क्षीणशस्त्राश्च जगृहुः प्रत्यासन्नामथैरकां ॥ एरकातु गृहीता तैर्व
ज्रभूतेव लक्ष्यते ॥ तया परस्परं जघ्नुः संप्रहारे सुदारुणे ॥ प्रद्युम्नसांबप्रमुखाः कृतवर्माथ सात्यकिः ॥ अनिरुद्धादयश्चान्ये पृथुर्वि
पृथुरेव च ॥ चारुकर्मा चारुकश्च तथाक्रूरादयो द्विज ॥ एरकारूपिभिर्वज्रैस्ते निजघ्नुः परस्परम् ॥ निवारयामास हरिर्यादवांस्ते च के
शवं ॥ सहायं मेनिरे प्राप्तं ते निजघ्नुः परस्परं ॥ कृष्णोपि कुपितस्तेषामेरकामुष्टिमाददे ॥ वधाय सोपि मुशलं मुष्टिर्लोहमभूत्तदा ॥ जघा
न तेन निःशेषान्यादवानाततायिनः ॥ जघ्नुश्च सहसाभ्येत्य तथान्ये च परस्परं ॥ ततश्चार्णवमध्येन जैत्रो सौ चक्रिणो रथः ॥ पश्यतो
दारुकस्याशु हृतोश्वैर्द्विजसत्तम ॥ चक्रं तथा गदा शार्ङ्गं तूणौ शंखोसिरेव च ॥ प्रदक्षिणं हरिं कृत्वा जग्मुरादित्यवर्त्मना ॥ क्षणेन नाभ
वत्कश्चिद्यादवानामघातितः ॥ ऋते कृष्णं महाबाहुं दारुकं च महामुने ॥ चंक्रममाणौ तौ रामं वृक्षमूलकृतासनं ॥ ददृशाते मुखा

वि॰पु॰
१४५

भेनयस्माच्चक्री मे बलवान्॥ तुकारस्संज्ञकः ष्कृत्वचामूढं पि तं पुनः॥ नशशाक तदा जिष्णुश्चिंतयन्नपि पांडवः॥ शरानमुमोच वै तेषु पार्थो वैरिष्वमर्षितः॥ त्वग्भेदं ते परं चक्रुरस्ता गांडीवधन्विना॥ वह्निनापि ह्यक्षयादत्ताः शरास्तेपि क्षयं ययुः॥ युध्यतः सह गोपालैरर्जुनस्याभवत्क्षये॥ अचिंतयच्च कौंतेयः कृष्णस्यैव हि तद्बलं॥ यन्मया शरसंघातैः सकला भूभुजो जिताः॥ मिषतः पांडुपुत्रस्य ततस्ताः प्रमदोत्तमाः॥ आभीरैरपकृष्यंते कामाच्चान्याः प्रवव्रजुः॥ ततः शरेषु क्षीणेषु धनुष्कोट्या धनंजयः॥ जघान दस्यूंस्ते चास्य प्रहारान्जहसुर्मुने॥ प्रेक्षतश्चैव पार्थस्य वृष्ण्यंधकवरस्त्रियः॥ जग्मुरादाय ते म्लेच्छाः समंतान्मुनिसत्तम॥ ततः सुदुःखितो जिष्णुः कष्टं कष्टमिति ब्रुवन्॥ यन्मया शरसंघातैरप्राभूत्तेनाहताः॥ अहो भगवता तेन मुषितोस्मि रुरोद ह॥ तेद्ध नु कार्मुकं चास्त्राणि स रथस्ते च वाजिनः॥ सर्वमेकपदे नष्टं दानमश्रोत्रिये यथा॥ अहो ति बलवद्दैवं विना तेन महात्मना॥ यदसामर्थ्ययुक्तोपि नीचवर्गं जयप्रदः॥ तौ बाहू स च मे मुष्टिः स्थानं तत्सोस्मि पांडवः॥ पुण्येनैव विना तेन गतं सर्वमसारवत्॥ ममार्जुनत्वं भीमस्य भीमत्वं तत्कृतं ध्रुवं॥ विना तेन यदाभीरैर्जितोहं कथमन्यथा॥ इत्थं वदन्ययौ जिष्णुरिंद्रप्रस्थं पुरोत्तमं॥ चकार तत्र राजानं वज्रं यादवनंदनं॥ स ददर्श ततो व्यासं फाल्गुनः काननाश्रयं॥ तमुपेत्य महाभागं विनयेनाभ्यवादयत्॥ तं वंदमानं चरणाववलोक्य मुनिश्चिरं॥ उवाच पार्थं विच्छायः कथमत्यंतमीदृशः॥ अवीरजोनुगमनं ब्रह्महत्याथवा कृता॥ दृढाशाभंगदुःखी वा भ्रष्टच्छायोसि सांप्रतं॥ सांतानिकादयो वा ते याचमाना निराकृताः॥ अगम्यस्त्रीरतिर्वा त्वं तेनासि विगतप्रभः॥ भुंक्ते प्रदाय विप्रेभ्य एको मिष्टमथो भवान्॥ किं वा कृपणवित्तानि हृतानि भवतार्जुन॥ कच्चिन्न सूर्यवातस्य गोचरत्वं गतोर्जुन॥ दुष्टचक्षुर्हतो वापि निःश्रीकः कथमन्यथा॥ स्पृष्टो नखांभसा वाथ घटांभः प्रोक्षितोपि वा॥ तेनापि वा सि विच्छायो न्यूनैर्वा यु

१४५

म सप्तत्रिंशोऽध्यायः॥ श्रीपराशर उवाच॥ अर्जुनोपि तदान्विष्य कृष्णरामकलेवरं॥ संस्कारं लंभयामास तथान्येषामनुक्रमात्॥ अ-
ष्टौ महिष्यः कथिताः रुक्मिणीप्रमुखास्तु याः॥ उपगुह्य हरेर्देहं विविशुस्ता हुताशनं॥ रेवती चैव रामस्य देहमाश्लिष्य सत्तम॥ विवे-
श ज्वलितं वह्निं तत्संगाह्लादशीतलं॥ उग्रसेनस्तु तच्छ्रुत्वा तथैवानकदुंदुभिः॥ देवकी रोहिणी चैव विविशुर्जातवेदसं॥ ततोर्जुनः प्रे-
प तकार्यं कृत्वा तेषां यथाविधिः॥ निश्चक्राम जनं सर्वं गृहीत्वा वज्रमेव च॥ द्वारवत्या विनिःक्रांता कृष्णपत्न्यः सहस्रशः॥ वज्रं जनं च
कौंतेय पालयन् शनकैर्ययौ॥ सभा सुधर्मा कृष्णेन मर्त्यलोके समुपस्थिते॥ स्वर्गं जगाम मैत्रेय पारिजातश्च पादपः॥ यस्मिन्दिने ह-
रिर्यातो दिवं संत्यज्य मेदिनीं॥ तस्मिन्नेवावतीर्णोयं कालकायो बली कलिः॥ प्लावयामास तां शून्यां द्वारकां च महोदधिः॥ यदुदेव-
गृहं चैकं नाप्लावयत सागरः॥ नातिक्रांतुमलं ब्रह्मन्तदद्यापि महोदधिः॥ नित्यं संनिहितस्तत्र भगवान्केशवो यतः॥ तदतीव म-
हत्पुण्यं सर्वपातकनाशनं॥ विष्णोः क्रीडान्वितं स्थानं दृष्ट्वा पापात्प्रमुच्यते॥ पार्थः पंचनदे देशे धनधान्यसमन्विते॥ चकार वासं स-
र्वस्य जनस्य मुनिसत्तम॥ ततो लोभः समभवत्पार्थेनैकेन धन्विना॥ दृष्ट्वा स्त्रियो नीयमाना दस्यूनां निहतेश्वराः॥ ततस्ते पापकर्मा-
णो लोभोपहतचेतसः॥ आभीरा मंत्रयामासुः समेत्यात्यंतदुर्मदाः॥ अयमेकोर्जुनो धन्वी स्त्रीजनं निहतेश्वरं॥ नयत्यस्मानतिक्र-
म्य धिगेतत्क्रियतां बलं॥ हत्वा गर्वसमारूढो भीष्मद्रोणजयद्रथान्॥ कर्णादींश्च न जानाति बलं ग्रामनिवासिनां॥ हे हे यष्टीमिहा-
या मागृहीतायं सुदुर्मतिः॥ सर्वानेवावजानाति किं वो बाहुभिरुन्नतैः॥ ततो यष्टिप्रहरणा दस्यवो लोकहारिणः॥ सहस्रशोऽभ्यधा-
वंत तं जनं निहतेश्वरं॥ ततो निवृत्तः कौंतेयः प्राहाभीरान्हसन्निव॥ निवर्त्तध्वमधर्मज्ञा यदि न स्थ मुमूर्षवः॥ अवज्ञाय वचः
तस्य जगृहुस्ते तदा धनं॥ स्त्रीजनं चैव मैत्रेय विष्वक्सेनपरिग्रहं॥ ततोर्जुनो धनुर्दिव्यं गांडीवमजरं युधि॥ आरोपितुं समारे-

वि०पु०
१४६

146

निरस्तं कर्म्म यत्समभूद्भुवि लोकप्रभोः॥ अतो गतः स भगवान्कृतकृत्यो ह्यपेक्षया॥ सृष्टिं सर्गे करोत्येष देवः स्थितौ स्थि-
तिं च यः॥ अंते तुल्यसमर्थोयं सांप्रतं हि यथा कृतं॥ तस्मात्पार्थ न संतापस्त्वया कार्य्यः पराभवात्॥ भवंति भवकालेषु
तथा याः पराक्रमाः॥ यतस्त्वयैकेन हता भीष्मद्रोणादयो नृपाः॥ तेषामर्ज्जुन कालोत्थः किं न्यूनाभिभवो न सः॥ विष्णो-
स्तस्यानुभावेन यथा तेषां पराभवः॥ तत्तथैव भवतो दस्युभ्योंतेन तदुद्भवः॥ स देवोन्यशरीराणि समाविश्य जगत्स्थि-
तिम्॥ करोति सर्वभूतानां नाशं चांते जगत्पतिः॥ भवोद्भवे च कौंतेय सहायोभूज्जनार्दनः॥ भवांते त्वद्विपक्षास्ते के-
शवेनावलोकिताः॥ कः श्रद्दध्यात्सगांगेयान्हन्यास्त्वं सर्वकौरवान्॥ आभीरेभ्यश्च भवतः कः श्रद्दध्यात्पराभवं॥ पा-
र्थैतत्सर्वभूतस्य हरेर्लीलाविचेष्टितं॥ त्वया यत्कौरवा ध्वस्ता यदाभीरैर्भवाञ्जितः॥ गृहीता दस्युभिर्यच्च भवता या-
श्चिता स्त्रियः॥ तदप्यहं यथावृत्तं कथयामि तवार्ज्जुन॥ अष्टावक्रः पुरा विप्रो जलवासरतोभवत्॥ बहून्वर्षगणान्पा-
र्थ गृणन्ब्रह्म सनातनं॥ जितेष्वसुरसंघेषु मेरुपृष्ठे महोत्सवः॥ बभूव तत्र गच्छंत्यो ददृशुस्तं सुरस्त्रियः॥ रंभाति-
लोत्तमाद्याश्च शतशोथ सहस्रशः॥ तुष्टुवुस्तं महात्मानं प्रशशंसुश्च पांडव॥ आकंठमग्नं सलिले जटाभारधरं
मुनिं॥ विनयावनताश्चैनं प्रणेमुः स्तोत्रतत्पराः॥ यथा यथा प्रसन्नोसौ तुष्टुवुस्तं तथा तथा॥ सर्व्वास्ताः कौरवश्रेष्ठ व-
रिष्ठं तं द्विजन्मनां॥ अष्टावक्र उवाच॥ प्रसन्नोहं महाभागा भवतीनां यदिष्यते॥ मत्तस्तद्व्रियतां सर्वं प्रदास्याम्यतिदुर्ल्ल-
भम्॥ रंभातिलोत्तमाद्यास्तं वैदिक्योप्सरसोब्रुवन्॥ प्रसन्ने त्वय्यसंप्राप्तं किमस्माकमिति द्विज॥ इतरास्त्वब्रुवन्वि-

राम
१४६

धिनिर्जितः॥ श्रीपराशरउवाच॥ ततः पार्थो विनिःश्वस्य कथ्यतां भगवानिति॥ प्रोक्तो यथावदाचष्टे व्यासायात्मपराभवं॥ अर्जु
नउवाच॥ यद्बलं यच्च नस्तेजो यद्वीर्यं यः पराक्रमं॥ या श्रीश्छाया च नः सोस्मान्परित्यज्य हरिर्गतः॥ इतरेणैव महता स्मितपूर्वा
भिभाषिणा॥ हीना वयं मुने तेन जातास्तृणमया इव॥ अस्त्राणां सायकानां च गांडीवस्य तथा मम॥ सारता याभवन्मूर्ता स गतः
पुरुषोत्तमः॥ यस्यावलोकनादस्मान् श्री र्जयः संपदुन्नतिः॥ न तत्याज स गोविंदस्त्यक्त्वास्मान्भगवान्गतः॥ भीष्मद्रोणांगराजा
द्यास्तथा दुर्योधनादयः॥ यत्प्रभावेन निर्दग्धाः स कृष्णस्त्यक्तवान्भुवं॥ निर्यौवना हतश्रीका भ्रष्टच्छायेव मे मही॥ विभाति ता
त नैकोहं विरहे तस्य चक्रिणः॥ यस्यानुभावाद्भीष्माद्यैर्मय्यग्नौ शलभायितं॥ विना तेनाद्य कृष्णेन गोपालैरस्मि निर्जितः॥
गांडीवं त्रिषु लोकेषु ख्यातं यदनुभावतः॥ मम तेन विनाभीरैर्लगुडैस्तन्निवारितं॥ स्त्रीसहस्राण्यनेकानि मन्नाथानि महा
मुने॥ यततो मम नीतानि दस्युभिर्लगुडायुधैः॥ आनीयमानमाभीरैः कृष्ण कृष्णावरोधनं॥ हृतं यष्टिप्रहरणैः परिभूय बलं
मम॥ निःश्रीकता न मे चित्रं यज्जीवामि तदद्भुतं॥ नीचावमानपंकांकी निर्लज्जोस्मि पितामह॥ श्रीवेदव्यासउवाच॥
अलं ते व्रीडया पार्थ न त्वं शोचितुमर्हसि॥ अवेहि सर्वभूतेषु कालस्य गतिरीदृशी॥ कालो भवाय भूतानामभवाय च पांड
व॥ कालमूलमिदं ज्ञात्वा भव स्थैर्यधरोर्जुन॥ नद्यः समुद्रा गिरयः सकला च वसुंधरा॥ देवा मनुष्याः पशवस्तरवः स
रीसृपाः॥ सृष्टाः कालेन कालेन पुनर्यास्यंति संक्षयं॥ कालात्मकमिदं सर्वं ज्ञात्वा शममवाप्नुहि॥ यथात्थ कृष्णमाहात्म्यं
तत्तथैव धनंजय॥ भारावतारकार्यार्थमवतीर्णः स मेदिनीं॥ भाराक्रांता धरा याता देवानां समितिं पुरा॥ तदर्थमवतीर्णो
सौ कालरूपी जनार्दनः॥ तच्च निःपादितं कार्यमशेषा भूभृतो हताः॥ वृष्ण्यंधककुलं सर्वं तथा पार्थोपसंहृतं॥ न किं

ल्पांते च यथा मुने ॥ श्रीपराशर उवाच ॥ मैत्रेय श्रूयतां मत्तो यथावदुपसंहृतिः ॥ कल्पांते प्राकृते चैव प्रलये जायते तथा ॥ अ
होरात्रं पितॄणां तु मासोऽब्दस्त्रिदिवौकसां ॥ चतुर्युगसहस्रं तु ब्रह्मणो द्वे द्विजोत्तम ॥ कृतं त्रेता द्वापरं च कलिश्चैव चतुर्युगं
॥ दिव्यैर्वर्षसहस्रैस्तु तद्द्वादशभिरुच्यते ॥ चतुर्युगाण्यशेषाणि सदृशानि स्वरूपतः ॥ आद्यं कृतयुगं मुक्त्वा मैत्रेयांत्यं त
था कलिः ॥ आद्ये कृतयुगे सर्गो ब्रह्मणा क्रियते यतः ॥ क्रियते चोपसंहारस्तथांते च कलौ युगे ॥ मैत्रेय उवाच ॥ कलेः स्व
रूपं भगवन्विस्तराद्वक्तुमर्हसि ॥ धर्मश्चतुष्पाद्भगवान् यस्मिन्विप्लवमृच्छति ॥ श्रीपराशर उवाच ॥ कलिस्वरूपं मैत्रेय य
द्भवान्प्रष्टुमिच्छति ॥ तन्निबोध समासेन वर्त्तते यन्महामुने ॥ वर्णाश्रमाचारवती प्रवृत्तिर्न कलौ नृणां ॥ न सामऋग्यजु
र्धर्मविनिःपादनहेतुकी ॥ विवाहा न कलौ धर्म्या न शिष्यगुरुसंस्थितिः ॥ न दांपत्यक्रमो नैव वह्निदेवात्मकः क्रमः ॥ यत्र त
त्र कुले जातो बली सर्वेश्वरः कलौ ॥ सर्वेभ्य एव वर्णेभ्यो योग्यः कन्यावरोधने ॥ येन केनैव योगेन द्विजातिर्दीक्षितः कलौ
॥ यैव सैव च मैत्रेय प्रायश्चित्तं कलौ युगे ॥ सर्वमेव कलौ शास्त्रं यस्य यद्वचनं द्विज ॥ देवताश्च कलौ सर्वाः सर्वः सर्वस्य चा
श्रमः ॥ उपवासस्तथायासो वित्तोत्सर्गस्तथा कलौ ॥ स्त्रीणां रूपमदश्चैव केशैरेव भविष्यति ॥ सुवर्णमणिरत्नादौ वस्त्रे
चापि क्षयं गते ॥ कलौ स्त्रियो भविष्यंति तदा केशैरलंकृताः ॥ परित्यक्ष्यंति भर्त्तारं वित्तहीनं तथा स्त्रियः ॥ भर्त्ता भविष्यति क
लौ वित्तवानेव योषितां ॥ यो यो ददाति बहुलं स स स्वामी तदा नृणां ॥ स्वामित्वहेतुः संबंधो भावी नाभिजनस्तदा ॥ गृहान्ता
द्रव्यसंघाता द्रव्यान्ता च तथा मतिः ॥ अर्था आत्मोपभोगान्ता भविष्यंति कलौ युगे ॥ स्त्रियः कलौ भविष्यंति स्वैरिण्यो ल
र्था

म्प्रसन्नोभगवान्यदि ॥ यदिच्छामः पतिं प्राप्तुं विशेषेण पुरुषोत्तमं ॥ श्रीवेदव्यासउवाच ॥ एवंभविष्यतीत्युक्त्वा उत्ततार जलान्मु
निः ॥ ददृशुस्तास्तमुत्तीर्णं विरूपं वक्रमष्टधा ॥ तंदृष्ट्वा गूहमानानां यासां हासः स्फुटोभवत् ॥ ताः शशाप मुनिः कोपमवाप्य कुरु
नंदन ॥ यस्माद्विरूपरूपं मां मत्वा हासावमानना ॥ भवतीभिः कृता तस्मादेषशापं ददामिवः ॥ मत्प्रसादेन भर्तारं लब्ध्वा तु पुरुषो
त्तमं ॥ मच्छापोपहताः सर्वाः दस्युहस्तं गमिष्यथ ॥ श्रीवेदव्यासउवाच ॥ इत्युदीरितमाकर्ण्य मुनिस्ताभिः प्रसादितः ॥ पुनः सु
रेंद्रलोकं वै प्राह भूयो गमिष्यथ ॥ एवं तस्य मुनेः शापादष्टावक्रस्य केशवं ॥ भर्तारं प्राप्य ता याता दस्युहस्तं वरांगनाः ॥ तन्न
त्वयात्र कर्तव्यः शोकोल्पोपि हि पांडव ॥ तेनैवाखिलनाथेन सर्वं तदुपसंहृतं ॥ भवतां चोपसंहारमासन्नं तेन कुर्वता ॥
बलं तेजस्तथा वीर्यं माहात्म्यं चोपसंहृतं ॥ जातस्य नियतो मृत्युः पतनं च तथोन्नतेः ॥ विप्रयोगावसानश्च संयोगः संचयस्त्वयः
॥ विज्ञाय न बुधाः शोकं नहर्षमुपयांति ते ॥ तेषामेवेतरे चेष्टां शिक्षंतः संति तादृशाः ॥ तस्मात्त्वया नरश्रेष्ठ ज्ञात्वैतद्भ्रातृभिः
सह ॥ परित्यज्याखिलं तंत्रं गंतव्यं तपसे वनं ॥ तद्गच्छ धर्मराजाय निवेद्यैतद्वचो मम ॥ परश्वो भ्रातृभिः सार्धं यथा यासि तथा कु
रु ॥ श्रीपराशरउवाच ॥ इत्युक्तोभ्येत्य पार्थाभ्यां यमाभ्यां च सहार्जुनः ॥ दृष्टं चैवानुभूतं च कथितं तेष्वशेषतः ॥ व्यासवाक्यं च तेस
र्वे श्रुत्वार्जुनसमीरितं ॥ राज्ये परीक्षितं कृत्वा ययुः पांडुसुता वनम् ॥ इत्येतत्तव मैत्रेय विस्तरेण मयोदितं ॥ जातस्य यद्यदोर्वंशे
वासुदेवस्य चेष्टितं ॥ इति श्रीविष्णुपुराणे पंचमेंशे यादवसंहारो नामाष्टत्रिंशतितमोध्यायः ॥ मैत्रेयउवाच ॥ व्याख्याता भवता सर्गवंश
मन्वंतरस्थितिः ॥ वंशानुचरितं चैव विस्तरेण महामुने ॥ श्रोतुमिच्छाम्यहं त्वत्तो यथावदुपसंहृतिं ॥ महाप्रलयसंस्थानं क

विष्णु०
१४८

त्रिदुःखिताः ॥ वेदमार्गे प्रलीने च पाखंडाढ्ये ततो जने ॥ अधर्मवृद्ध्या लोकानां स्वल्पमायुर्भविष्यति ॥ अशास्त्रविहितं घो
रं तप्यमानेषु वै तपः ॥ नरेषु नृपदोषेण बालमृत्युर्भविष्यति ॥ भवित्री योषितां सूतिः पंचषट्सप्तवार्षिकी ॥ नवाष्ट
दशवर्षाणां मनुष्याणां तथा कलौ ॥ पलितोद्भवश्च भविता तथा द्वादशवार्षिकः ॥ नातिजीवति वै कश्चित्कलौ
वर्षाणि विंशतिः ॥ अल्पप्रज्ञा वृथालिंगा दुष्टांतःकरणाः कलौ ॥ यतस्ततो विनंक्ष्यंति कालेनाल्पेन मानवाः ॥
यदा यदा हि पाखंडवृद्धिर्मैत्रेय लक्ष्यते ॥ तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः ॥ यदा यदा सतां हानिर्वेदमा
र्गानुसारिणां ॥ आरंभाश्चावसीदंति यदा धर्मभृतां नृणां ॥ तदानुमेयं प्राधान्यं कलेर्मैत्रेय पंडितैः ॥
यदा यदा न यज्ञानामीश्वरः पुरुषोत्तमः ॥ इज्यते पुरुषैर्यज्ञैस्तदा ज्ञेयं कलेर्बलं ॥ न प्रीतिर्वेदवादेषु पाखंडेषु
यदा रतिः ॥ कलेर्वृद्धिस्तदा प्राज्ञैरनुमेया द्विजोत्तम ॥ कलौ जगत्पतिं विष्णुं सर्वस्रष्टारमीश्वरं ॥ नार्चयिष्यंति
मैत्रेय पाषंडोपहता नराः ॥ किं देवैः किं द्विजैर्वेदैः किं शौचेनांबुजन्मना ॥ इत्येवं विप्र वक्ष्यंति पाषंडोपहता नराः
॥ अल्पांबुवृष्टिः पर्जन्यः सस्यं स्वल्पफलं तथा ॥ फलं तथाल्पसारं च विप्र प्राप्ते कलौ युगे ॥ शाणीप्रायाणि वस्त्रा
णि शमीप्राया महीरुहाः ॥ शूद्रप्रायास्तथा वर्णा भविष्यंति कलौ युगे ॥ अणुप्रायाणि धान्यानि अजाप्रा
यं तथा पयः ॥ भविष्यति कलौ प्राप्ते औशीरं चानुलेपनं ॥ श्वश्रूश्वशुरभूयिष्ठा गुरवश्च नृणां कलौ ॥ श्याला

राम
१४८

148

लिंगास्तथा ॥ अल्पायायाश्च विनेष्टुपुरुषास्या हलवः ॥ अल्पवित्तोपि सुहृदः स्वार्थहानिं न मानवः ॥ [illegible] दुर्भिक्षे
णाकरिष्यंति तदा द्विज ॥ समानपौरुषं चेतो भावि विप्रेषु वै कलौ ॥ नीरसंदाने संबंधो भ्रातृविप्रेषु च गौरवं ॥ वेनाधूर्तिश्च
प्रायाः प्रजाः [illegible] पकातराः ॥ भविष्यंति तदा सर्वा गगनासक्तदृष्टयः ॥ कंदपर्णफलाहाराः तापसा इव मानवाः ॥ आत्मा
नं घातयिष्यंति तदा वृष्ट्यादिदुःखिताः ॥ दुर्भिक्षमेवं सततं तदा क्लेशमनीश्वराः ॥ प्राप्स्यंति व्याहतसुखप्रमोदा मान
वाः कलौ ॥ अस्नानभोजिनो नाग्निदेवतातिथिपूजनं ॥ करिष्यंति कलौ प्राप्ते न च पिंडोदकक्रियां ॥ लोलुपा ह्रस्वदे
हाश्च बह्वन्नादनतत्पराः ॥ बहुप्रजाल्पभाग्याश्च भविष्यंति कलौ स्त्रियः ॥ उभाभ्यामपि पाणिभ्यां शिरः कंडूयनं स्त्रियः
कुर्वंत्यो गुरुभर्तॄणामाज्ञां भेत्स्यंत्यनादृताः ॥ स्वपोषणपरा क्षुद्रा देहसंस्कारवर्जिता ॥ परुषानृतभाषिण्यो भविष्यंति
कलौ स्त्रियः ॥ दुःशीला दुष्टशीलेषु कुर्वंत्यः सततं स्पृहाम ॥ असद्वृत्ता भविष्यंति पुरुषेषु कुलांगनाः ॥ वेदादानं करिष्यं
ति वृटवश्चाव्रतास्तथा ॥ गृहस्थाश्च न होष्यंति न दास्यंत्युचितान्यपि ॥ वनवासिनो भविष्यंति ग्राम्याहारपरिग्रहाः ॥ भिक्षव
श्चापि मित्रादिस्नेहसंबंधयंत्रिताः ॥ अरक्षितारो हर्तारः शुल्कव्याजेन पार्थिवाः ॥ हारिणो जनवित्तानां संप्राप्ते तु कलौ
युगे ॥ यो यो श्वरथनागाढ्यः स स राजा भविष्यति ॥ यश्च यश्चाबलः सर्वः स स भृत्यः कलौ युगे ॥ वैश्याः कृषिवणिज्या
दि संत्यज्य निजकर्मयत् ॥ शूद्रवृत्त्या भविष्यंति कारुकर्मोपजीविनः ॥ भैक्ष्यव्रतास्तथा शूद्राः प्रव्रज्यालिंगिनोधमाः
॥ पाखंडसंश्रया वृत्तिमाश्रयंत्यसंस्कृताः ॥ दुर्भिक्षकरपीडाभिरतीवोपद्रुता जनाः ॥ गोधूमान्नयवान्नाद्यान् देशान् यास्यंत्यदुःखिताः

याब्रवीत्॥ श्रूयतां भो मुनिश्रेष्ठा यदुक्तं साधु साध्विति॥ यत्कृते दशभिर्वर्षैस्त्रेतायां हायनेन तत्॥ द्वापरे तच्च मासेन अहोरात्रे
ण तत्कलौ॥ तपसो ब्रह्मचर्यस्य जपादेश्च फलं द्विजाः॥ प्राप्नोति पुरुषस्तेन कलिः साध्विति भाषितं॥ ध्यायन्कृते यजन्यज्ञैः
त्रेतायां द्वापरेऽर्चयन्॥ यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवं॥ धर्मोत्कर्षमतीवात्र प्राप्नोति पुरुषः कलौ॥ अल्पायासेन ध
र्म्मज्ञास्तेन तुष्टोऽस्म्यहं कलेः॥ व्रतचर्यापरैर्ग्राह्या वेदाः पूर्वं द्विजातिभिः॥ ततः स्वधर्म्मसंप्राप्तैर्यष्टव्यं विधिना धनैः॥ वृथा कथा वृ
था भोज्यं वृथेज्या च द्विजन्मनाम्॥ पतनाय ततो भाव्यं तैस्तु संयमिभिः सदा॥ असम्यक्करणे दोषस्तेषां सर्वेषु वस्तुषु॥ भोज्य
पेयादिकं चैषां नेच्छाप्राप्तिकरं द्विजाः॥ पारतंत्र्यं समस्तेषु तेषां कार्येषु वै यतः॥ जयंति ते निजान् लोकान् क्लेशेन महता द्वि
जाः॥ द्विजशुश्रूषयैवैष पाकयज्ञाधिकारवान्॥ निजाञ्जयंति वै लोकान् शूद्रो धन्यतरस्ततः॥ भक्ष्याभक्ष्येषु नास्यास्ति पेया
पेयेषु वै यतः॥ नियमो मुनिशार्दूलास्तेनासौ साध्वितीरितः॥ स्वधर्मस्याविरोधेन नरैर्लब्धं धनं सदा॥ प्रतिपादनीयं पात्रेषु य
ष्टव्यं च यथाविधि॥ तस्यार्जने महान्क्लेशः पालने च द्विजोत्तमाः॥ तथा सद्विनियोगाय विज्ञेयं गहनं नृणां॥ एभिरन्यैस्तथा
क्लेशैः पुरुषा द्विजसत्तमाः॥ निजाञ्जयंति वै लोकान्प्राजापत्यादिकान्क्रमात्॥ योषिच्छुश्रूषणाद्भर्तुः कर्मणा मनसा गि
रा॥ कुर्वती समवाप्नोति तत्सालोक्यं यतो द्विजाः॥ नातिक्लेशेन महता तानेव पुरुषो यथा॥ तृतीयं व्याहृतं तेन मया साध्विति
योषितां॥ एतद्वः कथितं विप्रा यन्निमित्तमिहागताः॥ तत्पृच्छध्वं यथाकामं सर्वं वक्ष्यामि वः स्फुटं॥ श्रीपराशर उवाच॥
ततस्ते मुनयः प्रोचुर्यत्प्रष्टव्यं महामुने॥ अस्मिन्नेव च तत्प्रश्ने यथावत्कथितं त्वया॥ ततः प्रहस्य तानाह कृष्णद्वैपायनो मुनिः

ष्याहरिर्भार्याश्च सुहृदो मुनिसत्तम। कस्य माता पिता कस्य यदा कर्मात्मकः पुमान्॥ इति चोदाहरिष्यंति श्वशुरानुग
ता नराः॥ वाङ्मनःकायिकैर्दोषैरभिभूताः पुनः पुनः॥ नराः पापान्यनुदिनं करिष्यंत्यल्पमेधसः॥ निःसत्वानामशौचानां निः
श्रीकानां तथा नृणाम्॥ यद्यद्दुःखाय तत्सर्वं कलिकाले भविष्यति॥ निःस्वाध्यायवषट्कारे स्वधास्वाहाविवर्जिते॥ तदाप्रवि
रलो विप्रः क्वचिल्लोके विनश्यति॥ तत्राल्पेनैव यत्नेन पुण्यस्कंधमनुत्तमं॥ करोति यं कृतयुगे क्रियते तपसा हि सः॥ इति
श्रीविष्णुपुराणे षष्ठेंऽशे प्रथमोऽध्यायः॥ श्रीपराशर उवाच॥ व्यासश्चाह महाबुद्धिर्यदत्रैव हि वस्तुनि॥ तच्छ्रूयतां महाभाग
गदतो मम तत्त्वतः॥ कस्मिन्कालेऽल्पको धर्मो ददाति सुमहत्फलं॥ मुनीनां पुण्यवादोऽभूत्कैश्चासौ क्रियते सुखं॥ संदेहनिर्ण
यार्थाय वेदव्यासं महामुनिं॥ ययुस्ते संशयं प्रष्टुं मैत्रेय मुनिपुंगवाः॥ तस्थुस्तटे महानद्यास्तरुषंडमुपाश्रिताः॥ मग्नो या
यज्जाह्नवीतोयादुत्थायाह सुतो मम॥ शूद्रः साधुः कलिः साधुरित्येवं शृण्वतां ततः॥ तेषां मुनीनां भूयश्च ममज्ज स नदीज
ले॥ उत्थाय साधु साध्विति शूद्र धन्योसि चाब्रवीत्॥ स निमग्नः समुत्थाय पुनः प्राह महामुनिः॥ योषितः साधु धन्यास्तास्ता
भ्यो धन्यतरोस्ति कः॥ ततः स्नात्वा यथान्यायमायांतं च कृतक्रियं॥ उपतस्थुर्महाभागं मुनयस्ते सुतं मम॥ कृतसंवंदनां
श्चाह कृतासनपरिग्रहान्॥ किमर्थमागता यूयमिति सत्यवतीसुतः॥ तमूचुः संशयं प्रष्टुं भवंतं वयमागताः॥ अलं तेनास्तु
तावन्नः कथ्यतामपरं त्वया॥ कलिः साध्विति यत्प्रोक्तं शूद्रः साध्विति योषितः॥ यदाह भगवान्साधु धन्याश्चेति पुनः पु
नः॥ तत्सर्वं श्रोतुमिच्छामो न चेद्गुह्यं महामुने॥ तत्कथ्यतां ततो हृत्स्थं पृच्छामस्त्वां प्रयोजनं॥ इत्युक्तो मुनिभिर्व्यासः प्रहस्येदम

वि॰पु॰
१५०

150

वमैत्रेय प्राह्नो नैमित्तिको लयः॥ तस्य स्वरूपमत्युग्रं मैत्रेय गदतो मम॥ शृणुष्व प्राकृतं भूयस्तव वक्ष्याम्यहं लयं॥ चतुर्युगसहस्रान्ते क्षीणप्रा
ये महीतले॥ अनावृष्टिरतीवोग्रा जायते शतवार्षिकी॥ ततो यान्यल्पसाराणि तानि सत्वान्यशेषतः॥ क्षयं यान्ति मुनिश्रेष्ठ पार्थि
वान्यनुपीडनात्॥ ततः स भगवान्विष्णू रुद्ररूपधरोव्ययः॥ क्षयाय यतते कर्त्तुमात्मस्थाः सकलाः प्रजाः॥ ततः स भगवान्
विष्णुर्भानोः सप्तसु रश्मिषु॥ स्थितः पिबत्यशेषाणि जलानि मुनिसत्तम॥ पीत्वांभांसि समस्तानि प्राणिभूमिगतानि वै॥
शोषं नयति मैत्रेय समस्तं पृथिवीतलं॥ समुद्रान्सरितः शैलान् शैलप्रस्रवणानि च॥ पातालेषु च यत्तोयं तत्सर्वं न
यति क्षयं॥ ततस्तस्यानुभावेन तोयाहारोपबृंहिताः॥ त एव रश्मयः सप्त जायन्ते सप्त भास्कराः॥ अधश्चोर्द्ध्वं च ते दीप्तास्त
तः सप्त दिवाकराः॥ दहन्त्यशेषं त्रैलोक्यं सपातालतलं द्विज॥ दह्यमानं तु तैर्दीप्तैस्त्रैलोक्यं द्विज भास्करैः॥ साद्रिनद्यर्णवाभो
गं निःस्नेहमभिजायते॥ ततो निर्दग्धवृक्षाम्बु त्रैलोक्यमखिलं द्विज॥ भवत्येका च वसुधा कूर्मपृष्ठोपमाकृतिः॥ ततः का
लाग्निरुद्रोसौ भूत्वा सर्वहरो हरिः॥ शेषाहिश्वाससंभूतः पातालानि दहत्यधः॥ पातालानि समस्तानि स दग्ध्वा ज्वल
नो महान्॥ भूमिमभ्येत्य सकलं समस्तं वसुधातलं॥ भुवर्लोकं ततः सर्वं स्वर्लोकं च सुदारुणः॥ ज्वालामालामहावर्त्तस्त
त्रैव परिवर्त्तते॥ अम्बरीषमिवाभाति त्रैलोक्यमखिलं तदा॥ ज्वालावर्त्तपरीवारमुपक्षीणचराचरम्॥ ततस्तापपरीतास्तु
लोकद्वयनिवासिनः॥ कृताधिकारा गच्छन्ति महर्लोकं महामुने॥ तस्मादपि महातापतप्ता लोकात्ततः परं॥ गच्छन्ति ज
नलोकं ते दशावृत्त्या परैषिणः॥ ततो दग्ध्वा जगत्सर्वं रुद्ररूपी जनार्दनः॥ मुखनिश्वासजान्मेघान्करोति मुनिसत्तम॥ त

राम
१५०

॥विस्मयोत्फुल्लनयनांस्तापसांस्तानुपागतान्॥ मयैष भवतां प्रश्नो ज्ञातो दिव्येन चक्षुषा॥ ततो हि वः प्रसंगेन साधु साध्विति भाषितं
॥स्वल्पेन हि प्रयत्नेन धर्म्मः सिध्यति वै कलौ॥ नरैरात्मगुणाम्भोभिः क्षालिताखिलकिल्बिषैः॥ शूद्रैश्च द्विजशुश्रूषातत्परैर्मुनिसत्त
माः तथा स्त्रीभिरनायासात्पतिशुश्रूषयैव हि॥ ततस्त्रितयमप्येतन्मम धन्यतमं मतं॥ धर्म्मसंसाधने क्लेशो द्विजातीनां कृतादिषु॥
भवद्भिर्यदभिप्रेतं तदेतत्कथितं मया॥ अपृष्टेनापि धर्म्मज्ञाः किमन्यत्क्रियतां द्विजाः॥ श्रीपराशर उवाच॥ ततः संपूज्य ते व्यासं प्र
शशंसुः पुनः पुनः॥ यथागतं द्विजा जग्मुर्व्यासोक्तिकृतनिश्चयाः॥ भवतोपि महाभाग रहस्यं कथितं मया॥ अत्यन्तदुष्टस्य कलेरयमेव म
हान्गुणः॥ यच्चाहं भवता पृष्टो जगतामुपसंहृतिम्॥ प्राकृतां चान्तरालां च तामप्येष वदामि ते॥ ६०॥ इति श्री विष्णुपुराणे षष्ठेंशे द्वितीयो
ऽध्यायः॥ श्रीपराशर उवाच॥ सर्वेषामेव भूतानां त्रिविधः प्रतिसंचरः॥ नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको मतः॥ ब्राह्मो नैमित्तिक
स्तेषां कल्पान्ते प्रतिसंचरः॥ आत्यन्तिकश्च मोक्षाख्यः प्राकृतो द्विपरार्द्धिकः॥ मैत्रेय उवाच॥ परार्द्धसंख्यां भगवन्ममाचक्ष्व यया तु सः
द्विगुणीकृतया ज्ञेयः प्राकृतः प्रतिसंचरः॥ श्रीपराशर उवाच॥ स्थानात्स्थानं दशगुणमेकस्माद्गण्यते द्विज॥ ततोष्टादशमे भागे प
रार्द्धमभिधीयते॥ परार्द्धद्विगुणं यत्तु प्राकृतः स लयो द्विज॥ तदाव्यक्तेखिलं व्यक्तं स्वहेतौ लयमेति वै॥ निमेषो मानुषो योयं मात्रामा
त्रप्रमाणतः॥ तैः पंचदशभिः काष्ठा त्रिंशत्काष्ठास्तथा कला॥ नाडिका तु प्रमाणेन कला दश च पंच च॥ उन्मानेनांभसः सा तु पला
न्यर्द्धत्रयोदश॥ हेममाषैः कृतच्छिद्रा चतुर्भिश्चतुरंगुलैः॥ मागधेन प्रमाणेन जलप्रस्थस्तु सः स्मृतः॥ नाडिकाभ्यामथ द्वाभ्यां मुहूर्तो
द्विजसत्तम॥ अहोरात्रं मुहूर्तास्तु त्रिंशन्मासो दिनैस्तथा॥ मासैर्द्वादशभिर्वर्षमहोरात्रं तु तद्दिवि॥ त्रिभिर्वर्षशतैर्वर्षं षष्ट्या चैवासुरद्वि
षां॥ तैश्च द्वादशसाहस्रैश्चतुर्युगमुदाहृतं॥ चतुर्युगसहस्रं तु कथ्यते ब्रह्मणो दिनं॥ स कल्पस्तत्र मनवश्चतुर्दश महामुने॥ तदंते चैव

वि॰पु॰
१०२

सहस्रवत्॥ एकार्णवीकृते लोके तावती रात्रिरिष्यते॥ ततः प्रबुद्धो रात्र्यंते पुनः सृष्टिं करोत्यजः॥ ब्रह्मस्वरूपधृग्विष्णुर्यथा
ते कथितं पुरा॥ इत्येष कल्पसंहारो ऽवांतरप्रलयो द्विज॥ नैमित्तिकस्ते कथितः प्राकृतं शृण्वतः परम्॥ अनावृष्ट्यादिसं
पर्कात्कृते संक्षालने मुने॥ समस्तेष्वेव लोकेषु पातालेष्वखिलेषु च॥ महदादेर्विकारस्य विशेषांतस्य संक्षये॥ कृष्णे
च्छाकारिते तस्मिन्प्रवृत्ते प्रतिसंचरे॥ आपो ग्रसंति वै पूर्वं भूमेर्गंधात्मकं गुणम्॥ आत्तगंधा ततो भूमिः प्रलयत्वाय
कल्पते॥ प्रनष्टे गंधतन्मात्रे भवत्युर्वी जलात्मिका॥ आपस्तदा प्रवृद्धास्तु वेगवत्यो महास्वनाः॥ सर्वमापूरयंतीदं ति
ष्ठंति विचरंति च॥ सलिलेनैवोर्मिमता लोका व्याप्ताः समंततः॥ अपामपि गुणो यस्तु ज्योतिषा पीयते तु सः॥ नश्यंत्या
पस्ततस्ताश्च रसतन्मात्रसंक्षयात्॥ ततश्चापो हृतरसा ज्योतिष्ट्वं प्राप्नुवंति वै॥ अग्न्यवस्थे तु सलिले तेजसा सर्वतो वृते॥ स
चाग्निः सर्वतो व्याप्य आदत्ते तज्जलं तदा॥ सर्वमापूर्यते ऽर्चिर्भिस्तदा जगदिदं शनैः॥ अर्चिर्भिः संवृते तस्मिंस्तिर्यगूर्ध्वमधस्तथा
॥ज्योतिषोपि परं रूपं वायुरत्ति प्रभाकरम्॥ प्रलीने च ततस्तस्मिन्वायुभूते ऽखिलात्मनि॥ प्रनष्टे रूपतन्मात्रे कृतरूपो वि
भावसुः॥ प्रशाम्यति तदा ज्योतिर्वायुर्दोधूयते महान्॥ निरालोके तदा लोके वाय्ववस्थे च तेजसि॥ ततस्तु मूलमा
साद्य वायुः संभवमात्मनः॥ ऊर्ध्वं चाधश्च तिर्यक्च दोधवीति दिशो दश॥ वायोरपि गुणं स्पर्शमाकाशो ग्रसते ततः
॥ प्रशाम्यति ततो वायुः खं तु तिष्ठत्यनावृतम्॥ अरूपमरसस्पर्शमगंधं न च मूर्तिमत्॥ सर्वमापूरयच्चैव सुमहत्तत्प्र
काशते॥ परिमंडलं तत्सुषिरं सर्वमावृत्य तिष्ठति

रा
१५२

नोगजकुलप्रख्यास्तडित्वंतो निनादिनः ॥ अग्निं छंति जनसमेभूतियोराः संवर्त्तकाः घनाः ॥ केचिन्नीलोत्पलश्यामाः केचित्कु
मुदसन्निभाः ॥ धूम्रवर्णाः घनाः केचित्केचित्पीताः पयोधराः ॥ केचिद्रासभवर्णाभालाक्षारससन्निभास्तथा ॥ केचिद्वैडू
र्यसंकाशाइंद्रनीलनिभाः परे ॥ शंखकुंदनिभाश्चान्ये जात्यंजननिभास्तथा ॥ इंद्रगोपनिभाः केचिन्मनःशिलनिभा
स्तथा ॥ चाषपत्रनिभाः केचिदुत्तिष्ठंते घनाः पर्याः ॥ केचित्पुरवराकाराः केचित्पर्वतसन्निभाः ॥ कूटागारनिभाश्चान्ये
केचित्स्थलनिभाः घनाः ॥ महारावा महाकायाः पूरयंति नभस्तलम् ॥ वर्षंतस्ते महामेघा यावर्षाणामधिकं शतं ॥ शमयं
तो जगत्सर्वं वर्षंति मुनिसत्तम ॥ धाराभिरक्षमात्राभिः प्लावयित्वाखिलं भुवम् ॥ भुवर्लोकं तथैवोर्ध्वं प्लावयंति दिवं द्वि
ज ॥ अंधकारीकृते लोके नष्टे स्थावरजंगमे ॥ वर्षंति ते महामेघा वर्षाणामधिकं शतं ॥ इति श्रीविष्णुपुराणे षष्ठेंशे तृती
योध्यायः ॥ श्रीपराशर उवाच ॥ सप्तर्षिस्थानमाक्रम्य स्थितेंभसि महामुने ॥ एकार्णवं भवत्येतत्त्रैलोक्यमखिलं ततः ॥ मुख
निश्वासजो विष्णोर्वायुस्तान् जलदांस्ततः ॥ नाशयंत्वा तु मैत्रेय वर्षाणामधिकं शतम् ॥ सर्वभूतमयोचिंत्यो भगवान्भूतभाव
नः ॥ अनादिरादिर्विश्वस्य पीत्वा वायुमशेषतः ॥ एकार्णवे जगत्यस्मिन् शेषशय्यास्थितः प्रभुः ॥ ब्रह्मरूपधरः शेते भगवानादिकृद्ध
रिः ॥ जनलोकगतैः सिद्धैः सनकाद्यैरभिष्टुतः ॥ ब्रह्मलोकगतैश्चैव चिंत्यमानो मुमुक्षुभिः ॥ आत्ममायामयीं दिव्यां योगनिद्रां समा
स्थितः ॥ आत्मानं वासुदेवाख्यं चिंतयन्परमेश्वरः ॥ एष नैमित्तिको नाम मैत्रेय प्रतिसंचरः ॥ निमित्तं तत्र यच्छेते ब्रह्मरूपधरो
हरिः ॥ यदा जागर्ति विश्वात्मा स तदा चेष्टते जगत् ॥ निमीलत्येतदखिलं योगशय्याशयेच्युते ॥ पद्मयोने दिनं यत्तु चतुर्युग
ग

अथात्यंतिकमित्येवं यथैव ज्ञात्वा तापत्रयं बुधः उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यंतिकी लयम् ६

वि०पु० १५२

152

तोयेमयं जव॥ तदहस्तस्य मैत्रेय विष्णोरीशस्य कथ्यते॥ व्यक्ते च प्रकृतौ लीने प्रकृत्यां पुरुषे तथा॥ तत्र स्थिते निशा चान्या तत्प्रमाणा महामुने॥ नैवाहस्तस्य न निशा नित्यस्य परमात्मनः॥ उपचारस्तथाप्येष तस्येशस्य द्विजोच्यते॥ इत्येष तव मैत्रेय कथितः प्राकृतो लयः॥ आत्यंतिकमितो ब्रह्मन्निबोध प्रतिसंचरं॥ इति श्रीविष्णुपुराणे षष्ठेंशे चतुर्थोध्यायः॥ श्रीपराशर उवाच॥

आध्यात्मिको वै द्विविधः शारीरो मानसस्तथा॥ शारीरो बहुभिर्भेदैर्भिद्यते श्रूयतां च सः॥ शिरोरोगप्रतिश्यायज्वरशूलभगन्दरैः॥ गुल्मार्शःश्वासश्वयथुछर्द्यादिभिरनेकधा॥ तथाक्षिरोगातीसारकुष्ठाङ्गामयसंज्ञकैः॥ भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि॥ कामक्रोधभयद्वेषलोभमोहविषादजः॥ शोकासूयावमानेर्ष्यामात्सर्यादिभवस्तथा॥ मानसोपि द्विजश्रेष्ठ तापो भवति नैकधा॥ इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकस्ततः॥ मृगपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः॥ सरीसृपाद्यैश्च नृणां जन्यते चाधिभौतिकः॥ शीतोष्णवातवर्षाम्बुवैद्युतादिसमुद्भवः॥ तापो द्विजवरश्रेष्ठ कथ्यते चाधिदैविकः॥ गर्भजन्मजराज्ञानमृत्युनारकजं तथा॥ दुःखं सहस्रशो भेदैर्भिद्यते मुनिसत्तम॥ सुकुमारतनुर्गर्भे जंतुर्बहुमलावृते॥ उल्वसंवेष्टितो भुग्नपृष्ठग्रीवास्थिसंहतिः॥ अत्यम्लकटुतीक्ष्णोष्णलवणैर्मातृभोजनैः॥ अतितापिभिरत्यर्थं वर्द्धमाना ना
तिवेदनाः॥ प्रसारणाकुंचनादौ नांगानां प्रभुरात्मनः॥ शकृन्मूत्रमहापंकशायी सर्वत्र पीडितः॥ निरुच्छ्वासः सचैतन्यः स्मरञ्जन्मशतान्यथ॥ आस्ते गर्भेतिदुःखेन निजकर्मनिबंधनः॥ अधोमुखो वै क्रियते प्रबलैः सूतिमारुतैः॥ क्लेशान्निष्क्रान्तिमाप्नोति जठरान्मातुरातुरः॥ मूर्च्छामवाप्य महतीं संस्पृष्टो बाह्यवायुना॥ विज्ञानभ्रंशमाप्नोति जातश्च मुनि

रा

१५२

पी

दैसंस्थिते ध्रुवे ॥ अभिमानात्मको ह्येष भूतादिस्तामसः स्मृतः ॥ भूतादिं ग्रसते चापि महान्वै बुद्धिलक्षणः ॥ ऊर्वीं महांश्च
जगतः प्रान्ते सर्वाह्येतत्तथा ॥ एवं सप्त महाबुद्धे क्रमात्प्राकृतयस्तु वै ॥ प्रत्याहारे तु ताः सर्वाः प्रविशन्ति परं परम् ॥ येनेदम्
वृतं सर्वमंडमप्सु प्रलीयते ॥ सप्तद्वीपसमुद्रान्तं सप्तलोकं सपर्वतम् ॥ उदकावरणं यत्तु ज्योतिषा पीयते तु तत् ॥ ज्योतिः
वायौ लयं यात्याकाशे समीरणः ॥ आकाशं चैव भूतादिर्ग्रसते च तथा महान् ॥ महान्तमेभिः सहितं प्रकृतिर्ग्रसते द्वि
७ ज ॥ गुणसाम्यमनुद्रिक्तमन्यूनं च महामुने ॥ प्रोच्यते प्रकृतिर्हेतुः प्रधानं कारणं परम् ॥ इत्येषा प्रकृतिः सर्वा व्यक्ताव्यक्त
स्वरूपिणी ॥ व्यक्तस्वरूपमव्यक्ते तस्मिन्मैत्रेय लीयते ॥ एकः शुद्धोऽक्षरो नित्यः सर्वव्यापी तथा पुमान् ॥ सोऽप्यंशः सर्वभूतस्य मैत्रे
य परमात्मनः ॥ न सन्ति यत्र सर्वेशे नामजात्यादिकल्पनाः ॥ सत्तामात्रात्मके ज्ञेये ज्ञानात्मन्यात्मनः परे ॥ स ब्रह्म तत्परं धाम परमात्मा
स चेश्वरः ॥ स विष्णुः सर्वमेवेदं यतो नावर्तते यतिः ॥ प्रकृतिर्या मयाख्याता व्यक्ताव्यक्तस्वरूपिणी ॥ पुरुषश्चाप्युभावेतौ ली
येते परमात्मनि ॥ परमात्मा च सर्वेषामाधारः परमेश्वरः ॥ विष्णुनामा स वेदेषु वेदान्तेषु च गीयते ॥ प्रवृत्तं च निवृत्तं च द्विविधं कर्म
वैदिकं ॥ ताभ्यामुभाभ्यां पुरुषैः सर्वमूर्तिः स इज्यते ॥ ऋग्यजुःसामभिर्मार्गैः प्रवृत्तैरिज्यते ह्यसौ ॥ यज्ञेश्वरो यज्ञपुमान्पुरुषैः पुरु
षोत्तमः ॥ ज्ञानात्मा ज्ञानयोगेन ज्ञानमूर्तिः स चेज्यते ॥ निवृत्तैर्योगिभिर्मार्गैर्विष्णुर्मुक्तिफलप्रदः ॥ ह्रस्वदीर्घप्लुतैर्यत्तु किंचिद्वस्त्वभि
धीयते ॥ यच्च वाचामविषयं तत्सर्वं विष्णुरव्ययः ॥ व्यक्तः स एव चाव्यक्तः स एव पुरुषोऽव्ययः ॥ परमात्मा च विश्वात्मा विश्वरूपधरो ह
रिः ॥ व्यक्ताव्यक्तात्मिका तस्मिन्प्रकृतिः संप्रलीयते ॥ पुरुषश्चापि मैत्रेय व्यापिन्यव्याहतात्मनि ॥ द्विपरार्द्धात्मकः कालः कथि

पतन्त्येनस्य संक्लेशपरां जरी ॥ स्वात्मपुत्रदारैश्चाभ्यवमानपराहतः ॥ प्रक्षीणाखिलशौचश्च विहाराहारस
स्पृहः ॥ हास्यः परिजनस्यापि निर्विण्णाशेषबान्धवः ॥ अनुभूतमिवान्यस्मिन् जन्मन्यात्मविचेष्टितम् ॥ संस्म
रन्यौवने दीर्घं निःश्वसित्यभितापितः ॥ एवमादीनि दुःखानि जरायामनुभूय वै ॥ मरणे यानि दुःखानि
प्राप्नोति शृणु तान्यपि ॥ श्लथग्रीवाङ्घ्रिहस्तोऽथ व्याप्तो वेपथुना भृशम् ॥ मुहुर्ग्लानिपरश्चासौ मुहुर्ज्ञानलवा
न्वितः ॥ हिरण्यधान्यतनयभार्याभृत्यगृहादिषु ॥ एते कथं भविष्यन्तीत्यतीव ममताकुलः ॥ मर्मभिद्भिर्महा
रोगैः क्रकचैरिव दारुणैः ॥ शरैरिवान्तकस्योग्रैश्छिद्यमानास्थिबन्धनः ॥ विवर्तमानताराक्षिहस्तपादं मुहुः क्षि
पन् ॥ संशुष्यमाणताल्वोष्ठकण्ठो घुरघुरायते ॥ निरुद्धकण्ठदोषोघैरुदानश्वासपीडितः ॥ तापेन महता
व्याप्तस्तृषा चार्तस्तथा क्षुधा ॥ क्लेशादुत्क्रान्तिमाप्नोति याम्यकिंकरपीडितः ॥ ततश्च यातनादेहं क्लेशेन प्रतिप
द्यते ॥ एतान्यन्यानि चोग्राणि दुःखानि मरणे नृणाम् ॥ शृणुष्व नरके यानि प्राप्यन्ते पुरुषैर्मृतैः ॥ याम्यकिंकरपाशादि
ग्रहणं दण्डताडनम् ॥ यमस्य दर्शनं चोग्रमुग्रमार्गविलोकनम् ॥ करम्भवालुकावह्नियन्त्रशस्त्रादिभीषणैः ॥ प्रत्येकं न
रके याश्च यातना द्विज दुःसहाः ॥ क्रकचैः पीड्यमानानां मूषायां चापि ध्मायताम् ॥ कुठारैः कृत्यमानानां भूमौ चा
पि निखन्यताम् ॥ शूलेष्वारोप्यमाणानां व्याघ्रवक्त्रे प्रवेश्यताम् ॥ गृध्रैः संभक्ष्यमाणानां द्वीपिभिश्चोपभुज्यताम्

सप्तम॥ कंटकैरिव तुन्नांगः क्रकचैरिव दारितः॥ कृमिभिश्चाग्निभिः पतितो धरण्यां कृमिकोऽयथा॥ कंडूयनेऽपि चाशक्तः परिवर्त्ते
प्यनीश्वरः॥ अन्नपानादिकाहारमवाप्नोति परेच्छया॥ अशुचि [illegible] संस्तरे सुप्तः कीटदंशादिभिस्तथा॥ भक्ष्यमाणोऽपि नैवा
स्य समर्थो विनिवारणे॥ जन्मदुःखान्यनेकानि जन्मनोऽनंतराणि च॥ बाल्यभावे यदाप्नोति आधिभौमादिकानि च॥ अज्ञानत
मसाच्छन्नो मूढांतःकरणो नरः॥ न जानाति कुतः कोऽहं क्वाहं गंता किमात्मकः॥ केन बंधेन बद्धोऽहं कारणं किमकारणम्॥ किं
कार्यं किमकार्यं वा किं वाच्यं किं न चोच्यते॥ को धर्मः कश्च वै धर्मः क्वास्ति न्वर्तेत वा कथं॥ किं कर्तव्यमकर्तव्यं किं वा किं
गुणदोषवत्॥ एवं पशुसमैर्मूढैरज्ञानप्रभवं महत्॥ अवाप्यते नरैर्दुःखं शिश्नोदरपरायणैः॥ अज्ञानतमसो भावः रैः
कार्यारंभप्रवृत्तयः॥ अज्ञानिनां प्रवर्तन्ते कर्मलोपास्ततो द्विज॥ नरकं कर्मणां लोपात्फलमाहुर्महर्षयः॥ तस्मा
दज्ञानिनां दुःखमिह चामुत्र चोत्तमम्॥ जराजर्जरदेहश्च शिथिलावयवः पुमान्॥ विगलच्छीर्णदशनो वलीस्नायुः
शिरावृतः॥ दूरप्रनष्टनयनो व्योमांतर्गततारकः॥ नासाविवरनिर्यातरोमपुंजश्चलद्वपुः॥ प्रकटीभूतसर्वास्थि
र्नतपृष्ठास्थिसंहतिः॥ उत्सन्नजठराग्नित्वादल्पाहारोऽल्पचेष्टितः॥ चंक्रमणोत्थानशयनासनचेष्टितः॥ मंदी
भवच्छ्रोत्रनेत्रः स्रवल्लालाविलाननः॥ अनायत्तैः समस्तैश्च करणैर्मरणोन्मुखः॥ तत्क्षणेऽप्यनुभूतानामस्मर्ता
खिलवस्तुनाम्॥ सकृदुच्चारिते वाक्ये समुद्भूतमहाश्रमः॥ श्वासकाससमुद्भूतमहायासप्रजागरः॥ अन्येनो

वि०पु० ६५

१५४

मव्ययम्॥ अनिर्देश्यमरूपं च पाणिपाद्यसंयुतम्॥ विभुं सर्वगतं नित्यं भूतयोनिमकारणम्॥ व्याप्यव्याप्तं यतः स
र्वं तद्वै पश्यन्ति सूरयः॥ तद्ब्रह्म परमं धाम तद्ध्येयं मोक्षकांक्षिणाम्॥ श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम्॥ त
देतद्भगवद्वाच्यं स्वरूपं परमात्मनः॥ वाचको भगवच्छब्दस्तस्याद्यस्याक्षयात्मनः॥ एवं निगदितार्थस्य स तत्त्वं तस्य तत्त्वतः॥
ज्ञायते येन तज्ज्ञानं परमन्यत्त्रयीमयम्॥ अशब्दगोचरस्यापि तस्य वै ब्रह्मणो द्विज॥ पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः॥ शुद्धे
महाविभूत्याख्ये परे ब्रह्मणि वर्तते॥ मैत्रेय भगवच्छब्दः सर्वकारणकारणे॥ संभर्तेति तथा भर्ता भकारोऽर्थद्वयान्वितः॥
नेता गमयिता स्रष्टा गकारार्थस्तथा मुने॥ ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः॥ ज्ञानवैराग्ययो
श्चैव षण्णां भग इतीरणा॥ वसन्ति यत्र भूतानि भूतात्मन्यखिलात्मनि॥ स च भूतेष्वशेषेषु वकारार्थस्ततोऽ
व्ययः॥ एवमेष महाशब्दो भगवानिति सत्तम॥ परमब्रह्मभूतस्य वासुदेवस्य नान्यगः॥ तत्र पूज्यपदार्थोक्ति
परिभाषासमन्वितः॥ शब्दोऽयं नोपचारेण त्वन्यत्र ह्युपचारतः॥ उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम्॥
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति॥ ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः॥ भगवच्छब्दवाच्या
नि विना हेयैर्गुणादिभिः॥ सर्वाणि तत्र भूतानि वसन्ति परमात्मनि॥ भूतेषु च स सर्वात्मा वासुदेवस्ततः स्मृ
तः॥ खाण्डिक्यजनकायाह पृष्टः केशिध्वजः पुरा॥ नामव्याख्यामनन्तस्य वासुदेवस्य तत्त्वतः॥ भूतेषु वसते सोऽन्त
र्वसन्त्यत्र च तानि यत्॥ धाता विधाता जगतां वासुदेवस्ततः प्रभुः॥ स सर्वभूतप्रकृतिं विकारान्गुणादिदोषांश्च मु

ष

राम

६५

यंत्र

क्वाथ्यतां तैलमध्ये च क्लिश्यतां क्षारकर्दमे ॥ उच्चान्निपात्यमानानां क्षिप्यतां क्षेपकैः ॥ नरके यानि दुःखानि पापहेतू-
द्भवानि वै ॥ प्राप्यंते नरकैर्विप्र तेषां संख्या न विद्यते ॥ न केवलं द्विजश्रेष्ठ नरके दुःखपद्धतिः ॥ स्वर्गेपि पातभीतस्य क्षयि-
ष्णोर्नास्ति निर्वृतिः ॥ पुनश्च गर्भे भवति जायते च पुनर्नरः ॥ गर्भे विलीयते भूयो जायमानोस्तमेति च ॥ म्रियते जातमात्रश्च
बालभावेथ यौवने ॥ मध्यमं वा वयः प्राप्य वार्द्धके वा ध्रुवा मृतिः ॥ यावज्जीवेत्तावद्दुःखैर्नानाविधैः प्लुतः ॥ तंतुकार: ति
पक्ष्मौघैरास्ते कर्पासबीजवत् ॥ द्रव्यनाशे तथोत्पन्ने पालने च तथा नृणाम् ॥ भवंत्यनेकदुःखानि तथैवेष्टविपत्तिषु ॥
यद्यत्प्रीतिकरं पुंसां वस्तु मैत्रेय जायते ॥ तदेव दुःखवृक्षस्य बीजत्वमुपगच्छति ॥ कलत्रपुत्रमित्रादिगृहक्षेत्रधनादिकैः ॥
क्रियते न तथा भूरि सुखं पुंसां यथासुखम् ॥ इति संसारदुःखार्कतापतापितचेतसां ॥ विमुक्तिपादपच्छायामृते कुत्र सुखं
नृणाम् ॥ तदस्य त्रिविधस्यापि दुःखजातस्य पंडितैः ॥ गर्भजन्मजराद्येषु स्थानेषु प्रभविष्यतः ॥ निरस्तातिशयाह्लादसुख-
भावैकलक्षणम् ॥ भेषजं भगवत्प्राप्तिरेकांतात्यंतिकी मता ॥ तस्मात्तत्प्राप्तये यत्नः कर्तव्यः पंडितैर्नरैः ॥ तत्प्राप्तिहेतुर्ज्ञा-
नं च कर्म चोक्तं महामुने ॥ आगमोत्थं विवेकाच्च द्विधा ज्ञानं तथोच्यते ॥ शब्दब्रह्मागममयं परं ब्रह्म विवेकजम् ॥ अंधं
तम इवाज्ञानं दीपवच्चेंद्रियोद्भवम् ॥ यथा सूर्यस्तथा ज्ञानं यद्विप्रर्षे विवेकजम् ॥ मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्त-
म ॥ तदेतच्छ्रूयतामत्र संबंधे गदतो मम ॥ द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ॥ शब्दब्रह्मणि निष्णातः परं ब्रह्माधिग-
च्छति ॥ द्वे विद्ये वेदितव्ये इति चाथर्वणी श्रुतिः ॥ परया त्वक्षरप्राप्तिर्ऋग्वेदादिमयापरा ॥ यत्तदव्यक्तमजरमचिंत्यमज-

विष्णु०
१५५

155

पुरोधसामंत्रिभिश्च समवेतो स्वसाधनः॥ एष्वा त्रिप्रकृतः सोप्युद्धर्मरागपवृत्तोऽभवत्॥ इष्टवान्सोपिसुबहून्य
ज्ञान्ज्ञानव्यपाश्रयः॥ ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्यया॥ एकोदा वर्त्तमानस्य योगे योगविदांवर॥ धर्म
धेनुं जघानोग्र शार्दूलो विजने वने॥ ततो राजा हतां श्रुत्वा धेनुं व्याघ्रेण ऋत्विजः॥ प्रायश्चित्तं स पप्रच्छ
किमत्रेति विधीयतां॥ ते चोचुर्न वयं विद्मः कशेरुः पृच्छ्यतामिति॥ कशेरुरपि तेनोक्तस्तथैव प्राह भार्गव॥
शौनकं पृच्छ राजेंद्र नाहं वेद्मि स वेत्स्यति॥ स गत्वा तमपृच्छच्च सोप्याह शृणु यन्मुने॥ न कशेरुर्न चैवाहं न
चान्यः सांप्रतं भुवि॥ वेत्त्येक एव त्वच्छत्रुः खांडिक्यो यो जितस्त्वया॥ स चाह तं व्रजाम्येष प्रष्टुमात्मरिपुं मुने॥
प्राप्त एव समायज्ञो यदि मां स हनिष्यति॥ प्रायश्चित्तं स चेत्पृष्टो वदिष्यति रिपुर्मम॥ ततश्चाविकलो योगो
मुनिश्रेष्ठ भविष्यति॥ श्रीपराशर उवाच॥ इत्युक्त्वा रथमारुह्य कृष्णाजिनधरो नृपः॥ वनं जगाम यत्रास्ते खांडिक्यः
स महामतिः॥ तमायांतं समालोक्य खांडिक्यो रिपुमात्मनः॥ प्रोवाच क्रोधताम्राक्षः समारोपितकार्मुकः॥ खांडि
क्य उवाच॥ कृष्णाजिनं त्वं कवचमाबध्यास्मान्निहंस्यसि॥ कृष्णाजिनधरो वेत्सि न मयि प्रहरिष्यति॥ मृगाणां वद पृ
ष्ठेषु मूढ कृष्णाजिनं च किम्॥ येषां त्वया मया चोग्राः प्रहिताः शितसायकाः॥ स त्वामहं हनिष्यामि न मे जीवन्विमो
क्ष्यसे॥ आततायसि दुर्बुद्धे मम राज्यहरो रिपुः॥ केशिध्वज उवाच॥ खांडिक्य संशयं प्रष्टुं भवंतमहमागतः॥ न त्वां
हंतुं विचार्यैतत्कोपं बाणं च मुंच

राम
१५५

ने मतीतः॥ अतीतसर्वावरणोऽखिलात्मा तेनास्तृतं यद्भुवनांतराले॥ समस्तकल्याणगुणात्मको हि स्वशक्तिलेशावृत
भूतिवर्गः॥ इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितोसौ॥ तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैक
राशिः॥ परः पराणां सकला न यत्र क्लेशादयः संति परावरेशे॥ स ईश्वरो व्यष्टिसमष्टिरूपो व्यक्तस्वरूपः प्रकटस्व
रूपः॥ सर्वेश्वरः सर्वग सर्ववेत्ता समस्तशक्तिः परमेश्वराख्यः॥ संज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेकरूपं सं
दृश्यते वाप्यथ गम्यते वा॥ तज्ज्ञानमज्ञानमतोन्यदुक्तम॥ इति श्री विष्णुपुराणे षष्टेंशे पंचमोध्यायः॥ श्री पराशर उवाच॥
स्वाध्यायसंयमाभ्यां स दृश्यते पुरुषोत्तमः॥ तत्प्राप्तिकारणं ब्रह्म तदेतदिति पठ्यते॥ स्वाध्यायाद्योगमासीत योगात्स्वाध्या
यमामनेत्॥ स्वाध्याययोगसंपत्त्या परमात्मा प्रकाशते॥ तदीक्षणाय स्वाध्यायश्चक्षुर्योगस्तथापरम॥ न मांसचक्षुषा द्रष्टुं
ब्रह्मभूतः स शक्यते॥ मैत्रेय उवाच॥ भगवंस्तमहं योगं ज्ञातुमिच्छामि तं वद॥ ज्ञाते यत्राखिलाधारं पश्येयं परमेश्वरम॥
श्री पराशर उवाच॥ यथा केशिध्वजः प्राह खांडिक्याय महात्मने॥ जनकाय पुरा योगं तथाहं कथयामि ते॥ मैत्रेय उवाच
खांडिक्यः कोभवद्ब्रह्मन् को वा केशिध्वजोभवत्॥ कथं तयोश्च संवादो योगसंबंधवानभूत॥ श्री पराशर उवाच॥ धर्मध्वजो
जनकस्तस्य पुत्रोमितध्वजः॥ कृतध्वजश्च नामासीत्सदाध्यात्मरतिर्नृपः॥ कृतध्वजस्य पुत्रोभूत् ख्यातः केशिध्वजो द्विज
॥ पुत्रोमितध्वजस्यापि खांडिक्यो जनकोभवत्॥ कर्ममार्गेपि खांडिक्यः पृथिव्यामभवत्कृती॥ केशिध्वजोप्यतीवासीदा
त्मविद्याविशारदः॥ तावुभावपि चैवास्तां विजिगीषू परस्परम॥ केशिध्वजेन खांडिक्यः स्वराज्यादवरोपितः॥

वि॰पु॰
१५६

152

वैगुरुदक्षिणां॥ सजगाम ततो भूयो यत्र मास्य ह्य पार्थिवः॥ मैत्रेय दुर्गगहनं खांडिक्यो यत्र संस्थितः॥ खांडिक्योपि तमा
यांतं पुनर्दृष्ट्वा धृतायुधः॥ तस्थौ हंतुं कृतमतिस्तमाह स पुनर्नृपः॥ भो नाहं ते पकाराय प्राप्तः खांडिक्य माक्रु
धः॥ गुरोर्निष्क्रयदानाय मामवेहि त्वमागतम्॥ निष्पादितस्त्वया मह्यं सम्यक् तद्दुपदेशतः॥ सोहं ते दातुमिच्छा
मि वृणुष्व गुरुदक्षिणाम्॥ श्रीपराशर उवाच॥ भूयः स मंत्रिभिः सार्द्धं मंत्रयामास पार्थिवः॥ गुरुनिष्क्रयकामोत्र
किमयं प्रार्थ्यतामिति॥ तमूचुर्मंत्रिणो राज्यमशेषं प्रार्थ्यतामयं॥ कृतिभिः प्रार्थ्यते राज्यमनायासितसैनिकैः
॥ प्रहस्य तानाह नृपः स खांडिक्यो महामतिः॥ स्वल्पकालं महीराज्यं मादृशैः प्रार्थ्यते कथम्॥ एवमेतद्भवंतोत्र सर्व
साधनमंत्रिणः॥ परमार्थः कथं कोत्र यूयं नात्र विचक्षणाः॥ श्रीपराशर उवाच॥ इत्युक्त्वा समुपेत्यैनं स तु केशिध्वजं
नृपः उवाच किमवश्यं त्वं ददासि गुरुदक्षिणां॥ बाढमित्येव तेनोक्तः खांडिक्यस्तमथाब्रवीत्॥ भवानध्यात्मविज्ञान
परमार्थविचक्षणः॥ यदि चेद्दीयते मह्यं भवता गुरुनिष्क्रयः॥ तत्क्लेशप्रशमायालं यत्कर्म तदुदीरय॥ इति श्रीवि
ष्णुपुराणे षष्ठेंशे षष्ठोध्यायः॥ केशिध्वज उवाच॥ न प्रार्थितं त्वया कस्मान्मम राज्यमकंटकम्॥ राज्यलाभाद्विना ना
न्यत्क्षत्रियाणामतिप्रियम्॥ खांडिक्य उवाच॥ केशिध्वज निबोध त्वं मया न प्रार्थितं यतः॥ राज्यमेतद्दुरापं यत्तत्र

राम
१५६

हंतुं विचार्यैतल्लोपं वणं च मुंचच ॥ श्रीपराशरउवाच ॥ ततः समंत्रिभिः सार्द्धं सकांते सपुरोहितः ॥ मंत्रयामास
खांडिक्यः सर्वैरेव महामतिः ॥ तमूचुर्मंत्रिणो वध्योरिपुरेष वशंगतः ॥ हतेस्मिन्पृथिवी सर्वा तव वश्या भवि
ष्यति ॥ खांडिक्यः प्राह तान्सर्वानेतदेवं न संशयः ॥ हतेतु पृथिवी सर्वा मम वश्या भविष्यति ॥ परलोकजयस्त
स्य पृथिवी सकला मम ॥ न हन्मि चेल्लोकजयो मम तस्य वसुंधरा ॥ परलोकजयोनंतः स्वल्पकालो महीज
यः ॥ तस्मादेनं न हिंसिष्ये यत्पृच्छति वदामि तत् ॥ श्रीपराशरउवाच ॥ ततस्तमभ्युपेत्याह खांडिक्यजनको
रिपुम् ॥ प्रष्टव्यं यत्त्वया सर्वं तत्पृच्छस्व वदामि ते ॥ ततः सर्वं यथावृत्तं धर्मधेनुवधं द्विज ॥ कथयित्वा स प
प्रच्छ प्रायश्चित्तं हि तद्गतम् ॥ स चाचचक्षे यथान्यायं द्विज केशिध्वजाय तत् ॥ प्रायश्चित्तमशेषेण यद्वै त
त्र विधीयते ॥ विदितार्थः स तेनैव अनुज्ञातो महात्मना ॥ यागभूमिमुपागम्य चक्रे सर्वाः क्रियाः क्रमात् ॥ क्रमेण वि
धिवद्यागं नीत्वासोवभृथाप्लुतम् ॥ कृतकृत्यस्ततो भूत्वा चिंतयामास पार्थिवः ॥ पूजिता ऋत्विजः सर्वे सदस्या
मानिता मया ॥ तथैवार्थिजनोप्यर्थैर्योजितोभिमतैर्मया ॥ यथार्हमस्य लोकस्य मया सर्वं विचेष्टितम् ॥ अ
निष्पन्नक्रियं चेतस्तथापि मम किं यथा ॥ इत्थं संचिंतयन्नेव सस्मार स महीपतिः ॥ खांडिक्याय न दत्तेति मया

न्तकैर्भोगैः पंचभूतात्मकं वपुः॥ आप्यायते यदि ततः पुंसो भोगोत्र किं कृतः॥ अनेकजन्मसाहस्रीं संसारपदवीं व्रजन्॥ मो
हश्रमं प्रयातोसौ वासनारेणुकुंठितः॥ प्रक्षाल्यते यदा सोस्य रेणुर्ज्ञानोष्णवारिणा॥ तदा संसारिपांथस्य याति मोहश्र
मः शमम्॥ मोहश्रमे शमं याते स्वच्छांतःकरणः पुमान्॥ अनन्यातिशयाबाधं परं निर्वाणमृच्छति॥ निर्वाणमय एवा
यमात्मा ज्ञानमयोमलः॥ दुःखाज्ञानमला धर्माः प्रकृतेस्ते न चात्मनः॥ जलस्य नाग्निसंसर्गः स्थालीसंगात्तथा
पि हि॥ शब्दोद्रेकादिकान्धर्मान्तत्करोति यथा मुने॥ तथात्मा प्रकृतेः संगादहंमानादिदूषितः॥ भजते प्राकृता
न्धर्मानन्यस्तेभ्यो हि सोव्ययः॥ तदेतत्कथितं बीजमविद्याया मया तव प्रभो॥ क्लेशानां च क्षयकरं योगादन्यन्न विद्यते॥
खांडिक्य उवाच॥ तं ब्रवीहि महाभाग योगं योगविदुत्तम॥ विज्ञातयोगशास्त्रार्थस्त्वमस्यां निमिसंततौ॥ केशिध्वज
उवाच॥ योगस्वरूपं खांडिक्य श्रूयतां गदतो मम॥ यत्र स्थितो न च्यवते प्राप्य ब्रह्मलयं मुनिः॥ मन एव मनुष्याणां
कारणं बंधमोक्षयोः॥ बंधाय विषयासंगि मुक्त्यै निर्विषयं मनः॥ विषयेभ्यः समाहृत्य विज्ञानात्मा मनो मुनिः॥
चिंतयेन्मुक्तये तेन ब्रह्मभूतं परेश्वरम्॥ आत्मभावं नयत्येनं तद्ब्रह्मध्यायिनं मुने॥ विकार्यमात्मनः श
क्त्या लोहमाकर्षको यथा॥ आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः॥ तस्या ब्रह्मणि संयोगो योग इत्य

धर्मतत्त्वपंडिताः ॥ क्षत्रियाणामयं धर्म्मो यत्प्रजापरिपालनम् ॥ वधश्च धर्मयुद्धेन स्वराज्यपरिपंथिनाम् ॥ यत्राज्ञानकृत दोषो
नैवास्माप हृतो त्वया ॥ बंधोयेव भवेत्पुंसा अविद्याध्यक्रमोज्झिता ॥ जन्मोपभोगलिप्सार्थमियं राज्यस्पृहा मम ॥ तन्नेवंवादो
मज्ञानेनाधर्म्ममिवानुरुध्यते ॥ नयांचाहत्र वंधूनां धर्म्मोच्छेदनस्य नातनम् ॥ अतो न याचितं राज्यमविज्ञांतगतिं तव ॥ राजे
ज्ञ धर्मतत्त्वविज्ञो सो ममत्वाहतचेतसः ॥ अहंमानमहायानमदमत्तानमादृशाः ॥ श्रीपरशराउवाच ॥ तत्र प्रहृष्टः साधिति प्राह केशि
शिध्वजो नृपः ॥ खांडिक्य जनकं प्रीत्या श्रूयतां वचनं मम ॥ अहमप्यविद्यया मृत्युं तर्तुं कामः करोमि वै ॥ राज्यं यागांश्च विविध
धान्भोगैः पुण्यक्षयं तथा ॥ तदिदं ते मनो दिष्ट्या विवेकैश्वर्य्यतां गतम् ॥ श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनंदन ॥ अनात्म
न्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः ॥ अविद्यातरुसंभूति वीजमेतद्द्विधा स्थितम् ॥ पंचभूतात्मके देहे देही मोहतमो व
वृतः ॥ अहमेतदितीत्युच्चैः कुरुते कुमतिर्म्मतिम् ॥ आकाशवाय्वग्निजलपृथिवीभ्यः पृथक् स्थिते ॥ आत्मन्यात्ममयं
भावं कः करोति कलेवरे ॥ कलेवरोपभोग्यं हि गृहक्षेत्रादिकं च कः ॥ अदेहे ह्यात्मनि प्राज्ञो ममेदमिति मन्यते ॥ इत्थं च पुत्र
पौत्रेषु तद्देहोत्पादितेषु कः ॥ करोति पंडितः स्वाम्यमनात्मनि कलेवरे ॥ सर्वं देहोपभोगाय कुरुते कर्म्म मानवः ॥ देहश्चान्यो
यदा पुंसस्तदा वंधाय तत्परम् ॥ मृन्मयं हि यथा गेहं लिप्यते वै मृदंभसा ॥ पार्थिवोयं तथा देहो मृदंभोलेपनस्थितिः ॥ पंचभूता

धारणमेवं तु हंति दोषं समुद्भवम् ॥ केशिध्वज उवाच ॥ आश्रयश्चेतसो ब्रह्म द्विधा तच्च स्वभावतः ॥ भूप मूर्तममूर्तं
च परं चापरमेव च ॥ त्रिविधा भावना भूप विश्वमेतन्निबोध मे ॥ ब्रह्माख्या कर्मसंज्ञा च तथा चैवोभयात्मिका ॥ ब्रह्म
भावात्मिका ह्येका कर्मभावात्मिकापरा ॥ उभयात्मिका तथैवान्या त्रिविधा भावभावना ॥ सनंदनादयो ब्रह्म
भावभावनया युताः ॥ कर्मभावनया चान्ये देवाद्याः स्थावराश्चराः ॥ हिरण्यगर्भादिषु ब्रह्मकर्मात्मिका द्वि
धा ॥ बोधाधिकारयुक्तेषु विद्यते भावभावना ॥ अक्षीणेषु समस्तेषु विशेषज्ञानकर्मसु ॥ विश्वमेतत्परं चा
न्यद्भेदभिन्नदृशां नृप ॥ प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् ॥ वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितं ॥
तच्च विष्णोः परं रूपमरूपस्याजमक्षरम् ॥ विश्वस्वरूपवैरूप्यलक्षणं परमात्मनः ॥ न तद्योगयुजा शक्यं नृ
प चिंतयितुं यतः ॥ ततः स्थूलं हरेरूपं चिंतयेद्विश्वगोचरम् ॥ हिरण्यगर्भो भगवान्वासवोऽथ प्रजापतिः ॥ मरु
तो वसवो रुद्रा भास्करास्तारका ग्रहाः ॥ गंधर्वयक्षदैत्याद्याः सकला देवयोनयः ॥ मनुष्याः पशवः शैलाः समुद्राः
सरितो द्रुमाः ॥ भूप भूतान्यशेषाणि भूतानां ये च हेतवः ॥ प्रधानादिविशेषांतं चेतनाचेतनात्मकम् ॥ एकपादं द्वि
पादं च बहुपादमपादकम् ॥ मूर्तमेतद्धरे रूपं भावनात्रितयात्मकम् ॥ एतत्सर्वमिदं विश्वं जगदेतच्चराचरम् ॥
परब्रह्मस्वरूपस्य विष्णोः शक्तिसमन्वितम् ॥ विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा ॥ अविद्याकर्म

भिधीयते ॥ एवमत्यंतवैशिष्ट्यात् युक्तधर्मोपलक्षणः ॥ यस्य योगः स वै योगी मुमुक्षुरभिधीयते ॥ योगयुक् प्रथमं
योगी युंजमानोभिधीयते ॥ विनिष्पन्नसमाधिस्तु परं ब्रह्मोपलब्धिमान् ॥ यद्यंतरायदोषेण दुष्यते नास्य समा
नसम् ॥ जन्मांतरैरभ्यसतो मुक्तिः पूर्वस्य जायते ॥ विनिष्पन्नसमाधिस्तु मुक्तिं तत्रैव जन्मनि ॥ प्राप्नोति योगी
योगाग्निदग्धकर्मचयोग्यवित् ॥ ब्रह्मचर्यमहिंसां च सत्यास्तेयापरिग्रहान् ॥ सेवेत योगी निःकामो योग्यतां स्व
मनो नयन् ॥ स्वाध्यायशौचसंतोषतपांसि नियतात्मवान् ॥ कुर्वीत ब्रह्मणि तथा परस्मिन् प्रवणं मनः ॥ एते य
माः सनियमाः पंच पंच प्रकीर्तिताः ॥ विशिष्टफलदाः काम्या निःकामानां विमुक्तिदाः ॥ एकं भद्रासनादीनां
समास्थाय गुणैर्युतः ॥ यमाख्यैर्नियमाख्यैश्च युंजीत नियतो यतिः ॥ प्राणाख्यममिलं वश्यमभ्यासात्कुरुते तु
यत् ॥ प्राणायामः स विज्ञेयः सवीजोवीज एव च ॥ परस्परेणाभिभवं प्राणापानौ यदानिलौ ॥ कुरुतः सद्विधा नेन तृ
तीयः संयमात्तयोः ॥ तस्य चालंबनवतः स्थूलं रूपं द्विजोत्तम ॥ आलंबनमनंतस्य योगिनोभ्यसतः स्मृतम् ॥ श
ब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित् ॥ कुर्याच्चित्तानुसारीणि प्रत्याहारपरायणः ॥ वश्यता परमा तेन जा
यते निश्चलात्मनाम् ॥ इंद्रियाणामवश्यैस्तैर्न योगी योगसाधकः ॥ प्राणायामेन पवनैः प्रत्याहारेण चेंद्रियैः ॥
वशीकृतैस्ततः कुर्यात् स्थितं चेतः शुभाश्रये ॥ खांडिक्य उवाच ॥ कथ्यतां मे महाभाग चेतसो यः शुभाश्रयः ॥ यदा

वि०पु०
१५९

153

योनयः॥ मूर्त्तं भगवतो रूपं सर्वापाश्रयनिःस्पृहम्॥ एषा वै धारणा ज्ञेया यच्चित्तं तत्र धार्य्यते॥ तच्च मूर्त्तं हरे रूपं यादृक्चिं
त्यं नराधिप॥ तच्छ्रूयतामनाधारे धारणा नोपपद्यते॥ प्रसन्नचारुवदनं पद्मपत्रोपमेक्षणम्॥ सुकपोलं सुविस्तीर्णं
ललाटफलकोज्वलम्॥ समं कर्णान्तविन्यस्तचारुकर्णविभूषणम्॥ कंबुग्रीवं सुविस्तीर्णश्रीवत्सांकितवक्षसं
॥ वलीत्रिभंगिना मग्ननाभिना चोदरेण वै॥ प्रलंबाष्टभुजं विष्णुमथवापि चतुर्भुजम्॥ समस्थितोरुजंघं च सुस्थि
तांघ्रिपुगंबुजम्॥ चिंतयेद्ब्रह्मभूतं तं पीतनिर्मलवाससम्॥ किरीटचारुकेयूरकटकादिविभूषितं
॥ शार्ङ्गशंखगदाखड्गचक्राक्षवलयान्वितम्॥ चिंतयेत्तन्मना योगी समाधायात्ममानसम्॥ तावद्यावद्दृ
ढीभूता तत्रैव नृप धारणाम्॥ व्रजतस्तिष्ठतोन्यद्वा स्वेच्छया कर्म कुर्वतः॥ नापयाति यदा चित्तात्सिद्धां मन्येत
तां तदा॥ ततः शंखगदाचक्रशार्ङ्गादिरहितं बुधः॥ चिंतयेद्भगवद्रूपं प्रशांतं साक्षसूत्रकम्॥ सा यदा धारणा त
द्वदवस्थानवती ततः॥ किरीटकेयूरमुखैर्भूषणै रहितं स्मरेत्॥ तदेकावयवं देवं चेतसा हि पुनर्बुधः॥ कुर्या
त्ततोवयविनि प्रणिधानपरो भवेत्॥ तद्रूपप्रत्यया चैका संततिश्चान्यनिस्पृहम्॥ तद्ध्यानं प्रथमैरंगैः षड्भि
र्निष्पाद्यते नृप॥ तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत्॥ मनसा ध्याननिष्पाद्य समाधिः सोभिधीयते॥
विज्ञानं प्रापकं प्राप्ये परे ब्रह्मणि पार्थिव॥ प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः॥ क्षेत्रज्ञः करणी ज्ञानं क

रा०
१५९

संज्ञान्या तृतीया शक्तिरिष्यते॥ यथा क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा॥ संसारतापानखिलानवाप्नोत्यनुसंतता
न्॥ तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता॥ सर्वभूतेषु भूपाल तारतम्येन लक्ष्यते॥ अप्राणवत्सु स्वल्पाल्पा स्थाव
रेषु ततोऽधिकाः॥ सरीसृपेषु तेभ्योऽप्यतिशक्त्या पतत्रिषु॥ पतत्रिभ्यो मृगास्तेभ्यः स्वशक्त्या पशवोऽधिकाः॥ पशुभ्यो
मनुजाश्चातिशक्त्या पुंसः प्रभाविताः॥ तेभ्योऽपि नागगंधर्वयक्षाद्या देवसत्तमाः॥ शक्रः समस्तदेवेभ्यस्ततश्चाति
प्रजापतिः॥ हिरण्यगर्भोऽपि ततः पुंसः शक्त्युपलक्षितः॥ एतान्यशेषरूपाणि तस्य रूपाणि पार्थिव॥ यतस्तच्छक्ति
योगेन युक्तानि नभसा यथा॥ द्वितीयं विष्णुसंज्ञस्य योगिध्येयं महामते॥ अमूर्तं ब्रह्मणो रूपं यत्सदित्युच्यते बुधैः॥
समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः॥ तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत्॥ समस्तशक्तिरूपाणि तत्करोति जने
श्वर॥ देवतिर्यङ्मनुष्यादिचेष्टावन्ति स्वलीलया॥ जगतामुपकाराय न सा कर्मनिमित्तजा॥ चेष्टा तस्याप्रमेयस्य व्यापि
न्यव्याहतात्मिका॥ तद्रूपं विश्वरूपस्य तस्य योगयुजा नृप॥ चिंत्यमात्मविशुद्ध्यर्थं सर्वकिल्बिषनाशनम्॥ यथा
ग्निरुद्धतशिखः कक्षं दहति सानिलः॥ तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषम्॥ तस्मात्समस्तशक्तीना
माधारे तत्र चेतसः॥ कुर्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा॥ शुभाश्रयः स चित्तस्य सर्वगस्य तथात्मनः॥ त्रिभा
वभावनातीतो मुक्तये योगिनां नृप॥ अन्ये तु पुरुषव्याघ्र चेतसो ये व्यपाश्रयाः॥ अशुद्धास्ते समस्तास्तु देवाद्याः कर्म

वि०पु०
१६०

यथावन्मैत्रेय प्रोक्तं शुश्रूषवे मयम् ॥ यदन्यदपि वक्तव्यं तत्पृच्छाद्य वदामि ते ॥ मैत्रेय उवाच ॥ भगवन्कथितं सर्वं यत्पृष्टोसि मया मुने ॥ श्रु
तं चैतन्मया भक्त्या नान्यत्प्रष्टव्यमस्ति मे ॥ विच्छिन्नाः सर्वसंदेहा वैमल्यं मनसः कृतम् ॥ त्वत्प्रसादान्मया ज्ञाता उत्पत्तिस्थितिसंयमाः
॥ ज्ञातश्चतुर्विधो राशिः शक्तिश्च त्रि॥ नाचापि कार्त्स्न्येन त्रिविधा भावभावना ॥ त्वत्प्रसादान्मया ज्ञातं ज्ञेयैरन्यैरलं द्विज ॥ यथैतद
खिलं विष्णोर्जगन्नाप्यतिरिच्यते ॥ कृतार्थोस्म्यपसंदेहस्त्वत्प्रसादान्महामुने ॥ वर्णधर्मादयो धर्मा विदिता यदशेषतः ॥ प्रवृत्तं च नि
वृत्तं च ज्ञातं कर्म मयाखिलम् ॥ प्रसीद विप्रप्रवर नान्यत्प्रष्टव्यमस्ति मे ॥ यदस्य कथनायासैर्योजितोसि मया गुरो ॥ तत्क्षम्यतां
विशेषोस्ति न सतां पुत्रशिष्ययोः ॥ श्रीपराशर उवाच ॥ एतत्ते यन्मयाख्यातं पुराणं वेदसंमितम् ॥ श्रुतेस्मिन्सर्वदोषोत्थः पापप
राशिः प्रणश्यति ॥ सर्गश्च प्रतिसर्गश्च वंशमन्वन्तराणि च ॥ वंशानुचरितं कृत्स्नं मयात्र तव कीर्तितम् ॥ अत्र देवास्तथा दैत्या गं
धर्वोरगराक्षसाः ॥ यक्षा विद्याधराः सिद्धाः कथ्यंतेप्सरसस्तथा ॥ मुनयो भावितात्मानः कथ्यंते तपसान्विताः ॥ चातुर्वर्ण्यं तथा
पुंसां विशिष्टचरितानि च ॥ पुण्याः प्रदेशा मेदिन्याः पुण्या नद्योथ सागराः ॥ पर्वताश्च महापुण्याश्चरितानि च धीमताम् ॥ वर्ण
धर्मादयो धर्मा वेदशास्त्राणि कृत्स्नशः ॥ येषां संश्रवणात्सद्यः सर्वपापैः प्रमुच्यते ॥ उत्पत्तिस्थितिनाशानां हेतुर्यो जगतोव्ययः
॥ स सर्वभूतः सर्वात्मा कथ्यते भगवान्हरिः ॥ अवशेनापि यन्नाम कीर्तितं सर्वपातकैः ॥ पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगै
रिव ॥ यन्नाम कीर्तितं भक्त्या विलायनमनुत्तमम् ॥ मैत्रेयाशेषपापानां धातूनामिव पावकः ॥ कलिकल्मषमत्युग्रं नरकार्ति
प्रदं नृणां ॥ प्रयाति विलयं सद्यः सकृद्यत्रानुसंस्मृते ॥ हिरण्यगर्भदेवेन्द्ररुद्रादित्याश्विवायुभिः ॥ किन्नरैर्वसुभिः साध्यैर्

166

एवं तेन तत्स्यजत् ।। निष्पाद्यं मुक्तिकार्यं वै कृतं कर्म्मोनिवर्त्तते ।। तद्भावभावमापन्नस्ततोसौ परमात्मना ।। भवत्यभेदी भेदश्चास्त
स्याज्ञानकृतो भवेत् ।। विभेदजनके ज्ञाने नाशमात्यंतिकं गते ।। आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यति ।। इत्युक्तस्ते म
या योगः खांडिक्य परिपृच्छतः ।। संक्षेपविस्तराभ्यां च किमन्यत्क्रियतां तव ।। खांडिक्य उवाच ।। कथिते योगसद्भावे सर्वमे
व कृतं मम ।। तवोपदेशेनाशेषो नष्टश्चित्तमलो यतः ।। ममेति यन्मया चोक्तमसदेतन्न चान्यथा ।। नरेंद्र गदितुं शक्यम
पि विज्ञेयवेदिभिः ।। अहं ममेत्यविद्येयं व्यवहारस्तथानया ।। परमार्थस्त्वसंलापो गोचरो वचसां न यः ।। तद्गच्छ श्रेयसे सर्वं ममैतद्भवता कृ
तम् ।। यद्विमुक्तिप्रदो योगः प्रोक्तः केशिध्वजाव्ययः ।। श्रीपराशर उवाच ।। यथार्हं पूजया तेन खांडिक्येन स पूजितः ।। आजगाम
पुरं ब्रह्मंस्ततः केशिध्वजो नृपः ।। खांडिक्योपि सुतं कृत्वा राजानं योगसिद्धये ।। वनं जगाम गोविंदविनिवेशितमानसः
।। तत्रैकांतमतिर्भूत्वा यमादिगुणसंयुतः ।। विष्ण्वाख्ये निर्मले ब्रह्मण्यवाप नृपतिर्लयम् ।। केशिध्वजोपि मुक्त्यर्थं
स्वकर्मक्षपणोन्मुखः ।। बुभुजे विषयान्कर्म चक्रे चानभिसंधितम् ।। स कल्याणोपभोगैश्च क्षीणपापोमलस्ततः ।। अ
वाप सिद्धिमत्यंतां तापक्षयफलां तथा ।। इति श्री विष्णुपुराणे षष्ठेंशे सप्तमोध्यायः ।। श्रीपराशर उवाच ।। इत्येषः कथितः स
म्यक्तृतीयः प्रतिसंचरः ।। आत्यंतिको विमुक्तिर्या लयो ब्रह्मणि शाश्वते ।। सर्गश्च प्रतिसर्गश्च वंशमन्वंतराणि च ।। वंशानु
चरितं चैव भवतो गदितं मया ।। पुराणं वैष्णवं चैतत्सर्वकिल्बिषनाशनम् ।। विशिष्टं सर्वशास्त्रेभ्यः पुरुषार्थोपपादकम् ।। तुभ्यं

वि॰पु॰
१६१

नसमसाहितः॥ दत्वापिंडान्वितम्पित्र्यंयमुनासलिलाप्लुतः॥ यत्प्राप्नोतिनरःपुण्यंतारयन्स्वपितामहान्॥ श्रुत्वाध्यायंतदाप्नोति
पुराणस्यास्यभक्तिमान्॥ नरकसंसारभीरूणांपरित्राणमनुत्तमम्॥ दुःस्वप्ननाशनंनॄणांसर्वदुष्टनिवर्हणम्॥ इदमार्षंपुरा
प्राहऋभवेकमलोद्भवः॥ ऋभुःप्रियव्रतायाहसचभागुरवेब्रवीत्॥ भागुरिस्तंवमित्रायदधीचायसचोक्तवान्॥ सवैसा
रस्वतेप्रासद्भृगुःसारस्वतादपि॥ भृगुणापुरुकुत्सायनर्मदायैसचोक्तवान्॥ नर्मदाधृतराष्ट्रायनागयापूरणाय
च॥ ताभ्यांचनागराजायप्रोक्तंवासुकयेद्विज॥ वासुकिःप्राहवत्सायवत्सश्चाश्वतरायवै॥ कंवलायचतेनोक्तःएल
पत्रायतेनवै॥ पातालंसमनुप्राप्तस्ततोवेदशिरामुनिः॥ प्राप्तवानेतदखिलंसवैप्रमतयेददौ॥ दत्तंप्रमतिनाचैतज्जा
तूकर्णायधीमते॥ जातूकर्णेनचैवोक्तमन्येषांपुण्यशालिनाम्॥ वशिष्ठवरदानेनममाप्येतत्स्मृतिंगतम्॥ म
यापितुभ्यंमैत्रेययथावत्कथितंत्विदम्॥ त्वयाप्येतच्छिनीकायकलेरंतेप्रदास्यसि॥ इत्येतत्परमंगुह्यंकलिकल्म
षनाशनम्॥ यःशृणोतिनरःपापैःसर्वैर्द्विजविमुच्यते॥ पितृयक्षमनुष्येभ्यःसमस्तामरसंस्तुतिः॥ तज्जातेनभवेदत्त
घांशंशृणोतिदिनेदिने॥ कपिलाप्रदानजनितंपुण्यमत्यंतदुर्लभम्॥ श्रुत्वातत्स्याद्दशाध्यायानवाप्नोतिनसंशयः॥ य
स्त्वेमंसकलंशृणोतिपुरुषःकृत्वामनस्यच्युतंसर्वंसर्वमयंसमस्तजगतामाधारमात्माश्रयम्॥ ज्ञानंज्ञेयमनंतमा
दिरहितंसर्वामराणांहितंसप्राप्नोतिनसंशयोऽस्त्यविकलंयद्वाजिमेधेफलम्॥ यत्रादौभगवांश्चराचरगुरुर्मध्ये

राम
१६१

देवादिभिः सुरैः ॥ यक्षरक्षोरगैः सिद्धैर्दैत्यगंधर्वदानवैः ॥ अप्सरोभिस्तथा चान्यैर्नक्षत्रैः सकलैर्ग्रहैः ॥ सप्तर्षिभिस्त
था दिव्यैर्धिष्ण्याधिपतिभिस्तथा ॥ ब्राह्मणाद्यैर्मनुष्यैश्च तथैव पशुभिर्मृगैः ॥ सरीसृपैर्विहंगैश्च प्रेताद्यैः समहीरुहैः ॥
पर्वतैः सागरैः सप्तपातालैः खचरादिभिः ॥ शक्रादिभिश्च सहितं ब्रह्मांडमखिलं द्विज ॥ मेरोः शिखरमुत्पन्नं तस्य देवेन द्विजोत्तम
॥ सर्वदः सर्ववित्सर्वरूपोऽरूपविवर्जितः ॥ भगवान्कीर्त्यते विष्णुरेष पापप्रणाशनः ॥ यदश्वमेधावभृथे स्नातः प्राप्नोति वै
फलम् ॥ सकलं तदवाप्नोति श्रुत्वैतन्मुनिसत्तम ॥ प्रयागे पुष्करे चैव कुरुक्षेत्रे तथार्बुदे ॥ कृतोपवासः प्राप्नोति तदस्य श्र
वणान्नरः ॥ यदग्निहोत्रे सुहुते वर्षेणाप्नोति वै फलम् ॥ महापुण्यमयं विप्र तदस्य श्रवणात्सकृत् ॥ यः श्रेष्ठशुक्लपक्षेषु
शृणोति नियतेंद्रियः ॥ मथुरायां हरिं दृष्ट्वा प्राप्नोति परमां गतिम् ॥ नरः प्राप्नोति फलं सम्यक्तन्माधवस्य कीर्तनात् ॥ उपो
ष्यासौ विप्रर्षे केशवार्पितमानसः ॥ यमुनासलिले स्नातः पुरुषो मुनिसत्तम ॥ ज्येष्ठमूले सिते पक्षे द्वादश्यामुपवासकृ
त् ॥ समभ्यर्च्याच्युतं सम्यङ्मथुरायां समाहितः ॥ अश्वमेधस्य यज्ञस्य प्राप्नोत्यविकलं फलं ॥ आलोक्यर्द्धिमथान्येषामु
न्नीनानात्मवंशजैः ॥ एतत्किलोचुरन्येषां पितरः सपितामहाः ॥ कश्चित्कस्मत्कुले जातः कालिंद्यां सलिले शुभे ॥ अर्च्चयिष्य
ति गोविंदं मथुरायामुपोषितः ॥ ज्येष्ठमूले सिते पक्षे येनैवं वयमप्युत ॥ परामृद्धिमवाप्स्यामस्तारिताः स्वकुलोद्भवैः ॥
ज्येष्ठमूले सितपक्षे समभ्यर्च्य जनार्दनम् ॥ धन्यानां पिंडनिर्वापं यमुनायां प्रदास्यति ॥ तस्मिन्काले समभ्यर्च्य तत्र कृ

ज्ये

विष्णु० १६२

परमात्ममयं सनातनस्य। प्रदिशतु भगवानशेषपुंसां हरिरपजन्मजरादिकां स सिद्धिम्॥ इति श्रीविष्णुपुराणे षष्ठेंऽशे अष्ट
मोऽध्यायः समाप्तोयं ग्रंथः॥ अंशैः षड्भिः समाप्तोयमादौ सर्गो मिर्वापर। भूगोलकं सूर्यादि दिग्ध्रुववर्णनं। भरतचरितं मन्वंत
राणि। वेदव्यासचरितं। गृहस्थादिधर्मः। पितृगीता। श्राद्धकल्पः। मायामोहाख्यानं। शतधन्वोपाख्यानं। सौभरिचरितं।
इक्ष्वाकुवंशानुचरितं। काश्यपवंशानुकीर्त्तनं। भूभारावतरणं। पूतनावधः। शकटपरिवर्त्तनं। जमलार्जुनभंगः। कालीयद
मनं। धेनुकवधः। प्रलंबवधः। गिरियज्ञं। गोवर्द्धनोद्धरणं। उपेन्द्राभिषेकः। रासक्रीडा। अरिष्टवधः। अक्रूरागमनं। केशि
वधः। चाणूरवधः। मौष्टिकवधः। कंसवधः। सांदीपनिपुत्रप्रदानं। जरासंधवधः। कालयवनवधः। यमुनाकर्षणं। रु
क्मिवधः। नरकवधः। पारिजातहरणं। बाणयुद्धं। वाराणसीदाहः। शांबविमोचनं। द्विविदवधः। कलिवर्णनं। केशिध्वज
खांडिक्यसंवादश्चेति। पुराणं वैष्णवं श्रुत्वा श्रेष्ठाद्वाचं द्विजसत्तम। ब्राह्मणान्पूजयेत्पश्चाद्वस्त्रहेमादिवस्तुभिः। गां च दद्यात्प्र
यत्नेन स्वप्रजानं च तत्प्रये। पाठकाः पूजिता येन विष्णुर्भवति पूजितः। तस्मात्सर्वप्रयत्नेन पूजनीयाश्च पाठकाः। नरो
ऽश्वमेधावभृथात्फलं प्राप्नोति नरः। तत्फलं लभते नूनं पुराणश्रवणाद्बुधः। उभयतश्च पुनात्येव पुरुषानेकविंशतिः।
श्रुतं येन सदा भक्त्या पुराणं वैष्णवं द्विज। ब्रह्महा भ्रूणहा गोघ्नः सुरापो गुरुतल्पगः। परदाराभिहर्त्ता च अयाज्यायाजकः परर्वनि
न्दकः। सकृत्पुराणश्रवणात्पूतो भवति नान्यथा॥ इति श्रीविष्णुपुराणे श्रीपराशरमैत्रेयसंवादे पुराणं समाप्तक
स्य समाप्तम्॥ श्रीरामकृष्णाभ्यां नमः। श्रीरामकृष्णाभ्यां नमः। श्रीरामकृष्णाभ्यां नमः। श्रीरामकृष्णाभ्यां नमः। श्रीहरिः

राम १६२

तपांतेचसः॥ ब्रह्मज्ञानमयोच्युतोखिलजगन्मध्यांतसर्गप्रभुः॥ तच्छ एवमुरुषः पवित्रपरमंभक्त्यापठन्वाचयन्नात्रो
त्पत्तिनतस्समस्तभुवनेष्वेकांतसिद्धिर्हरिः॥ यस्मिन्न्यस्तमतिर्नयातिनरकं स्वर्गोपियच्चिंतने॥ विघ्नोयत्रनिवेशितेचम
नसिब्राह्मोपिलोकोल्पकः॥ भुक्तिंचेतसियःस्थितोमलधियंपुंसांददात्यव्ययः॥ किंचित्रंयदघंप्रयातिविल
यंतत्राच्युते॥ यज्ञैर्यज्ञविदोयजंतिसततंयज्ञेश्वरंकर्मिणो॥ यंब्रह्मपरमंपरापरपरंध्यायंतिविज्ञानिनः॥ यंप्राप्यनैव
जायंतेनम्रियतेनोवर्द्धतेहीयतेनैवासन्नचसद्भवत्यपिततः किंवाहरेः श्रूयताम्॥ कव्यंयःपितृरूपधृग्विधिहुतंहव
चभुंक्तेविभुर्देवत्वेभगवाननादिनिधनः स्वाहास्वधासंज्ञितः॥ यस्मिन्ब्रह्मणिसर्वशक्तिनिलयेमानानिनोमानि
नांनिष्ठायैप्रभवंतिहंतिकलुषंश्रोत्रंसयातोहरिः॥ नांतोस्तियस्यनचयस्यसमुद्भवोस्तिवृद्धिर्नयस्यपरिणा
मविवर्जितस्य॥ नापक्षयंचसमुपैत्यविकल्पवस्तुयस्तंनतोस्मिपुरुषोत्तममीशमीड्यं॥ तस्यैवयो — — गुण
भुग्बृहदेकआद्यःपुंडोप्यशुद्धबहुमूर्तिविभागभेदैः॥ ज्ञानान्वितस्सकलतत्वविभूतिकर्त्तातस्मैनतोस्मिपुरुषायस
दाव्ययाय॥ ज्ञानप्रवृत्तिनियमैकमयायपुंसोभोगप्रदानपटवेत्रिगुणात्मकाय॥ अव्याकृतायभवभावनका
रणायवंदेस्वरूपभवायसदाजराय॥ व्योमानिलाग्निजलभूरचनामयायशब्दादिभोग्यविषयोपनयक्षमा
य॥ पुंसःसमस्तकरणैरुपकारकायव्यक्तायसूक्ष्मविमलायसदानतोस्मि॥ इतिविविधमजस्ययस्यरूपंप्रकृति